1195 Rága-málá.
1196 Vádya-khaṇḍa.
1307 Saṅgíta-ratnávalí.
847 Pancha-kalpa.
1110 Saṅgíta-ratnákara.
1112 Nṛitya-ratnávalí.
1131 Táládhyáya.
1128 Saṅgíta-kalpataru.
1129 Saṅgíta-párijáta.
1139 Saṅkírṇarága-lakshaṇa.
1141 Rasaratnávalí.

S'ILPA.

1472 Pratímá-pramáṇa.

S'ÁṄKHYA.

802 Sáṅkhyatattva-kaumudí.
920 Sánkhya-káriká, Sáṅkhya-chandrikákhya-ṭíká-sahita.
943 Sáṅkhya-sútra. Vritti-sahita.
908 Tattva-yáthártha-dípana

NYA'YA.

669 Nyáya-sútra-vyakhyá.
671 Anumáṇa-didhiti-ṭippaní.
673 Kusumánjali-ṭíká.
681 Sidhánta-muktávalí-gudártha-prakaśiká.

688 Vidhiváda-ṭíká.
689 Bhásá-ratna.
695 Siddhánta-lakshaṇa-rahasya.
696 Vyáptyánugama.
697 Kevalánvayi-rahasya.
698 Anumáṇa-didhiti.
699 S'abda-parichchheda-rahasya.
700 S'akti-váda.
703 Ákhyáta-vichára.
704 Anumáṇa-khaṇḍa-ṭíká.
705 S'abda-śakti-prakáśiká-bodhiní.
706 Chintámaṇí-prakáśa.
707 Ditto.
712 Pratyaksha-kshaṇḍáloka-darpaṇa.
713 Ditto, Maṇididhiti-vyákhyá-vivechaṇa.
714 Pratyaksha-maṇyáloka.
722 Tarka-paribháshá.
733 Pravartaka-jṇána-vichára.
781 Anvaya-bodhiní-ṭíká.
783 Nyáyavártika-tátparya-ṭíká.
785 Anumáṇa-chintámaṇi-ṭíká.
786 Líláratí-prakáśa-rahasya.
787 Líláratí-dídhiti-rahasya.
788 Líláratí-rahasya.
789 S'abdaprámáṇya-chintámaṇi-rahasya.
791 Pratyakshya-chintámaṇi-didhiti.
794 Kusumanjali-prakáśa.
795 Pratyaksha-maṇi-phakkiká-mangala-váda.
812 Ditto. Chintámaṇyáloka, púrvárddha.
813 Anumityádi-bádhánta-didhiti.
817 S'akti-vichára.
821 Nyáya-sára.
825 Ákánkshálokа-máthurí-ṭíka
827 Satpratipaksha-máthurí-ṭíká.
837 Nyáya-makaranda-saṭíka.
838 Tarka-saṅgraha.
840 Nyáya-dípávali.
852 Vishayatá-váda.
855 Aparokshánubhuti, Dípikákhya-ṭíka-sahita.
860 Nañváda-ṭippaní.
861 Samása-váda.
862 S'ábdabodha-prakṛiyá.
918 Nyáya-siddhánta-muktávali-dípiká.
925 Nyáya-siddhánta-muktávali-prakáśa.
927 Viśishṭa-vaiśishṭa.
928 Pratijṇá-sútra-pariśishṭa.
984 Kusumaṇjali-vyákhyá.
1002 Dídhiti-bhávártha.
1003 Nyáya-bodhiní.
1045 Líláratí-prakáśa.
1082 Líláratí-śiromaṇi.
1086 Mímáñsá-nyáya-prakáśa
1093 Nyáya-siddhánta-bhaṇjana.
1137 Anubhútí-prakáśa.
1178 Nyáya-bodhiní.
1218 Nyáya-sudhá, 3rd 2 páda.
1217 Ditto, 3rd 3 ditto.
1220 Ditto. 2nd 3 ditto.
1219 Ditto, 2nd 4 ditto.
1231 Pratyakshálokа-sáramaṇjarí.
1237 Nyáyasiddhánta-maṇjarí-dípiká.
1268 Líláratí-didhiti.
1276 Dídhiti-bhavánandí.
1296 Tarka-pratibandhakatá-rahasya.
1387 Tárkika-rakshá.
1105 Anubhúti-prakáśa
867 Pramáṇa-málá.
1017 Nyáyasiddhánta-maṇjarí.

1087 Mitabháshí *alias* Sapta-pádar-thi-ṭíká.
1174 Padártha-dípiká.
1344 Pratyak-tattva-chíntámaṇi, saṭíka.
1175 Pratyaksha-pragalbhí.
1231 S'abda-parichchheda.
1235 Sarvopakáriṇí *alias* Bhavánandi-ṭiká.
1336 Pramáṇa-paddhati.
1341 Ditto, ṭiká.
1346 Bhávaprakásíká *alias* Máyáváda-khaṇḍana-ṭíká.
904 Tantráloka.
957 Vaidika-liñartha-vivechana.
959 Mimáñsá-nyáya-prakáśa.
960 Ditto, sútra-paddhati, 8th Adhyáya.
961 Ditto, kusumanjalí.
963 Ditto.
1090 Ditto. śloka-várttika.
1157 Tantra-ratna.
851 Vákya-dípiká, saṭíka.
1430 Nyáya-siddhánta-tattvaviveka.
1434 Nyáya-kaustubha.
1439 Pratyaksha-khaṇḍa-kaṇṭakoddhára.
1572 A'loka-kaṇṭakoddhára.
1570 Guṇa-prakáśa-vivriti.
1445 Lílávatí-bháva-prakáśa.
1444 Anumánáloka-ṭíká.
1492 Khaṇḍanoddhára.
1571 Kíraṇávalí-prakáśa.
1590 Tárka-tattva-nirúpaṇa.
1594 Tárkika-rakshá.
1439 Pratyaksha-khaṇḍa-kaṇṭa-koddhára.
1443 Pratyaksháloka-darpaṇa.
1566 Pratyaksháloka.
1552 Nyáya-sára-padapanchiká.
1430 Nyáya-siddhánta-tattva-viveka.
1434 Nyáya-kaustubha.
1497 Nyáya-várttika-tatparyya-ṭíká.
1446 S'abda-parichchhedáloka.

VAIS'ESHIKA.

824 Vaiśeshika-sútropaskára.
839 Siddhánta-chandrodaya.
1356 Sapta-padarthí.

MÍMA'NSA'.

1290 Mayúkhamáliká *alias* Bhaṭṭa-chintámaṇí-vyákhyá.
1359 Adhyayana-vidhi-vyákhyá.
735 Nyáya-ratnamála.
747 Tantra-ratna-ṭíká.
752 Bháṭṭa-dipiká.
753 Mímáñsá-siddhánta-lesa-saṅgraha.
758 Mímáñsá-vártika.
763 S'ástrasiddhánta-saṅgraha.
803 Adhikaraṇa-kaumudí.
869 Mímáñsártha-saṅgraha-kaumudí.
874 Chandráloka, Chandráloka-prakáśa-sahita.
883 Sphoṭa-chaṭaka.
939 Tantra-várttika-ṭíká.
1147 Mímáñsá-tantra-dípiká.
1214 Mámañsá-várttikábharaṇa.
1215 Tantra-várttika-ṭíká.
1236 Tantra-ratna.
1241 Mímáñsá-nyáya-dípiká.
1255 Mímáñsá-bháshya-várttika, 1 3-páda.
1256 Ditto, 2-1-ditto.
1257 Ditto, tantra-várttika.
1289 Bháṭṭa-chintámaṇi.
1291 Mímáñsá-kaustubha.
1292 Bháṭṭa-dípiká.

1326 Mímáṅsá-nyáya-prakáśa
1408 Siddhánta-dípa.
1416 S'ástra-dípiká-ṭíká.
1115 S'avara-bháshya-padayojaná.
1140 Várttika-káśiká.
1146 Sáṅkarshaṇa-mímáṅsá.
1221 Ajitá *alias* Tantra-ṭíká-vyákhyá.
1275 Vidhi-rasáyana.

VEDA'NTA.

1418 Brahmasútríya-śaiva-bháshya.
1287 Brahma-sútra-vallabhí-bháshya.
1312 Brahma-sútra-anubháshya.
1313 Anu-bháshya-prakáśa.
1320 Brahma-sútra-bháshya. Saunaka-sampradáyi.
1285 S'ástra-dípiká, from 3 to 12 A.
1390 S'ástra-dípiká, 2nd Adhya.
958 S'ástra-dípiká.
1328 Sáṇḍilya-sútra-pravachana.
905 Páshaṇḍa-chapeṭiká.
954 S'áriraka-mimáṅsa-bháshya-vivaraṇa.
1188 S'ástra-dípiká-ṭíká.
427 Táratamya-stava-vyákhyá.
628 Daśaśloka-ṭíká *alias* Siddhánta-vindu.
653 Gítá-tátparya-bodhiní.
655 Adhyátma-bhágavata.
692 Siddhánta-vindu.
674 Ashṭávakra-saṅhitá.
715 Bheda-dhikriti.
729 Shaṭśloki-vártíka.
741 Advaita-siddhyupanyása.
759 Advaita-chandriká.
779 Gítá-táparya-bodhiní.
782 Bhagavad-gítá-bháshya.
780 Adhyátma-sára.
836 Vedánta-sanjṇá-prakriyá.
849 Hariyasí-gítá *alias* Bhagavad-gítá-ṭíká.
850 Pánchálí-gítá-ṭíká.
856 Vedánta-tattva-traya-nirúpaṇa.
859 Vedánta-ratna-traya-parikshá.
834 Anubandha-darsana.
885 Áryá-vyákhyá *alias* Vedánta-traya-saṭíka.
909 Advaita-brahmavidyá-paddhatí.
1001 Vivaraṇa-tattvadípa.
1069 Gítá-tátparya-nirṇaya.
1088 Vedánta-sára, Rámánuja.
1094 Panchakosha-viveka.
1095 Svarúpa-prakáśa.
1099 Panchíkaraṇa-várttíka.
1022 Rasika-ranjiní-gítá-ṭíká, 1st khaṇḍa.
1123 Ditto, 2nd khaṇḍa.
1124 Ditto, 3rd khaṇḍa.
1125 Gítá-bháshya, Rámánujíya.
1148 Súreśvara-várttika-víjákhyána.
1156 Vedánta-kalpalatá.
1185 Advaitánusandhána.
1190 Amrita-taraṅgini-gítá-ṭíká.
1191 Tattvadípiká-gítá-ṭíká.
1225 Prapancha-sára-viveka.
1232 Paramahaṅsáchára-paddhati.
1278 Panchíkaraṇa-tátparya-chandriká.
1280 Panchapadíka-vívaraṇa.
1288 Panchíkaraṇa-bhávaprakáśiká
1383 Gítártha-vivaraṇa.
736 Síddhánta-leśa-guḍhártha-prakáśa.
744 Síddhánta-dípa.
854 Dvádaśa-mahávákya.
911 Tattva-pradípiká.
915 Panchapádiká.

964 Panchapádiká-vivarana.
947 Upadeśa-ratnamálá.
974 Yatíndra-mata-dípiká.
1071 Prameya-ratnávalí, saṭíka.
1084 Tattva-bodha.
1145 Vishṇutattva-nirṇaya-ṭíká.
1184 Naishkarmya-sindhu.
1209 S'ástra-prakáśiká.
1243 Prameya-sañgraha.
1324 Prameya-ratnárṇava.
1332 Nibandha-ṭíká.
1338 Madhyasiddhánta-sára.
1339 Tattvodyota-ṭíká.
678 Tattva-prakáśiká.
1431 Vedánta-dípa.
1431 Vedánta-kalpataru-parimala.
1429 A'tma-váda.
1595 Aláṭ-prakaraṇa-bháshya.
1569 Gítá-pradípa.

YOGA.

941 Pátanjala-bháshya-vártika.
924 Yoga-vásishṭa, Vásishṭa-tátparya-prakáśikákhya-ṭíká-sahita.
990 Yoga-maṇiprabhá.
1159 Yoga-chintámaṇi.
1279 Yoga-yátrá.
1400 Yoga-ratna-málá.
1061 Samádhi-dípiká.

BHAKTI.

654 Bhakti-rasáyaṇa.
681 Ujjala-nílamaṇi-kiraṇaleśa.
798 Krishṇa-stava-málá.
806 Bhakhti-ratnávalí.
1074 Bhagavannáma-máhátmya-nírṇaya.
1102 Bhagavadbhakti-chandriká.
1104 Bhakti-rasáyaṇa.
1113 Vaishṇava-siddhánta-vaijayanti.
1158 Bhakti-rañginí.
1311 Bhakti-siddhánta.
1381 Bhakti-hañśa.
1384 Bhakti-varddhiní.
1385 Bhakti-márgíya-śañkánirása.
679 Shaṭśandarbha.
725 Krama-dípiká.
1206 Vishṇutattva-prakáśa.
1319 Prema-pattana.
1378 Bhakti-siddhánta-rahasya-nibandha.
1379 Tattvadípa-prakáśávaraṇa-bhañga.
1380 Jalabheda, saṭíka.
1382 Sanyása-nirṇaya-vivaraṇa.
1584 Brihad-Bhágavatámṛita, saṭika.
1606 Bhakti-siddhánta-rahasya.
1612 Bhakti-rasámṛita-sindhu.
1599 Govinda-lílámṛita.
1582 Náma-máhátmya.
1581 Rasamañjari-stava and Rádhá-saundaryya-manjarí.
1560 Vaishṇava-toshaṇí.
1314 Sampradáya-pradípa.

TANTRA.

675 Gautama-tantra.
672 Tantra-sára.
790 Tárá-vilásodaya.
797 S'yámá-kalpa-latiká.
804 Bhúta-ḍámara-tantra.
811 Syámá-rahasya.
815 Tárábhakti-tarañginí.
907 A'gama-tattva-sañgraha.
1369 Vírabhadra-tantra.
720 A'gama-kaumudí.
1100 Maṇḍapa-druma.
1360 Jyotishmatí-kalpa.
676 Urddhvámnáya-sañhitá.
979 Dípa-prakáśa.

981 S'abdaprakáśa *alias* Dípaprakáśa-ṭíká.
1611 Ágama-tattva-vilása.
1457 Sáma-tantra-bháshya.

VAIDYAKA.

828 S'álahotra.
982 Pathyápathya-viveka.
1089 Chikitsá-sára.
1423 Aśvavaidya-śástra.
1424 Aśva-vaidya.
1425 Aśva-chikitsita.
1426 Ditto.
1117 Rasa-ratnákara.
1100 Arka-prakáśa.
1520 Bhaishajya-ratnávalí.
1508 Dravya-sañgrahábhidhána-ṭíká.
1585 Rasa-gañgádhara.
1609 Ratna-málá.

JAINA.

1539 Nitisára.
1515 Rája-várttika.
1528 Vimalanátha-puráṇa.
1474 Upáśakádhyána.
1498 Uttara-puráṇa.
1533 Upáśakádhyáya-ṭíká.
1512 Trailokya--sára-ṭíká.
1419 Padma-puráṇa.
1503 Pravachana-sára-ṭíká.
1509 Páṇḍava-puráṇa.
1510 Padma-puráṇa, brihat.
1518 Padmávati-charita.
1521 Prasastáprasasti *alias* Mritáchára.
1522 Prasatáprasasti *alias* Trailoka-prajṇapti.
1523 Padmánandi-pachanaví.
1527 Pareshanátha-charita.
1562 Purushárlhánusáśana.
1473 Pratiñkara-mahámuṇi-charita.
1299 Prasnottara-málá.
1300 Páṇḍava-puráṇa.
1302 Laghu-kshetra-samása-vivaraṇa.
956 Bhagavatí-vṛitti.
1487 Áradhana-kathá-kosha.
1489 Ádi-puráṇa.
1507 Ajítanátha-puráṇa.
1525 Ápta-mímáñsa.
Aptamímáñsa-lañkrita.
1550 Alañkára-ratnákara.
1524 Bhávya-kumuda-chandríká.
1542 Brahma-vilása.
1475 Chakradhara-puráṇa.
1484 Chandra-prabhá-charita.
1516 Charitra-sára.
1538 Devágamana-vṛitti.
1147 Gomatta-sára-vṛitti.
1511 Muni-suvrata-puráṇa.
1567 Moksha-pravṛitti-ṭíká.
1535 Mallinátha-puráṇa.
1530 Kahapanasára.
1545 Plates of Jaina figures, 18 sorts.
1544 Drawings of Jaina-tirthañkaras, 24.
1541 Jaina-pújá-vidhi.
1536 Jṇána-súryodaya-náṭaka.
1531 Jaina-sañhitá.
1529 Jṇánárnava.
1488 Jaina-pratíshṭhá-samagri.
1477 Jina-pújá.
1476 Jaina-Yájṇavalka-prathisthá-páṭha.
1471 Jaina-viváha-paddhati.
1461 Jayakumára-charita.
1448 Jaina-pújá-vidhi.
1514 Brihat Harivañsa.
1459 Sapata-śataka-bhávollása-prakáśa.
1462 Sumeda-śikhara-māhátmya.

1466 Sára-chauïsí.
1468 Srávakáchára.
1469 Svarṇáchala-máhátmya.
1478 Sántinátha-puráṇa.
1480 Subháshita-ratna-sandoha.
1489 Sukha-nidhána.
1490 Siddha-chakráshṭa-pújá-ṭíká.
1494 Sridhara-vásishṭa-ṭíká.
1583 S'ástra-prakáśa.
1592 S'aṅkara-siddhi-dípiká.
1470 Múláchára-pradípaká.
1483 Mahápála-charita.
1491 Mahápuráṇa-ṭippaní.
1593 Míta-bháshiṇí.
1481 Niyama-sára.
1605 Nirodha-lakshaṇa, saṭika.
1440 Prapannámrita.
1455 Pancha-stava.

BAUDDHA.

1294 Bauddha-mata-yantra-vidhi.
1270 Vítarága-stotra.
1427 Malinda-panná.

ANIRDISHṬA.

880 Laukika-nyáya-saṅgraha.
1208 Adhikára-ṣaṅgraha.
1318 Sarva-siddhánta.
1323 Nava-ratna.
1377 Válabodha-prakáśa.
1558 Bhujja-bhárati.
1176 Praśasti-prakásiká.
1329 Praśasti-patriká.

Facsimile of the last Page of a MS. dated Śaka 1509.

T. Black & Co., Cal.

তি ॥ বহুবিধবিবাদতিমিরগ্রস্তগ্রহণং বদেৎ শশাঙ্কস্য । তদ্ধর্ম্মবত্নীপাদোদ্যৎসন্দীপ্তদোষত ॥ ০ ॥ ইতি পণ্ডিতশ্রীযতীন্দ্রতবাহনজলধিধর্ম্মরত্নে গ্রহণনিরূপণম্ ॥ ওঁ০০০ ॥ ॥
সমাপ্তশ্চায়ং হরবত্নধর্ম্মবত্নমিতি ॥ ওঁ ॥ যথাদৃষ্টং তথাদি ॥ ০ ॥ ওঁ নমো নারায়ণায় ॥ ০ ॥ শ্রীমচ্ছ্রীনিবাসশর্ম্মণা লিখিতমিদমিতি সমাপ্তিদর্পণম্ ॥

৫ শুভমস্তু শকাব্দা ১৪ ১৭ আষাঢ়স্য চতুর্থে দিবসে বাধৌ বৃষলগ্নস্য প্রথমাংশে ...
গৌড়েন্দ্র বর্ম্মণো যশ্রী বটকিসিংহস্য শুভম্ ...

Facsimile of the last Page of a MS. dated Śaka 1417.

T. Black & Co., Cal.

Facsimile of the last Page of a MS. of the Mítákshavá, dated L. S. 399=A. D. 1506.

T. Black & Co., Cal.

যাধনলোভাদর্থসঞ্চয়পরাণাং অপবিশোষিতদেবার্ষিপিত্রনাং নিত্যনৈমিত্তিককর্ম্মানুষ্ঠানরহিতানাং অনাচারস্য কৃতনত্রসজ্জানাং পরাধীনজীবিতানাং মূর্খাণা
ঞ্চ এতদাত্যাগবিহীনানাং পরপূর্ব্বাভার্য্যাপ্রধানগৃহাশৌচজীবিকানাং যা বজ্জীবাশৌচং। কার্য্যেষ্বনবকাশিকনত্রসপ্তাহঞ্চ সর্ব্বত্রানাধিকারবশ্বেতি।
॥ ইতি পিপানকাবিতাযাং শূদ্রপদ্ধতৌ শূদ্রাশৌচপ্রকরণং সম্পূর্ণং॥ ॥ সং ১৪৪২। শাকে যমসরোজসন্তবমুখাম্ভোবাশিচন্দ্রান্বিতে পৌষেমাসি দি
নেশনেববিত্তিথৌশ্রুক্লেতবেযত্নতঃ। গৌড়ে শ্রীগোবিন্দস্যবন্দ্যমুদ্ধৃতশ্রীনীলকণ্ঠাত্মজো নেখীঃ পানহতাং স্মৃতিং নবহরিঃ শূদ্রক্রিয়াদীপিকাং। শুভমস্তু॥

Facsimile of the last Page of a MS. of the Sudrapaddhati, dated Samvat 1442=A. D. 1385

T. Black & Co., Cal.

ণ্ণবসমবস্সন্তো ॥ কাউঁণ স্মস্সঁস্সৰকউঁজৰদ্ধবণবীসজ্জিএণ কজস্সণপ্পবত্তা জনহৰন্তপন্তবও সগাহিগ্রন্থেবণেকওমাপ্পনিণা ॥ ঘেন্তূণজণস্সতাস্সকণ্ঠণনাউস্বিদ্ধস্সবহবি
স্সদ্ধ । পত্তোপ্পৰিবিবদ্ধবণকাতন্তৰস্সোসপ্ফ নীস্সবৰাস্স ॥ এত্থেসমপ্পডাএপ্পসীস্সা নম্তেণজানস্সবামণ্ডপ্পস্স । ৰাবণব হন্তিক বস্সনৰাম্মকিত্তিমণ্ডেজুণ নক্কেসি ॥
শ্রী ৮৬ ডাস্সমহাব স্সপবৰসণ্ডবিৰুগএদহস্সহবন্থ পন্তুৰণোস্সাসাসওসমন্তো ॥ বাণাবিনী সকগণাস্সকগাকগন্দনকানিদাসস্সকস্স দহস্সহকস্সমির্মমগাকগ
ণোবিনিহিস্সাৰভাগন্তুং ॥ সিৰিনক্কণস্সস্সমন্দেমঙ্গবহৰেবাহ্নবেবিহ্ এ । পোস মিস্সৰাণন্দসিস্সপক্কেচন্দহীদিল্লফ্ ॥ দোযবিস্সাসামেনিখিতসীবাণাণাথে
নেতি । ৰেজতবানুডসিশীতমযুষবি । স্সঁসথাএসিহতিস্সতিস্মৃতিবিস্সনিক্কি । দানিযবীজ নিডবনেচস্ত্রৈংসামিদ্ধিনাৰীযখেন্দ্ধমিনিতিমনিদ্ধণ্ডনেব ॥ ওতমস্তু শ্রীবস্তানেথকানামিতি ॥

Facsimile of the last Page of a MS. of the Setubandha, 672 years old.

T. Black & Co., Cal.

NOTICES OF SANSKRIT MSS.

No. 1723. सत्योपाख्यानं ।

Substance, country-made paper, 15 × 6 inches. Folia, 120. Lines, 7 on a page. Extent, 2,551 s'lokas. Character, Nágara. Date, ? Place of deposit, Nashípura, Zilá Murshidábád. Bábu Jagannáthaprasáda Gupta. Appearance, old. Verse. Incorrect.

Satyopákhyána.—The history of Ráma illustrated with a variety of anecdotes and stories not to be met with in the Rámáyaṇa. It professes to have been originally imparted by Válmíkí to Márkaṇḍeya, who related it to Vyása, and Vyása to Súta, who recounts it to the Ṛishis assembled at the Naimiha forest. This account shows that the work is a part of some Puráṇa or other; but which Puráṇa it is cannot be identified. The codex under notice contains chapters 1 to 49 of the work. A second volume, purchased for the Government of India, (*ante* II, No. 714, p. 129), contains chapters 50 to 79; but as that stops with the arrival of Ráma at the capital of Guhaka, it is probable there are at least a hundred ch· pters yet to be found out to complete the work.

Beginning. श्रीमते भगवते निम्बार्काय नमः ।

दशरथसुतरामं योग+याज्ञिपद्मजशिवसनकाद्यैः पूज्यमानं सदैव ।
हृदि हृदि कृतवासं रामनामाख्यदेवं तमहमखिलसेव्यं सर्व+ +र्नतोऽस्मि ॥
सूतं सर्व्वपुराणज्ञं सर्व्वशास्त्रार्थकोविदं ।
नमस्कृत्याब्रुवन् सर्व्वे ऋषयः शौनकादयः ॥
ऋषय ऊचुः । सूत सूत महाबुद्धे सर्व्वशास्त्रविशारद ।
श्रीरामस्य कथां दिव्यां कथयस्व प्रसादतः ॥
सूत उवाच । विप्रवर्य्याः शृणुध्वं हि श्रीरामस्य कथां शुभां ।
व्यासेन कथितां पूर्व्वं तामहं कथयामि वः ॥

चित्रकूटं महापुण्यं पर्व्वतानां हि सुन्दरं।
वाल्मीकिस्तु महातेजा न्यवसद्धर्म्मतत्परः ॥
दर्शनार्थं मुनेस्तस्य मार्कण्डेयो महामुनिः।
आजगाम चिरायुर्हि चित्रकूटालयं मुनिं ॥

End. किं मया बहुधा वाच्यं सर्व्वपुण्यफलन्त्विदं।
व्यासप्रसादाज्जानामि श्रीरामकृपया तथा ॥
इतः परं महारम्यं विवाहचरितं शुभं।
वर्णयामि महापुण्यं श्रोतॄणामघमोचनं ॥

Colophon. इति श्रीसत्योपाख्याने सूतशौनकसंवादे एकोनपञ्चाशत्तमोऽध्यायः।
समाप्तञ्चेदं पूर्व्वार्द्धं।

विषयः। १–१० अध्याये,—सूतेन सह शौनकादीनां संवादकथनं। वाल्मीकिसन्दर्शनार्थं मार्कण्डेयस्य चित्रकूटगमनविवरणं। तत्पुरतो वाल्मीकिना रामचरित्रवर्णनं। रामस्य बाललीलावर्णनव्याजेन सपुत्राभिः कौशल्यादिभिः अन्तःपुरागतस्य वसिष्ठस्य सपर्य्याविधानादिकथनं। श्रीरामलक्ष्मणादीनां विष्णुशेषादिरूपेण कौशल्यादिभिः स्वप्नदर्शनवृत्तान्तकीर्त्तनञ्च। एकदा कौशल्याधात्रिकायाः कैकेयीमन्दिरगतस्य दशरथस्य समीपे रामानयनवृत्तान्तकीर्त्तनं। कैकेय्या रामाभिनन्दनादिप्रकारकथनञ्च। मन्थरया सह कैकेय्याः संवादकथनं। तत्र विस्तरेण कैकेय्या विवाहवृत्तान्तकथनं। दशरथस्य सत्यपि अन्तःपुरवर्गे तस्यां नितरामनुरागकारणकथनञ्च। नारदेन सह दशरथस्य संवादकथनं।

११–२१ अध्याये,—योगिन्या सह केकयराजमहिष्याः संवादकथनं। गर्गेण सह दशरथस्य संवादकीर्त्तनं। तत्र अजातपुत्रेण दशरथेन कैकेय्याश्चेत् पुत्रो भविष्यति तस्मै राज्यं दास्यामीति प्रतिज्ञाकरणवृत्तान्तकथनं। शत्रुघ्नादिभिः कन्दुकेन ताड़ितायाः मन्थराया अभियोगार्थं दशरथसमीपगमने रहस्यवर्णनादिकं। लोमशोक्तमन्थराचरितकीर्त्तनं। तस्याः पूर्व्वजन्मनि विरोचनाभिधानस्य दैत्यराजस्य कन्यात्वकथनादिकं। तया विप्रकृतानां क्रतुभुजां दुरवस्थादिवर्णनञ्च। पराशरस्य वाल्मीकितो रामचरितप्राठकथनं। दशरथाङ्कस्थितस्य रामस्य विस्तरतो रूपवर्णनं। तीर्थदर्शनार्थं सर्व्वेषां देवानां भारतभूमावागमनवृत्तान्तकीर्त्तनं। तत्र पौलोम्याः पुरतः पुरन्दरेण तद्वृत्तान्तकथनञ्च।

१२–२७ अध्याये,—सावित्र्याः पुरतो विधातुरयोध्यादिमाहात्म्यकथनं। तत्र तत्र वृत्तान्तकथनञ्च। विशेषेण अयोध्यायाः शोभादिवर्णनं। श्रीरामसन्दर्शनार्थं ब्रह्मादीनां दशरथपुरप्रवेशवृत्तान्तकीर्त्तनं। रामस्य विचित्रबाल्यक्रीड़ादिवर्णनं। रामहस्तात्

शष्कुलीमाकर्षयतो भूसुण्डनामकस्य काकस्य वृत्तान्तकीर्त्तनं। भूसुण्डकृतरामस्तोत्र-कीर्त्तनं। दशरथस्य अन्तःपुरे विश्वावसुनामकस्य गन्धर्व्वराजस्य सङ्गीतालापेन मोहितानां रामचन्द्रादीनां चेष्टादिवर्णनं। कैकेय्या आदेशेन शरसन्धानपूर्व्वकं दशरथेन इन्द्रसद्मनि विश्वावसुचेष्टितप्रकाशकपत्रेण सह बाणनिक्षेपादिविवरणं। गन्धर्व्वकृतमोहनादिना दशरथादीनां भ्रान्तिवर्णनं।

३८–४९ अध्याये,—रत्नकलाया वृत्तान्तकीर्त्तनं। रत्नकलावीरसिंहयोः वसिष्ठाश्रम-प्रवेशविवरणकथनं। वसिष्ठस्योपदेशेन तयोः कलायनामकग्रामगमनानन्तरं तत्र तपस्यादिवर्णनं। तयोः यशोदानन्दरूपेण गोकुले जन्म भावीति कथनञ्च। राम-नवमीव्रतमाहात्म्यकीर्त्तनं। अगस्त्याश्रमवर्णनं। तस्य तपस्यानुष्ठानप्रकारकथनञ्च। अगस्त्योक्तरामनवमीव्रतानुष्ठानप्रकारकीर्त्तनं। तत्र मरुकान्तारदेशस्थानां पञ्चपापि-नामुपाख्यानकथनं। विस्तरतः रामस्य पौगण्डलीलावर्णनं। दशरथकृतशरण्याष्टक-स्तोत्रकीर्त्तनं। दशरथस्य पुरतः शरण्या निजजन्मवृत्तान्तकथनं। चारुचन्द्र-शत्रुनाश-सुकण्ठ-विजयप्रभृतिरामचन्द्रवयस्यकथनं। रामचन्द्रादीनां कन्दुकक्रीडादिवर्णनं। तेषां धनुर्विद्यादिशिक्षाकथनं। कैशोरलीलावर्णनञ्च। नाविकस्य प्रार्थनया रामा-दीनां महिषहननार्थं प्रयाणवृत्तान्तकथनं। त्यक्तमाहिषरूपस्य बिल्वाभिधानस्य गन्धर्व्वराजस्य रामस्तोत्रकीर्त्तनं। एकदा मृगयार्थं गहनमध्ये पविष्टस्य रामस्य करस्पर्शमात्रेण वल्मीकदेहं परित्यज्य डिण्डिरनामकस्य किरातस्य आत्मवृत्तान्तकथनं-गुहेन सह रामस्य सखित्वसंस्थापनादिविवरणकथनं। वनशोभावर्णनं। रामवय-स्येन विदूषकेण वसन्तवर्णनकीर्त्तनं। रामचन्द्रादिकृतवसन्तोत्सववर्णनं। भरतकृत-सिंहहननवृत्तान्तकथनं। सिंहस्य पूर्व्ववृत्तान्तकीर्त्तनं। ऋष्यशृङ्गाश्रमगमनविवरण-कीर्त्तनञ्च।

No. 1724. तैत्तिरीयश्रुतिवार्त्तिकं।

Substance, country-made paper, 11 × 5 inches. Folia, 46. Lines, 10 on a page. Extent, 1,057 s'lokas. Character, Nágara. Date, ? Place of deposit, Nashípura, Zilá Murshidábád, Bábu Jagannáthaprasáda Gupta. Appearance, old. Verse. Correct.

Taittiríya-s'ruti vártika.—A dissertation on the theology and philosophy of the Taittiríya Upanishad. By Sures'a A'chárya. The work belongs to the Vedánta School of Philosophy. The author's name is incorrectly given in the codex; it should be Sures'vara A'chárya.

Beginning. ॐ नमो गणेशाय ।

सत्यं ज्ञानमनन्तमेकसकलं ध्वस्तान्धकारं परं
निर्द्वैतं हृदि पद्ममध्यनिलयं निःशेषधीसाक्षिणं ।
वेदान्तोपनिविष्टबोधविषयं प्र+त्नया योगिनां
भक्त्या तं प्रणिपत्य वेदशिरसो वक्ष्यामि सद्वार्त्तिकं ॥
यस्येयं सकलामलेन्दुकिरणप्रख्यैर्यशोरश्मिभि-
र्व्याप्तं यस्य कृपालुता-परवशस्यक्रे हितं दुःखिनां ।
यद्वाणीकुलिशावल+मतयः पेतुर्द्विशस्ताकिका
भक्त्या पूज्यतमं प्रणम्य तमहं तद्भाष्यनीतो यते ॥
तैत्तिरीयकसारस्य मयाचार्य्यप्रसादतः ।
विस्पष्टार्थं रुचीनां हि व्याख्येयं सम्प्रगीयते ॥ इत्यादि ।

End. तैत्तिरीयकसारस्य वार्त्तिकामृतमुत्तमं ।
मस्करीन्द्रप्रणीतस्य भाष्यस्यैतद्विवेचनं ॥
मुमुक्षुसार्थवाहस्य भवनामभृतो यतेः ।
शिष्यश्चकार तद्भक्त्या सुरेशाख्यो महार्थवित् ॥

Colophon. इति श्रीसुरेशाचार्य्यविरचितं तैत्तिरीयकश्रुतेर्वार्त्तिकं समाप्तं ।

विषयः । पद्यैन तैत्तिरीयकोपनिषदो व्याख्यान ।

No. 1725. प्रपन्नदिनचर्य्या ।

Substance, country-made paper, $12\frac{1}{2} \times 5$ inches. Folia, 6. Lines, 9 on a page. Extent, 111 s'lokas. Character, Nágara. Date, ? Place of deposit, Nashípura, Zilá Murshídábád, Bábu Jagannáthaprasáda Gupta. Appearance, fresh. Prose. Correct

Prapannadina-charyá —A manual of the daily religious duties of the Vaishṇavas of the Rámánuja School. Anonymous.

Beginning. श्रीमते रामानुजाय नमः ।

श्रीशापारकृपापात्रप्रपन्नजनसम्मता ।
दिनचर्य्या विशेषज्ञैरुपभोग्या विरच्यते ॥

अथास्यां लीलाविभूत्यां प्रपन्नश्रीवैष्णवो निरन्तराचार्य्याभिमानविरतः कैङ्कर्य्य-त्वरातिशयेन अपरयामे समुत्थाय गुरुपरम्परापूर्व्वकमित्यादि ।

End. अथ लक्ष्मीनाथसमारम्भामित्युक्तश्लोक एव प्रमाणीक्रियते। इति ।

Colophon. इति प्रपन्नदिनचर्य्या समाप्ता ।

विषयः । रामानुजसम्प्रदायवैष्णवानां दैनिकोपासनादिप्रकारकथनं ।

No. 1726. त्रिकाण्डचिन्तामणिः ।

Substance, country-made paper, 13½ × 5 inches. Folia, 250. Lines, 10 on a page. Extent, 8,092 s'lokas. Character, Bengali. Date, Sk. 1742. Place of deposit, Nashípura, Zilá Murshidábád, Bábu Jagannáthaprasáda Gupta. Appearance, new. Prose. Correct.

Trikáṇḍa-chintámaṇi.—Annotations on the *Trikáṇḍa-sésha* lexicon of Amara Siñha. By Raghunátha Chakravartí, of the village of S'rímantasára.

Beginning. नत्वा गिरीशचरणाम्बुजमाकलय्य तन्त्राणि तत्त्वविदुषां रघुनाथनामा ।
श्रीकृष्णवल्लभमहामतिसन्नियोगाद्दीरस्तनोति विमलामरकोषटीकां ॥
याचे विधाय विनयं कृतिनोऽहमेतद्दृष्यं मया यदिह शास्त्रविरुद्धमुक्तं ।
आलोक्य सम्यगवधानपरैः कृतज्ञैर्मात्सर्य्यमत्र कृपया परिहेयमेव ॥
ग्रन्थारम्भे निखिलविघ्नविघाताय अभिमतदेवतानमस्कारेण धर्म्ममुत्पादयन् शैव-वैष्णवबौद्धान् प्रवर्त्तयितुं शिष्यशिक्षायै चादौ निबध्नाति। यस्येति ।

End. स्वयमेव काम इत्यादिप्रयोगाच्च । पुंस्त्वमित्यादिकमूह्यं ।
मतं गुरूणां प्रविचार्य्य यत्नादालोक्य तन्त्राणि च कोविदानां ।
सतां मुदे श्रीरघुनाथशर्म्मा त्रिकाण्डचिन्तामणिमाततान ॥

Colophon. इति श्रीमामन्तसारग्रामनिवासिश्रीरघुनाथचक्रवर्त्तिकृतत्रिकाण्डचिन्तामणावमर-कोषटीप्पन्यां लिङ्गादिसङ्ग्रहवर्गविवरणं। समाप्तश्चेदं पुस्तकं। शकाब्दाः १७४२।

विषयः । अमरकोषव्याख्यानं। तत्र निखिलकोषशास्त्रसंवादेन अपूर्व्वेयं निर्म्मिता टीका ।

No. 1727. सोमकर्म्मप्रदीपिका ।

Substance, country-made paper, 10 × 4 inches. Folia, 156. Lines, 7 on a page. Extent, 2,509 s'lokas. Character, Nágara. Date, ? Place of deposit, Nashípura, Zilá Murshidábád, Bábu Jagannáthaprasáda Gupta. Appearance, very old. Prose. Correct.

Somakarma-pradípiká.—A guide to the performance of sacrifices with the Soma beverage. By Ráma.

Beginning. श्रीगणेशाय नमः । मखाजोऽग्निचितो नत्वा विद्याकरगुरोः पदे ।
रामः पद्धतिमाधत्ते सोमकर्म्मप्रदीपिकाम् ॥
तत्र दर्शपैार्णमासाविष्ट्वा वसन्ते सोमेन यजेत । अथ वोपक्लृप्तसोमो द्विपुरुषसोमपीथी, आधानमनन्तरमेव सोमेन यजेत । अद्विपुरुषसोमपीथी अनुपक्लृप्तसोमो वा आधाय दर्शपैार्णमासपूर्व्वकं यजेत । इत्यादि ।

End. स प्रैषं वाचयति नमो वरुणाय पाश इति प्रथमं मूलावभृथा प्राग्वत् ++++
तिष्ठतामे + सर्व्वेषां । अवभृथेष्ट्या तिष्ठन्तस्वरन् + + त्याश्वलायनवचनात् । तत्र गार्हपत्यं स्थापयदिति शम् । ग्रन्थसङ्ख्याः २८०० ।

विषयः । सोमयागप्रयोगकथनं ।

No. 1728. एकाहानां पद्धतिः ।

Substance, country-made paper, 10 × 4½ inches. Folia, 10. Lines, 10 on a page. Extent, 1,168 s'lokas. Character, Nágara Date, ? Place of deposit, Nashípura, Zilá Murshidábád, Bábu Jagannáthaprasáda Gupta. Appearance, very old. Prose. Correct.

Ekáhánám Paddhati.—A manual for the performance of ephemeral or Ekáha rites. Anonymous.

Beginning. ॐ नमो गणेशाय । अथैकाहानां पद्धतिर्लिख्यते । तत्र उदयने पूर्व्वपक्षे पुण्याहे प्रतिपदि वा शोभने नक्षत्रे अनुकूले चन्द्रे वा एकाहा दीक्षा भवन्ति । तेषामनादेशे एका दीक्षा तिस्रो वा चतस्रो वा द्वादशो वा अपरिमिता वा दीक्षा भवन्ति तिस्र उपसदः । इत्यादि ।

End. राजपुरोहितौ सायुज्यकामौ यजेयातां। पुरोधाः कामो वा ब्राह्मण इति। इतीन्द्राग्न्योः स्तोमः॥ इतः खण्डितं। परिशेषे द्वे पत्रे न स्तः।

विषयः। तत्र प्रथमतः, भूर्नामकस्य एकाहयागस्य सङ्क्षेपेण प्रयोगकथनं। एवं ज्योतिः। गौः। आयुः। अभिजित्। विश्वजित्। सर्व्वजित्। ज्योतिः। सर्व्वज्योतिः। विश्वज्योतिः। त्रिरात्रसम्मितः। अनुक्तिः। विश्वजिच्छिल्पः। श्येनः। एकत्रिकः। चतुःषोड़शी। षट्षोड़शी। द्विषोड़शी। ऊर्द्धस्तोमः। अग्निष्टुत्। इन्द्रस्तुत्। सूर्य्यस्तुत्। वैश्वदेवस्तुत्। इत्युयज्ञः। बृहस्पतिसवः। इषुः। सर्व्वस्वारः। सर्व्वस्तोमः। चतुश्चत्वारिंशत्स्तोमः। अष्टचत्वारिंशत्स्तोमः। वात्सस्तोमः। त्रिवृत्। पञ्चदशः। सप्तदशः। एकविंशः। त्रिणवः। त्रयस्त्रिंशः। वैश्वदेवोऽग्निष्टोमः। वरुणप्रघासः। अग्निष्टोमः। शाकमेधः। अतिरात्रः। ज्योतिःष्टोमः। अतिकर्म्मसोमाः। अग्न्याधेयस्तोमः। पुनराधेयस्तोमः। अग्निहोत्रः। इन्द्राग्निष्टोमः। इतः खण्डितं।

No. 1729. सूर्य्यानुवादिनी।

Substance, country-made paper, 11 × 4 inches. Folia, 50. Lines, 6 on a page. Extent, 845 s'lokas. Character, Nágara. Date, ? Place of deposit, Nashípura, Zílá Murshidábád, Bábu Jagannáthaprasáda Gupta. Appearance, old. Prose. Correct.

Súryánuvádini.—A commentary on Mayura Bhatta's hymn to Súrya in a hundred stanzas. By Vallabha.

Beginning. नत्वा वागीश्वरीं देवीं बालानां बोधसिद्धये।
सूर्य्यानुवादिनी टीका वल्लभेन विरच्यते॥
जम्भारातीति। भूयासुः। भवेयुः। के किरणाः। कस्यै विभूत्यै। इत्यादि।

End. ईदृग्गुणविशिष्टः स निर्णीयते। कैरपि पण्डितैरपि स दृश्यताभीष्टरभ्यर्थितं। दिशतु। इति।

Colophon. इति श्रीपण्डितवल्लभेन विरचिता सूर्य्यानुवादिनी सूर्य्यशतकटीका समाप्ता।

विषयः। मयूरभट्टकृतसूर्य्यशतकस्य व्याख्यानं।

No. 1730. बुधरञ्जनी ।

Substance, country-made yellow paper, 13 × 5 inches. Folia, 35. Lines, 6 on a page. Extent, 841 s'lokas. Character, Bengali. Date, ? Place of deposit, Nashípura, Zilá Murshidábád, Bábu Jagannáthaprasáda Gupta. Appearance, fresh. Prose. Correct.

Budharañjaní.—Annotations on the difficult passages in the 10th book of the Bhágavata Puráṇa. By Vasudeva. The work is not commonly known.

Beginning. नत्वा कृष्णपदद्वन्द्वं वासुदेवेन यत्नतः ।
क्रियते दशमस्कन्धटीकेयं बुधरञ्जनी ॥
कृष्णावतारचरितश्रवणामृतनिर्भितः ।
उक्तानुवादेनौत्सुक्याद्राजा पृच्छति तत् पुनः ॥
यद्यपि नवमस्कन्धे सूर्य्यवंशवर्णनानन्तरं सोमवंशवर्णनं, तथापि सोमवंशे श्रीकृष्णावतारात् तस्य प्रधानत्वात् प्रथमत उपन्यासः । अभ्यर्हितत्वात् प्राग्भावो वेति । उत्तरवंश्यानामिति पाठे सूर्य्यवंश्याः पूर्व्वाः सोमवंश्यास्च उत्तराः । तथा च सूर्य्यवंश्यानां श्रीरामाद्यवताराणां चरितं कथितं सोमवंश्यानां कथयेति । यदोः स्वधर्म्मशीलस्य यदोश्च धर्म्मशीलस्य इति पाठः । तत्रांशेनावतीर्णस्य विष्णोः वीर्य्याणि शंसनः । ननु कृष्णस्तु भगवान् स्वयमित्युक्तत्वात् कथमंशेनेति सङ्गच्छते । अत्र स्वामी, प्रतीत्यभिप्रायेणेति । केचित्तु प्रतीतिः ख्यातिः । पुराणान्तरेषु अंशावतारश्रवणात् । परीक्षितः प्रतीत्यभिप्रायेणेत्यर्थः । तथा च शौनकं प्रति सूतस्य कथनं । कृष्णस्तु भगवान् स्वयं । न तु परीक्षितं प्रति शुकस्य वचनं । तन्न । प्रथमस्कन्धावधि शुकमुखात् परीक्षितश्रवणात् । अत्र गुरवः । द्वे अंशेन प्रधान इति शुकसम्बोधनं । इत्यादि ।

End. स्वामी तु अमृतत्वे हेतुः । गदाभृतः पीतशेषं । तथा च जन्मकाले श्रीकृष्णेन पीतमिति भावः । तथा च वामनपुराणे । मात्रापि बालकं सुप्तं पर्य्यङ्के स्तनपायिनं । इति श्रवणात् ।

Colophon. इति एकाशीतितमोऽध्यायः ।

विषयः । श्रीमद्भागवतदशमस्कन्धस्य विषमस्थलीयव्याख्यान ।

No. 1731. प्रपन्नामृतं वा रामानुजचरित्रं ।

Substance, country-made paper, 13 × 4 inches. Folia, 290. Lines, 7 on a page. Extent, 5,752 s'lokas. Character, Nágara. Date, Sm. 1861. Place of deposit, Jápharagañja Baḍa A'khḍá, Zíla Murshidábád, Gopáladása Mahanta. Appearance, fresh. Verse. Generally correct.

Prapannámṛita alias *Rámánuja-charitra.* A legendary life of Rámánuja, the great Bhakta reformer, and founder of the dualistic school of the Vedantists. The name of the author of the work is not apparent, nor have I any means of making a guess as to his age. The work extends to 90 chapters. It opens with a scene in Vaikuṇṭha where Hari, anxious to promote the translation of mankind to his favourite region, desires Phanirája or Ananta to descend on earth as a saviour. The scene then changes to the village of Bhútapuri in the district of Toṇḍila, three Yojanas to the west of the eastern sea. There lived a pious man of the name of Kes'ava of the Hárita family. He once celebrated a rite during a lunar eclipse, praying for a son. The prayer was granted. Ananta informed him in a dream that he would himself become the son of the devotee, and assume the name of Rámánuja. In due course the son was born, and named Lakshmaṇa A'rya with the alternative name or title of Rámánuja. On his 16th year, the boy was married to a maiden named Rakshákámbá. Soon after this marriage he lost his father, and repaired to Kánchipur, where he placed himself under the tutelage of one Yádava, a renowned scholar.

While he was at Kánchipur, the daughter of the king was possessed by a Bráhman devil, whom none could drive away. Yádava, with his pupils, went to see her, and on her being touched by the feet of Rámánuja, the devil departed. This pleased the king greatly, and he loaded the youth with rich presents. Soon after, his uncle (mother's sister's husband), Govinda came to the place to carry on a polemical disputation with Yádava. The uncle and the nephew took one side of the question mooted, and the teacher the other, and the result was a breach between them. The teacher also coveted the wealth of the pupil, and so the latter, by the advice of his uncle, went away to Prayága. In the way, when passing through the Gouḍa forest, he was very much overpowered by fear, when Hari, the lord of Hastigiri, and his consort Lakshmí, assumed the form of wild hunters, and advised him to go back to

Kánchipur. On his return he was reconciled to his teacher; but after a time he was induced to become the pupil of a Sannyásí named Yamuná A'rya, who then dwelt at S'ríranga, and there he also contracted a friendship with one Purṇa A'chárya.

On the death of Yamuná A'rya, he returned to Kánchipur, and compiled his great work the *S'ribháshya*, a commentary on the Vedánta Sútras of Vyása. Here, on one occasion, his wife Rakshakámbá quarrelled with the wife of Purṇáchárya, and Rámánuja, taking the side of his friend, sent his own wife away to her father's house. At the same time he himself became a Sannyásí of the Tridaṇḍí sect, and established a monastery (maṭha) at Kánchipur, and there he consecrated an image of Hastinátha. The people now gave him the title of 'Yatirája,' and his reputation spread far and wide.

On one occasion his former tutor Yádava came to see him, and, in the course of a long disputation, was so completely overcome, that he became a pupil of his pupil, and, forsaking the world, became a Tridaṇḍí under the name of Govindadása.

From this time forward Rámánuja was engaged principally in disputations with learned paṇḍits of Southern India who came to him for the purpose, and in making disciples. Among his antagonists there were a few Buddhists, but the bulk of them were S'ivites. The Chola king of S'ríranga was one of those whom he converted, and made one of his ardent supporters.

He devoted also much time to travelling, and the following are the places he is said to have visited, *viz.*, Dvárká, Mathurá, S'álagráma, S'áketa, Vadarikás'rama, the Naimisha forest, Vrindávána, Sáradapíṭha, Jagannátha, Chitrakúṭa and Delhi, (whence a Delhi princess is said to have gone away with him as his disciple, and in love with a pupil of his) and most of the leading towns of Southern India.

Rámánuja is said to have established 72 principal maṭhs, dedicating in each the image of his tutelary deity. Among these, the image established on the Yádava Hill, was the consequence of a dream, in which Vishṇu inspired him to put up a figure of Náráyaṇa. This image was consecrated on the 14th of the waxing moon in the month of Chaitra, of the S'aka year 1012 = 1090 A. D.

He lived to the age of 120 years, and died on the 10th of the waxing moon of Mágha. Most vexatiously however, the year of death, is not given.

The following are the works he is said to have written (1) *S'ríbháshya*, a commentary on the Vedánta Sútras; (2). *Vedántadípa*, the essence of the Vedánta; (3), *Vedántasára*, the elements of the Vedánta; (4), *Vedártha-sangraha* or the true meaning of the Vedas; (5), *Gítá-bháshya*, a commentary on the Bhagavad Gítá; all these works are still in existence.

The concluding sections (76 to 90) of the work give brief notices of the immediate successors of the reformer, from which it would seem that the work was not written until 150 years after his death. The followers of Rámánuja are known by the name of 'S'rí Sampradáyís,' and their number is very large in the south.

It is to be regretted that the work, though very detailed, does not give the year of the pious Yati's birth or death; but the fact of his establishing an image of Náráyaṇa in S'aka 1012, = A. D. 1090, about the close of his life, would suggest the idea that he lived all through the eleventh century. On this subject I quote the following from Wilson's account of the Vaishṇava.

"The *Smriti Kála Taranga* places the date of Rámánuja's appearance in S'aka—1049 or A. D. 1127. A note by Colonel Mackenzie on an inscription, given in the Asiatic Researches IX, 270, places the birth of Rámánuja in A. D. 1008: various accounts, collected by Dr. Buchanan, make it 1010 and 1025 (Buchanan's Mysore 2, 80) and 1019 (ibid 3, 413). Inscriptions make him alive in 1128, (ibid) which would give him a life of more than a century: according to Col. Wilks, indeed (History of Mysore 1, 41, note and appendix), he was alive in 1183. The weight of authority seems to be in favour of the more recent date, and we may conclude that he was born about the end of the eleventh century, and that the first half of the twelfth century, was the period at which his fame, as a teacher, was established."

Beginning. श्रीमते रामानुजाय नमः।

श्रीरङ्गराजपदपङ्कजराजहंसं रामानुजाख्यं नदपङ्कजभृङ्गराजं।
श्रीशैलवंशकलशाम्बुधिपूर्णचन्द्रं श्रीरङ्गनाथगुरुमन्वहमाश्रयाम॥
मिथ्यावादिमदान्धसिन्धुरमुखासंरम्भकुम्भस्थली-
निर्भेदोद्भवसूक्तिमौक्तिकमणेः प्रभ्रीकृताभस्थली।
सत्तर्कस्फुरदत्युदग्रनखरो वेदान्तशैलाश्रितः
श्रीरामानुजकेशरी विजयते प्रोद्दण्डविक्रीड़ितं॥

काश्यिकान्वयमम्भूतं कारुण्यामृतसागरं ।
नृसिंहाचार्य्यतनयं रामानुजगुरुं भजे ॥
नाधीतानि च शास्त्राणि न कृतं गुरुपूजनं ।
वक्ष्यामि कृपया विष्णोरनुगृह्णन्तु देशिकाः ॥
इन्दिरारमणं देवमिभशैलनिवासिनं ।
विवस्वत्कोटिसङ्काशं देवराजमहं भजे ॥
अस्ति वैकुण्ठनगरं सर्व्वलोकेषु विश्रुतं । इत्यादि ।

End. गोदा शठारिपरकालमुखादिसिद्धैर्नाथार्य्ययामुनयतीश्वरकूरनाथैः ।
मार्द्धं जगत् करुणया कलिदोषजुष्टं स्वाधीनरङ्गनिलया सकलं ररक्ष ॥
गोदाचरित्रं सुमहद्विचित्रं समस्तसन्मङ्गलपूर्णपात्रं ।
शृण्वन्ति ये भक्तियुताः पठन्ति सन्मङ्गलास्ते सततं भवेयुः ॥

Colophon. इति श्रीप्रपन्नामृते रामानुजचरित्रे भट्टाचार्य्यवेदान्तिसंवादे गोदारङ्गेश्वरकल्याणं नाम नवतितमोऽध्यायः। इति प्रपन्नामृतं समाप्तं। संवत् १८६१ ।

विषयः। १ अध्याये,—एकदा वैकुण्ठपदने लक्ष्म्या समुपास्यमानस्य "केनोपायेन वैकुण्ठमिमान् जन्तून् नयाम्यहमिति" चिन्तयतो हरेः पुरतः समुपस्थितं फणिराजं समुद्दिश्य पुरा किल लोकसंरक्षणाय मया शङ्खचक्राद्यायुधानि विष्वक्सेनादयश्च प्रेरिताः, तदधुना भवानपि भूमाववतीर्य्य लोकान् रक्षितुमर्हतीति समादेशादिकथनं ।

२ये अध्याये.—पूर्व्वसागरस्य पश्चिमतीरे योजनत्रयेण व्यवहिते तोण्डीरमण्डले भूतपुरीति नाम्ना प्रसिद्धा पुरी आसीत्। तत्र हारीतान्वयः केशवनामकः कश्चिद् भागवतोत्तमोऽनपत्यतया नितरां निर्व्वेदमापन्नः प्रतिवसति स्म। अथैकदा सभार्य्योऽसौ चन्द्रग्रहणकाले भगवन्तमुद्दिश्य इष्टिं चकार। भगवानपि तथेज्यया प्रसादमभ्युपगच्छन् "अहं ते पुत्रो भविष्यामीति स्वप्ने तमेवमब्रवीत्। अथ शेषोऽपि चैत्रशुक्लपञ्चम्यां तत्पुत्रत्वेनावतीर्णो रामानुज इति समाख्यामधिजगाम। ततो लक्ष्मणार्य्यापरनामधेयस्य रामानुजस्य अन्यान्यसंस्कारानन्तरं षोड़शे वर्षे रक्षकाम्बया सह विवाहकथनं। अथ पितृमरणोत्तरं तस्य काञ्चीपुरगमनपूर्व्वकं यादवनामकस्य विद्वद्वरस्य समीपे शास्त्राध्ययनकथनञ्च ।

३ ये अध्याये,—अथ काञ्चीपुरेशकुमारीं ब्रह्मराक्षसोपद्रुतामुपलभ्य तदुपद्रवशान्त्यर्थं यादवस्य सह शिष्यगणैस्तत्र गमनमकृतार्थता च। अथ रामानुजस्य चरणस्पर्शमात्रेण अस्तमितोऽयं ब्रह्मराक्षस इति विज्ञाय राजा तस्मै सुवर्णराशिं प्रददौ। अस्मिंश्च समये रामानुजस्य मातृष्वस्रीयो गोविन्दाभिधानः काञ्चीपुरे तेन सह सि-

विषयः। लित्वा यादवस्य समीपे शास्त्रार्थं चिन्तयन् तस्थौ। अथैकदा यादवेन सत्यज्ञानादिश्रुतिवाक्यानि अपार्थतया व्याख्यातानीत्याकलय्य तेन रामानुजस्य विवादः समजनि।

४–६ष्ठे अध्याये,—अथासौ यादवः खान्तिकमनागच्छतोऽपि रामानुजस्य गुणोत्कर्षमसहमानस्तन्निधनेच्छया भूय एव तं मधुराचरेण वशीकृत्य स्वाभीष्टसिद्धये शिष्यैः परास्तश्च च प्रयागमुद्दिश्य प्रचचाल। तत्र गोण्डारण्ये गोविन्दस्य उपदेशेन ततः पलायितस्यापि तस्य असहायतया अत्यर्थं भीतस्य साहाय्यार्थं भगवान् हस्तिगिरिनाथो लक्ष्म्या सह व्याधमिथुनवेशेन तत्र आविर्बभूव। सोऽपि तदनुग्रहेण पुनः काञ्चीपुरं प्रत्याययौ। अस्मिन्नेव समये यामुनार्य्याभिधेयः कश्चित् सन्न्यासी रङ्गनगरे निवासमकरोत्। स हि सर्व्वसुलक्षणयुक्तं बालकमेकं प्राप्तुकामः सर्व्वेषु देशेषु शिष्यान् प्रेरयामास। अथ ते रामानुजस्य प्रवृत्तिमाकलय्य तत् सर्व्वं गुरवे न्यवेदयन्। अत्रान्तरे गोविन्दोऽपि प्रयागात् प्रत्यागच्छन् कालहस्तिनगरे शिवमेकं प्रतिष्ठाप्य तत्र उवास। अथ काञ्चीपुरं प्रत्यागतोऽसौ यादवो रामानुजप्रभावाद् भीत इव शिष्यमुखेन पुनरेव रामानुजेन सह सख्यं चकार।

७–९मे अध्याये,—अथ यामुनाचार्य्यः रामानुजदिदृक्षया श्रीरङ्गात् काञ्चीपुरं प्रति प्रययौ। ततः कियद्दूरं गत्वा हस्तिगिरिं ददर्श। तत्र स्वशिष्येण काञ्चीपूर्णेन सह मिलित्वा ततो निर्ज्जगाम। अत्रान्तरे हस्तिगिरिनाथं वरदाभिधानं द्रष्टुकामो यादवो रामानुजादिभिः शिष्यैः सह तत्र समाययौ। काञ्चीपूर्णस्तु तद्दर्शनेन आनन्दमासाद्य यामुनाय तेषां परिचयमदात्। अथ सोऽपि रामानुजसौन्दर्य्यामृतं निपीय भूय एव श्रीरङ्गनगरं प्राप। एकदा रामानुजः तैलेन यादवस्य अभ्यञ्जनं कुर्व्वन्नेव तत्कृतं 'कप्यास'मिति श्रुतेरपार्थं निशम्य नितरां सन्तापमधिगम्य च विचारपराजितेन तेन ततो बहिष्कारितो हस्तिगिरिं जगाम। तत्र च काञ्चीपूर्णस्योपदेशवत् कैङ्कर्य्येण वरदार्च्चनायां निरतो बभूव। अथ वृत्तान्तमिममुपश्रुत्य यामुनाचार्य्यः निजनिर्म्मितां स्तोत्रावलीं समर्प्य स्वान्तेवासिनं पूर्णाचार्य्यं तत्र प्रेरयामास। तत्रैकदा वरदस्य पुरतः पठ्यमानं तत्स्तोत्रमपूर्व्वमिति मत्वा गुम्फितमिदं केनेति जिज्ञासुः रामानुजः पूर्णाचार्य्येण तथा पथि सङ्गतेन महापूर्णेन च समं यामुनाचार्य्यदिदृक्षया रङ्गनगरमुद्दिश्य प्रचचाल। अथ यामुनाचार्य्योऽपि तत्प्रत्युद्गमनाय कावेरीतीरपर्य्यन्तमासाद्य तत्र देहत्यागेन स्वजनान् शोकसिन्धौ निमज्जयाञ्चकार। अत्रावसरे रामानुजोऽपि तत्रोपस्थाय गतजीवितं यामुनदेहं पश्यन्नेव तस्य तदानीन्तनाङ्गुलित्रयसङ्कोचकारणं स्वकर्त्तव्यत्रितयं श्रीभाष्यरचनादिकं प्रतिज्ञाय तदसङ्कोचमापाद्य च पुनः काञ्चीपुरं प्रत्याजगाम।

विषयः। १०-१२ अध्याये,—रामानुजगृहे काञ्चीपूर्णस्य भोजनादिवृत्तान्तवर्णनं। तदुपदेशेन रामानुजस्य पूर्णाचार्य्यदर्शनार्थं पुनरेव रङ्गनगरगमनं। अथ पूर्णाचार्य्येण पञ्चसंस्कारदीक्षितो रामानुजः सस्त्रीकेन तेन सह स्वगृहं प्राप्य ततो द्रविड़ागमादीन् अधीतवान्। एकदा कूपात् जलोत्तोलनकाले पूर्णाचार्य्यभार्य्यया सह रक्षकाम्बायाः कलहः समजायत। अत एव कारणात् भार्य्यासहायः पूर्णाचार्य्यः भूय एव रङ्गनगरं प्रतिययौ। रामानुजोऽपि रक्षकाम्बायां वीतरागो बभूव। अथैकदा हस्तिगिरिनाथमभ्यर्चयन्तं रामानुजमभ्युपेत्य कश्चिद् ब्राह्मणो बुभुक्षामात्मनो विज्ञापयन् "मद्गृहं गम्यतामिति" तेनानुज्ञातः तत्र गत्वा च रक्षकाम्बया तिरस्कृतोऽसौ पुनरेव तत्समीपमाजगाम। अथ विदितवृत्तान्तेन रामानुजेन "भो विप्र त्वमिदं रोचनारञ्जितं वसनं लेखञ्चादाय भूय एव तत्पुरतो गच्छ, कथयस्व चैवं तव पितृगृहे विवाहमहोत्सवो भविष्यतीति" कथितो विप्रस्तथा चकार। रामानुजपत्नी तु तत् श्रुत्वा अत्यर्थमानन्दिता यत्नेन तं भोजयामास। अत्रान्तरे रामानुजोऽपि स्वगृहमागतः किमप्यजानन्निव पत्नीमुखात् सर्व्वं विज्ञाय तदुपायेन तां पितृवेश्मनि प्रेरयाञ्चकार।

१३-१५ अध्याये,—अथ रामानुजो विगतस्पृहतया गृहधनादिकं सर्व्वं विहाय हस्तिगिरिनाथस्य प्रसादमुपलभ्य च त्रिदण्डादिग्रहणेन सन्न्यासं चकार। अत एव काञ्चीपूर्णेन सादरं गृहीतोऽसौ 'यतिराज' इति समाख्यान्तरमधिगम्य तत्र मठस्वामी बभूव। समयेऽस्मिन् रामानुजस्य भागिनेयो दाशरथिस्तथा अनन्तभट्टतनयः कूरनाथश्च हस्तिगिरिमासाद्य यतिराजस्य अन्तेवासिनौ बभूवतुः। अथैकदा यादवाचार्य्यः हस्तिगिरिनाथदर्शनार्थं रामानुजाश्रमं जगाम। तत्र हि शङ्खचक्राद्यङ्कितं रामानुजकलेवरं दृष्ट्वा तं प्रोवाच। भोः किमिदमवैदिकमनुतिष्ठसि कुतश्च त्वया निर्गुणं ब्रह्म सगुणतया ख्यापितमित्यभिहितो यतिराजस्तदुत्तरदानाय कूरेशमादिदेश। सोऽपि श्रुत्यादिप्रमाणैः स्वपक्षं समर्थ्य यादवं पराजिग्ये। ततश्च काञ्चीपूर्णस्य उपदेशात् यादवाचार्य्यः शरणत्वेन रामानुजं संश्रितवान्। स च तस्मै सन्न्यासं दत्वा गोविन्ददास इति नाम्ना आजुहाव। अथ गोविन्ददासो यतिवराभ्यनुज्ञया यतिधर्म्मसमुच्चयाख्यं ग्रन्थं निर्म्माय वैष्णवं लोकं प्रययौ।

१६-२० अध्याये,—अथ यामुनाचार्य्यपुत्रो वररङ्गो रामानुजानयनार्थं हस्तिगिरिं प्रजगाम। तत्र चाभिनयप्रदर्शनादिना सन्तोषिताद्वरददेवादभीष्टप्राप्तिपूर्व्वकं रामानुजं गृहीत्वा रङ्गनगरं प्रत्यागत्य च रङ्गेशाय तमुपदीचकार। अथ रङ्गनाथाद्विभूतिद्वयलाभपूर्व्वकं यतिराजस्तत्र अवस्थितिश्चक्रे। अत्रावसरे रामानुजमातुलपुत्रस्य शैवधर्म्मरतस्य गोविन्दस्य वेङ्कटाद्रिवासिना श्रीशैलपूर्णनामधेयेन वैष्णव-

विषयः। यतिना सार्द्धं शास्त्रार्थोऽभूत्। तत्र पराजितस्य गोविन्दस्य सन्न्यासग्रहणपूर्व्वकं श्रीशैलपूर्णचरणाश्रयणकथनं। अथ पूर्णाचार्य्योपदेशेन यतिराजस्य चरमतत्त्व-जिज्ञासया गोष्ठीपुरमष्टादशकृत्वः गत्वापि गोष्ठीपूर्णाचार्य्यादभीष्टमलब्ध्वा परितप्तस्य च तस्य गोष्ठीपूर्णादेशेन पुनस्तत्र गमनपूर्व्वकं मन्त्रार्थप्राप्तिकथनं।

२१–२३ अध्याये,—यथा गोष्ठीपूर्णेन निषिद्धोऽपि रामानुजः केषुचिन्मन्त्रं कथयामास। स ह्येतद्विज्ञाय तमाहूय च प्रोवाच। भोः कथय गुरुद्रोहकरणस्य किं फलं? रामानुजः प्राह नरकगमनमिति। गोष्ठीपूर्णः पुनराह एवं ज्ञात्वा कथं त्वया तदनुष्ठितं। यतिराजेनोक्तं,———

'पतिष्ये एक एवाहं नरके गुरुपातकात्। सर्व्वे गच्छन्तु भवतां कृपया परमं पदम्'॥

इति। निशम्यैतत् गोष्ठीपूर्णो नितरां प्रीतिमावहन् हर्षभरेण 'मन्नाथ' इति तस्य नामान्तरं विधाय व्याजहार,—अद्यारभ्य लोकेऽस्मिन् वैष्णवदर्शनमिदं रामानुजार्य्यसिद्धान्तमिति ख्यातं भविष्यतीति। अथ दाशरथिः यतिवरस्यादेशेन पूर्णाचार्य्यसुतायाः गृहकर्म्मकरणार्थं तस्याः श्वशुरालयेऽवस्थानञ्चकार। तत्रैकदा केनचित् श्रुतिविरुद्धार्थकारिणा वैष्णवेन सह विचारे लब्धजयश्रीरसौ भूय एव रामानुजस्य चरणावभ्युपेत्य वैष्णवदास इति नामान्तरं प्राप। अथ रामानुजपुत्रस्य सुन्दरवाहोः मालाधराद्दीचादिग्रहणकथनं। तत्र मालाधरप्रमुखात् रामानुजेन शठकोपाचार्य्यकृतसहस्रगीतेर्व्याख्याणश्रवणञ्च।

२४–२७ अध्याये,—रामानुजस्य गद्यत्रयरचनाकथनं। अथ रङ्गनाथसेवाद्व्यापचारकाणां बन्धनक्लिष्टानां रामानुजनिधनार्थं तस्मै विषान्नदानं, तस्य च ततः परित्राणादिकथनञ्च। अथैकदा यज्ञमूर्त्तिरिति श्रुतः कश्चिन्मायावादी कृतसन्न्यासोऽपि दिग्विजयार्थं प्रवर्त्तमानः सह रामानुजेन शास्त्रार्थं कर्त्तुमना रङ्गनगरमाजगाम। स हि अष्टादशदिनानि यावत् शास्त्रार्थं कृत्वा रामानुजप्रभावेण विमुग्धोऽसौ तच्छिष्यतां स्वीचकार। रामानुजोऽपि ब्रह्मनिर्गुणत्ववादनिरसनमद्वैतवादादिखण्डनञ्चोपदिश्य तं भूय एव शिखासूत्रादिकं ग्रन्थयामास। अपि च तस्मै देवराज–देवमन्नाथ-मन्नाथेति नाम त्रयं प्रदाय मठेऽन्यस्मिन् तं स्वामिनं चकार। अथ तत्र पुण्याख्यनगरात् वैष्णवानामनन्ताचार्य्यादीनामागमनकथनं। ततो रामानुजाज्ञया देवराजो द्रविड़भाषया ज्ञानसारप्रमेयसारेत्यभिधानं ग्रन्थद्वयं चकार। तथा तदाज्ञया अनन्ताचार्य्यो वेङ्कटगिरिगमनपूर्व्वकं तत्र वृन्दावनं विधाय वेङ्कटेशस्य रामानुज इति नामान्तरञ्च कृत्वा तत्र वासमकरोत्।

२८–३० अध्याये,—अथ रामानुजः वेङ्कटाद्रिगमनपुरःसरं वेङ्कटेशं समभ्यर्च्च दिशमुत्तरां गन्तुकामस्तत्र पथिस्थितां देहलीनगरीं प्राप्य त्रिविक्रमवन्दत।

विषयः। ततोऽसौ अष्टसहस्राख्यं ग्रामं प्राप्य वरदाचार्य्ययज्ञेशनामानौ स्वशिष्यौ विदितप्रवृत्ती चकार। अथ यतिराजः केनाप्यपराधेन यज्ञेशमुखसन्दर्शनमविधाय वरदस्य गृहं प्रययौ। तत्र अनुपस्थितेऽपि तस्मिन् तद्गृहिण्याः भक्त्यतिशयदर्शनेन अत्यर्थं सन्तोषमापन्नोऽसौ भोजनादिकं व्यधात्। समनन्तरञ्च ततो हस्तिगिरिं प्राप्य काञ्चीपूर्णादिभिः सह साक्षात्कारं विधाय च कापिलतीर्थमुद्दिश्य प्रचचाल। तत्र चोपस्थितोऽसौ कञ्चित्कालमुवास। अथ तद्देशाधिपतिः विट्ठलदेवो रामानुजस्य शिष्यत्वमभ्युपगम्य तस्मै तोण्डीरमण्डलादिग्राममुपजहार। अतश्च यतिवरस्य वृषाचल-रङ्गनगरादिवृत्तान्तकीर्त्तनं।

२१-२२ अध्याये.—अथ यदा रामानुजेन बहुशोऽनुरुद्धोऽपि तन्मातुलपुत्रो गोविन्दो गार्हस्थ्यं नाभ्यनन्दत, तदा तस्य सन्न्यासाश्रमग्रहणस्य वृत्तान्तकथनं। अथ कूरेशमात्रसहायस्य रामानुजस्य शारदापीठगमनानन्तरं तत्रत्यान् पण्डितान् विजित्य ततो बौधायनकृतब्रह्मसूत्रवृत्तिपुस्तकमादाय रङ्गनगरं प्रत्यागच्छतस्तस्य अनुगामिनः शारदापीठीयविबुधाः बलादेव तत्पुस्तकं सङ्गृह्य शारदापीठमध्ययुः। तद्दर्शनेनात्यर्थं विषादमापन्नस्य रामानुजस्य पुरतः कूरेशेनोक्तं, भगवन्! मया खलु रात्रिकालेषु तत् पुस्तकं तत्त्वतो दृष्टं, भवत्कृपया तत् सर्व्वमद्यापि हृदये लिखितमस्तीति। एतच्छ्रुत्वा रामानुजो बौधायनवृत्तिलिपिकरणाय तमादिदेश। समनन्तरञ्च रामानुजो बौधायनमतानुसारेण श्रीभाष्यं, वेदान्तदीपं, वेदान्तसारं, वेदार्थसङ्ग्रहं, गीताभाष्यञ्च रचयाञ्चकार। अथ बहुभिः शिष्यैः परिवृतस्य तस्य शास्त्रार्थेन दिग्विजयार्थं प्रयाणवर्णनं। तत्र चोलमण्डल-पाण्ड्यमण्डल-कुरुकानगरादिस्थितानां पण्डितमण्डलीनां विचारपराजितानां रामानुजसमीपात् कैङ्कर्य्यधर्म्मग्रहणकथनं। ततो रामानुजस्य कुरङ्गनगराधिपतिं दीक्षितं विधाय केरलदेशगमनकीर्त्तनं।

२४-२६ अध्याये,—अथ रामानुजस्य द्वारका मथुरा-सालग्राम-साकेतनगर-वदरिकाश्रम-नैमिषारण्य-वृन्दावनादिगमनकथनं। अथासौ पुनरेव शारदापीठमाजगाम। तत्र वाग्देवी आविर्भूय 'कप्यासश्रुतितात्पर्य्यं वदेति' स्वयमेव तं पप्रच्छ। अथ तत्कृतार्थश्रवणेन प्रसादमापन्ना देवी श्रीभाष्यं स्वशिरसि संस्थाप्य सङ्गृह्य च पाणिभ्यां तत्पाणियुगलं भाष्यकार इति तन्नामकरणं विदधे। तत्र भाष्यकारात् तत्रत्यानां पण्डितानां पराजयादिकथनं। अनन्तरं पुरुषोत्तमक्षेत्रगतस्य तस्य प्रच्छन्नसौगतगणविजयानन्तरं रामानुजाख्यं मठं निर्म्माय तत्र अवस्थानकथनं। अथ स पाञ्चरात्रानुसारेण जगन्नाथस्य नित्यपूजादिकं कारयितुमनाः तदर्च्चकानाहूय तथा आदिदेश। तेऽपि तत्रासम्मताः वृत्तान्तमिमं जगन्नाथाय

विषयः। निवेदयामासुः। अथ भगवान् रामानुजेन पूर्व्वं तथा सम्प्रार्थितोऽपि तं ततो निवर्त्तनाय अनुरुरोध। यदा खलु स्थिरप्रतिज्ञोऽसौ स्वव्यवसायात् न निवृत्तो बभूव। तदा निशायां निद्रितं तं योगमायया पुरुषोत्तमक्षेत्रात् कूर्म्मक्षेत्रं प्रेरयाञ्चकार। अथ प्रभातकाले विबुद्धोऽसौ कूर्म्मक्षेत्रमिदमिति विज्ञाय विस्मयमागतः श्रीकूर्म्मनाथं समाराध्य तत्र कतिचित् दिनानि तस्थौ। ततस्तस्य सिंहाचलाहोवलगरुड़ाचलादिगमनकथनं। अथ तेन पुनरेव वेङ्कटाचलगमनपूर्व्वकं ततः शैवानां निर्व्वासनकरणकथनं।

३७–३९ अध्याये,—कूरेशस्य सर्व्वस्वपरित्यागानन्तरं स्त्रीमात्रसहायस्य श्रीरङ्गनगरे नित्यवासकथनं। अथ तत्र रङ्गेशप्रसादात् पराशरव्यासयोरंशेन कूरेशस्य यमजौ पुत्रावजायातां। प्रवृत्तिमिमामुपलभ्य रामानुजस्तद्गृहं गत्वा प्रथमस्य पराशर इति द्वितीयस्य च श्रीरामदेशिकः व्यासश्चेति तयोः नाम चक्रे अत्रावसरे गोविन्दस्यापि पुत्रो व्यजायत, रामानुजस्तु पराङ्कुश इति तन्नामकरणं विदधे। अथ रङ्गेशेन अपत्यनिर्व्विशेषतया प्रतिपालितस्य पराशरस्य विवाहादिकथनञ्च।

४०–४३ अध्याये,—अथ रामानुजस्य कृपया मथुरावास्तव्यस्य धनुर्द्दासस्य सह भार्य्यया वैष्णवत्वसिद्धिवर्णनं। एकदा रङ्गेश्वरस्य प्रीत्यर्थं महान् उत्सव आसीत्। तत्र यतीश्वरः स्वयमेव धनुर्द्दासदासमालम्ब्य स्वयमेव महोत्सवं प्रदर्श्य च पुनरागमनसमये तेन सह स्वमन्दिरं प्रविवेश। अथ कुतोऽयं धनुर्द्दासः यतिपतिनैवं सम्मानित इति जिज्ञासूनां वैष्णवानां पुरतो यतिपतिना तस्य तत्पत्न्याः हेमाङ्गनायाश्च गुणकीर्त्तनकथनं। अथ गोष्ठीपुरेशः मूकाय निजगुरुविग्रहं प्रदर्श्य तस्मै मोक्षोपायं कथयामासेति वृत्तान्तकीर्त्तनं। चोलदेशाधिपतेः क्रिमिकण्ठस्य उत्पत्त्यादिकथनञ्च।

४४–४८ अध्याये,—क्रिमिकण्ठस्य चित्रकूटराज्यशासनकथनं। शैवधर्म्मश्रेष्ठत्वेन तत्सत्तलेखनप्रचारादिकथनं। अथ क्रिमिकण्ठस्य प्रार्थनया तद्राज्यमुद्दिश्य पश्चिमाशाभिमुखं प्रचलितस्य रामानुजस्य व्याधकृतार्च्चनामङ्गीकृत्य चेलाञ्चलाम्बागृहगमनकथनं। तदनुग्रहेण च चेलाञ्चलाम्बाभर्त्तुः पञ्चसंस्कारप्राप्तिवर्णनं। रामानुजात् बौद्धानां पराजयवर्णनं। अथ भक्तगणैः सह शिष्यसङ्घेन निवसतस्तस्य स्वप्नदर्शनानन्तरं भगवन्मूर्त्त्युद्धरणार्थं यादवाद्रिगमनकथनं। १०१२ शकाब्दे चैत्रशुक्लचतुर्द्दश्यां रामानुजस्तत्र नारायणमूर्त्तिं प्रतिष्ठापितवान्। अथ रामप्रियनामकस्य नारायणविम्बस्य दिल्लीशभवने अवस्थितिकथनं। अथ विदिततद्वृत्तान्तो रामानुजो दिल्लीशं अभ्युपेत्य तदनुमोदनेन रामप्रियस्य 'सम्पत्सुत' इति नामान्तरं ररक्ष। अनन्तरं दिल्लीशदुहितुः रामप्रियस्य आनयनकाले दिल्लीशतनयापि राम-

विषयः। प्रियविरहमसहमाना तेन सह यादवाचलमाजगाम। अथ तत्र रामप्रियेणैक्यं गतायास्तस्या अर्चारूपेण अवस्थानादिकथनं। अत्रान्तरे वृत्तान्तमिममद्भुतं निशम्य कवीरनामकस्य कस्यचित् यवनसाधोः तत्र गमनपूर्व्वकं श्रुतमोक्षोपायस्य च पुरुषोत्तमक्षेत्रगमनानन्तरं कुक्कुररूपधरस्य भगवतः प्रसादभोजनात् मुक्तिप्राप्तिकथनञ्च। अधुना यादवाचलस्य 'यतिशैल' इति नामकरणकथनं।

४८—५९ अध्याये,—अथ कूरेशकृतवैष्णवस्थानविनाशविवरणकथनं। तिल्लगोविन्दराजप्रतिष्ठाविवरणं। अथ अन्धीभूतस्य कूरेशस्य रामानुजोपदेशात् भगवत्स्तवनेन पुनश्चक्षुःप्राप्तिकथनं। विष्णुचित्तसुतायाः गोदायाः रामानुजादभीष्टप्राप्तिकथनं। श्रीरङ्गपत्तने निवसतो रामानुजस्य चतुःसप्ततिसङ्ख्यकानां प्रधानशिष्याणां विवरणकथनं। रामानुजाष्टोत्तरशतनामस्तोत्रकथनं। रामानुजशिष्यस्य आन्ध्रपूर्णस्य माहात्म्यादिकथनं। तदनुज्ञया अनन्तार्य्यस्य वृषाचलावस्थितिकथनं। कूरेशस्य शेषदशाकीर्त्तनं, रङ्गेशकृपया परमपदप्राप्तिकथनञ्च। अथ रङ्गेश-वेङ्कटेश्वर-वरद-सुन्दर-वकुलाभरण-नाथमुनि-यामुनाचार्य्य-वररङ्गप्रभृतिप्रकाशितरामानुजवैभववर्णनं। शठकोपाचार्य्यस्य जन्मादिवृत्तान्तकीर्त्तनं। पूर्णाचार्य्यकृतरामानुजमाहात्म्यवर्णनञ्च।

६०—६५ अध्याये,—कृष्णग्रामाधिपस्य बालस्वामिनः विवरणं। अथैकदा कावेरीतीरे वैष्णवानां महती गोष्ठी बभूव। तत्र मोक्षमार्गोपदेशप्रसङ्गेन रामानुजमाहात्म्यवर्णनं। नारायणपुरवासिनो 'मामभद्र' इति विश्रुतस्य वैष्णवस्य विवरणकथनं। यथा सङ्ख्यातीतेष्वपि भगवदवतारेषु नृसिंह-राम-कृष्णानां प्राधान्यं, तथा अष्टोत्तरशतेष्वपि दिव्यदेशेषु श्रीरङ्गनगः, वेङ्कटगिरिः, हस्तिगिरिः, यादवगिरिश्चेति चत्वारो मुख्याः बभूवुरिति वचनमाकर्ण्य नृसिंहादीनां प्राधान्ये कारणजिज्ञासूनां पुरतो रामानुजेन तन्निदानकथनं। एवं व्यास-पराशर-शुकशौनकादीनां प्राधान्ये कारणनिरूपणं। तथा वेदानामर्थानाहृत्य शठकोपाचार्य्यः द्राविड़भाषया ग्रन्थांश्चकारेतिवृत्तान्तकीर्त्तनं।

६६—७५ अध्याये,—सर्व्वेभ्य आचार्य्येभ्यो रामानुजस्य प्राधान्यकीर्त्तनं। आचार्य्यशब्दनिर्व्वचनादिकं। प्रपन्नगाथचीकथनादिकं। रामानुजस्य १२० विंशत्युत्तरशतवर्षजीवितकालनिरूपणं। अथ रामानुजः स्वजनान् चिरविरहविधुरान् कर्त्तुमनाः तानाहूय भगवत्कैङ्कर्य्यमेव मोक्षोपाय इति उपदिदेश। आदिदेश च तेषां कर्त्तव्याकर्त्तव्यनिर्णयपुरःसरं सम्यगनुष्ठानं। अथ ते तदनुज्ञया भूतनगरे तदर्चाप्रतिष्ठां विदधिरे। अथ रामानुजः रङ्गेशदास्यसाम्राज्ये पराशरमभिषिच्य माघशुक्लदशम्यां परमं पदं प्राप। अतः परं दाशरथिः पूर्णाचार्य्यः गोविन्दः कुरुक-

विषयः । श्चेति चत्वारः प्रधानकल्पा आसन्। गोविन्दस्य परलोककथनं। पराशरकृतमायावादिपराजयकथनं। माधवदासस्य वृत्तान्तकथनं। स हि सहस्रनामभाष्यं विष्णुपूजाक्रमं, अष्टश्लोकीं, श्रीशस्तुतिं, रत्नकोषञ्चेति ग्रन्थपञ्चकं कृतवान्। पूर्व्वाचार्य्याणां द्राविड़भाषया ग्रन्थरचनाकारणकथनं। तत्र अगस्त्यविश्वकर्म्मणोरन्योन्यं शापदानवृत्तान्तकीर्त्तनं। श्रीवैश्नवस्य द्राविड़ाम्नायपठनावश्यकताकथनं। सङ्क्षेपेण पूर्व्वाचार्य्याणां चरितकीर्त्तनमुखेन लक्ष्म्याः द्रविड़ेषु गोदारूपेण अवतारकथनं।
७६-९० अध्याये,—अथ कासारादीनां जन्मकथनं। तेषां देहलीनगरे भगवद्दर्शनवृत्तान्तकथनं। भक्तिसारस्य जन्मादिकथनं। फणिकृष्णस्य जन्मादिकथनं। भक्तिसारस्य द्रविड़भाषया ग्रन्थप्रणयनकथनं। तत्र भगवता भक्तिसाराय महदाख्यतत्त्वोपदेशदानकथनं। भक्तिसारात् रुद्रस्य पराजयकथनं। भक्तिवैभवातिशयवर्णनं। कुलशेखरस्य जन्मादिकथनं। तत्र तत्कृतश्रीरामप्रत्यक्षीकरणादिवृत्तान्तकीर्त्तनं। भट्टनाथस्य जन्मादिकथनं। पद्मराजस्य जन्मादिविवरणकथनमुखेन तत्सभायां विष्णुतत्त्वनिरूपणवृत्तान्तकीर्त्तनञ्च॥

No. 1732. आनन्दलहरीटीका।

Substance, country-made paper, 10 × 4½ inches. Folia, 78. Lines, 8 on a page. Extent, 1,463 s'lokas. Character, Nágara. Date, Sm. 1836. Place of deposit, Lálgolá, Zilá Murshidábád. Kálícharaṇa Upádhyáya. Appearance, fresh. Prose. Correct.

A'nandalahari-ṭíká. A commentary on S'aṅkara A'chárya's hymn to S'iva. By Narasiṅha. The great peculiarity of this commentary is, that it explains the text in two different ways; in one way proving that it is a hymn in praise of Bhavání, and in another way making Vishṇu the subject of its praise. Ordinarily the text is understood to have been written in honour of S'iva.

Beginning. वारंवारमुदारमस्मितमुखः शिक्योपरिस्थापितं
हारं हारमुदूखले परिगतो हैयङ्गवीनं हटात्।
आयान्तीं पुरतो विलोक्य जननीमादाय यष्टिं करे
धावं धावमिह प्रकाशितभयं पायात् स मायार्भकः॥

कह्लारोत्पलकैरवाम्बुजदल++न्दसन्मञ्जरीः
कोदण्डं करपङ्कजेन दधतीं पुण्ड्रेक्षु++ङ्गवं ।
सौवर्णाङ्कुशपाशपाणिमरुणामारक्तवल्लाट्टता-
मातामाम्बुजसंस्थितां त्रिनयनां चन्द्रार्द्धचूडां भजे ॥
प्रणम्य शङ्कराचार्य्यचरणाम्बुरुहद्वयं ।
आनन्दलहरीस्तोत्रं विष्णुपक्षेऽपि लक्षयेत् ॥
तत्र भवानीपक्षे,—ननु हरिहरविरिञ्च्यादिदेवद्वन्दमपास्य किमिति कात्यायनी-
भद्ररुद्रेश्वरलिङ्गमाहात्म्यकथनप्रसङ्गेन भद्ररुद्राभिधानयोः गन्धर्व्वयोरुपाख्यानकथनं। निमिनामकनृपतेः पत्नियोर्नौ जन्मादिकथनं। निमिपत्न्याः चन्द्रमत्याः शापेन च्यवनस्य चक्षुर्हीनत्वादिविवरणकीर्त्तनञ्च। एरण्डीसङ्गममाहात्म्यादिकथनं। पितृतीर्थस्य उद्भवादिकथनं। शल्यामाहात्म्यकथनमुखेन भरतकृतहयमेधयज्ञानुष्ठानकथनं। भृगुपतनादिना प्राणत्यागमाहात्म्यकथनं। युगानां सन्ध्यातदङ्गादिनिरूपणं। कलिस्वभावकथनं। ॐकारमाहात्म्यादिकथनं। अयोध्याधिपतेः धुन्धुमारस्य आख्यानकथनं। मुचुकुन्दकुवलयाश्वस्वर्गारोहणवृत्तान्तकथनञ्च।

विस्तरतो नरकवर्णनं। यमोक्तकर्म्मगतिवैचित्र्यकीर्त्तनं। गोदानमाहात्म्यकथनमुखेन हरिश्चन्द्रोपाख्यानकथनं। मातङ्गाश्रममाहात्म्यकथनं। तत्र मातङ्गस्य देवर्षेरुपाख्यानकथनञ्च। नर्म्मदामाहात्म्यकथनं। तत्र व्याधस्य उपाख्यानकथनञ्च। ब्रह्माण्डसंस्थानकथनं। तत्र विशेषेण शिवलोकवर्णनं। शैवदानधर्म्मकथनं। शिवमाहात्म्यकथनञ्च। वैष्णवदानधर्म्मकीर्त्तनं। तत्र जावालिपुत्रेण वानरविग्रहेण कदम्बेन सह युवनाश्वस्य संवादकथनञ्च।

रन्तिदेवस्य आख्यानकथनं। वृत्रवधकाले देवैः सार्द्धं दधीचिमुनेः संवादादिकथनं। अष्टोत्तरशततीर्थस्थितानां मातृणां स्तोत्रकथनं। कुब्जामाहात्म्यकथनं। विष्णुमाहात्म्यकीर्त्तनं। माण्डव्याश्रमवर्णनं। ययातिप्रक्रमाहात्म्यकथनं। दीप्तिकेश्वरमाहात्म्यकथनं। शम्भुस्तोत्रकीर्त्तनं। ययातेः हरिहरभागहीनयज्ञानुष्ठानविवरणकथनं। तत्र विष्णुसहस्रनामस्तोत्रकथनञ्च। मयदानवदुहित्रा सार्द्धं रावणस्य परिणयविवरणकथनं। तत्र मेघनादस्य जन्मकथनं। तन्नामनिर्व्वचनं। नर्म्मदाजलमध्ये मेघनादेश्वरलिङ्गवृत्तान्तकीर्त्तनञ्च।

दारुतीर्थमाहात्म्यकथनप्रसङ्गेन स्वपुत्रं दारुकं प्रति मातलिना शापदानविवरणकथनं। देवतीर्थमाहात्म्यकथनं। तत्र जम्भासुरविप्रकृतानां क्रतुभुजां चेष्टितवर्णनं। एकदा वसन्तकाले अगस्त्याश्रमप्रविष्टस्य महादेवस्य लिङ्गपतनादिवृत्तान्तकथनं। तत्र नर्म्मदेश्वरमाहात्म्यकथनञ्च। करञ्जेश्वरमाहात्म्यकथनं। अत्र दनुकुमारस्य करञ्जस्य जन्मादिविवरणकथनं। कुण्डलेश्वरमाहात्म्यकथनं। पिप्पलेश्वरमाहात्म्यकथनमुखेन याज्ञवल्क्यतनयस्य पिप्पलादस्य आख्यानकथनं। विमलेश्वरमाहात्म्य-

विषयः । कथनं । दानधर्म्मकीर्त्तनं । तत्र दानविधिकथनञ्च । गुह्यतीर्थविवरणादिकथनं ।
विश्वरूपलिङ्गमाहात्म्यकथनं । तत्र सारिकाया उपाख्यानकथनं । पञ्चलिङ्गमहिमा ।
मृकाण्डेश्वरमहिमा । अत्र मयूरकुक्कुटयोरुपाख्यानकथनञ्च । रमेश्वर-हरिणेश्वर-
लुब्धकेश्वर-धनुषेश्वर-वाणेश्वरप्रभृतीनां माहात्म्यादिकथनं । अन्धकेश्वरलिङ्गमा-
हात्म्यकथनं । तत्र अन्धकबधविवरणं, तस्मै वरप्रदानवृत्तान्तकथनञ्च । शूलभे-
दोत्पत्तिकथनं । श्राद्धे पात्रकरणयोग्यब्राह्मणलक्षणकथनं । कन्यादानफलकीर्त्तनं ।
श्राद्धकालादिनिरूपणं । वाराणसीनाथस्य चित्रसेनस्य उपाख्यानकथनं । तत्र दीर्घ-
तपाख्यानकथनञ्च । शम्बरस्वर्गारोहणविवरणकथनं । भानुमत्याः स्वर्गारोहणवृत्तान्त-
कीर्त्तनञ्च ।
अर्कतीर्थमहिमा । तत्र वृद्धया सह याज्ञवल्क्य-भरद्वाज-शाण्डिल्य-विभाण्डक-
शातातपप्रभृतीनामृषीणां संवादकथनं । आदित्येश्वरमाहात्म्यकथनं । तत्र ब्रह्म-
कृतत्रिज्वालास्तोत्रकथनं । अगस्त्यतीर्थवर्णनं । तत्र इन्द्रस्य पुरतो भरतेन दैत्य-
भारनिपीडितायाः पृथिव्या दुरवस्थादिवर्णनं । अगस्त्यकृतविन्ध्यगिरिरोधनविव-
रणकीर्त्तनञ्च । भस्माङ्गदवधविवरणकथनं । मणिनागतीर्थवर्णनं । शङ्खचूड़तीर्थमा-
हात्म्यकथनं । गोपारेश्वरलिङ्गमाहात्म्यकथनं । एवं पाराशरेश्वरादितीर्थमाहात्म्य-
कथनं । दधिच्छन्द-मधुच्छन्दादितीर्थपञ्चकविवरणकथनं । हनूमन्तेश्वरमाहात्म्य-
कथनप्रसङ्गेन शिखण्डिनः समीपे तत्कन्यया कलापिन्या पूर्व्वजन्मवृत्तान्तकीर्त्तनं ।
सोमनाथतीर्थमाहात्म्यकथनं । तत्र दक्षशापेन चन्द्रस्य क्षयप्राप्तिविवरणकथनं ।
पिङ्गलेश्वर-कपिलेश्वरयोर्माहात्म्यकथनं । तत्र रुद्रतेजसा सन्तप्तस्य वह्नेस्तीर्थवर्णनं ।
चक्रतीर्थमाहात्म्यकथनप्रसङ्गेन श्रीकृष्णकृतधुन्धुमारादिनिपातनवृत्तान्तकीर्त्तनं । आ-
दित्येश्वरमाहात्म्यकथनं । तत्र चण्डमुण्डकृतसूर्य्योपासनवृत्तान्तकीर्त्तनं । यमहास-
तीर्थमाहात्म्यकथनमुखेन नर्म्मदातीरे रजकमेकं पश्यतः पाण्डुराजस्य हास्यकरणादि-
वृत्तान्तकथनं । द्वीपेश्वरव्यासतीर्थमाहात्म्यकथनं । तत्र योजनगन्धया सह पराशरस्य
संवादकथनं । व्यासजन्मादिविवरणकीर्त्तनञ्च । प्रभासतीर्थकथनं । भैरवरूपमा-
स्थाय नृत्यतो महादेवस्य स्वेदमिश्रितं सलिलं पिवन्तं वासुकिमुद्दिश्य 'श्वपचो
भवेति' मन्दाकिन्या शापदानादिवृत्तान्तकीर्त्तनं । एरण्डतीर्थमहिमा । तत्र अनु-
सूयया सार्द्धं हरिहरब्रह्मादीनां संवादकथनादिकं । करण्डेश्वरमाहात्म्यकथनं ।
सौभाग्यतीर्थवर्णनं । गङ्गादिकृतनर्म्मदापूजनविवरणकथनं । नर्म्मदासागरयोः
संवादकथनं । तत्सङ्गममाहात्म्यकीर्त्तनञ्च । इति शम् । (इति रेवाखण्डस्य विवरणं) ।

No. 1746. स्कन्दपुराणीयसौरसंहिता ।

Substance, country-made paper, 13½ × 6 inches. Folia, 54. Lines, 7 on a page. Extent, 1,031 s'lokas. Character, Nágara. Date, Sm., 1835. Place of deposit, Nasípura, Zilá Murshidábad. Rájá Rámachánda Siñha. Appearance, fresh. Verse. Incorrect.

Saura Sañhitá.— A part of the Kás'í-khanda of the Skanda Purána. The codex comprises 16 chapters, but as the last chapter breaks off abruptly, the work is obviously incomplete. Contents : Puránas. Upa-Puránas. Vyása's adoration of S'iva. His compilation of the Vedas, and teaching thereof to Jaimini and others. His teachings on the attributes of the Deity. The character of the gods and characteristics of Dharma and the Puránas. Adoration of Súrya as the Divinity. Creation. Planets, their extent and motion. Adoration of Sadás'iva. The theory of illusion. Condemnation of Bauddha, Arhata, Pancha-pátra, Vináyaka, and other systems of philosophy. Sectarial marks. Destruction of sin. Praise of Ávimúkta, Benares, Ganges and other sacred places. Metaphysical disquisitions on the power of the soul and its relation to the Divinity. Ignorance and knowledge. The three essential qualities. Various philosophical theories and their value. Emancipation. Pre-eminence of the S'ruti. Yajnávalkya's hymn to Súrya.

Beginning. श्रीगणेशाय नमः। ॐ नमोऽखंपदार्थाय तत्पदार्थस्वरूपिणे।
भास्कराय नमस्तस्मै भवाय भवहारिणे ॥
नमः साम्बाय सर्व्वाय सर्व्वविज्ञानदायिने ।
स्वशक्तिरचितेदन्ता-हन्तारूपाय साक्षिणे ॥
समस्तजगदुत्पत्तिस्थितिनाशैकहेतवे ।
रुद्रविष्णुविरिञ्चादिस्वरूपाय नमो नमः ॥
प्रमाणानामगम्याय स्वयं भानाय केवलं। इत्यादि ।

End. इत्युक्ता भगवान् सूतः सर्व्वज्ञः साम्बमीश्वरं ।
ध्यात्वा ++ मया भक्त्या पपात विवशो ++ ॥
बालखिल्या महात्मानं व्यासशिष्यं क्षपाकरं ।
यथार्हं पूजयामासुः सूतं सुमनसः प्रियम् ॥

Colophon. इति श्रीस्कन्दपुराणे सौरसंहितायां षोड़शोऽध्यायः। शुभमस्तु। संवत् १८८५

विषयः। १ प्रथमे अध्याये,—सूतेन सह ऋषीणां संवादेन अष्टादशपुराणप्रस्तावकीर्तनं। उपपुराणकथनं। व्यासकृतशिवाराधनविवरणकथनं। तत्कृतवेदविभागकथनं तत्र ऋग्वेदस्य एकविंशतिशाखा, यजुर्वेदस्य शतैकशाखा, सामवेदस्य च सहस्र-शाखेति कथनं। विभागपूर्व्वकं जैमिन्यादिभ्यो वेददानविवरणकथनं। मुनीनां पुरतः कृष्णद्वैपायनेन परब्रह्मस्वरूपकथनं। तस्य शिव-शम्भु-महादेवादिनामकथ-नञ्च। धर्म्मस्य चोदनालक्षणत्वकथनं। चोदनाप्रामाण्यनिरूपणं। पुराणलक्षण-कथनञ्च।

२–५ अध्याये, याज्ञवल्क्यकृतसूर्य्योपासनाविवरणकथनं। तस्मै सूर्य्येण तत्त्वज्ञानो-पदेशदानकथनं। अभेदवादकथनं। जगत्सृष्टिकथनं। हिरण्यगर्भाद्युपाधिभेद-सप्तपातालानां स्वरूपकथनं। एवं स्वर्गाणां संस्थानादिकथनञ्च। वर्षादिस्थाननि-र्देशपूर्व्वकं जम्बूद्वीपसंस्थानादिकथनं। एवं ग्रहादीनां निरूपणं। आवहप्रवहादि-सप्तवायुनेमिनिरूपणं। नक्षत्रमण्डल-सप्तर्षिमण्डल-ध्रुवमण्डलादीनां दूरत्वादि-कथनं। सूर्य्य-चन्द्र-मङ्गलप्रभृतीनां मण्डलविस्तारादिपरिमाणकथनं। सदाशिव-लोकसंस्थानकथनपूर्व्वकं विस्तरतः सदाशिवरूपवर्णनं। जगत्कारणनिरूपणप्रसङ्गेन मायावादनिरूपणं। वेदान्तप्रशंसा। तत्र ब्रह्मकारणतावादस्य अभ्यर्हितत्वकथनं। आर्हतबौद्ध-पाशुपातवैनायकादितन्त्राणां निन्दाकीर्त्तनं।

६–१० अध्याये,—भस्मत्रिपुण्ड्रादिधारणमाहात्म्यकथनं। पापक्षयोपायकथनं। अवि-मुक्तमाहात्म्यकथनं। विश्वेश्वरमहिमा। वाराणसीवर्णनं। शिवगङ्गामाहात्म्यकथनं। गङ्गादिनानातीर्थमाहात्म्यकथनं। अध्यारोपादिस्वरूपनिरूपणं। अज्ञानलक्षणा-दिकथनं। आत्मस्वरूपादिकथनं। परमात्मजीवात्मनोरौपाधिको भेद इति निरू-पणं। विज्ञानमाहात्म्यकथनं। तदुपायकीर्त्तनं। तत्स्वरूपकथनञ्च। ज्ञानकारण-निरूपणञ्च।

११–१६ अध्याये,—सत्त्वरजस्तमोगुणानां प्रकृतिनिरूपणं। जीवस्वरूपविवेचनं। निर्गुणस्य आत्मनो बन्धहेतुनिरूपणं। तत्र आत्मनो देह-इन्द्रिय-मनः-प्राण-विज्ञान-शून्याद्यात्मकत्ववादकथनादिकं। मोक्षोपायकथनं। मोक्षस्वरूपनिरूपणञ्च। प्रत्य-क्षादिभ्यः श्रुतेर्बलवत्त्वकथनं। श्रुतिकल्पनायोग्यविषयनिरूपणं। श्रुतिसारकथनं याज्ञवल्क्यकृतसूर्य्यस्तोत्रकीर्तनञ्च॥

No. 1747. स्कन्दपुराणीयसूतसंहितायां शिवमाहात्म्यखण्डः ।

Substance, country-made paper, 17 × 5½ inches. Folia, 40. Lines, 6 on a page. Extent, 780 s'lokas. Character, Bengali. Date, ? Place of deposit, Nasípura, Zillah Murshidábád. Rájá Rámachánd Siñha. Appearance, new. Verse. Generally correct.

S'iva-máhátmya Khanḍa of the *Skanda Purána.* The Skanda Purána includes seven parts, of which the Súta Sañhitá forms a part of the 5th or Nágara Khanḍa. According to the introduction, the Sañhitá comprises four books or khanḍas, of which the codex under notice, which is known under the name given, contains only the first. It is divided into thirteen chapters, and devoted to the glory of S'iva. The first chapter gives a summary of the Puráṇas and of the Vedas with their several S'ákhás. Then follow four chapters on the glory of S'iva, the necessity and propriety of worshipping him, and the rituals appropriate for the purpose. The next three chapters are devoted to the adoration and glorification of S'ákta divinities, and their relation to S'iva. The last five chapters dwell upon Vishṇu as subordinate to S'iva.

Beginning. श्रीगणेशाय नमः । नारायणं नमस्कृत्य नरञ्चैव नरोत्तमं ।
देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ॥
ईश्वरं परमं तत्त्वमादिमध्यान्तवर्ज्जितं ।
आधारं सर्व्वलोकानामनाधारमविक्रियं ॥
अनन्तानन्दबोधाम्बुनिधिमद्भुतविक्रमं ।
अम्बिकापतिमीशानमनिशं प्रणमाम्यहं ॥
सत्रावसाने मुनयो विशुद्धहृदया भृशम् ।
नैमिषीया महात्मानमागतं रोमहर्षणं ॥
दृष्ट्वा यथार्हं सम्पूज्य प्रसन्नेन्द्रियमानसाः ।
पप्रच्छुः संहितां पुण्यां सूतं पौराणिकीं मुदा ॥
एवं पृष्टो मुनिश्रेष्ठैः सूतः सर्व्वार्थदायिनं ।
महादेवं महात्मानं ध्यात्वा व्यासञ्च भक्तितः ॥
समाहितमना भूत्वा विलोक्य मुनिसत्तमान् ।
वक्तुमारभते सूतः संहितां श्रुतिसम्मितां ॥ इत्यादि ।

End. ध्यात्वा हृत्पङ्कजे भक्त्या प्रसन्नेन्द्रियमानसः ।
प्रणम्य दण्डवद्भूमौ महादेवं जगद्गुरुं ॥
वेदव्यासश्च संसारसमुद्रतरणप्लवं ।
हिताय मुनिशार्दूलाः कैलासमचलं गतः ॥

Colophon. इति श्रीस्कन्दपुराणे सूतसंहितायां शिवमाहात्म्यखण्डे त्रयोदशोऽध्यायः समाप्तः
प्रथमः खण्डः समाप्तः ॥

विषयः । १ प्रथमे अध्याये,—सूतेन सह ऋषीणां संवादेन अष्टादशपुराणनामकथनपूर्व्वकं तेषां चतुर्लचश्लोकसम्मितत्वकथनं । एवमष्टादशोपपुराणनामकथनप्रसङ्गेन तेषां लचश्लोकपरिमाणत्वकीर्त्तनञ्च । स्कन्दपुराणस्य सनत्कुमारसूत-शाङ्कर-वैष्णव-ब्राह्म-सौरभेदात् षड्विधसंहिताकथनं । साकल्येनैषां पञ्चपञ्चाशत्सहस्रमितग्रन्थसङ्ख्याकथनं । तथा प्रत्येकं श्लोकसङ्ख्याकीर्त्तनं । सूतसंहितायाः शिवमाहात्म्य-ज्ञानयोग-मुक्ति-यज्ञवैभवभेदेन चतुःखण्डकथनं । तत्र प्रत्येकं अध्यायश्लोकसङ्ख्यादिनिरूपणं । ऋग्वेदादीनां शाखादिकथनं ।

२—५ अध्याये,—शिवसन्दर्शनार्थं केशवादीनां रुद्रलोकगमनवृत्तान्तकथनं । तेषां करुणोक्तिं निशम्य शिवस्य अर्द्धनारीश्वररूपेण आविर्भावादिवृत्तान्तकीर्त्तनं । भगवत ऐश्वर्य्यवर्णनञ्च । एकदा 'अहमेव जगत्कर्त्ता मय्येवेदं स्थितं जगत् । मत्तसमधा-धिकश्चापि नास्ति सर्व्वत्र सर्व्वदा ॥' इत्यहङ्कारसंच्छन्नस्य विष्णोः शिवेन शक्तिसमा-हरणविवरणकथनं । सर्व्वेषां सुराणां पुरतो नन्दिना शिवमाहात्म्यकथनं । तदा तत्र शिवस्य आविर्भावदर्शनेन देवैस्तत्स्तोत्रकथनं । शिवपूजाविधिकीर्त्तनं । तत्र सन्न्यासिनां स्त्रीणाञ्च विशेषकथनादिकं । शिवपूजामाहात्म्यकथनप्रस्तावेन ब्राह्मण-कुलघातकस्य कस्यचित् पुक्कसस्य उपाख्यानकथनञ्च ।

६—८ अध्याये,—शक्तिपूजाविधिकथनं । तत्र साधार-निराधारभेदाद् विधिपूजा-निरूपणं । शिवभक्तस्य विशेषपूजाविधिकथनं । तत्र वाराणसीवासिनः कस्यचिद् वैश्यस्य आख्यानकथनं । विन्ध्याचलेश्वरमाहात्म्यकीर्त्तनञ्च । सलक्ष्मीकस्य हरेः व्यासेन सह शिवलोकगमनवृत्तान्तकथनं । तत्र तेषां प्रार्थनया शिवेन तत्त्वज्ञानस्य अभ्यर्हितत्वकथनं । तत्त्वज्ञाने द्विजातीनां मुख्याधिकारकथनं । स्त्रीशूद्रादीनां ज्ञानोपायकथनं । मुक्तिचेत्रनिरूपणं । कालसङ्ख्यानिरूपणं । तत्र कलाकाष्ठादि-परिभाषाकथनं । माया-अविद्या-करण-अव्यक्तादिशब्दानां प्रवृत्तिनिमित्तकथनञ्च । हरिहरब्रह्मादीनां त्रिगुणात्मकत्वादिकथनञ्च ।

९—१२ अध्याये,—नारायणशब्दनिर्व्वचनं । शिवाज्ञया वराहरूपधारिणा विष्णुना सागरगर्भे निमग्नायाः पृथिव्या उद्धारादिविवरणकथनं । सनकादिकृतवराहस्तोत्र-

कथनं। विरिञ्चिकृतसृष्टिविवरणकथनं। तत्र ऊर्द्ध्वस्रोतआदिसृष्टिनिरूपणं। हिरण्यगर्भ-सूत्रात्म-प्रभृतिस्वरूपनिरूपणं। जातिनिर्णयः। सङ्करजातीनामुत्पत्तिकथनं। वाराणस्यादितीर्थमाहात्म्यकथनं। शिवमाहात्म्यखण्डश्रवणादिफलश्रुतिकीर्त्तनञ्च।

No. 1748. स्कन्दपुराणीयसह्याद्रिखण्डः। उत्तरविभागः।

Substance, country-made paper, $14\frac{1}{4} \times 7$ inches. Folia, 225. Lines, 8—9 on a page. Extent, 4,998 ślokas. Character, Nágara. Date, Sм. 1836. Place of deposit, Nasípura, Zillah Murshidábad. Rájá Rámachánd Siñha. Appearance, fresh. Verse. Incorrect.

Sahyádri Khaṇḍa of the *Skanda Puráṇa.* This work is devoted to the sacred places of pilgrimage in western India on the Western Ghauts and along the Godávarí river from its source to its mouth; the sacred places noticed most in detail being those which exist on the Sahyádri Hill, whence its name.

Beginning. ॐ नमो भगवते वासुदेवाय। युधिष्ठिर उवाच।

कथितानि मुनिश्रेष्ठ तीर्थानि भवता मम।
क्षेत्राणि चैव मुख्यानि वत्स + वनवासिनां॥
वदर्य्यादीनि स्थानानि नैमिषं पुष्करस्तथा।
सह्याद्रेर्द्दण्डकारण्यमाहात्म्यं वद सुव्रत॥
मार्कण्डेय उवाच। शृणु वत्स प्रवक्ष्यामि सह्याद्रेर्द्दण्डके वने।
देवदेवः स्वयं यत्र सदा तिष्ठति दैत्यहा॥
दत्तात्रेयो मुनिर्य्यत्र यत्र देवी च रेणुका।
रामस्तु सर्व्वदा यत्र संस्थितो भगवान् स्वयं॥
यस्मिन् क्षेत्रे महाराज द्विसप्ततिचतुर्म्मुखाः।
मुक्तिं प्राप्तास्तथा सर्व्वे सिद्धयः सनकादयः॥
कृष्णधात्रीफली यत्र वृक्षस्तिष्ठति सर्व्वदा।
यत्र देवस्य देवास्य शिवस्य परमेश्वरः॥ इत्यादि।

End. पुस्तकं धर्म्मशास्त्रञ्च यो ददाति ++ द्विज।
शतमन्वन्तरान् पितॄन् तारयेन्नरकादपि॥
वेदविद्यां नरो दत्त्वा स्वर्गे कल्पत्रयं वसेत्।
आत्मविद्याञ्च यो दद्यात्तस्य सङ्ख्या न विद्यते॥

धर्म्मशास्त्रं नरो बुद्धा यं कश्चिद्धर्म्ममाचरेत् ।
तस्य दत्त्वा दशगुणं पुण्यं शास्त्रे च जायते ॥

Colophon. इति श्रीस्कन्दपुराणे सह्याद्रिखण्डे त्र्यशीतितमोऽध्यायः ।
समाप्तोऽयमुत्तरविभागः । संवत् १८२६ ।

विषयः । १, २ अध्याये,—मार्कण्डेयेन सह युधिष्ठिरस्य संवादेन दत्तात्रेयस्य मुनेर्जन्मवृत्तान्तकीर्त्तनं। तत्र दस्युभिः सार्द्धं बद्धस्य माण्डव्यस्य शूलारोपणविवरणकथनं। अथ निशीथे निविड़ान्धकारतया पन्थानं ज्ञातुमसमर्थायाः कस्याश्चित् पतिव्रतायाः शिरःस्पर्शेन द्विगुणितक्लेशेन माण्डव्येन तामुद्दिश्य 'सूर्य्योदये त्वं विधवा भविष्यसीति' शापः प्रदत्तः। तस्याः प्रभावेणैव दिवाकरो देवमानेन सहस्राणि वर्षाणि नोदेति-इति वृत्तान्तकथनं । पतिव्रता-तत्पत्योः पूर्व्वजन्मवृत्तान्तकीर्त्तनं। ततः हरिहरादिभिरभ्यर्थितया अनुसूयया संस्तुतायाः भर्तुरनायासलब्धलाभेन प्रीतिमापन्नायाः तस्याः अनुमत्या पुनः सूर्य्योदयादिकथनञ्च ।

३–७ अध्याये,—'पुत्रास्त्रयो मे भवन्त्विति' देवानां पुरतोऽनुसूयायाः प्रार्थनादिकथनं। सह्याद्रौ दण्डकारण्ये अत्रेराश्रमशोभावर्णनं। अनुसूयागर्भे विष्णोर्जन्मग्रहणकथनं । तस्य दत्तात्रेयसमाख्याकथनञ्च । तथा शिवपितामहयोः तद्गर्भे जन्मग्रहणकथनं । तयोः यथाक्रमेण दुर्व्वासःसोमेति नामप्राप्तिकथनञ्च। भूगोलसंस्थानकीर्तनं। दत्तात्रेयस्य आश्रमे कृष्णामलकवृक्षतले चतुर्भुजस्य विष्णोरवस्थानकथनं। कृष्णामलकवृक्षस्य उद्भवादिकथनं। गद्येन ब्रह्मणा कृतं विष्णुस्तोत्रं। तत्र तत्कृतविष्णुप्रतिमाप्रतिष्ठाकथनं। धातृदर्शनलालसस्य दुर्व्वाससः सोमलोकगमनादिविवरणकीर्तनं। दत्तात्रेयस्य पुरतः परशुरामेण कार्तवीर्य्यार्ज्जुनस्य दुश्चेष्टितादिकथनं। तत्र जमदग्निरेणुकयोरन्त्येष्टिक्रियासम्पादनादिकथनञ्च ।

८–११ अध्याये,—सह्याद्रौ सर्व्वेषां तीर्थानामवस्थानकथनं । भानुतीर्थकथनं। तत्र भानुना निजकन्याहरणवृत्तान्तकीर्त्तनं। ब्रह्मतीर्थमाहात्म्यादिकथनं। गौतमतीर्थमाहात्म्यादिकथनं । अगस्त्यतीर्थमाहात्म्यादिकीर्त्तनं। एकदा द्वादशवार्षिक्या अनावृष्ट्या पीड़ितानामृषीणां वैक्लव्यदर्शनेन सन्तप्तहृदयेन गौतमेन तपोबलेन व्रीहीन् समुत्पाद्य तेभ्यो भोजनदानवृत्तान्तकीर्तनं। पद्मतीर्थमाहात्म्यादिकथनं। तत्र शृङ्गवेरपुराधीशस्य वज्रधरस्य नृपतेरुपाख्यानकथनं। गदातीर्थमाहात्म्यकथनं। सोमतीर्थकथनं। पुत्रतीर्थकथनं। लक्ष्मीतीर्थकथनं। वाणतीर्थकथनं। इन्द्रतीर्थकथनं । खड्गतीर्थकथनं । गदातीर्थे रामचन्द्रेण वनवासगतेन दशरथमुद्दिश्य पिण्डदानवृत्तान्तकथनं। चन्द्रेण ताराहरणविवरणकथनं। गदातीर्थादीनामुत्पत्तिकथनञ्च ।

विषयः। १२–१४ अध्याये,—तपसा सन्तोषितादाशुतोषात् वाणेन सहस्रबाहुत्वलाभवृत्तान्त-कीर्तनं। परिणयसमये गिरिजायाः रूपदर्शनेन मुग्धस्य ब्रह्मणः रेतःसेकात् बालखिल्यादीनां मुनीनामुत्पत्तिकथनं। अमरतीर्थमाहात्म्यादिकथनं। वसुतीर्थ-माहात्म्यकथनं। माहेश्वरतीर्थमाहात्म्यकथनं। शङ्खतीर्थमाहात्म्यकीर्तनं। तच्च शङ्खासुरकृतवेदहरणवृत्तान्तकथनं। चक्रतीर्थमाहात्म्यकथनं। वद्रतीर्थमाहात्म्य-कथनं। बलाहकतीर्थमाहात्म्यकथनं। एवं स्कन्दतीर्थ-गोतीर्थ-दुर्गातीर्थ-हंसतीर्थ-पुष्करतीर्थ-वह्नितीर्थ-मयूरतीर्थानां माहात्म्यकथनं। कालजिह्वाभिधानस्य असुर-राजस्य शिवाद् वरप्राप्तिकथनं। हयशीर्षरूपेण भगवता तन्निपातनविवरणकथनं। तच्च हयशीर्षस्य रूपादिवर्णनञ्च। लक्ष्मीतीर्थमाहात्म्यकथनं।

१५–१७ अध्याये,—कर्णधाराभिधेयस्य राज्ञः कर्मविपाकेन शृगालयोनौ जन्मादि-विवरणकथनं। चक्रतीर्थमाहात्म्यकथनं। एकादशरुद्राणां रूपवर्णनादिकं। चक्र-तीर्थाद् वाष्परूपेण मेघानामुत्पत्तिकथनं। कार्तिककृततारकासुरविजयवृत्तान्त-कीर्तनं। चियचोः पितामहस्य गव्याभावेन तत्र अकृतार्थस्य च तपस्यादिवर्णनं। देवीकृतदुर्गासुरवधवृत्तान्तकीर्त्तनं। वृषाकपिनामकतीर्थस्य माहात्म्यकथनप्रसङ्गेन धेनुकाद्यसुरवधजनितपापेन सन्तप्तहृदयस्य श्रीकृष्णस्य नारदोपदेशेन चक्रतीर्थ-गमनादिविवरणकथनं। वृषाकपिनामप्राप्तिकथनं। वृषाकपिरूपवर्णनञ्च। हंस-रूपस्य भगवतः चक्रतीर्थागमनवृत्तान्तकथनं। खाण्डवदाहकस्य दहनस्य चक्र-तीर्थागमनवृत्तान्तकथनं। रूपवर्णनञ्च। मयूरतीर्थमाहात्म्यकथनप्रसङ्गेन कार्तिक-तारकयोः युद्धसमये गरुडांशस्य मयूरस्य उत्पत्त्यादिकथनं।

१८, १९ अध्याये,—पुरा किल कर्दमो नाम प्रजापतिः देवहूत्यां वासुदेवांशभूतं कपिलाभिधानं पुत्रमजीजनत्। अथ कपिलेन अनिच्छतापि पितुरनुज्ञया तपस्यातो निवृत्तेन देवहूत्याः पुरतः साङ्ख्ययोगः कथित इति विवरणकथनपूर्व्वकं कपिलतीर्थमाहात्म्यकीर्तनं। कर्दमतीर्थकथनं। देवहूतितीर्थकथनं। सिद्धतीर्थ-कथन। महिषासुराद् भीतानामिन्द्रादीनां लोकपालानां सह्याद्रिगमनपूर्व्वकं। तत्र खखनाम्ना तीर्थकरणवृत्तान्तकथनं। सिद्धनद्या उत्पत्तिविवरणकथनं। महा-देवप्रसादेन गयासुरशरीरस्य पवित्रताकथनं। तस्य मस्तकं गृहीत्वा ब्रह्मणो यज्ञा-नुष्ठानवृत्तान्तकथनं। गयशिरसि पिण्डदानादिमाहात्म्यकथनञ्च।

२०, २१ अध्याये,—कोटीश्वरतीर्थमाहात्म्यकथनं। तत्र शतबिन्दुतीर्थमाहात्म्य-कीर्त्तनं। सहस्रबिन्दुतीर्थमाहात्म्यकीर्त्तनं। सोमतीर्थमाहात्म्यकथनं। अग्नितीर्थ-माहात्म्यकथनं। सूर्य्यतीर्थमाहात्म्यकथनप्रसङ्गेन द्वादशादित्यध्यानकथनं। विरज-तीर्थ-शिवतीर्थ-पद्मतीर्थ-हरितीर्थादिमाहात्म्यकथनं। कपिलतीर्थमाहात्म्यकथन-

विषयः। प्रस्तावेन भगवत्प्रीत्यर्थं रन्तिदेवस्य तपस्यादिवर्णनं। तत्र कपिलाभिधानायाः नद्याः उत्पत्तिकथनञ्च। करूषतीर्थमाहात्म्यकथनं। तत्र सिन्धुदेशेषु कश्चिद् ब्राह्मण आसीत्। तस्य सुमतिः सुरुचिश्चेति द्वौ पुत्रौ बभूवतुः। अथैकदा वेश्यासक्तेन सुरुचिना सुरापानेन उन्मत्ततया चौरबुद्ध्या कश्चिद् ब्राह्मणो हतः, हतश्च तेन प्रजावतीसतीत्वरत्नमितिवृत्तान्तकीर्त्तनं। कर्म्मतीर्थ-पितृतीर्थादिमाहात्म्यकथनं। रेणुकातीर्थमाहात्म्यकथनप्रसङ्गेन रेणुकाजमदग्न्योः प्राणनाशनपूर्व्वकं कार्त्तवीर्य्यार्ज्जुनेन धेनुहरणवृत्तान्तकीर्त्तनं।

२२–२५ अध्याये,—शक्तितीर्थमाहात्म्यकथनं। तत्र सरस्वती-गौरीप्रभृतीनां शक्तीनां ध्यानादिकथनञ्च। शेषतीर्थकथनं। तत्र शेषपर्य्यङ्कशयानस्य भगवतो ध्यानकथनं। रत्नगिरिवर्णनं। मातृतीर्थकथनं। ब्रह्मतीर्थकथनं। सोमतीर्थकथनं। रामतीर्थकथनं। शिवतीर्थकथनं। वैनायकतीर्थकथनं। फल्गुतीर्थकथनं। कालिकातीर्थकथनञ्च। तत्र मातृकाणां रूपकथनं। सर्व्वतीर्थमाहात्म्यकथनं। अम्बातीर्थमाहात्म्यकथनं। दक्षिणामूर्त्तेः शिवस्य रूपवर्णनादिकं। अष्टवसुकथनं। तत्र वसूनां प्रत्येकं ध्यानकथनं। भास्करालयतीर्थमाहात्म्यकथनं। तत्र सिद्धचण्डिकायाः ध्यानादिकथनं। धर्म्मस्य रूपकथनं। आयुर्व्वेद-धनुर्व्वेद-शिक्षा-कल्प-व्याकरण-निरुक्त-छन्दो-ज्योतिष-मीमांसा-न्याय-धर्म्मशास्त्र-पुराणेतिहास-नृत्य-शास्त्र-पञ्चरात्र-पाशुपत-पातञ्जल-साङ्ख्यादीनां शास्त्राणां ध्यानकथनं, तत्र तत्र अधिष्ठातृदेवताकीर्त्तनञ्च।

२६–३० अध्याये,—नारदादीनां ध्यानकथनं। काल-निमेष-काष्ठा-कला-क्षण-मुहूर्त्त-प्रहरादिध्यानकथनं। नरसिंहध्यानकथनं। गरुड़-विनायक-स्कन्दानां रूपवर्णनं। लक्ष्मीनारायणरूपवर्णनं। वासुदेव-सङ्कर्षण-प्रद्युम्नानिरुद्धरूपचतुर्व्यूहस्य रूपवर्णनं। भगवतः मत्स्यावतारे शृङ्गिमत्स्यरूपलकथनं। बलराम-कृष्ण-प्रद्युम्नानिरुद्ध-शाम्बप्रभृतीनां रूपकथनं। कल्किरूपस्य भगवतो रूपवर्णनं। बुद्धस्य रूपकथनं। व्यासस्य रूपवर्णनं। धन्वन्तरिरूपवर्णनं। आमलीग्रामस्य चतुर्द्वारेषु स्थितानां हाटकेशादीनां माहात्म्यकथनं। कपालमोचनतीर्थमाहात्म्यकथनप्रसङ्गेन शिवकृतब्रह्मशिरश्छेदनवृत्तान्तकथनादिकं। शङ्करतीर्थविवरणकथनं।

३१–३९ अध्याये,—सिद्धतीर्थयात्राप्रकारादिकीर्त्तनं। मानसतीर्थयात्राप्रकारकथनं। उत्तरमानसतीर्थयात्राप्रकारकथनं। सप्तक्रोशीतीर्थमाहात्म्यकथनं। तत्र यात्राप्रकारकीर्त्तनञ्च। गोण्डलीतीर्थमाहात्म्यनिरूपणं। तत्र नृत्यगीतादिलक्षणकीर्त्तनं। तत्तत्कालनिरूपणञ्च। गायकलक्षणं। रागकथनपूर्व्वकं तद्दारापत्यादिनिरूपणं। वैखरीपश्यन्तीप्रभृतीनां स्थानादिनिरूपणं। चैत्रशुक्लपञ्चम्यां मघानक्षत्रे रुद्रस्य

विषयः। जन्मकथनं। कार्त्तिकपौर्णमास्यां चण्डनामकदैत्यशरीरेण चण्डकाभिधानायाः वीणायाः उत्पत्त्यादिकथनं। महादेवात् तालोत्पत्तिकथनं। नाट्य-नृत्त-नृत्यानां पार्थक्यकथनमेषामवान्तरभेदकथनञ्च। ताण्डवलास्ययोरुत्पत्तिकथनं। स्थानविशेषे नृत्यविशेषनियमनं।

४०—४६ अध्याये,—रेणुकासहस्रनामस्तोत्रकथनं। रेणुकापूजनविधानादिकीर्त्तनं। असुरगणनिर्ज्जितस्य निर्ज्जरेन्द्रस्य क्षीरोदशायिना सह संवादादिकथनं। कान्यकुब्जाधिपस्य रेणुराजस्य कन्यात्वेन अदितेर्जन्मग्रहणकथनादिकं। तस्याः एकवीरा रेणुका चेति नामद्वयकथनं। अग्निं प्रति 'सर्व्वभक्ष्यो भवेति' भृगोः शापदानवृत्तान्तकथनं। जमदग्नेर्जन्मविवरणकीर्त्तनं। जह्नुवंशकथनं। ऋचीकवंशकीर्त्तनं। रेणुकास्वयम्बरवर्णनं। तथा सार्द्धं जमदग्नेः परिणयविवरणकीर्त्तनं। रेणुकाकृतकाम्बोजादिदेशजयकथनं। रेणुकायाः पञ्चपुत्रजननकथनादिकं। परशुरामस्य उद्भवादिकथनं।

४७—६१ अध्याये,—तपस्यया सन्तोषितात् महादेवात् परशुरामेण पाशुपताद्यस्त्रप्राप्तिकथनं। सृष्टेः पूर्व्वं विश्वमिदं ज्वालामालाकुलमासीत्। तत्रैकदा महादेवेन सह प्रभारूपायाः कस्याश्चित् नार्य्याः संवादकथनं। जमदग्निरूपेण महादेव एव अवततार इति कथनादिकं। रेणुकावधवृत्तान्तकीर्त्तनं। तस्याः पुनर्जीवनकथनञ्च। मूर्त्तिमता क्रोधेन सार्द्धं जमदग्नेः संवादकथनं। कार्त्तवीर्य्यार्ज्जुनस्य उद्भवादिकथनं। तस्मात् दशग्रीवस्य निग्रहादिवृत्तान्तकीर्त्तनं। अर्ज्जुनकृतकामधेनुग्रहणविवरणं। दत्तात्रेयाश्रमे रामकृतरेणुकामूर्त्तिप्रतिष्ठावृत्तान्तकथनं।

६२—७० अध्याये,—अर्ज्जुनस्य दुर्न्निमित्तदर्शनविवरणकीर्त्तनं। रामकृतमाहिष्मतीपुरीदाहनवृत्तान्तकीर्त्तनं। रामार्ज्जुनयोरद्भुतयुद्धवर्णनं। परशुरामस्य दिग्विजयवर्णनं। तस्य कैलासगमनवृत्तान्तकथनं। राक्षसैः सार्द्धं समरसंरम्भवर्णनञ्च। स्यमन्तपञ्चकतीर्थवृत्तान्तकथनं। रामतीर्थविवरणकथनं। प्रत्यक्षतां गताभ्यां मातापितृभ्यां सह परशुरामस्य संवादकथनादिकं। यजमानेन रामेण कश्यपाय पृथिवीदानविवरणकथनं।

७१—७५ अध्याये,—विस्मृतवेदचतुष्टयस्य ब्रह्मणो रेणुकाश्रमे तपस्यावर्णनं। दत्तात्रेयप्रसादेन तस्य वेदप्राप्तिकथनं। पुत्रविक्रयजनितपापेन अजीगर्त्तस्य निरयगमनवृत्तान्तादिकीर्त्तनं। नरकवर्णनं। इन्द्रद्युम्नस्य उपाख्यानकथनं। हेमकुण्डाभिधानस्य विप्रस्य प्रयागतीर्थे पितृलोकदर्शनवृत्तान्तकीर्त्तनं। विष्णोर्देवदेवेश्वरनामप्राप्तिविवरणकथनं। दत्तात्रेयस्य गार्हस्थ्यादिभ्यः पञ्चमाश्रमाश्रयत्वकथनं। कृष्णामलकवृक्षस्य उत्पत्त्यादिकथनं। वाभ्रिकस्य द्विजस्य उपाख्यानकथनं। अश्वत्थाम-

तीर्थमाहात्म्यादिकथनं। मूर्त्तिमता हेमगिरिणा सार्द्धं देवानां रेणुकाश्रमगमन-विवरणकथनं। शृङ्गवेरपुराधिपतेः वज्रधारस्य नृपतेरुपाख्यानकीर्त्तनं। ७६-८२ अध्याये,—वज्रधारेण शाखामृगस्य कस्यचित् ब्राह्मणस्य प्राणनाशनवृत्तान्त-कीर्त्तनं। शाखामृगस्य जन्मवृत्तान्तकथनं। यमकिङ्करताड़ितस्य अन्तरिक्षस्थस्य कस्यचित् पुरुषस्य अगस्त्येन सह संवादकथनं। भास्करालयमाहात्म्यकथनं। तत्र रिरंसया आगच्छन्तं भास्करं दृष्ट्वा उषायाः मृगीरूपेण पलायनवृत्तान्तकथनं। चक्रतीर्थमाहात्म्यकथनं। तत्र जम्बूकस्य उपाख्यानकथनं। शङ्करतीर्थवर्णनं। कोटीश्वरमाहात्म्यादिवर्णनं। पटेश्वरमाहात्म्यवर्णनं। कार्त्तिकमाससमाहात्म्यकथनं। कन्यादानादिमाहात्म्यकथनं। विवाहकालादिकथनं। कन्याविक्रये महापाप-कथनं। उपनयनसंस्कारादिकरणे फलश्रुतिकथनं। विद्यादानमाहात्म्यकीर्त्तनञ्च। इति स्कन्दपुराणीयसह्याद्रिखण्डोत्तरविभागस्य विवरणम्।

No. 1749. स्कन्दपुराणीयसह्याद्रिखण्डे तुरजामाहात्म्यविभागः।

Substance, country-made paper, 14 × 7 inches. Folia, 67. Lines, 12 on a page. Extent, 4,128 s'lokas. Character, Nágara. Date, ? Place of deposit, Nasípura, Zilláh Murshidábád, Rájá Rámachánd Siñha. Appearance, fresh. Verse. Incorrect.

Turajá Máhátmya.—The history of Turajá *alias* Tvaritá, a goddess. She was the wife of a Rishi named Kardama. On his death she was about to ascend the funeral pile of her lord, but desisted on a celestial voice preventing her. She then retired to the Himálaya to pass the rest of her life in devotion. A demon encountered her on a peak on the Himálaya, and was so struck by her charms as to be impelled to offer her violence. A goddess descended from heaven, and saved her. In the course of giving this narrative, the author recounts a number of stories, and the religious merits of a great number of sacred places in Central India. A brief account of the Rámáyaṇa is also given. The work extends to 15 chapters, and professes to be a part of the Sahyádri Khaṇḍa of the Skanda Purána. The name is sometimes written Tulajá.

Beginning. श्रीगणेशाय नमः। नारायणं नमस्कृत्य नरञ्चैव नरोत्तमं।
देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत्॥
ऋषय ऊचुः। महासेन महादेवनन्दनानन्तविक्रम।

सर्व्वज्ञाननिधे सौम्य शिवाह्लादकर प्रभो ॥
त्वत्प्रसादेन चास्माभिरितिहासाः सहस्रशः ।
पुराणानि च सर्व्वाणि श्रुतानि देववल्लभ ॥
न तृप्तिमधिगच्छामः सुधास्वाद् यथामराः ।
कथिता या त्वया देव त्वरिता नाम देवता ॥
अपरं तुरजा नाम तस्या जातं कथं विभो ।
यमुनाद्रौ किमर्थं सा अवतीर्णा विकाशिता ॥
एतदिच्छामहे श्रोतुमनुग्राह्या भवाम ते ।
साकल्येन तु नो ब्रूहि त्वरितायाः कथामिमां ॥
स्कन्द उवाच । शृण्वन्तु ऋषयः सर्व्वे देवीमाहात्म्यमुत्तमं ।
कैलासशिखरासीनं शङ्करं पार्व्वतीपतिं ॥ इत्यादि ॥

End. उक्तवान् मुनयः श्रेष्ठाः तत्सर्व्वं कथितं मया ।
अविद्यारहितो भूत्वा ततः सिद्धिं गमिष्यति ॥

Colophon. इति श्रीस्कन्दपुराणे सह्याद्रिखण्डे तुरजामाहात्म्यविभागे शिववसिष्ठसंवादे द्वाविंशतितमोऽध्यायः । शुभमस्तु ।

विषयः । १–३ अध्याये,—शिवेन सह वसिष्ठनामकस्य ऋषेः संवादे त्वरितापराभिधानायाः तुरजायाः माहात्म्यकीर्त्तनं । पुरा किल कृतयुगे कर्द्दमो नाम कश्चिद् ब्राह्मण आसीत् । एकदा कालधर्म्ममुपागते तस्मिन् तत्पत्नी सहमरणार्थं कृतनिश्चया आकाशवाणीमुपश्रुत्य ततो निवृत्तापि नितरां निर्व्वेदमापन्ना तपश्चरणार्थं त्वरितं सुमेरुप्रदेशं प्रययौ । तत्र च कुक्कुराभिधानः कश्चिद् दानवेन्द्रः मृगयार्थमागतः तां वीक्ष्य सञ्जनितकामतया तदभिप्रायमनाकलय्यैव आक्रमणाय कृतोद्यमो बभूव । अत्रान्तरे त्वरितायाः देव्याः आविर्भावादिकथनं ।

४–९ अध्याये,—परशुरामं प्रति त्वरितामूर्त्तेः रेणुकायाः रामलक्ष्मणयोः भाविवृत्तान्तवर्णनं । तत्र सङ्क्षेपेण रामस्य वनवासवृत्तान्तकीर्त्तनं । तत्र रामेण रेणुकादर्शनानन्तरं तत्स्तोत्रकथनं । पुनश्च रामकृतसहस्रनामस्तोत्रकीर्त्तनं । रामं प्रति रेणुकया वनवासोपयुक्तदेशदानविवरणकथनं । रामतीर्थकथनं । लक्ष्मणतीर्थकथनं । त्वरितया देव्या सह ब्रह्मणः संवादकथनं । वासवादिभिः सर्व्वैः देवैः गङ्गादिभिश्च सर्व्वाभिः देवीभिः सार्द्धं ब्रह्मणः तत्र अवस्थानकथनं । ब्रह्मणा आज्ञापितेन विश्वकर्म्मणा तत्र विचित्रपुरीनिर्म्माणकथनं ।

१०–१४ अध्याये,—त्वरिताश्रमे तीर्थभूतानां सर्व्वासां नदीनामागमनवृत्तान्तकथनं । कल्लोलतीर्थमाहात्म्यकथनं । अमृततीर्थमाहात्म्यकथनं । तत्र तत्र

स्नाने सर्व्वरोगशान्तिकथनं। धारातीर्थस्य उत्पत्तिकथनं। तन्माहात्म्यकथनञ्च। धारायाः त्रिवेणीत्वकथनं। ब्रह्मकुण्डमाहात्म्यकथनं। विष्णुतीर्थमाहात्म्यकथनं। गौतमस्य विष्णुप्रीत्यर्थं धारातीर्थे तपश्चरणवृत्तान्तकीर्त्तनं। गौतमकृतविष्णुस्तोत्र-कथनं। तत्कृपया गौतमस्य इन्द्रद्युम्नरूपेण जन्मग्रहणकथनं। औदुम्बरतीर्थ-माहात्म्यकीर्त्तनं। नागतीर्थमाहात्म्यकीर्त्तनं। रावणानुजेन ऐरावणेन पातालात् निर्वासितेन नागराजेन ललितात्रमगमनपूर्व्वकं तपस्यानुष्ठानादिवर्णनं। मातङ्गी-तीर्थमाहात्म्यकथनं।

१५ अध्याये,—राक्षसाधिपतेः मतङ्गस्य उपाख्यानकीर्त्तनं। तत्पीड़ितानां देवानां कात्यायनीस्तोत्रकीर्त्तनं। सिंहवाहिन्या तया सह मतङ्गस्य समरसंरम्भवर्णनं। तत्र तत्सैनिकयोः निशुम्भहयग्रीवयोः विनाशादिकथनं। मातङ्ग्या आविर्भावादि-कथनं। मातङ्ग्या शरविद्धस्य मतङ्गस्य भुजङ्गादिरूपग्रहणविवरणकथनं। नृसिंह-तीर्थमाहात्म्यकीर्त्तनं। गोकुलतीर्थमाहात्म्यकथनं। ललितायाः पूजाविधानकी-र्त्तनं। सा तु आश्विनशुक्लप्रतिपद् आरभ्य नवमीपर्य्यन्तं यावत्—इति कथनं। तत्र पञ्चपल्लव-पञ्चामृत-पञ्चगव्यादीनां लक्षणपरिभाषादिकथनं। अन्यान्यसमयेऽपि तस्याः पूजाकथनं। दत्तात्रेयपूजाविधिकथनं। देवीदर्शनार्थं यात्राविधानकथनं। फलश्रुतिकीर्त्तनञ्च।

No. 1750. स्कन्दपुराणीयशम्भलग्राममाहात्म्यम्।

Substance, country-made paper, 13½ × 7¼ inches. Folia, 74. Lines, 8 on a page. Extent, 1,812 s'lokas. Character, Nágara. Date, ? Place of deposit, Nasípura, Zilláh Murshidábád, Rájá Rámachánd Siṅha. Appearance, fresh. Verse. Incorrect.

S'ambhalagráma Máhátmya.—A part of the Bhúmi Khaṇḍa of the Skanda Puráṇa. It is devoted to the religious merits of the various sacred places and pools in the Province of S'ambhala-gráma—modern Sambhalpur. As usual, each sacred place has a story attached to it, to illustrate its virtues and sin-removing powers. The work extends to 24 chapters. It is a local legend, not named in the account of the Puráṇas given in the Nárada Puráṇa.

Beginning. ॐ नमः परमात्मने। नारायणं नमस्कृत्य नरञ्चैव नरोत्तमं।
देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत्॥
+ + + + काले पुष्यन्ति पादपाः।

वर्षन्ति तोयदाः काले तस्मात् कालं न लङ्घयेत् ॥
गायत्रीमन्त्रतो ++ दत्तं येनाञ्जलित्रयं ।
काले सवित्रे किन्न स्यात् तेन दत्तं जगत्त्रयं ॥
किं किं न सविता सूते काले सम्यगुपासितः ।
आयुरारोग्यमैश्वर्य्यं वसूनि सपशूनि च ॥
पुत्रमित्रकलत्राणि क्षेत्राणि ++ धानि च ।
भोगाश्च विविधाश्चापि स्वर्गं वाप्यपवर्गकं ॥
दुर्ल्लभा सर्व्वमन्त्रेषु गायत्री प्रणवान्विता ।
न गायत्र्याधिकं किञ्चित् त्रयीषु परिविद्यते ॥
न गायत्रीसमो मन्त्रो न शम्भलसमं पुरं ।
न कृष्णसदृशो देवः सत्यं सत्यं पुनः पुनः ॥ इत्यादि ।

End. अधीत्येमां कथां दिव्यां न तृप्तिमधियाम्यह ।
तव वागमृतं भूयो मनो मे पातुमिच्छति ।
इदानीं ब्रूहि मे स्वामिन् शालग्रामकथामृतं ॥
स्कन्द उवाच । नन्दिग्रामस्य माहात्म्यं हरेश्चैव द्विजोत्तम ।
कथितञ्च महापुण्यं शालग्रामे निशामय ॥

Colophon. इति श्रीस्कन्दपुराणे भूखण्डे शम्भलग्राममाहात्म्यं समाप्तं । इति शं ।

विषयः । १—३ अध्याये,—स्कन्देन सह ऋषीणां संवादेन शम्भलग्राममाहात्म्यकथनं । गायत्रीमाहात्म्यकीर्त्तनं । शम्भलेश्वरलिङ्गमाहात्म्यकथनं । चन्द्रेश्वरलिङ्गमाहात्म्यकथनं । भुवनेश्वरलिङ्गमाहात्म्यकथनं । शम्भलेश्वरस्वरूपवर्णनं । निषादाधिपतेः धूम्राक्षस्य आतिथ्यादिवर्णनं । काम्पिल्यनगरवास्तव्यस्य सोमयाजिनो देवशर्म्मण उपाख्यानकीर्त्तनं । तत्पुत्रस्य द्यूतकारस्य वृत्तान्तकीर्त्तनं ।

४, ५ अध्याये,—ययातिकृतराजसूययज्ञविवरणकथनं । तेन सह नारदस्य संवादादिकथन । नारदेन अर्ककुण्डेश्वरमाहात्म्यकीर्तनं । अत्र अङ्गदेशस्थस्य जातकुष्ठरोगस्य शालूकाभिधानस्य वैश्यस्य विवरणकथनं । हंसतीर्थमाहात्म्यकथनं । तत्र काकैः सार्द्धं क्रौञ्चानां विवादवृत्तान्तकीर्तनं । कृष्णतीर्थमाहात्म्यकथनं । श्वेतद्वीपमाहात्म्यकथनं । शङ्खमाधवतीर्थमाहात्म्यकथनं । लोलार्कतीर्थमाहात्म्यकीर्तनं । तत्र सुरथाभिधानस्य नरपतेरुपाख्यानकथनं । ब्रह्मेश्वरमाहात्म्यकथनं । दशाश्वमेधवर्णनञ्च ।

६—९ अध्याये,—पिशाचमोचनतीर्थवर्णनं । तत्र पिशाचेन सह कस्यचिद् ब्राह्मणस्य संवादकथनादिकं । चतुर्मुखतीर्थकथनं । हरिमन्दिरतीर्थमाहात्म्यकथनं

विषयः। विजयतीर्थमाहात्म्यकीर्तनं। एकान्तीतीर्थवर्णनादिकं। अवन्तीसरस्तीर्थविवरण-कथनं। अत्र कौशिकीतीरनिवासस्य यज्ञदत्तस्य उपाख्यानकथनं। तस्य निर्व्वे-दादिवर्णनं। तीर्थसागरमाहात्म्यादिकथनं। अग्निपञ्चकतीर्थमाहात्म्यादिकीर्तनं यमघण्टकतीर्थमाहात्म्यादिकीर्तनं।

१०–१३ अध्याये,—महोदकीतीर्थमाहात्म्यादिकथनं। मणिकर्णिकायाः महोद-कीनामप्राप्तिकारणकथनं। तत्र सोमवंशप्रभवस्य पुरजेष्ठनामकस्य राजर्षेर्विवरण-कथनं। शिवेन तस्य पूर्व्वजन्मवृत्तान्तकीर्तनञ्च। ऋणमोचनतीर्थमाहात्म्यादि-कथनं। पापमोचनतीर्थमाहात्म्यादिकीर्तनं कलोदकतीर्थमाहात्म्यादिकथनं। सोमतीर्थमाहात्म्यादिकथनं। विस्तरतः प्रयागतीर्थवर्णनं। मृत्युतीर्थमाहात्म्यादि-कथनं। एवं ब्रह्मावर्त्त-नर्म्मदा-धर्म्मकूपतीर्थानां माहात्म्यकथनं। पञ्चह्रदयतीर्थस्य माहात्म्यकथनप्रसङ्गेन विष्णुना सह पितृलोकानां संवादादिकथनं। भविष्य-गङ्गाया विवरणकथनं। तत्र विष्णुना सार्द्धं तापस्य संलापादिवर्णनञ्च।

१४–१७ अध्याये,—गोमतीतीर्थमाहात्म्यकथनप्रसङ्गेन तस्या उद्भवादिवृत्तान्तकी-र्त्तनं। अत्र विश्वपालाभिधानस्य वणिज उपाख्यानकीर्त्तनं। गोदावरीतीर्थमाहात्म्य-कथनं। भारतीतीर्थमाहात्म्यकीर्तनं। रेवाकुण्डमाहात्म्यादिकथनं। अत्र चटक-मिथुनस्य विवरणकीर्त्तनञ्च। तीर्थगोपालमाहात्म्यादिकथनं। अत्र अत्रिवंश-सम्भूतस्य दत्ताभिधेयस्य विप्रस्य उपाख्यानकथनं। आनन्दसरस्तीर्थमाहात्म्यकीर्त्तनं। अत्र दशार्णविषयस्य लवणविक्रयिणो वाहिकाभिधानस्य ब्राह्मणस्य उपाख्यान-कथनं। तस्य पुनर्जन्मनि क्षत्रियवंशे जन्मादिविवरणकीर्त्तनञ्च। भद्रकाश्रममाहा-त्म्यादिवर्णनं।

१८–२१ अध्याये,—अत्रिकाश्रममाहात्म्यकथनप्रसङ्गेन अत्रेस्तपस्यादिवर्णनं। देव-तीर्थमाहात्म्यकथनं। शिवतीर्थमाहात्म्यकीर्त्तनं। गङ्गातीर्थमाहात्म्यकथनमुखेन अमलगन्धिनीनामिकाया विद्याधर्य्या उपाख्यानकथनं। शरद्वीपतीर्थमाहात्म्य-कथनं। तत्र गोधाया उपाख्यानकथनञ्च। मोक्षतीर्थमाहात्म्यादिकथनं। चक्रह्रद-तीर्थमाहात्म्यकीर्त्तनप्रसङ्गेन रैभ्यस्य उपाख्यानकथनं।

२२–२४ अध्याये,—रत्नदुग्धतीर्थमाहात्म्यकथनं। अत्र द्विमणिनामकस्य नृपते-रुपाख्यानकथनञ्च। गुप्ततीर्थमाहात्म्यकथनादिकं। अत्र हरिशर्म्मसञ्ज्ञकस्य राज्ञ उपाख्यानकथनञ्च। गयातीर्थमाहात्म्यादिकथनं। यज्ञकूपतीर्थमाहात्म्यादिकीर्त्तनं। सप्तसागरकूपतीर्थमाहात्म्यादिकथनं। विष्णुभक्तिमाहात्म्यकथनं। कलिधर्म्मकथनं। तत्र नराणां प्रकृतिवर्णनादिकं। शम्भलग्रामे विष्णुयशोऽभिधानस्य विप्रस्य पुत्रत्वेन कल्क्यवतारविवरणकथनञ्च। कलौ विशेषेण शम्भलग्राममाहात्म्यकीर्त्तनं।

No. 1751. स्कन्दपुराणीयगणेशमाहात्म्यखण्डः ।

Substance, country-made paper, 13½ × 7 inches. Folia, 45. Lines, 12—13 on a page. Extent, 1,764 s'lokas. Character, Nágara. Date. Sm., 1834. Place of deposit, Nasipura, Zilláh Murshidábád, Rájá Rámachánd Siñha. Appearance, fresh. Verse. Generally correct.

Gaṇes'a Máhátmya.—The life of Gaṇes'a, his birth, loss of human head, wars, sanctity and virtues, as also the ritual of worshipping him. The work extends to 22 chapters and professes to be a part of the Gaṇes'a Khaṇḍa of the Skanda Puráṇa.

Beginning. श्रीगणेशाय नमः। स्कन्द उवाच। शिवशम्भो महादेव सर्व्वज्ञ सुखदायक।
आख्यानानि सुपुण्यानि श्रुतानि त्वन्मुखाम्बुजात्॥
विचित्राणि पवित्राणि सर्व्वाघशमनानि च।
शाक्त-शाङ्कर-सौराणि बहूनि वैष्णवाणि च॥
येषां श्रवणमात्रेण पलायन्ते महापदः।
पुरुषार्थाः प्रसिद्ध्यन्ति महादेव जगत्पते॥
तथापि तृप्तिं नो यामि पायं पायं सुधामिव।
अतस्त्वं कृपया ब्रूहि गणेशचरितं मम॥
अवतारान् सेतिहासान् सर्व्वकामप्रपूरकान्।
शरणागतस्य लोकस्य वक्तुमर्हसि शङ्कर॥
शिव उवाच। सम्यक् पृष्टं त्वया स्कन्द सर्व्वसन्तोषकारकं।
गणेशचरितं वक्ष्ये सेतिहासं तवानघ॥ इत्यादि।

End. व्यास उवाच। शिवेन कथितो विप्राः स्कन्दाय पृच्छतेऽखिलः।
विनायकस्य महिमा स भवद्भ्यो निवेदितः॥

Colophon. इति श्रीस्कन्दपुराणे गणेशमाहात्म्यखण्डे शिवस्कन्दसंवादे गणेशावतारवर्णनो नाम द्वाविंशतितमोऽध्यायः। संवत् १८३४। कार्त्तिकमास।

विषयः। १ प्रथमे अध्याये,—शिवस्कन्दयोः संवादप्रसङ्गेन गणेशस्य निर्व्विशेषत्वकथनं। गणेशात् हरिहरब्रह्मादीनामुत्पत्तिकथनं। प्रजासृष्ट्यर्थं गणेशेन आज्ञप्तस्य प्रजापतेः तत्र अकृतकार्य्यस्य वक्रतुण्डमन्त्रजपादिवृत्तान्तकथनं। वक्रतुण्डनामनिर्व्वचनं। वक्रतुण्डावतारकथनञ्च।

२, ३ अध्याये,—द्राविडदेशेषु अभिजिन्नामकः कश्चित् नृपतिरासीत्, स च अनपत्यतया नितरां निर्व्वेदमापन्नः पत्न्या सह वनं प्रविवेश। तत्र सञ्जातकरुणेन

विषयः। केनचित् मुनिना समुपदिष्टोऽसौ तपस्यार्थं सरस्वत्यास्तीरं प्रययौ। अथ सफलमनोरथोऽयं स्वराज्यं पुनरागम्य स्वपुत्रं यौवराज्ये अभिषिक्तवानिति वृत्तान्तकथनं। तत्र सरस्वत्याः नदीभावप्राप्तिकथनं।

४, ५, ६, ७ अध्याये.—अभिजित्पुत्रस्य गणस्य दिग्विजयोद्यतस्य देवानीकपराजयवृत्तान्तवर्णनं। अथैकदा मृगयार्थं महारण्यमुपागतोऽसौ बुभुक्षया पीड़ितैः सैनिकैः सार्द्धं कपिलस्य मुनेराश्रमं प्राप। स च चिन्तामणिमणिप्रभावेण सबलस्य तस्य यथोचितमातिथ्यं कृतवान्। गणकृतचिन्तामणिहरणविवरणकथनं। कपिलतपस्यया सन्तोषमापन्नस्य विनायकस्य गणवधार्थमाविर्भावकथनं। गणस्य दुःस्वप्नदर्शनविवरणं। गणवधवृत्तान्तकथनं। गणेशस्य चिन्तामणिनामप्राप्तिकथनञ्च।

८, ९, १० अध्याये,—वासवादीनां कपिलाश्रमे भोजनविवरणकथनं। तत्र सुप्रसन्नेन पुरन्दरेण कपिलाय चिन्तामणिदानवृत्तान्तकीर्त्तनञ्च। एकदा जृम्भमाणस्य ब्रह्मणो मुखात् कश्चित् रक्तवर्णपुरुषस्य उद्भवादिकथनं। तस्य सिन्दूरनामप्राप्तिकथनं। 'त्वत्कृतवेष्टनेन सर्व्वे भस्मीभविष्यन्तीति' ब्रह्मणा तस्मै वरदानकथनं। तेन कृतानुगमनस्य भयाकुलस्य ब्रह्मणो वैकुण्ठसमीपे पलायनादिकथनं। विष्णोरुपदेशेन सिन्दूरस्य विनायकेन सह युद्धार्थं कैलासगमनादिवृत्तान्तकथनं। तद्भयाकुलानां देवानां विनायकस्तोत्रकीर्त्तनं। पार्व्वतीपुत्रत्वेन अवतरिष्यामीति तान् प्रति विनायकस्य आश्वासवाक्यकथनादिकं। अर्द्धनारीश्वररूपेण नन्दनकानने शिवाशिवयोः विहारकथनं। गजासुरस्य जन्मवृत्तान्तकथनं। तच्चर्म्मपरिधानेन शिवस्य कृत्तिवासोऽभिधानप्राप्तिकथनञ्च। तन्मस्तकस्य पूज्यत्वकथनञ्च।

११, १२ अध्याये.—एकदा गर्भिण्याः पार्व्वत्या वायुरूपेण उदरमध्यं प्रविष्टेन सिन्दूरेण नखैः गर्भस्थस्य शिशोः शिरश्छित्वा नर्म्मदायां निक्षिप्तमपि पार्व्वत्यादीनां तद्वृत्तान्ताज्ञानकथनं। तत्र पार्व्वतीकुमारदिदृक्षया समवेतानामुपेन्द्रादीनां मस्तकहीनं बालकं पश्यतां प्रार्थनया विनायकेन शिवगृहस्थितं गजासुरमस्तकमेव शिरस्त्वेन स्वीकृतमिति कथनादिकं। गजाननकृतसिन्दूरवधवृत्तान्तवर्णनं।

१३, १४ अध्याये,—सौभरिनामकस्य मुनेः शापात् क्रौञ्चमञ्चकस्य गन्धर्व्वस्य मूषिकत्वप्राप्तिकथनं। ततः तत्कृतकारुण्येन सकरुणहृदयेन सौभरिणा 'गणेशवाहनो भविष्यतीति' तस्मै वरदानवृत्तान्तकथनं। इन्द्रस्याज्ञया विघ्नरूपेण कालपुरुषेण अभिरूपस्य राज्ञः यज्ञध्वंसवृत्तान्तकथनं। तत्र विघ्नराजावतारकथाकीर्त्तनं। तेन सह विघ्नस्य समरसंरम्भवर्णनञ्च।

१५, १६, १७, १८ शङ्खासुरकृतवेदादिहरणविवरणकथनं। ब्राह्मणरूपधारिणा विनायकेन सर्व्वाणि शास्त्राणि गृहीत्वा वक्ताऽसीति समाख्यामधिगतेन मुनिभ्यः

विषयः । वेदादिशास्त्रदानवृत्तान्तकथनं । मयूरेशरूपेण विनायकेन शङ्खासुरसोदरस्य कमलासुरस्य बधवृत्तान्तकथनं । मयूरेश्वरमाहात्म्यकथनञ्च ।

१९, २०, २१, २२ अध्याये,—विन्ध्यदेशाधिपस्य धूमाभिधानस्य भूपालस्य भृगुणा सह संवादेन राज्ञः पूर्व्वजन्मवृत्तान्तवर्णनं । विन्ध्यदेशवास्तव्यस्य माधवाख्यस्य ब्राह्मणस्य पत्न्या अनपत्यतया निर्व्वेदमापन्नायाः तपस्यया सन्तोषितात् भगवतो वरप्राप्तिवृत्तान्तकथनं । माधवपुत्रस्त्वां हनिष्यतीति आकाशवाणीं निशम्य धूमस्य मूर्च्छादिविवरणकथनं । तत्र नीतिज्ञानां वादानुवादविवरणकथनं । माधवपुत्ररूपेण विनायकेन धूमबधवृत्तान्तकथनं । तस्य धूमकेतुनामप्राप्तिकथनं । गणेशनामनिर्व्वचनम् । त्रिपुरासुरस्य पुरत्रयनिर्म्माणादिवृत्तान्तकथनं । पिनाकपाणिकृत त्रिपुरबधविवरणकथनं । विशेषेण विनायकमाहात्म्यकथनञ्च । इति शम् ।

No. 1752. स्कन्दपुराणीयसह्याद्रिखण्डे रेणुकामाहात्म्यविभागः ।

Substance, country-made paper, 14 × 7 inches. Folia, 113. Lines, 9 on a page. Extent, 2,542 s'lokas. Character, Nágara. Date, ? Place of deposit, Nasípura, Zilláh Murshidábád, Rájá Rámachánd Siñha. Appearance, fresh. Verse. Generally correct.

Reṇuká Máhátmya.—The history of Reṇuká, daughter of Renuka, king of Kányakubja. S'iva was charmed by her beauty and wanted to marry her. The work extends to 64 chapters, and comprises a great number of anecdotes regarding various places in Central India, and of Ráma's peregrinations during his exile. It is said to be a part of the Sahyádri Khaṇḍa of the Skanda Puráṇa.

Beginning. ॐ नमो भगवते वासुदेवाय । नारायणं नमस्कृत्य नरञ्चैव नरोत्तमं ।
देवीं सरस्वतीञ्चैव ततो जयमुदीरयेत् ॥
ऋषय ऊचुः । यत त्वया कथितं स्कन्द भुक्तिमुक्तिफलप्रदं ।
विरजं सेखलं तीर्थं तदस्माभिः श्रुतं प्रभो ॥
मातृतीर्थमिति ख्यातं विस्तराद् ब्रूहि षन्मुख ।
का चैकवीरा सा देवी जमदग्निश्च को विभो ॥
यस्या गर्भे समुद्भूतः स रामः क्षत्रियान्तकः ।
जमदग्निः कथम्भूतः को येनं तस्य वाचरत् ॥

कार्त्तवीर्य्यः स रामेण कथयस्व कथं हतः ।
स्कन्द उवाच । देवानां दानवानाञ्च युद्धमासीत् सुदारुणं ।
तद्दैतानजयन् दैत्या मायया बलिनः सुरान् ॥
ततः ब्रह्मादयो देवा निर्ज्जितास्तैर्महासुरैः ।
निराकृतास्ते त्रिदशा गोविन्दं शरणं ययुः । इत्यादि ।

End. श्रुत्वा माहात्म्यमतुलं पुरुषो भक्तिसंयुतः ।
ब्राह्मणान् भोजयेत् पश्चात् दद्याद् दानान्यनेकशः ।
सर्व्वान् कामानवाप्नोति नात्र कार्य्या विचारणा ।
इति सर्व्वं मुनीन्द्राय वशिष्ठाय तु शङ्करः ॥
उक्तवान् मुनयः श्रेष्ठाः तत् सर्व्वं कथितं मया ।
अविद्यारहितो भूत्वा ततः सिद्धिं गमिष्यति ॥

Colophon. इति श्रीस्कन्दपुराणे सह्याद्रिखण्डे रेणुकामाहात्म्ये शङ्करवसिष्ठसंवादे फलश्रुति-नाम चतुःषष्टितमोऽध्यायः । (इति प्रथमो भागः) ।

विषयः । १-५ अध्याये,—स्कन्देन सह ऋषीणां संवादकथनं । असुरनिर्ज्जितानां निर्ज्जराणां क्षीरोदसागरगमनपूर्व्वकं विष्णुस्तोत्रकथनं । उपेन्द्रं पुत्रत्वेन अधिगन्तुं च ऋषे-स्तपश्चर्य्यादिवर्णनं । तस्या एकवीरेति संज्ञाप्राप्तिकथनं । पार्व्वतीमपि [illegible] प्रार्थयमानायै तस्यै तेन वरदानवृत्तान्तकथनं । कन्यालाभार्थं कान्यकुब्जदेशाधिपस्य रेणुकस्य शिवस्तोत्रविवरणकथनं । तस्य यज्ञानुष्ठानसमये कुण्डादेकवीराया आविर्भावादिकथनं । तस्या रेणुकानामकथनं । वरुणाद् रत्नोत्पत्तिकथनं । वह्निं प्रति सर्व्वभक्षो भवेति तस्य शापदानवृत्तान्तकथनं । भृगुवंशकथनञ्च ।

६-१२ अध्याये,—[illegible] जह्नोः यज्ञस्थलीप्लावनेन कुपितस्य गङ्गा-शोषणवृत्तान्तकथनं । पुनः स्वशापेन मानुषरूपायाः कावेर्य्याः जह्नुपत्नीत्वकथनं । तत्पुत्रस्य अजकस्य कुशाभिधानपुत्रोत्पत्तिकथनं । ततश्च "प्रीतस्य इन्द्रस्य कुश-पुत्रत्वेन जन्म ग्रहणं" । तस्य गाधिनामकरणं । तत्कन्यया सत्यवत्या सह ऋचीकस्य विवाहकथनं । जमदग्नेः उत्पत्तिकथनं । रेणुकया सह तस्य विवाह-कथनं । तत्र स्वयम्वरसभायां समरसंभवर्णनञ्च ।

१३-२० अध्याये,—रेणुकायै इन्द्रदत्तकामधेनुचिन्तामणिविवरणकथनं । तस्याः पञ्चपुत्रजननकथनं । रेणुकागर्भे हरेः जन्मग्रहणकथनं । रामस्य तपस्यार्थं-कैलास-पर्व्वतगमनवृत्तान्तकीर्त्तनं । तत्र महादेवात् धनुर्व्विद्याप्राप्तिः, गणेशात् परशुलाभ-विवरणकथनञ्च । परशुरामस्य पुरतः पुरारिणा जमदग्निरेणुकयोः पूर्व्ववृत्तान्त-कथनं । नारीगणपरिवृतस्य कुबेरस्य गङ्गायां जलविहारवर्णनं ।

विषयः। २१–२७ अध्याये,—रेणुकाबधार्थं आज्ञापितानपि तत्र असम्मतान् पुत्रानुद्दिश्य क्रुद्धस्य जमदग्नेः शापदानादिवृत्तान्तकथनं। परशुरामकृतरेणुकाबधवृत्तान्तकथनं। तत्र परशुरामप्रार्थनया जातकरुणस्य जमदग्नेः प्रसन्नतया सपुत्रायाः रेणुकायाः पुनर्ज्जीवनवृत्तान्तकीर्त्तनञ्च। क्रोधेन सह जमदग्नेः संवादकथनं। रिरंसया कृतवीर्य्यसमीपमुपागतया राकावत्या सह तस्य संवादकथनं। तत्र हरेः पूर्व्ववैरं संस्मृत्य मधुनामकस्य असुरस्य कृतवीर्य्यपुत्रत्वेन जन्मग्रहणकथनं। करहीनस्य तस्य दत्तात्रेयप्रसादेन सहस्रकरत्वप्राप्तिकथनं। तस्य करहीनतया जन्मग्रहणकारणकथनं। एकदा दिग्विजयोद्यतस्य दशमुखस्य नर्म्मदायां स्त्रीभिः सार्द्धं जलक्रीड़ायामासक्तेन कार्त्तवीर्य्यार्ज्जुनेन सह संवादकथनं। तयोः युद्धवर्णनं। ब्रह्मादीनां प्रार्थनया कार्त्तवीर्य्यार्ज्जुनगृहे रुद्धस्य रावणस्य मुक्तिकथनञ्च।

२८–३५ अध्याये,—नारदोपदेशेन सपरिवारस्य कार्त्तवीर्य्यार्ज्जुनस्य रेणुकादर्शनार्थं जमदग्न्याश्रमगमनविवरणकथनं। जमदग्निना कामधेनुप्रसादेन सबलस्य राज्ञः आतिथ्यकरणवृत्तान्तकीर्त्तनं। कामधेनुग्रहणार्थं सामदानादिप्रयोगेणापि अकृतकार्य्यस्य अर्ज्जुनस्य बलात्कारेण तां नेतुमिच्छतः कलत्रापत्यसैन्यादीनां कामधेनुसृष्टपुरुषसमूहेन समूलं विनाशवृत्तान्तकथनं। धेनुहरणविवरणकथनं। अर्ज्जुनकृतजमदग्निवधवृत्तान्तकथनञ्च।

३६–४० अध्याये,—पितरं निहतं दृष्ट्वा परशुरामस्य प्रतिज्ञादिवर्णनं। ततश्च तच्छरीरं तुलायामारोप्य सह्याद्रिप्रदेशमुपागतस्य रामस्य दैववाणीमाकर्ण्य तत्र पितुरौर्द्धदेहिकादिकार्य्यानुष्ठानविवरणकथनं। रेणुकायाः सहगमनवृत्तान्तकीर्त्तनं। कार्त्तवीर्य्यार्ज्जुनवधाय कृतप्रयाणस्य रामस्य पथि नारदेन सह संवादकथनं। रामकृतपिशाचगणवधवृत्तान्तकीर्त्तनं। एकदा मार्कण्डेयाश्रममुपागतेन रामेण भ्राम्यमाणः कश्चित् राक्षसः अर्ज्जुनराजधान्यां निपपात। तच्च दृष्ट्वा विदितकारणस्य अर्ज्जुनस्य चेष्टादिकथनं। तस्य दुःस्वप्नदर्शनवृत्तान्तकथनञ्च।

४१–५० अध्याये,—नारदस्य परशुरामचररूपेण माहिष्मतीपुरीप्रवेशवृत्तान्तकथनं। रामस्य ज्याशब्दश्रवणेन यमसचिवस्य अर्ज्जुनस्य वितर्कादिवर्णनं। रामार्ज्जुनयोः विचित्रयुद्धवर्णनं। बहुना उपायेनापि तं हन्तुं असमर्थेन रामेण वायोरुपदेशात् लम्बोदररूपधारिणा तद्विनाशवृत्तान्तकथनं। परशुरामभयार्दितानां नृपतीनां परिव्राजकादिरूपेण पर्य्यटनवृत्तान्तकथनं। एकविंशतिवारं परशुरामेण क्षत्रियविनाशनवृत्तान्तकथनं। तेन च पृथिवीं निःक्षत्रियां विधाय स्यमन्तपञ्चकाभिधानतीर्थनिर्म्माणविवरणकथनं। तत्कृतत्रैलोक्यविजयवृत्तान्तकीर्त्तनं। वासुकिकृतरामसपर्य्यावर्णनं। गणेशरामयोः संवादकथनं। रामकृतराक्षसवधवृत्तान्तकीर्त्तनञ्च।

५१-५५ अध्याये,—तत्र प्रत्यक्षतां गतायाः रेणुकायाः समादेशात् रामेण खड्‌ग-जालप्रक्षालनार्थं भागीरथीगमनविवरणकथनं। रामतीर्थस्य उत्पत्तिकथनं। तत्र दत्तात्रेयाश्रमे शङ्खतीर्थचक्रतीर्थादीनामुत्पत्तिकथनं। रामकृतयज्ञानुष्ठानसमृद्धि-वर्णनं। तेन च दक्षिणात्वेन कश्यपाय पृथिवीदानविवरणकथनं। रामकृत-रेणुकाभिषेकवृत्तान्तकीर्त्तनं। तत्र ब्रह्मादिकृतरेणुकास्तोत्रकथनं। ब्रह्मणः पुरतः हरिणा गायत्रीरूपायाः रेणुकायाः सर्व्ववेदमयत्वकथनं। ब्रह्मणो वेदोपदेशप्राप्ति-विवरणकथनञ्च।

५६-५८ अध्याये,—आजीगर्त्तस्य "शुनः पुच्छः शुनः शेफः शुनो लाङ्गूलश्च" इति त्रयः पुत्रा आसन्। तत्र दुर्भिक्षनिपीड़ितेन आजीगर्त्तेन हरिश्चन्द्रस्य राज्ञः समीपे शुनःशेफं विक्रीय तज्जनितपापेन अधोगच्छता शमीकाभिधानस्य ऋषेरुपदेशात् रेणुकातीर्थगमनवृत्तान्तकीर्त्तनं। देवशर्म्मनामकस्य मुनेः शापेन हतश्रीकस्य इन्द्र-द्युम्नस्य रेणुकातीर्थगमनविवरणकथनं। रेणुकासमादिष्टेन ब्रह्मणा क्षीरसागरात् आमलकीतरुसहितस्य विष्णोरानयनवृत्तान्तकथनं। विशेषेण रेणुकामाहात्म्यकी-र्त्तनं। तत्र मणिदत्ताभिधानस्य ब्राह्मणस्य उपाख्यानं।

५९-६४ अध्याये,—रामदीर्घिकाविवरणकथनं। भास्करतीर्थमाहात्म्यकथनं। भा-स्करस्य उषायां भानुमतीनाम कन्या बभूव। तां कामयमानस्य तस्य कुष्ठरोग-प्राप्तिविवरणादिकथनं। पद्मतीर्थस्थापनवृत्तान्तकीर्त्तनं। विष्णुना हयग्रीवरूपेण कालजिह्वाभिधेयासुरनाशनवृत्तान्तकथनं। जम्बूकरूपस्य कर्णधारस्य नृपतेरुपा-ख्यानकीर्त्तनं। शङ्करतीर्थवर्णनं। कोटितीर्थमाहात्म्यकथनप्रसङ्गेन मुचुकुन्दस्य नृपतेरुपाख्यानकीर्त्तनं। फलश्रुतिकीर्त्तनञ्च। इति रेणुकामाहात्म्यविभागः॥

No. 1753. स्कन्दपुराणीयावन्तीखण्डः।

Substance, country-made paper, 13½ × 7¼ inches. Folia, 143. Lines, 12 on a page. Extent, 5,345 s'lokas. Character, Nágara. Date, Sm. 1835. Place of deposit, Nasípura, Zillah Murshidábád, Rájá Rámachánd Siñha. Appearance, fresh. Verse. Generally correct.

Avanti Khaṇḍa.—The fifth of the seven parts into which the Skanda Purána is divided. It belongs to the class of works which are known under the generic name of Mahátmya. Its character may be best described by comparing it with a modern tourist's guide; though the authorship of the work is attributed to a divine personage. It

opens with a request from Umá, who desires her lord to describe, for her information, all those sacred pools and rivers on the earth where funeral cakes should be offered to the manes, and in reply to this comprehensive question S'iva gives her an account of all the sacred places, temples, pools and lingams in the city of Avanti, modern Ujjain, and its neighbourhood, and recites a number of stories to account for the sanctity of those places. The names of the places, and abstracts of the stories relating to them, are given below in Sanskrit.

Beginning. श्रीगणेशाय नमः। उमा उवाच। पृथिव्यां यानि तीर्थानि पुण्याश्च सरितस्तथा।
कथ्यन्तां तानि यत्नेन श्राद्धं येषु प्रदीयते ॥
ईश्वर उवाच। अस्ति लोकेषु विख्याता गङ्गा त्रिपथगा नदी।
सेविता देवगन्धर्व्वैर्मुनिभिश्च निषेविता ॥
तपनस्य सुता देवि यमुना लोकपावनी।
पितृणां वल्लभा देवि महापातकनाशनी ॥
चन्द्रभागा वितस्ता च नर्म्मदामरकण्टकं।
कुरुक्षेत्रं गया देवि प्रभासं नैमिषं तथा ॥
केदारं पुष्करञ्चैव तथा कायावरोहणं।
तथा पुण्यतमं देवि महाकालवनं शुभं ॥
यत्रास्ते श्रीमहाकालः पापेन्धनहुताशनः।
क्षेत्रं योजनपर्य्यन्तं ब्रह्महत्याविनाशनं ॥ इत्यादि।

End. इत्येते चतुरशीतिमङ्ख्याता ईश्वरास्तव।
कथिता ये त्वया ++ महाकालवने ++ ॥
एतेषां देवि यो यात्रां प्रतिलोमानुलोमतः।
करिष्यति नरो भक्त्या स यास्यति परं पदं ॥
यद्येषां लिङ्गमेकन्तु पश्येद्भक्त्याथ वा पुनः।
सकुलं तारयेद्देव पैटकं स हकं भतं ॥
एष ते कथितो देवि प्रभावपापनाशनः।
चतुरशीतिलिङ्गानां किं भूयः श्रोतुमिच्छसि ॥

Colophon. इति स्कन्दपुराणे अवन्तीखण्डे चतुरशीतिलिङ्गमाहात्म्यम्। शिवमस्तु।
संवत् १८२५।


विषयः। ईश्वरीश्वरयोः संवादेन श्राद्धदानयोग्यपुण्यनदीवनादिनिरूपणप्रसङ्गात् चतुरशीति-सङ्ख्यकलिङ्गमाहात्म्यकीर्त्तनं। तत्र अवन्तीदेशे महाकालवनवर्णनं। अगस्त्येश्वर-

विषयः माहात्म्यादिवर्णनं। अत्र असुरविप्रकृतानां देवानां मुखमालिन्यं निर्वर्ण्य सन्तप्तहृदयेन अगस्त्येन स्वतेजसा दानवकुलं भस्मसात्कृत्वा 'किमिदमनुष्ठितं हिंसारूपं महत्पापमिति' खेदमधिगच्छता अगस्त्येश्वराभिधानलिङ्गप्रतिष्ठावृत्तान्तकथनं। गुह्येश्वरलिङ्गमाहात्म्यकीर्तनं। अत्र मङ्कणाभिधानस्य महर्षेर्वृत्तान्तकीर्तनं। ढुण्ढेश्वरलिङ्गमाहात्म्यं। अत्र गणनायकस्य ढुण्ढस्य वृत्तान्तकथनं। डमरुकेश्वरलिङ्गमाहात्म्यं। रुरुदैत्येन सुरपुरान्निर्वासितानां वासवादीनां क्रोधाग्नितः समुद्भूतायाः देव्याः समरसंरम्भे रुरुपुत्रादिविनाशकृतानायाः सह कालवने पलायनादिवृत्तान्तकथनं। अनादिकल्पेश्वरलिङ्गमाहात्म्यं। तत्र अहमेव ज्यायानिति विवदमानयोः पद्मनाभपद्मजन्मनोरूर्ध्वाधोलोकप्रयाणादिकथनं। स्वर्णजालेश्वरमाहात्म्यकीर्तनं। तत्र वह्निमुखनिहितस्य शैवरेतसः सुवर्णस्य उद्भवादिकथनं। तल्लाभाय अन्योन्यं प्रहरतां सुरासुरादीनां निधनादिकथनञ्च। त्रिविष्टपेश्वरलिङ्गमाहात्म्यं। अत्र देवर्षिणा सह देवेन्द्रस्य महाकालवनगमनादिवृत्तान्तकथनं। कपालेश्वरमाहात्म्यकथनं। तत्र कापालिकवेशेन महाकालवने प्रविष्टं कपालिनं तत्रस्थानामागतानां विप्राणां लोष्ट्रादिप्रक्षेपविवरणकीर्तनं। स्वर्गद्वारेश्वरलिङ्गमाहात्म्यकथनं। तत्र दक्षमखात् विष्णुना सुदर्शनेन ताड़ितस्य वीरभद्रस्य निकटमनुपतत्सु [illegible] शूलिने दक्षयज्ञप्रवेशे उपेन्द्रादीनामन्तर्धानकथनं। नन्दिना स्वर्गद्वारनिरोधवृत्तान्तकीर्तनञ्च। कर्कोटेश्वरलिङ्गमाहात्म्यकथनं। तत्र मातुः शापेन भीतानां शेषादीनां तपस्यादिवर्णनं। कर्कोटकस्य महाकालवनप्रवेशादिविवरणञ्च। सिद्धेश्वरलिङ्गमाहात्म्यं। महाकालवनं प्रविश्य सिद्धानां तपश्चरणादिवृत्तान्तवर्णनं। लोकपालेश्वरलिङ्गमाहात्म्यकीर्तनं। दानवकुलाकुलितानां लोकपालानां नारायणोपदेशेन महाकालवनगमनादिवृत्तान्तकीर्तनं। कामेश्वरलिङ्गमाहात्म्यकीर्तनं। अत्र ब्रह्मशरीरात् कामस्य उत्पत्तिकथनं। कामं प्रति ब्रह्मणः शापदानविवरणादिकीर्तनञ्च। कुटुम्बेश्वरलिङ्गमाहात्म्यं। तत्र नीलकण्ठरूपधारिणा भगवता नीलकण्ठेन समुद्रोत्थितं कालकूटं सम्पीय शिप्राप्रवाहेण महाकालवने तत्प्रक्षिप्तमित्यादिवृत्तान्तकथनं। इन्द्रद्युम्नेश्वरलिङ्गमाहात्म्यकथनं। तत्र इन्द्रद्युम्नस्य नृपतेः हिमालयपार्श्वे तपस्यादिकथनञ्च। ईशानेश्वरलिङ्गमाहात्म्यं। तत्र तुहुण्डाभिधानेन दानवेन ताड़ितानां देवानां नारदोपदेशेन महाकालवनगमनादिकथनञ्च। अप्सरेश्वरलिङ्गमाहात्म्यकथनं। तत्रैकदा सुरसदसि नृत्यन्त्याः रम्भायाः तौर्य्यत्रिकेषु प्रमादमाकलय्य जातकोपस्य वासवस्य महान् मन्युरासीत्, तदनन्तरञ्च अभिशप्तायास्तस्या नारदोपदेशेन महाकालवनगमनादिविवरणकीर्तनञ्च। कलकलेश्वरलिङ्गमाहात्म्यकीर्तनं। तत्र गिरिजया सार्द्धं गिरिशस्य कलहवृत्तान्तकथनञ्च।

विषयः। चण्डेश्वरलिङ्गमाहात्म्यकथनं। नारदेन सह देवानां महाकालमुद्दिश्य गच्छतां पथि नागचण्डेत्यभिधानेन गणनायकेन समं संवादकथनञ्च। प्रतीहारेश्वरलिङ्गमाहात्म्यकथनं। तत्र द्वारपालं नन्दिनं वञ्चयित्वा रममाणयोः शिवाशिवयोः सान्निध्यमुपस्थिते हंसरूपधारिणि जातवेदसि नन्दिनं प्रति विरूपाक्षस्य शापदानवृत्तान्तकथनञ्च। कुक्कुटेश्वरलिङ्गमाहात्म्यकथनं। अत्र रात्रौ कुक्कुटरूपं धारयतः कौशिकनामकस्य राज्ञ उपाख्यानकीर्त्तनञ्च। कर्कटेश्वरमाहात्म्यकथनं। तत्र धर्म्ममूर्त्तिनामकस्य नृपतेः पुरतः वसिष्ठेन पूर्व्वजन्मनि राज्ञः शूद्रजातित्वकथनादिकं। मेघनादेश्वरलिङ्गमाहात्म्यकथनं। महाम्बनामकेन असुरेण उपद्रुतानां द्रुहिणानां भगवद्दर्शनार्थं श्वेतद्वीपगमनादिकथनं। महालयेश्वरलिङ्गमाहात्म्यकीर्त्तनं। मुक्तीश्वरलिङ्गमाहात्म्यकीर्त्तनं। तत्र मुक्तिनामकेन ब्राह्मणेन सार्द्धं तं हन्तुकामस्य व्याधस्य संवादकथनञ्च। सोमेश्वरलिङ्गमाहात्म्यकीर्त्तनं। तत्र इतराः दक्षकन्याः विहाय रोहिण्यामेव अनुरक्तं सोमं प्रति सञ्चितकोपेन दक्षेण शापदानविवरणकथनं। नरकेश्वरमाहात्म्यकीर्त्तनं। तत्र पूर्व्वकल्पीयकलियुगे जीवानां नरकयातनावर्णनप्रसङ्गात् निमिनामकेन नृपतिना समं यमकिङ्करस्य संवादकथनं। जटेश्वरलिङ्गमाहात्म्यकीर्त्तनं। तत्र रथन्तरकल्पीयस्य वीरधन्वाभिधानस्य नरपतेरुपाख्यानकीर्त्तनञ्च। (परशु-)रामेश्वरलिङ्गमाहात्म्यकथनं। तत्र अनुष्ठिताश्वमेधयज्ञेन परशुरामेण सह नारदस्य संवादकथनादिकञ्च। च्यवनेश्वरमाहात्म्यकथनं। तत्र वितस्तायाः तीरे तपश्चरन्तं प्राप्तवल्मीकभावं च्यवनं निरूपयन्तीनां स्वर्यातिकामिनीनां वृत्तान्तकथनञ्च। षण्डेश्वरलिङ्गमाहात्म्यकथनं। तत्र भद्राश्वाभिधेयेन राज्ञा सार्द्धमगस्त्यस्य संवादकथनञ्च। पत्तनेश्वरलिङ्गमाहात्म्यकीर्त्तनं। तत्र देवदेवेन सह देवर्षेः संवादकथनञ्च। आनन्देश्वरलिङ्गमाहात्म्यकीर्त्तनं। तत्र रथन्तरकल्पे अनमित्रतनयस्य आनन्दाभिधानस्य नरपतेरुपाख्यानकथनञ्च। कङ्कटेश्वरलिङ्गमाहात्म्यकथनं। तत्र प्रेतराजं जेतुकामस्य दरिद्रद्विजशिशोः तपस्यादिवर्णनञ्च। इन्द्रेश्वरलिङ्गमाहात्म्यकथनं। तत्र शतक्रतुना स्वतनयं निहतं श्रुत्वा कोपज्वलितस्य तष्टुः जटामाच्छिद्य अग्नौ क्षिपतः प्रभावेण वृत्रस्य उद्भवादिकथनञ्च। मार्कण्डेयेश्वरलिङ्गमाहात्म्यकथनं। तत्र पुत्रलाभार्थं मृकण्डोस्तपस्यादिवर्णनञ्च। शिवेश्वरलिङ्गमाहात्म्यकीर्त्तनं। तत्र ब्राह्मकल्पीयरिपुञ्जयाभिधानस्य नृपतेरुपाख्यानकथनञ्च। कुसुमेश्वरलिङ्गमाहात्म्यकीर्त्तनं। तत्र गणेशस्य कुसुमक्रीडादिवर्णनञ्च। अक्रूरेश्वरलिङ्गमाहात्म्यकथनं। तत्रैकदा भृङ्गिरिटेः सकाशात् रूपर्य्यामनधिगम्य अधिगतरोषायाः पार्व्वत्याः पुरतस्तेन स्वकायात् मातृभागरूपमांसशोणितादिपरित्यागवृत्तान्तकीर्त्तनञ्च। कुण्डेश्वरलिङ्गमाहात्म्यकथनं। स्वतनयं वीरकं महाकालवने

विषयः। तपस्यन्तं निशम्य दिदृक्षया कृतप्रयाणयोः पार्व्वतीपरमेश्वरयोः गणाध्यक्षेण कुण्डेन सह संवादकथनञ्च। लुम्पेश्वरलिङ्गमाहात्म्यकीर्त्तनं। तत्र म्लेच्छराजस्य लुम्पस्य युयुत्सया सामगनामकस्य मुनेराश्रमप्रविष्टस्य बलात्कारेण होमधेनुग्रहणादिवृत्तान्तकथनञ्च। गङ्गेश्वरमाहात्म्यकथनं तत्र गङ्गां प्रति समुद्रस्य शापदानवृत्तान्तकीर्त्तनञ्च। अङ्गारकेश्वरमाहात्म्यकथनं। तत्र शिवशरीरादङ्गारकस्य उत्पत्तिः, तस्य मङ्गलादिनामप्राप्तिवृत्तान्तकथनञ्च। उत्तरेश्वरलिङ्गमाहात्म्यकीर्त्तनं। तत्र इन्द्राज्ञया मेघनामकालवर्षणादिवृत्तान्तकथनञ्च। नूपुरेश्वरलिङ्गमाहात्म्यकीर्त्तनं। तत्र नूपुरस्य तपस्यादिवर्णनञ्च। अभयेश्वरमाहात्म्यकीर्त्तनं। तत्र सिसृक्षया चिन्ताकुलस्य कमलजस्य अश्रुबिन्दुतो हेरम्बकालकाभिधानयोः दानवयोः उत्पत्त्यादिकथनञ्च। पृथुकेश्वरलिङ्गमाहात्म्यकीर्त्तनं। तत्र वेणशरीरात् पृथोरुत्पत्तौ तत्कृतधरादोहनविवरणकीर्त्तनञ्च। स्थावरेश्वरमाहात्म्यकथनं। तत्र छायायाः गर्भे शनैश्चरस्य उत्पत्तिकथनं। तद्भयात् देवानां महादेवसमीपगमनादिविवरणञ्च। शूलेश्वरलिङ्गमाहात्म्यकीर्त्तनं। तत्र जम्भासुरसम्पात् वासवादीनां पराजये गौरीप्रार्थनया गिरिशस्य समीपे अन्धकस्य दूतप्रेरणादिवृत्तान्तकथनञ्च। ॐकारेश्वरलिङ्गमाहात्म्यकथनं। तत्र ॐकाराभिधानस्य कपिलाख्यमुनेरुपाख्यानकीर्त्तनञ्च। विश्वेश्वरलिङ्गमाहात्म्यकथनं। कण्टकेश्वरलिङ्गमाहात्म्यकथनं। तत्र सूर्य्यवंशीयस्य सत्यविक्रमनामकस्य नृपतेः महाकालवनं प्रस्थितस्य तत्र सिचचरं कञ्चन तापसं हुङ्कारेणैव अलौकिकवस्तुसृष्टिसमर्थं पश्यतः उपाख्यानकीर्त्तनञ्च। सिंहेश्वरलिङ्गमाहात्म्यकथनं। तत्र पतित्वेन पशुपतिमधिगन्तुं तपस्यन्तीं पार्व्वतीमुपेत्य प्रजापतौ शिवनिन्दनोद्यते तस्याः कोपेन सिंहस्य उत्पत्त्यादिकथनञ्च। रेवन्तेश्वरलिङ्गमाहात्म्यकीर्त्तनं। तत्र वडवारूपायाः सञ्ज्ञायाः गर्भे अश्वमुखकुमारयोः रेवन्तस्य च जन्मग्रहणवृत्तान्तकथनञ्च। घण्टेश्वरमाहात्म्यकीर्त्तनं। तत्र घण्टाभिधेयस्य कस्यचित् गणस्य विधातुः द्वारदेशे संवत्सरं यावदवस्थानादिवृत्तान्तकथनञ्च। प्रयागेश्वरमाहात्म्यकथनं। तत्र प्रियव्रतस्य पुरतो नारदेन 'मया खलु श्वेतद्वीपे कापि कामिनी सरोवरादरे दृष्टेति' विवरणकथनञ्च। सिद्धेश्वरलिङ्गमाहात्म्यकथनं। तत्र अश्वशिरोनामकस्य नृपतेः जैगीषव्यकपिलाभ्यां सह संवादकीर्त्तनञ्च। मातङ्गेश्वरलिङ्गमाहात्म्यकथनं। तत्र गर्द्दभ्या मातङ्गाभिधानस्य कस्यचित् द्विजकुमारस्य पूर्व्वजन्मवृत्तान्तकीर्त्तनञ्च। सौभाग्येश्वरलिङ्गमाहात्म्यवर्णनं। तत्र प्राग्ज्योतिषपुराधिपतेः कामिन्याः अनङ्गमञ्जर्य्याः दुर्भगाया अपि पतिसौभाग्यप्राप्तिविवरणकीर्त्तनञ्च। रूपेश्वरलिङ्गमाहात्म्यवर्णनं। तत्र एकदा पद्मकल्पे पद्माभिधानस्य नृपतेः मृगयार्थं गहनमध्यं प्रविष्टस्य कण्वदुहित्रा सह परिणयादिवृत्तान्तकीर्त्तनञ्च। धनुः-

विषयः। सहस्रेश्वरलिङ्गमाहात्म्यवर्णनं। तत्र वनमध्ये कुजम्भाभिधेयस्य दानवस्य गृहविवरं दृष्ट्वा शङ्कुकुलेन विदूरथनामकेन राज्ञा सार्द्धं कस्यचित् ब्राह्मणस्य संवादकथनञ्च। पशुपालेश्वरलिङ्गमाहात्म्यकथनं। तत्र पशुपालनामकस्य भूपालस्य दस्युभिराक्रमणवृत्तान्तकीर्त्तनञ्च। ब्रह्मेश्वरलिङ्गमाहात्म्यकथनं। तत्र पुलोमाभिधानेन दैत्येन क्षीरसागरं गत्वा पद्मनाभनाभिपद्मस्थितोऽपि पद्मोद्भवः समाक्रान्तः तपस्यार्थं महाकालवनं प्रयातीति विवरणकथनञ्च। जल्पेश्वरलिङ्गमाहात्म्यकथनं। तत्र जल्पाभिधानराजकुमाराणां सुबाहु-शत्रुमर्द्द-जय-विजयविक्रान्तानां वृत्तान्तकीर्त्तनञ्च। केदारेश्वरलिङ्गमाहात्म्यकथनं। तत्र शीतज्वरजर्जरितानां निर्ज्जराणां ब्रह्माणं पुरस्कृत्य पुरारिमार्गान्वेषणवृत्तान्तकीर्त्तनञ्च। पिशाचेश्वरमाहात्म्यकीर्त्तनं। तत्र लोमशनामकस्य कस्यचित् शूद्रस्य नास्तिकतया जन्मान्तरे पिशाचत्वमापन्नस्य शाकटायनेन सह संवादकथनादिकञ्च। सङ्गमेश्वरमाहात्म्यकथनं। तत्र कलिङ्गविषये सुबाहुनामकेन राज्ञा महिष्याः पुरतः निजपूर्व्वजन्मवृत्तान्तकीर्त्तनञ्च। दुर्द्धर्षेश्वरलिङ्गमाहात्म्यकथनं। तत्र नेपालदेशवासिनः दुर्द्धर्षनामकस्य राज्ञः मृगयार्थं वनमध्ये विहरतः पुरतः मत्तेभेन अधिगन्तुं कस्याश्चित् द्विजकन्यायाः उपस्थानादिविवरणस्य च। प्रयागेश्वरलिङ्गमाहात्म्यकीर्त्तनं। तत्र हस्तिनापुरपुरन्दरस्य शन्तनुनामधेयस्य भूपतेः वनमध्ये सानुरागया गङ्गया सार्द्धं पाणिग्रहणादिविवरणकथनञ्च। चन्द्रादित्येश्वरलिङ्गमाहात्म्यकथनं। तत्र दुर्द्धरासुरेण विग्रहतानां ऋभुभुजां रणभूमेः निर्य्याणे राहुभयेन स्फुरितयोः सूर्य्याचन्द्रयोः लिङ्गान्निस्सरणादिविवरणकथनञ्च। करभेश्वरलिङ्गमाहात्म्यकथनं। तत्र मृगयार्थं गहनकानने अश्वारोहितः वीरकेतुनामकस्य नृपतेः शरवर्षेण करभरूपस्य भद्रवटेः वृत्तान्तकीर्त्तनञ्च। राजस्थलेश्वरलिङ्गमाहात्म्यकथनं। तत्र ब्रह्माज्ञया रिपुञ्जयस्य चक्रवर्त्तिदेशनायकत्वं प्राप्तस्य पृथिवीपालनावसरे कदाचित् पृथिव्यां वज्रपातादिवृत्तान्तकथनञ्च। वड़लेश्वरलिङ्गमाहात्म्यकथनं। तत्र मणिभद्रतनयस्य वड़लस्य नन्दनकाननोद्याने विहरमाणस्य विवरणकथनञ्च। अरुणेश्वरलिङ्गमाहात्म्यकथनं। तत्र अरुणं प्रति विनतायाः शापदानवृत्तान्तकीर्त्तनञ्च। पुष्पदन्तेश्वरलिङ्गमाहात्म्यकथनं। तत्र पुष्करारण्ये गिरिनामकस्य ब्राह्मणस्य तपस्याकथनं, शिवपार्षदस्य पुष्पदन्तस्य अधोगतिकीर्त्तनञ्च। अविमुक्तेश्वरलिङ्गमाहात्म्यकथनं। तत्र काशीनगराधिपस्य चित्रसेनस्य उपाख्यानकीर्त्तनञ्च। हनूमन्तेश्वरलिङ्गमाहात्म्यकथनं। तत्र रावणवधानन्तरं राजपदप्रतिष्ठितं रामचन्द्रं सभाजयितुं समागतानामगस्त्यादीनां लक्ष्मणमुत्सृज्य केवलं अञ्जनानन्दनमेव प्रशंसतां बाल्ये हनूमतो रविधारणार्थं कृतोद्यमस्य ऐन्द्रकुलिशपातेन छिद्यमाणस्य वदनादि-



विषयः । वृत्तान्तकीर्तनञ्च । स्वप्नेश्वरलिङ्गमाहात्म्यकथनं । तत्र इक्ष्वाकुवंशीयं कल्माषपादं प्रति वशिष्ठेन 'राक्षसो भवेति' शापदानविवरणकथनञ्च। पिङ्गलेश्वरलिङ्गमाहात्म्यकथनं । तत्र पिङ्गलाया उपाख्यानकथनञ्च । बिल्वेश्वरमाहात्म्यकथनं । तत्र कपिलेन सह बिल्ववृक्षस्य संवादकथनं । कायावरोहणेश्वरलिङ्गमाहात्म्यकथनं । तत्र दक्षं प्रति चन्द्रस्य 'कायहीनो भविष्यसि' इति शापदानवृत्तान्तकथनञ्च । उत्तरेश्वरलिङ्गमाहात्म्यकथनं । तत्र पुरा किल परीक्षिदित्यभिधानः इक्ष्वाकुकुलतिलकः कश्चित् राजा अयोध्यायां प्रतिवसति स्म। स एकदा मृगाननुसरन् अश्वमात्रसहायः मध्यकाननं प्रविवेश। तत्र च कुसुमानि विचिन्वतीं कामपि कमनीयदर्शनां कामिनीं पश्यतः तस्य स्मरमार्गणानां अबन्ध्यप्रभावतया तस्यां हृदयं सरसमासीत् । सा च नृपतिप्रार्थनया आत्मानं बहुमन्यमाना 'त्वया नोदकं दर्शयितव्यमिति' ब्रुवाणा तेन सह सुचिरं रमयाञ्चकार, चकार च अन्तर्द्धानं कदाचित् राजप्रेरणया सलिलसन्दर्शनेनेत्यादिवृत्तान्तकीर्त्तनञ्च ॥

अत्र अध्यायसङ्ख्या नास्तीति ज्ञेयम् । इति अवन्तीखण्डस्य विवरणम् ॥

No. 1754. ज्योतिषकल्पतरुः ।

Substance, country-made paper, 12½ × 3 inches. Folia, 45. Lines, 10 on a page. Extent, 1,350 s'lokas. Character, Nágara. Date, Sm. 1896. Place of deposit, Calcutta, Government of India. Appearance, Fresh. Prose and verse. Incorrect.

Jyotisha-kalpataru. The influences of particular conjunctions of planets, stars, months and days of the week on the day of the birth, on human destiny. By Kavi Chúḍámaṇi.

Beginning. वृन्दाविपिनविनोदी दीनदयालुः स्वभक्तजनवश्यः ।
शिवविधिवन्दितचरणः श्रीगोपीरमणः पातु ॥
प्रणम्य सच्चिदानन्दं यशोदानन्दनन्दनं ।
प्रवक्ष्ये लौकिकस्कन्धे यत्र लोकशुभाशुभं ॥ अथ लौकिकस्कन्धे निरूप्यते ।

End. इति त्रिविधोत्पातशान्तिरस्मिन्स्कन्धे लिखिता अतस्त्रिविधं क्षितिः

Colophon. इति श्रीकविचूड़ामणिविरचिते ज्योतिषकल्पतरौ लौकिकस्कन्धे उत्पातकथनं नामैकादशोऽध्यायः ॥ ११ ॥

विषयः । अत्र एकादशाध्यायाः सन्ति । तत्र १–मे, प्रभवादिषष्टिसंवत्सरफलकथनं । २–ये, वर्षपञ्चाङ्गकथनं । ३–ये, सूर्य्यादिषु सप्तसु वारेषु रविसङ्क्रमणफलकथनं । ४–र्थे, भौमबुधगुरुचारकथनं । ५–मे, शनिराहुचारकथनं । ६–ष्ठे, नक्षत्रग्रहविभागकथनं । ७–मे, प्रकीर्णयोगकथनं । ८–मे, मासफलकथनं । ९–मे, वत्सरगर्भाधानादिकथनं । १०–मे, कूर्म्मचक्रादिकथनं । ११ शे, उत्पातप्रकरणं ॥

No. 1755. तन्त्रालोकटीका ।

Substance, country-made paper, 12¼ × 4⅓ inches. Folia, 35. Lines, 12 on a page. Extent, 1,400 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, Fresh. Prose and verse. Incorrect.

Tantráloka-ṭíká. A commentary on the Tantráloka, which is a work by Abhinava Gupta, on transcendental knowledge and emancipation. By Jayaratha. The codex is incomplete, containing only the 1st áhnika.

Beginning. इह यद्यपि सर्व्ववादिनां मोक्ष एवोपादेयः तत्प्रतिपक्षभूतश्च संसारो हेयः तस्य च मिथ्याज्ञनं निमित्तं तत्प्रतिकूलश्च तत्त्वज्ञानमिति तत्साक्षात्कारेणैवाज्ञानापगमान्मोक्षावाप्तिरित्यत्राविवादः । तथापि तैस्तत्त्वैकविषयं ज्ञानाज्ञानयोः स्वरूपं न ज्ञानमिति भ्रमयत्येव तान् माया ह्यमोक्षे मोक्षलिप्सयेत्यादि उक्तयुक्त्या तदभ्युपगतो मोक्षो मोक्ष एव न भवति इति दर्शयितुं शास्त्रान्तरवैलक्षण्येन तत्परीक्षणस्य वक्ष्यमाणत्वात् प्राधान्यमपि कटाक्षयितुमुपक्रम एव बन्धमोक्षपरीक्षामुट्टङ्कयति ग्रन्थकारः ॥

इह तावत् समस्तेषु शास्त्रेषु परिगीयते ।

अज्ञानं संसृतेर्हेतुर्ज्ञानं मोक्षैककारणं ॥

न चैतदस्माभिः स्वोपज्ञ(?)मेवोक्तमित्याह,——

मलमज्ञानमिच्छन्ति संसाराङ्कुरकारणं इति ।

तथा च श्रीमालिनीविजयोत्तरे । अज्ञानं तिमिरं पारमेश्वरस्वातन्त्र्यमात्रसमुल्लमितस्वरूपगोचरासतत्त्वया (?)त्मानात्मनोरन्यथाभिमानस्वभावमपूर्णं ज्ञानं तदेव चाणवं मलं न तु नवमाह्निकादौ निषेत्स्यमानं द्रव्यरूपं । उक्तञ्च

स्वातन्त्र्यहानिर्बोधस्य स्वातन्त्र्यस्याप्यबोधता। द्विधाणवं मलमिदं स्वस्वरूपाप-हानित इति। तच्च कीदृगित्याह॥ संसारेति।

End. इहाह्निकादाह्निकान्तरस्य संगयन्यायेन परस्परमनुष्ठत्यतां दर्शयितुमेकेनैव श्लोकेन तत्पर्य्यन्तप्रारम्भयोरुपसंहारोपक्रमा करोतीत्यस्य ग्रन्थकारस्य शैलीति-श्लोकस्य प्रथमार्द्धेनाह्निकार्थमुपसंहरति,—

तन्त्रालोकेऽभिनवरचिते सूत्रविज्ञानसत्त्वा-
भेदोद्गारप्रकटनपटावाह्निकेऽस्मिन् समाप्तिः।
पटाविति पाचिकात् पुंवद्भावात् इति शिवं।
श्रीशृङ्गादरथादवाप्य कृतिनो जन्मानवद्यक्रमं
श्रीमच्चक्रधरात् परं परिचयं विद्यासु सर्व्वास्वपि।
श्रीकल्याणतनोः शिवादधिगमं सर्व्वागमानामपि
व्याख्यातं प्रथमाह्निकं जयरथेनात्रावधेयं बुधैः॥

Colophon. इति श्रीमदभिनवगुप्तविरचिते तन्त्रालोके विज्ञानभेदप्रकाशनं नाम प्रथम-माह्निकं॥

विषयः। अभिनवगुप्तविरचिततन्त्रालोकस्य व्याख्यानं। तन्त्रालोके तु संसारहेतज्ञान-निरूपणं। मोक्षहेतुज्ञाननिरूपणञ्च। "इति श्रीमदभिनवगुप्तविरचिते तन्त्रालोके विज्ञानभेदप्रकाशनं नाम प्रथमाह्निकं" इति यत् समाप्तिसूचकं वाक्यं तत् तन्त्रालोकस्य न तु तन्त्रालोकटीकायाः॥

No. 1756. यतिधर्म्मसमुच्चयः।

Substance, country-made paper, 13 × 6 inches. Folia, 39. Lines, 14 on a page. Extent, 2,340 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Correct.

Yati-dharma-samuchchaya. A compendium of the duties of Yatis and Paramahaṅsas, compiled from the leading Smṛitis. By Vis'ves'vara Sarasvatí.

Beginning. प्रणम्य विष्णुमात्मानं सच्चिदानन्दमुक्तिदं।
गुरुं सर्व्वज्ञविश्वेशं मायया धृतविग्रहं॥ १॥
विश्वेश्वरसरस्वत्या क्रियते वेदमानतः।
यतेः परमहंसस्य धर्म्माणामेष सङ्ग्रहः॥ २॥

End. न रक्तमुल्वणं वासो न नीलञ्च प्रशस्यते ।
मलाक्तञ्च दशाहीनं वर्जयेदम्बरं यतिः ॥

Colophon. इति श्रीपरमहंसपरिव्राजकविश्वेश्वरसरस्वतीसङ्कथिते यतिधर्म्मसमुच्चये निवृत्ति-धर्म्मानुष्ठानाचाराः सम्पूर्णाः (समाप्ताः)। शुभं भवतु ॥

विषयः । श्रुतिस्मृतिपुराणप्रमाणानि संगृह्य यतेः परमहंसस्य धर्म्मसमुच्चयनिरूपणं ।

No. 1757. तत्त्वयाथार्थ्यदीपनं ।

Substance, country-made paper, 10¾ × 5 inches. Folia, 14. Lines, 12 on a page. Extent, 434 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Correct.

Tattva-yáthárthya-dípana. A commentary on the Tattvasamása. It comprises a summary of the leading doctrines of the S'áṅkhya system of Philosophy. By Bhává Gaṇes'a Dikshita, son of Bhává Vis'va-nátha, and pupil of Vijñána Bhikshu. Hall's *Contributions*, p. 4.

Beginning. पुरुषः स जयत्याद्यः प्रकृतिः सा जयत्यजा ।
याभ्यां संहृत्य सृज्यन्तेऽनन्तब्रह्माण्डकोटयः ॥ १ ॥
कपिलासुरिपञ्चशिखान् गुरून् विज्ञानाचार्य्यवर्य्यांश्च ।
प्रणमामि बुद्धिवृद्धौ सिद्धौ वा सर्व्वकार्य्याणां ॥ २ ॥
समाससूत्राण्यालम्ब्य व्याख्यां पञ्चशिखस्य च ।
भावागणेशः कुरुते तत्त्वयाथार्थ्यदीपनं ॥ ३ ॥

End. पुरुषार्थबुभुत्सूनां बोधायैव मयेरितं ।
तेभ्यः समर्पितञ्चैतत् तेनापि प्रीयतां हरिः ॥

Colophon. इति श्रीभावागणेशकृतं तत्त्वयाथार्थ्यदीपनं समाप्तं ॥

विषयः । अत्र प्रथमं साङ्ख्यमतसिद्धमूलप्रकृतिनिरूपणं । ततो बुद्धितत्त्वनिरूपणं । ततः अहङ्कारनिरूपणं । ततः पञ्चतन्मात्रानिरूपनं । तत एकादशेन्द्रिय-पञ्चमहा-भूतात्मकषोड़शविकारनिरूपणं । ततः पुरुषनिरूपणं । ततस्त्रैगुण्यनिरूपणं । ततः सृष्टिनिरूपणं । ततः प्राकृतिक-वैकारिक-दाक्षिणरूपबन्धत्रयनिरूपणं । ततो मोक्षत्रयनिरूपणं । ततः प्रत्यक्षानुमानशब्दात्मकप्रमाणत्रयनिरूपणं । तत आध्यात्मिक-आधिभौतिक-आधिदैविकदुःखत्रयनिरूपणं ॥

No. 1758. पाखण्डचपेटिका ।

Substance, country-made paper, 12¾ × 4¾ inches. Folia, 8. Lines, 12. on a page. Extent, 576 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Correct.

Pákhaṇḍa-chapeṭiká. "A slap for the unbeliever." A polemical disquisition on the Vaishṇavite doctrine, refuting objections to the authenticity of the Bhágavata Puráṇa, and establishing the superiority of the Vaishṇava faith as opposed to S'aiva and S'ákta doctrines. By Vijayaráma A'chárya.

Beginning. विश्वश्रीकर्त्ति विभुः स्वलीलया तथा वरीभर्त्त्यखिलं सनातनः ।
यः सञ्जरीहर्त्ति कलान्तविग्रहस्तं सर्व्वभूताश्रयमानतोऽस्म्यहं ॥ १ ॥
श्रीमद्विजयरामाख्यः पाखण्डस्य चपेटिकां ।
आचार्य्यकुलसम्भूतस्तनोति विदुषां मुदे ॥ २ ॥

End. सर्व्वे ते सुखिनः सन्तु प्रसादात् कमलापतेः ।
ये भजन्ति महाविष्णुं सम्प्रदायानुसारतः ॥ इति ।
इदं मदीयं साहसिकत्वं गुणग्राह्यैः सूरिभिरङ्गीकर्त्तव्यं ॥

Colophon. इति श्रीमद्विजयरामाचार्य्यविरचिता पाखण्डचपेटिका समाप्ता ॥

विषयः । श्रुतिविरुद्धान् परित्यक्तनिजवर्णाश्रमधर्म्मान् स्वर्गादिप्रतिबन्धकान् नरकोत्पादकान् पाखण्डान् शिक्षयितुं पुराणादिवाक्यैः तन्मुखचपेटिकानिरूपणं ।

No. 1759. वाशिष्ठोपपुराणं ।

Substance, country-made paper, 12½ × 4¾ inches. Folia, 13. Lines, 12 on a page. Extent, 880 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Verse. Incorrect.

Vás'ishṭha Upapuráṇa. Apparently a fragment of the work whose name it bears. The codex comprises 12 chapters as follows: 1, Conversation with S'iva and Vas'ishṭha. 2, Máyá, the origin of creation. 3, S'iva, the original first cause. 4, The advantages of worshipping S'iva on the 15 lunar days. 5, Do. of smearing the body with ashes.

6, Do. of wearing garlands of Rudráksha seeds. 7, Rules for repeating the Praṇava. 8, Religious duties of the four castes. 9, Characteristics of the Yogas. 10, A story of S'anka. 11, Praise of saints. 12, A story illustrating the merits of offerings to S'iva.

Beginning. श्रीमत्कैलासमागम्य वसिष्ठो वेदविन्मुनिः ।
तपश्चचार सत्कर्म्मनिरतो नियतेन्द्रियः ॥ १ ॥
दिव्यं वर्षसहस्रन्तु वायुभक्षोऽग्निमध्यगः ।
श्रीमत्पञ्चाक्षरं साक्षाच्छतरुद्रियमध्यगं ॥ २ ॥
सर्व्वपापहरं पुण्यं प्रणवेन षडक्षरं ।
जजाप शङ्करं द्रष्टुं वाञ्छया मुनिसत्तमः ॥ ३ ॥
ततः प्रसन्नो भगवानम्बया सह शङ्करः ।
लिङ्गज्योतिःस्वरूपेण पुरतोऽस्य प्रकाशितः ॥ ४ ॥

End. यत्प्रसादेन विज्ञानं यथावज्जायते नृणां ।
तं वन्दे षण्मुखं देवं ज्ञानशक्तिधरं परं ॥ ५५ ॥
यस्य प्रसादलेशस्य लवलेशलवेन तु ।
सर्व्वसिद्धिरयत्नेन तं नमामि विनायकं ॥ ५६ ॥

Colophon. इति श्रीउपपुराणे वासिष्ठलैङ्गे द्वादशोऽध्यायः ॥ १२ ॥ सङ्ख्या १०० ।

विषयः । अत्र १–मे, वसिष्ठशिवसंवादः । २–ये, मायाया जगत्कारणत्वकथनं । ३–ये, शिवस्यैव परमतत्त्वरूपताकथनं । ४–र्थे, पञ्चदशसु तिथिषु शिवपूजायाः फलकथनं । ५–मे, भस्मधारणफलं । ६–ष्ठे, रुद्राक्षधारणफलं । ७–मे, प्रणवजपनियमादिकथनं । ८–मे, ब्राह्मण-क्षत्रिय-वैश्य-शूद्रादीनां धर्म्मकथनं । ९–मे, युगधर्म्मकथनं । १०–मे, भिक्षापर्य्यटनव्याजेन शङ्कर्तृकमुनिसम्मोहनवृत्तान्तं । ११–शे, साधुभिर्मुनिभिर्ब्रह्मप्रबोधनादिकथनं । १२–शे, सभार्य्यवृषलस्य शिवप्रसादेन पुनरैश्वर्य्यप्राप्तिवृत्तान्तं ॥

No. 1760. आगमतत्त्वसङ्ग्रहः, द्वितीयपरिच्छेदमात्रं ।

Substance, country-made paper, $12\frac{1}{2} \times 4\frac{3}{4}$ inches. Folia, 16. Lines, 12 on a page. Extent, 900 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Correct.

A'gamatattva-sañgraha. A compilation of the three leading doctrines of the Tantra system, including rites, adoration and knowledge. By Kes'ava Vis'varupa,—an inhabitant of the bank of the Tuñgabhadrá River.

Beginning. प्रणम्य सर्व्वात्ममयीं महेश्वरीं गुरूंश्च सर्व्वान् विदुषः कृताञ्जलिः ।
द्वितीयभागं प्रकरोमि मेयप्रकाशकं ह्यागमतत्त्वसङ्ग्रहे ॥ १ ॥
प्रथमपरिच्छेदे आगमानां प्रामाण्यं निर्व्वाहितं । सम्प्रत्यागमप्रमेयतत्त्वं सङ्ग्रहेण विविच्यते ॥

End. एतेन त्रिपुरा वा प्रीयतां सर्व्वेश्वरी परा संवित् ।
श्रुतिरागमश्च यस्या निश्वसितञ्चापि चाच्छ्वसितं ॥ १० ॥

Colophon. इति श्रीतुङ्गभद्रोपकूलवमतिविश्वरूपोपाख्यकेशवकृतावागमतत्त्वसङ्ग्रहे द्वितीयः परिच्छेदः । समाप्तो ग्रन्थः ॥

विषयः । अत्र तन्त्रेषु काण्डत्रयेण निरूपितकर्म्मोपासनाज्ञानानां प्रत्येकस्वरूपनिरूपणं ।

No. 1761. अद्वैतब्रह्मविद्यापद्धतिः ।

Substance, country-made paper, 13 × 5 inches. Folia, 23. Lines, 15 on a page. Extent 736 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Verse. Incorrect.

Advaita-brahmavidyá-paddhati. An attempt to interpret the adualistic theory in connexion with the supreme divinity of Mahádeva, and to support the S'aiva system of faith. By Gopálás'rama-rúpa Nandís'vara A'chárya.

Beginning. सकलसुरगुरुर्यः शम्भुराद्यो महेशो गणपतिजनको यः षण्मुखस्योद्भवो यः ।
निखिलजननकर्त्री यस्य शक्तिर्ह्युमा तं विनतकरणमङ्गुश्चिन्तये विश्ववन्द्यं ॥ १ ॥
निखिलसुरगणाग्र्यो यस्तु नन्दीश्वराख्यो विविधसुतपसा यः श्रीशिलादेन लब्धः ।
सुमुनिगणनमस्यो दुर्जयो देवसङ्घैः स्वजनहितकरं तं वन्दितं वन्दे गणाग्र्यैः ॥ २ ॥

End. षड्ध्यायीमिमां यस्तु शिवप्रीतिकरीं शुभां ।
पठेद्धि शृणुयाद्वापि यथेष्टं फलमाप्नुयात् ॥ ७७ ॥
अनेन कृपया शिष्यं प्रशिष्यं ममतमारयत् ।
यः शम्भोः परमो भक्तस्तदात्मा तं प्रणौम्यहं ॥ ७८ ॥

Colophon. इति श्रीमद्गोपालाश्रमरूपनन्दीश्वराचार्य्योपदिष्टाद्वैतब्रह्मविद्यापद्धतौ षष्ठोऽध्यायः, समाप्तोऽयं ग्रन्थः ।

विषयः । अत्र शिवस्यैव परमतत्त्वरूपताकथनं । शैवीविद्यानिरूपणं, शिव एवोपास्य इति कथनञ्च ।

No. 1762. ज्योतिःशास्त्रसमुच्चयः ।

Substance, country-made paper, 12¼ × 5½ inches. Folia, 126. Lines, 10 on a page. Extent, 2,814 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Incorrect.

Jyotih-s'ástra-samuchchaya. A compilation on civil astronomy and astrology. By Nanda Paṇḍita. The author was a great Smṛiti scholar, and compiled several works on the subject. The work under notice is one of several treatises bearing the generic name of *Samuchchaya*, and is designed to afford full information on the selection of proper days for the performance of civil rites.

Beginning. ॐ श्रीमान् सहस्रकिरणः श्रियमातनोतु युष्मभ्यमभ्यधिकमानतिमात्रलभ्यः ।
मुक्तिं मुमुक्षुरधिगच्छति यं प्रसाद्य भक्त्या विभूतिमतुलामपि भुक्तिकामः ॥
ॐ अथ ज्योतिःशास्त्रसमुच्चयः तत्र प्रथमं प्रभवादिवर्षविचारः ।

End. श्रीनारायणपादपङ्कजनतिप्राप्तप्रबोधोदयो
वेदानङ्गयुतान् सभारतखिलान् साहित्यकाव्यान्वितान् ।
मीमांसेश्वरमाक्षुबोधमखिलं चार्व्वाकजैनाभिधं
ग्रन्थं यो व्यहणोत् स पण्डितकविः श्रीदेवशर्म्माऽभवत् ॥
तस्य श्रीशितिकण्ठभक्तिनिरतो नन्दाभिधोऽभूत् सुतो
विन्दा देवपदारविन्दशरणा यस्य प्रसिद्धा प्रसूः ।
सोऽयं नातिलघुं न विस्तृततरं ज्योतिर्विदां सेवको
ज्योतिःशास्त्रसमुच्चयं व्यरचयच्छिष्यौघसम्प्रार्थितं ॥
विजयजयदमित्रं मित्रराजीवनेत्रं भवजलधिवहित्रं दानवानाममित्रं ।
विषधररिपुपत्रं देवकीशौरिपुत्रं गहनतरचरित्रं नौमि मायाविचित्रं ॥

Colophon. इति श्रीपण्डितनन्दविरचितो ज्योतिःशास्त्रसमुच्चयः समाप्तः ।

विषयः। अत्र प्रथमं प्रभवादिषष्टिसंवत्सरविचारः। ततः अयनविचारः। अधिमासविचारः। तिथिविचारः। वारविचारः। नक्षत्रविचारः। उपयोगविचारः। विष्कम्भादियोगविचारः। करणविचारः। भद्राविचारः। चन्द्रविचारः। करणप्रस्तारः। ताराविचारः। ताराप्रस्तारः। मुहूर्त्तविचारः। लग्नविचारः। गोचरविचारः। राजाभिषेकविचारः। वस्त्रादिपरिधानविचारः। व्रतारम्भः। विद्यारम्भः। धनुर्विद्यारम्भः। नृत्यगीतप्रारम्भः। अनध्यायः। होमादिनक्षत्राणि। वेतालादिसाधनं। अभिचारकृत्यं। धर्म्मारम्भः। सेवानक्षत्राणि। मद्यारम्भः। क्षौरविचारः। चूड़ाकर्म्म। अन्नप्राशनं। कर्णवेधनं। पुंसवनं। नामकरणं। सूर्य्येन्दुदर्शनिष्क्रमाणि। अग्न्याधानं। श्रावणीविचारः। जलारम्भनक्षत्राणि। वृक्षरोपणं। गजकार्य्यनक्षत्राणि। गोनक्षत्राणि। क्रयविक्रयादिनक्षत्राणि। अग्निनक्षत्राणि। ह्लनक्षत्राणि। पञ्चकविचारः। सर्पदंशनक्षत्राणि। रोगनिवृत्तिलक्षणानि। रोगमुक्तस्नाननक्षत्राणि। यात्राविधानं। दिक्साधनं। उपनयनं। विवाहनिर्णयः। द्विरागमनं। वास्तुविचारः। गृहप्रवेशादिविधिः। देवादिप्रतिष्ठा। सङ्क्रान्तिनिर्णयः। मूलविचारः। मूलाश्लेषगण्डान्तशान्तिः। गण्डान्तविचारः। ज्येष्ठाजातनिर्णयः। ज्येष्ठाविचारः। अगस्त्योदयविचारः। संवत्सरपुरुषलक्षणं। सस्यजातकाध्यायः। सद्योवर्षणाध्यायः। रविवर्षफलं। चन्द्रवर्षफलं। भौमवर्षफलं। बुधवर्षफलं। जीववर्षफलं। शुक्रवर्षफलं। शनिवर्षफलं। मासफलं। ग्रहणविचारः। केतुलक्षणं। पिटकविचारः। अङ्गस्फुरणविचारः। शनिचक्रं। प्रकीर्णकं। रोहिणीयोगः। पल्लीविचारः। पल्लीसरटशान्तिविधानं। संवत्सरमाहात्म्यं। खञ्जदर्शनफलं। अशुभदर्शनप्रतीकारः॥

No. 1763. मानसोल्लासः, मानसोल्लासवृत्तान्ताख्यटीकासहितः।

Substance, country-made paper, 13 × 6 inches. Folia, 41. Lines, 14 on a page. Extent, 2,700 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Correct.

Mánasollása and *Mánasollása-vrittánta*. The first is a metrical commentary on a poem of ten stanzas by S'aṅkara A'chárya, in praise of Dakshiṇámúrti, a form of Durgá; the second is a prose gloss

on the commentary. The first is by Vis'ves'vara *alias* Vis'varúpa A'chárya, a pupil of S'ankara A'chárya; the second is by Ráma Tirtha, a hermit of his school.

Beginning. (टी॰)। प्रोद्यच्छाखमहावटद्रुमतटे योगासनस्थं प्रभुं
प्रत्यक् तत्त्वबुभुत्सुभिः प्रतिदिशं प्रोद्वीक्ष्यमाणाननं।
मुद्रां तर्कमयीं दधानममलं कर्पूरगौरं शिवं
हृद्यन्तःकलये स्फुरन्तमनिशं श्रीदक्षिणामूर्त्तिकं॥ १॥
नत्वाथ शङ्कराचार्य्यमुख्यान् सर्व्वान् गरीयसः।
मानसोल्लासवृत्तान्तं वर्णयामि यथामति॥ २॥
इह हि भाष्यकारः श्रीमच्छङ्कराचार्य्यनामा मन्दमतींस्तत्त्वजिज्ञासूननुगृहीतुं दक्षिणामूर्त्तिस्तोत्रव्याजेन समस्तवेदान्तार्थरहस्यमाविश्चकार, दशभिः पद्यबन्धैः तच्छिष्येण विश्वरूपाचार्य्येण सुरेश्वरापरनाम्ना तत्पद्यप्रबन्धार्थतत्त्वं तात्पर्य्यतो मानसोल्लासनाम्ना वार्त्तिकात्मना ग्रन्थसन्दर्भेणाविष्कृतमिमं ग्रन्थं यथाशक्ति विवृणोमि। तत्र शिष्टाचारसंरक्षणाय कृतं मङ्गलाचरणं द्योतयत्ययमाद्यः श्लोकः मङ्गलमिति। १।

(मू॰)। मङ्गलं दिशतु मे विनायको मङ्गलं दिशतु मे सरस्वती।
मङ्गलं दिशतु मे महेश्वरो मङ्गलं दिशतु मे महेश्वरी॥ १॥
आत्मलाभात् परो लाभो नास्तीति मुनयो विदुः।
तल्लाभार्थं कविः स्तौमि स्वात्मानं परमेश्वरं॥ २॥
स्वेच्छया सृष्टमाविश्य विश्वं यो मनसि स्थितः।
स्तोत्रेण स्तूयते तेन स एष परमेश्वरः॥ ३॥
अस्ति प्रकाशत इति व्यवहारः प्रवर्त्तते।
सर्व्वाखिलं प्रकाशिलं कस्मिन्नर्थे व्यवस्थितं॥ ४॥
किन्त्वेषु तेषु भावेषु किंवा सर्व्वात्मनीश्वरे।
ईश्वरत्वञ्च जीवत्वं सर्व्वात्मत्वञ्च कीदृशं॥ ५॥
ज्ञानीयात्तत् कथं जीवः किं तज्ज्ञानस्य साधनं।
ज्ञानात्तस्य फलं किं स्यादेकत्वञ्च कथं भवेत्॥ ६॥
सर्व्वज्ञः सर्व्वकर्त्ता च कथं जीवो भविष्यति।
शिष्यं प्रतीत्थं पृच्छन्तं वक्तुं प्रारभते गुरुः॥ ७॥
विश्वं दर्पणदृश्यमाननगरीतुल्यं निजान्तर्गतं
पश्यन्नात्मनि मायया बहिरिवोद्भूतं यथा निद्रया।

यः साक्षात् कुरुते प्रबोधसमये स्वात्मानमेवाद्वयं
तस्मै श्रीगुरुमूर्त्तये नम इदं श्रीदक्षिणामूर्त्तये ॥ ८ ॥

End. (मू०)। प्रकाशात्मिकया शक्त्या प्रकाशप्रभवाकरः।
प्रकाशयति यो विश्वं प्रकाशोऽसौ प्रकाशतां ॥ १४ ॥

Colophon. इति श्रीदक्षिणामूर्त्तिस्तोत्रार्थप्रतिपादके।
प्रबन्धे मानसोल्लासे दशमोल्लाससङ्ग्रहः ॥ १० ॥

(टी०)। इति श्रीमानसोल्लासप्रबन्धोऽयं यथा मति।
व्याख्यातो रामतीर्थेन गुरुदेवप्रसादतः ॥
अनेन भगवान् श्रीमद्दक्षिणामूर्त्तिरीश्वरः।
गुर्व्वात्मा प्रीयतां नित्यं तत्त्वज्ञानप्रदः सतां ॥
इति श्रीदक्षिणामूर्त्तिस्तोत्रव्याख्याप्रबन्धमानसोल्लासवृत्तान्तविलासः सम्पूर्णः ॥

विषयः। श्रीमच्छङ्कराचार्य्येण समस्तवेदान्तार्थरहस्यमाविष्कर्त्तुं श्रीमद्दक्षिणामूर्त्तिस्तोत्रव्याजेन यानि दशपद्यानि आविष्कृतानि तेषां दशपद्यानां श्रीमच्छङ्कराचार्य्यशिष्येण विश्वरूपाचार्य्येण सुरेश्वरापरनाम्ना अनेन मानसोल्लासग्रन्थेन तात्पर्य्याविष्करणं।

No. 1764. कण्टकोद्धारः।

Substance, palm-leaf, 11 × 1 inches. Folia, 120. Lines, 5 on a page. Extent, 3,036 s'lokas. Character, Maithili. Date, L.S. 431 = A. D. 1537. Place of deposit, Calcutta, Government of India. Appearance, fresh. Prose. Correct.

Kanṭakoddhára. A gloss on the *Pratyaksha Chintámanyáloka* of Jayadeva Mis'ra. By Madhusúdana Ṭhakkura. (*Vide ante*, I, p. 298.)

Beginning. मधुसूदनसद्युक्तिसमुत्सारितकण्टकाः।
आलोकव्यक्तमार्गेण मणिं यान्तु धीघनाः ॥
विशेषविभागोपयोगिसामान्यलक्षणं प्रमाणस्य सूचयति। एवमिति मूलं। यद्यपि करणत्वं व्यापारवत् कारणत्वमिति शरीरात्मप्राणालोकविषयादिषु अतिव्याप्तिः। इत्यादि।

End. तदवच्छेदकविद्यमानसम्बन्धप्रतियोगित्वमित्यवधातव्यं सुगममितिवत्।

Colophon. महामहोपाध्यायठक्कुरश्रीमधुसूदनकृतकण्टकोद्धारे प्रत्यक्षखण्डः परिपूर्णः ।

* * * * * * * * * * * * *

चक्रे रामकनीयसोऽवनिपतेः शीतांशुनन्दाम्बुधा-

वब्दे फाल्गुनसप्तमीरविदिने गङ्गागणेशार्चकः ॥

विषयः । जयदेवमिश्रकृतप्रत्यक्षचिन्तामण्यालोकस्य व्याख्यानं ।

No. 1765. न्यायकौस्तुभः ।

Substance, country-made paper, 9 × 4 inches. Folia, 136. Lines, 12 on a page. Extent, 4,185 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, fresh. Prose. Correct.

Nyáya-kaustubha. A gloss on the Pratyaksha Khaṇḍa of the Tattvachintamaṇi of Gañges'a. By Mahádeva Paṇḍita, son of Mukunda Paṇḍita.

Beginning. दाक्षायणीरमणसच्चरणारविन्दं ब्रह्मादिभिः सुरवरैरपि सेव्यमानं ।

श्रीगौतमं मुनिवरं मणिकारमुख्यान् आन्वीक्षिकीर+बुधांश्च नमामि भक्त्या

मुकुन्दं पितरं नौमि षट्शास्त्रतत्त्वदर्शिनं ।

यत् पुण्यपरिपाकेण शास्त्रे गतिरभून्मम ॥

पुरुहूतपुरोहितं सभायां कवितायां किल कालिदाससमं ।

निखिलाखिलशास्त्रविदुरीणं शितिकण्ठाभिधं सद्गुरुं नमामि ॥

मोक्षहेतुप्रमाणादितत्त्वज्ञानाय सत्क्रियां ।

महादेवेन सुधिया क्रियते न्यायकौस्तुभः ॥

End. मिश्रादीनामप्यत्रैव पक्षे स्वारस्यमिति वदन्तीत्यधिकमूह्यं सुधीभिरित्यलं विस्तरेण ।

प्रत्यक्षचिन्तामणिमिश्रदीधित्यादिप्रबन्धानवलोक्य भूयः ।

सङ्क्षेपतो वर्णितमत्र सम्यक् प्रत्यक्षतत्त्वं बहुयुक्तियुक्तं ॥

Colophon. इति श्रीमत्सद्वाक्यप्रमाणज्ञश्रीमन्मुकुन्दपण्डितात्मजपुणतामकरे (?)पनामकमहादेवपण्डितविरचिते श्रीन्यायकौस्तुभे प्रत्यक्षकौस्तुभः समाप्तः ।

विषयः । तत्त्वचिन्तामण्यन्तर्गतप्रत्यक्षखण्डस्य व्याख्यानं ।

No. 1766. वेदान्तकल्पतरुपरिमलः ।

Substance, country-made paper, 11 × 3½ inches. Folia, 508. Lines, 11 on a page. Extent, 16,382 s'lokas. Character, Nágara. Date, Sm., 1851. Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Correct.

Vedánta-kalpataru-parimala. Explanatory notes on Amalánanda's gloss on the Bhámati, which is a commentary on the Vedánta Sútras of Vyása. By Apyayi Díkshita, son of Rangarája Adhvaravara, of the race of Bharadvája. The work has been already noticed under No. 1413, (Vol. IV, p. 33), but the codex there noticed is incomplete.

Beginning. गुरुभिरुपदिष्टमर्थं विस्मृतमपि तत्र बोधितं प्राज्ञैः ।
अवलम्ब्य शिवमधीय यथामति व्याकरोमि कल्पतरुं ॥
कल्पतरुमुपकुर्य्यां कमधिकमाकाङ्क्षितमुपहृत्य ।
तद्गतैरेवार्थैर्मम मतिमीहे परिष्कर्त्तुं ॥
यावन्तो निविशन्ते विदुषां व्याख्यानचातुरीभेदाः ।
सर्व्वेषामपि तेषामयमवकाशं ददाति पुष्पकवत् ॥
इत्यमिहातिगभीरे कियदाशयवर्णनं मया क्रियते ।
तुष्यन्ति ततोऽपि कतिपयरत्नग्रहादिरम्बुनिधेः ॥
यदिति । अत्र प्रत्यगिति ब्रह्मविशेषणेन शास्त्रस्य विषयं प्रदर्श्य तत्र सर्व्वेषां वेदान्तानां समन्वयः प्रथमाध्यायार्थः । इत्यादि ।

End. अयमर्थो भाष्यकाराणामिमां श्रुतिं भोगसाम्यार्थत्वेन उदाहृतवतामाशयस्थो भवतीति स्वयमन्यथा व्याचष्टे तं ब्रह्मलोकगतमित्यादिना ॥

Colophon. इति श्रीमद्भरद्वाजकुलजलधिकौस्तुभश्रीमदद्वैतविद्याचार्य्यविश्वजिद्याजि-श्रीरङ्गराजाध्वरिवरसूनोरप्पय्यदीक्षितस्य कृतौ वेदान्तकल्पतरुपरिमले चतुर्थाध्यायस्य चतुर्थः पादः । सम्पूर्णः शुभमस्तु । संवत् १८५१ । अग्रहायण ।

विषयः । वेदान्तकल्पतरुनामिकायाः भामतीटीकायाः व्याख्यानं ।

No. 1767. सिद्धान्तसुन्दरः, गोलाध्यायः ।

Substance, country-made paper, 9½ × 4 inches. Folia, 8. Lines, 14 on a page. Extent, 424 s'lokas. Character, Maithili. Date, Sm., 1269. Place of deposit, Calcutta, Government of India. Appearance, new. Verse. Correct.

Siddhántasundara alias *Goládhyáya.* An elementary treatise on astronomical geography. By Jñánarája, son of Nága. Contents : Order of creation ; terrestrial sphere shaped like a Kadamba flower floating on vacuity ; celestial sphere ; situation of the Meru mountain ; explanation of the Puráṇic theory about the earth ; refutation of the theory of Bháskara about attraction ; the meridian of Laṅká ; location of mountains ; duration of the year ; distance of the stars from the earth ; orbits ; circumference of the earth and other spheres ; motions of planets ; solstitial motions and crossings ; ecliptics ; circles ; astronomical instruments ; causes of seasons.

Beginning. श्रीगणेशाय नमः। भाले यस्य कलानिधिर्मधुमिलद्भृङ्गावली गण्डयोः
कण्ठेऽहिर्विलसत्यगं पदयुगे गीर्वाण+भाजनाः।
ब्रह्मापि त्रिजगत् सिद्धचुरभजन्निर्विघ्नसंसिद्धये
श्रीमन्मङ्गलमूर्त्तिमनघं तन्नौमि भक्तप्रियं॥
यन्नामाक्षररश्मिभिस्तनुगतैश्चद्धत्कला+न् भवेत्
भक्तस्वान्तनिशाकरो हततमास्तन्वोक्षरद्भिः क्रमात्।
नत्वा तां भुवनेश्वरीमपि गुरून् सिद्धान्तसत्सुन्दरं
सुज्ञानन्दकरं करोति चतुरं ज्ञानाधिराजः स्फुटं॥
यन्नारदाय गदितं चतुराननेन ज्ञानं ग्रहर्त्तगतिसंस्थितिरूपमग्र्यं।
शाकल्यसञ्ज्ञमुनिना निखिलं निबद्धं पद्यैस्तदेव विदधामि सवासनं स्वैः॥
इत्यादि।

End. इत्थं श्रीमन्नागनामात्मजेन प्रोक्ते तन्त्रे ज्ञानराजेन रम्ये।
ग्रन्थागाराधारभूते प्रभूते गोलाध्याये वर्णनं षड्ऋतूनां॥

Colophon. समाप्तोऽयं गोलाध्यायः सिद्धान्तसुन्दरः। सन् १२३९। श्रावण।

विषयः। सृष्टिक्रमकीर्त्तनं। कदम्बकुसुमाकारस्य भूगोलस्य शून्ये अवस्थितिकथनं। भचक्रसंस्थानकथनं। मेरुस्थितिनिरूपणं। भूगाद्दर्शतलाकारेत्यादिपौराणिकवाक्यतात्पर्य्यकथनं। आकृष्टशक्तिश्च महीत्यादिभास्करमतखण्डनं। लङ्कायमकोटिसिद्धपुररोमकाणां संस्थितिकथनं। पर्व्वतानां स्थानादिकथनं। वर्षनिरूपणं। नक्षत्रमण्डलादीनां दूरत्वादिकथनं। कक्षादिनिरूपणं। पृथिव्यादीनां परिधिनिरूपणं। ग्रहाणां गत्यादिनिरूपणं। क्षेपकनिरूपणमुखेन कोट्याद्यानयनप्रकारकीर्त्तनं। मण्डलवर्णनं। वृत्तकथनं। विविधयन्त्रकथनं। ऋतूनां कारणकथनादिकञ्च। इति शम्।

No. 1768. पारस्करगृह्यसूत्रं ।

Substance, country-made paper, 16½ × 6 inches. Folia, 38. Lines, 10 on a page. Extent, 740 s'lokas. Character, Nágara. Date, Sm., 1923. Place of deposit, Calcutta, Government of India. Appearance, new. Prose. Incorrect.

Páraskara Grihya Sútra. Domestic rites enjoined to the followers of the Mádhyandiní School. By Páraskara. The work is divided into three káṇḍas, and treats of the domestic fire, the sacraments, and sthálipáka.

Beginning. अथातो गृह्यस्थालीपाकानां कर्म्म परिसमुह्योपलिप्योपलिख्योद्धृत्याभ्युक्ष्याग्निमुपसमाधाय दक्षिणतो ब्रह्मासनमास्तीर्य्य प्रणीय परिस्तीर्य्यार्थवदासाद्य पवित्रे कृत्वा प्रोक्षणीः संस्कृत्यार्थवत् प्रोक्ष्य निरुप्याज्यमधिश्रित्य पर्य्यग्निं कुर्य्यात् स्रुवं प्रतप्य सम्मृज्याभ्युक्ष्य पुनः प्रतप्य निदध्यादाज्यमुद्वास्योत्पूयावेक्ष्य प्रोक्षणीश्च पूर्व्ववदुपयमनकुशानादाय समिधोभ्यादाय पर्य्युक्ष्य जुहुयादेष एव विधिर्यत्र क्वचिद्धोमः ॥

End. आप्यायन्तु मेऽङ्गानि वाक् प्राणश्चक्षुः श्रोत्रं यशो बलं यन्मे श्रुतमधीतं तन्मे मनसि तिष्ठतु तिष्ठतु ॥ १६ ॥

Colophon. इति श्रीगृह्यसूत्रे तृतीयं काण्डं समाप्तं। इति पारस्कराचार्य्यकृतं माध्यन्दिनीशाखासम्बन्धितं गृह्यसूत्रं समाप्तं। संवत् १९२३ ।

विषयः । माध्यन्दिनीशाखासम्बन्धिगृह्यस्थालीपाककर्म्मनिरूपणं ।

No. 1769. कुसुमाञ्जलिव्याख्या ।

Substance, country-made paper, 13½ × 6¼ inches. Folia, 37. Lines, 15 on a page. Extent, 2,000 s'lokas. Character, Bengali, Date, ? Place of deposit, Calcutta, Government of India. Appearance, new. Prose. Incorrect.

Kusumanjali-vyákhyá. A commentary on the Kusumánjali of Udayana A'chárya. The name of the commentator is not given in the codex, and as there are several exegeses extant under the name of Vyákhyá, I cannot ascertain which it is. From the initial words it is evident that it is distinct from the work noticed under No. 1055. (III, p. 30). The text of Udayaná with an English translation has been published by Dr. E. B. Cowell.

Beginning. सत्पक्षप्रसरः सतां परिमलप्रोद्बोधबद्धोत्सवो
विम्लानो न विमर्दनेऽमृतरसप्रस्यन्दमाध्वीकभः ।
ईशस्यैष निवेशितः पदयुगे भृङ्गायमानं भ्रम-
च्चेतो मे रमयत्वविघ्नमनघः न्यायप्रसूनाञ्जलिः ॥
स्वर्गापवर्गयोर्मार्गमामनन्ति मनीषिणः ।
यदुपास्तिमसावत्र परमात्मा निरूप्यते ॥

End. इत्येष नीतिकुसुमाञ्जलिरुज्ज्वलश्रीर्यद्वासयेदपि च दक्षिणवामकौ द्वौ ।
नो वा ततः किममरेशगुरोर्गुरुस्तु प्रीतोऽस्त्वनेन पदपीठसमर्पितेन ॥

Colophon. इत्याचार्य्यश्रीमदुदयनविरचितन्यायकुसुमाञ्जलिप्रकरणं समाप्तं ।

विषयः । उदयनाचार्य्यकृतन्यायकुसुमाञ्जलिव्याख्यानं ॥

No. 1770. हारीतसंहिता, उत्तरार्द्धं ।

Substance, country-made paper, $16\frac{3}{4} \times 5\frac{3}{4}$ inches. Folia, 187. Lines, 12 on a page. Extent, 4,563 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Verse. Incorrect.

Hárita Sañhitá. A supplement to the system of medicine of A'treya. By Hárita. A'treya was the oldest medical writer among the Hindus, older than Dhanvantari and Charaka. The latter amplified the text of A'treya. The text of Hárita is exceedingly scarce. The codex under notice contains only the chapter on anatomy.

Beginning. नत्वा शिवं सकलतत्त्वकलाभिरूढं ज्ञानामृतैकबहुलं परमात्मरूपं ।
रोगाधिरोगशमनं दमनं स्मरस्य शान्तं कृपाकरधरं त्रिगुणात्मरूपं ॥
हिमवदुत्तरे कूले सिद्धगन्धर्वसेविते । शान्तमृगगणाकीर्णे नगरादपि शोभने ॥
तत्रस्थं तपसा युक्तं तरुणादित्यतेजसं । शुद्धस्फटिकवच्छुभ्रं भूतिभूषितविग्रहं ॥
जटाजूटाटवीमौलिं वासितं शुभ्रकुण्डलं ।
आत्रेयं बहुशिष्यैस्तु राजितं तपसा वने ॥
पप्रच्छ शिष्यो हारीतः सर्व्वज्ञानमिदं महत् ।
भगवंस्त्वं गुणाधार आयुर्व्वेदविदांवर ॥
विनयावविनीतो हि इच्छामि मुनिपुङ्गव ।
कथं रोगसमुत्पत्तिरुत्पन्नो ज्ञायते कथं ॥

End. तस्माद् यत्नेन मद्वैद्यैः सादरार्द्रसमानसैः।
अर्चयित्वा तु सन्दध्यात् तदा स्यात् सुखसम्पदः॥

Colophon. इति श्रीमहर्षिआत्रेयभाषितहारीतोत्तरे शरीराध्यायः समाप्तः।

विषयः। रोगाणां लक्षणं चिकित्सा च।

No. 1771. सिद्धान्तकौमुदीगूढफक्किकाप्रकाशः।

Substance, country-made paper, 11¾ × 6 inches. Folia, 314. Lines, 8 on a page. Extent, 7,250 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Siddhánta-kaumudí-gúḍha-phakkiká-prakás'a, alias *Gúḍha-phakkiká-prakás'a.* A commentary on the Siddhánta-kaumudí of Bhaṭṭojí Díkshita. By Indradatta Upáḍhyáya. The work refers to the portion extending from Sandhi to Kridanta.

Beginning. संवास्य मानसकञ्जालिं हरिं हृदयपङ्कजे।
सिद्धान्तकौमुदीगूढफक्किकार्थः प्रकाश्यते॥
गर्गवंशावतंसो यो वैयाकरणकेशरी।
उपाध्यायोपनामेन्द्रदत्तस्यैषा कृतिः ++॥

End. इन्द्रदत्तेन विदुषा कृतोऽयं सङ्ग्रहो मुदा।
श्रीकृष्णः प्रियतान्तेन भगवान् भक्तवत्सलः॥

Colophon. इति श्रीमदुपाध्यायेन्द्रदत्तकृते सिद्धान्तकौमुदीगूढफक्किकाप्रकाशे कृदन्तं समाप्तं।

विषयः। सिद्धान्तकौमुद्याः सन्धिप्रकरणावधिकृदन्तप्रकरणपर्य्यन्तस्य व्याख्यानं।

No. 1772. यङ्लुगन्तशिरोमणिः।

Substance, country-made paper, 11 × 5 inches. Folia, 50. Lines, 7 on a page. Extent, 525 s'lokas. Character, Nágara. Date. ? Place of deposit, Calcutta, Government of India. Appearance, new. Prose. Incorrect.

Yañluganta S'iromaṇi. A gloss on a portion of S'iromaṇi's commentary on the S'abda-khaṇḍa of Gaṅges'a. By S'eshakṛishṇa Paṇḍit. The portion refers to the effect of certain grammatical affixes.

Beginning. नतदेवशिरःस्यन्दिमकरन्दाङ्कितांङ्घये। वागीशदत्तमतये विघ्ननाशाय ते नमः॥
यङोऽचि च। अजितिप्रत्यये गृह्यते न प्रत्याहारः तथा सत्यनीत्येवावच्यत्
यङन्तादन्यस्याचोऽसम्भवादिति हरदत्तः।

End. श्रीभाष्यप्रमुखमहार्णवावगाहाल्लब्धोऽयं मणिरमलो हृदा निषेव्यः।
हन्तव्यं यदकरवं(?) पुरस्तात् प्रागल्भ्यं पितृचरणप्रसादलेशात्॥

Colophon. इति श्रीशेषकृष्णपण्डितविरचितो यङ्लुगन्तशिरोमणिः समाप्तः॥

विषयः। यङ्लुगन्तधातुप्रकरणं।

No. 1773. पितृभक्तितरङ्गिणी।

Substance, country-made paper, 11 × 4 inches. Folia, 84. Lines, 11 on a page. Extent, 1,890 s'lokas. Character, Nágara. Date, Sm. 1650. Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Correct.

Pitṛibhakti-taraṅgiṇí, alias *S'ráddha-kalpa*. On the religious duties due by a son to a father, or directions for the performance of the funeral and the various offerings of water and cake to the close of the first year after the death of a parent. By Váchaspati S'armá. The work was compiled under the orders, and by a court paṇḍit, of Maharájádhirája Rámabhadra, son of Rúpanáráyaṇa, and grandson of Harináráyaṇa, of Mithilá.

Beginning. प्रणम्य वासुदेवाय तन्यते स्वर्गरङ्गिणी। श्रीवाचस्पतिधीरेण पितृभक्तितरङ्गिणी॥

End. ततो ब्राह्मणो यजमान एकादशब्राह्मणान् पात्रवद् भोजयेत॥
इति छन्दोगप्रयोगः समाप्तः॥

Colophon. इति श्रीमहाराजाधिराजश्रीहरिनारायणात्मजश्रीरूपनारायणपदवीमलङ्कृत-मिथिलामण्डलश्रीरामभद्रचरणादिष्टेन परिषदा श्रीवाचस्पतिशर्म्मणा विरचितोऽयं श्राद्धकल्पः परिपूर्णः॥

विषयः। पुत्रकर्त्तव्यपित्रौर्द्धदेहिकक्रियादिसपिण्डीकरणान्तक्रियानिरूपणं।

No. 1774. व्यवहारचमत्कारः ।

Substance, country-made paper $10\frac{3}{4} \times 5\frac{1}{2}$ inches. Folia, 40. Lines, 12 on a page. Extent, 1,116 s'lokas. Character, Nágara. Date, Sm. 1637. Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Vyavahára-chamatkára. A Smṛiti compilation, containing succinct rules regarding certain domestic rites and sacraments. By Rúpanáráyaṇa Mis'ra, son of Bhavánidása. Contents: I. The sacrament of conception. II. do. of Puṅsavana. III. do. after birth. IV. to VI. do. of naming, and first eating of rice. VII. do. of cropping of the crown-lock. VIII. do. of puncturing the ears. IX. do. of putting on the sacred cord. X. returning home from pupilage. XI. do. of marriage. XII. do. of bringing a bride to her husband's abode for permanent stay there. XIII. Auspicious days for starting on journeys. XIV. Intercallary months.

Beginning. गङ्गातरङ्गाङ्कितशेखराय ब्रह्मादिनारायणवन्दिताय ।
संसारदुःखस्य निवर्त्तकाय सुखस्वरूपाय नमः शिवाय ॥ १ ॥
भारद्वाजकुलावतंसविमलप्रख्यातिकीर्त्त्याश्रयो
यो नारायणपादपद्मयुगलध्यानैकतानः सदा ।
श्रीमद्भर्गवराहमुख्यगणकाचार्य्यप्रबन्धाऽर्जित-
ज्ञानोऽभूदनवद्यगद्यजलधिः श्रीनाथमल्लः सुधीः ॥ २ ॥
भवानीदासनामाभूत्तत्तनुजो द्विजाग्रणीः ।
प्रदीपस्तक्तिमुक्तानां पटली सेव्यते बुधैः ॥ ३ ॥
रूपनारायणस्तस्य तनुजो विदुषां मुदे ।
व्यवहारचमत्कारं तनुते गुर्व्वनुग्रहात् ॥ ४ ॥

End. १६३७ मिते शाके श्रीविक्रमार्कदेवस्य कार्त्तिकश्वेतशुक्लसप्तम्यां ग्रन्थसमाप्तिं रवौ कृतवान् ॥

Colophon. इति श्रीभवानीदासात्मजमिश्ररूपनारायणविरचिते व्यवहारचमत्कारे मलमास-। निर्णयप्रकरणं चतुर्दशं ॥

विषयः। अत्र चतुर्दशप्रकरणानि सन्ति । तत्र १ प्रथमे प्रकरणे,—गर्भाधानं । २ ये,—पुंसवनं । ३ ये,—जातकर्म्म । ४ र्थे,—नामकरणं । ५ मे,—निष्क्रमणं ६ ष्ठे,—अन्नप्राशनं । ७ मे,—चूड़ाकरणं । ८ मे,—कर्णवेधः । ९ मे,—उपनयनं । १० मे,—समावर्त्तनं । ११ शे,—विवाहः । १२ शे,—द्विरागमनं १३ शे,—यात्रानिरूपणं । १४ शे,—मलमासनिर्णयः ॥

No. 1775. प्रयोगदर्पणं ।

Substance, country-made paper, 13 × 4¾ inches. Folia, 102. Lines, 11 on a page. Extent, 3,700 s'lokas. Character, Nágara. Date, Sm. 1884. Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Incorrect.

Prayoga-darpana. Directions for the performance of domestic duties and sacraments. By Padmanábha Díkshita, son of Gopála by Párvatí, grandson of Náráyana, and pupil of Sítikantha. Contents : S'ráddha performed before a marriage for the gratification of the manes. The tying of the crown-lock. Necessity of worshipping Ganes'a before commencing a domestic rite. The adoration of the *Mátrikás*, or the eight primary mothers. The sacraments from conception to birth. Special rites to be performed in the event of a child being born under inauspicious conjunctions. Do. for accidents during accouchement. Do. for the birth of twins. Do. for birth with face presentation. Sacrament of naming. Rules for placing a child on a bedstead. Do. for nursing. Sacraments from the first eating of rice to marriage.

Beginning. यो वन्द्यस्त्रिदशैः सदैव यमिनां ध्येयः सदा योगिनां
यो विघ्नौघविनाशनेऽप्यतिदृढो भाग्यप्रदः सेविनां ।
यो विश्वार्त्तिहरस्तथैव सुखदः साहित्यविद्यानिधि-
स्तं वन्दे गिरिजात्मजं गणपतिं वाक्सिद्धये सर्व्वदा ॥ १ ॥
वन्दे श्रीवैष्णवीमूर्त्तिमोहनीं कुलदेवतां ।
प्रचयायास्तटे रम्ये निवासपुरवासिनीं ॥ २ ॥
श्रीमद्गोपालपितरं नारायणपितामहं ।
श्रीगुरुं शितिकण्ठाख्यं पार्व्वतीञ्चैव मातरं ॥ ३ ॥
नाम्ना च पद्मनाभस्तु दीक्षितः श्रीदयान्वितः ।
नानाग्रन्थान् समालोक्य विदुषां प्रीतिहेतवे ॥ ४ ॥
रम्यां नवीनां सुगमां नानावाक्यसुधामयीं ।
प्रयोगदर्पणाख्यां वै चक्रे पद्धतिमुत्तमां ॥ ५ ॥

End. विसृज्य होममग्निञ्च विधिना मानुषीं पुरीं ।
उद्वहेदन्यथा नैव पुत्रपौत्रसमृद्धिमान् ॥ इत्यर्कविवाहः ॥

Colophon. इति श्रीमद्दीक्षितनारायणात्मजगोपालसूनपद्मनाभविरचितं प्रयोगदर्पणाख्यं ष्वर्कविवाहप्रकरणं समाप्तं ॥

विषयः । अत्र प्रथमं स्वस्तिवाचनप्रकरणं । तत आभ्युदयिकप्रकरणं । तत आभ्युदयिक- श्राद्धदेवतानिर्णयः । ततः शिखाबन्धनविचारः । ततः सर्व्वकर्म्मसाधारणाङ्गानां गणेशपूजादीनां प्रयोगः । ततो मातृकापूजनं । ततो गर्भाधानादिजातकर्म्म- प्रयोगः । ततो जातस्य बालकस्य अशुभतिथिनक्षत्रयोगजनितदोषशान्ति- प्रयोगः । ततो वैकृतप्रसवशान्तिप्रयोगः । ततो यमलजननशान्तिप्रयोगः । अधोमुखप्रसवशान्तिप्रयोगः । नामकरणप्रयोगः । पर्य्यङ्कारोहणविधिः । दुग्ध- पानविधिः । अन्नप्राशनचूड़ाकरणादिविवाहान्तसंस्कारप्रयोगः ॥

No. 1776. सूतसंहिता स्कन्दपुराणीया । सूतसंहितातात्पर्य्य- दीपिकाख्यटीकासहिता ।

Substance, country-made paper, 12¾ × 6½ inches. Folia, 401. Lines, 14—15—16—17—18 on a page. Extent, 32,812 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Incorrect.

Súta Sañhitá, with a commentary entitled *Tátparya-dípiká.* The work professes to be a part of the 5th book or the Nágara Khaṇḍa of the Skanda Puráṇa, and comprises, in the codex before me, six khaṇḍas, each subdivided into several adhyáyas or chapters. The *first,* containing 8 chapters, describes the origin of all things, sentient or otherwise, from S'iva. The *second,* containing 13 chapters, dwells on the greatness of S'iva. This is the work noticed under No. 1747 (*ante* p. 50) but there described as the 'first book.' The *third,* containing 20 chapters, discusses the means of liberation and the acquisition of true knowledge. The *fourth,* comprising 12 chapters, treats of the relation of the human to the divine soul, and of the purport of the Upanishads. The *fifth,* comprising 9 chapters, discusses the character of *Mukti* or salvation. The *sixth,* comprising 47 chapters, gives an exposition of the fruits of religious rites and sacrifices performed with a view to reward (*kámya*), as daily duties (*nitya*)—and as occasional rites (*naimittika*). The commentary is by Mádhava Áchárya

Beginning. (टी॰) । अथ विद्यार्थिना गुरुनमस्कारस्तुती प्रथमतः कर्त्तव्ये इति व्युत्पादयितुं सूतगीतां श्रोतुकामैर्नैमिषीयैः कृते नमस्कारस्तुती उपनिबध्नाति ।

(मू॰)। ऐश्वर्य्यं परमानन्दमनन्तं सत्यचिद्घनं।
आत्मत्वेनैव पश्यन्तं निस्तरङ्गसमुद्रवत्॥ १ ॥
निर्व्विकल्पं सुसम्पूर्णं सुप्रसन्नं शुचिस्मितं।
भासयन्तं जगत् सा भानुमन्तमिवापरं॥ २ ॥
प्रणम्य मुनयः सूतं दण्डवत् पृथिवीतले।
कृताञ्जलिपुटा भूत्वा तुष्टुवुः परया मुदा॥ ३ ॥

End. (मू॰)। इति जनहितमेतत् प्रोच्य देव्याः प्रसादात् गुरुगुरुमखिलेशं भक्तिपूर्व्वं प्रणम्य।
मुनिगणमवलोक्य स्वानुभूत्यैव सूतः स्वकपरशिवरूपे लीनबुद्धिर्बभूव॥

Colophon. इति श्रीस्कन्दपुराणे सूतसंहितायां यज्ञवैभवखण्डे सप्तचत्वारिंशोऽध्यायः॥

(टी॰)। तत्र विशेषतोऽभिव्यक्तावित्यर्थः श्रूयते हि यो वेद निहितं गुहायां परमे व्योमन्निति।

इति श्रीमत्काशीविलासक्रियाशक्तिपरमभक्तश्रीमत्त्र्यम्बकपादाब्जसेवापरायणेनोपनिषन्मार्गप्रवर्त्तकेन माधवाचार्य्येण विरचितायां सूतसंहितातात्पर्य्यदीपिकायां यज्ञवैभवाख्ये चतुर्थे खण्डे सप्तचत्वारिंशोऽध्यायः।

विषयः। कृत्स्नस्यैतद्ग्रन्थस्य षट्खण्डाः सन्ति। एकखण्डे,—अष्टभिरध्यायैः, शिवात् चेतनाचेतनात्मकजगतः आविर्भावकथनं।

अपरैकखण्डे,—त्रयोदशभिरध्यायैः, शिवमाहात्म्यवर्णनं।

अपरैकखण्डे,—विंशत्यध्यायैः, मोक्षसाधनज्ञानोपायनिरूपणं।

अपरैकखण्डे,—द्वादशभिरध्यायैः, जीवब्रह्मणोरेकत्वज्ञानस्य मुक्तिसाधनत्वं सर्व्वशाखासम्मतमिति दर्शयितुं ऐतरेयक-तैत्तिरीयकादिसमस्तोपनिषदर्थस्य साकल्येन प्रतिपादिकाया ब्रह्मगीतायाः कथनं।

अपरैकखण्डे,—नवभिरध्यायैः, मुक्तिनिरूपणं।

अपरैकखण्डे,—सप्तचत्वारिंशदध्यायैः, काम्यनित्यनैमित्तिकभेदेन त्रिधा विभक्तस्य यज्ञकर्म्मणः फलवैलक्षण्यादिनिरूपणं॥

No. 1777. शिवगीता, पद्मपुराणोत्तरखण्डीया, सुबोधिन्याख्य-टीकासहिता।

Substance, country-made paper, 14 × 7¼ inches. Folia, 72. Lines, 17 on a page. Extent, 4,200 ślokas. Character, Nágara. Date, Sm. 1873. Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Incorrect.

S'iva Gítá, with a commentary entitled *Subodhiní*. On the divinity of S'iva. The commentary is by Apyají Bhaṭṭa, of Vírapura, pupil of Jñánánanda. Contents: I. The importance of faith in S'iva. II. Dispassion. III. Initiation in the mantra of Virajá. IV. The manifestations of S'iva. V. The gift of the Mahápásupat weapon by S'iva to Ráma. VI. The embellishments of S'iva. VII. S'iva imparts to Ráma a knowledge of his (S'iva's) pervading the universe. VIII. Origin of the human body. IX. The philosophy of corporation. X. Ditto of the soul. XI. The rise and fall of the soul. XII. Adoration. XIII. Varieties of Mukti. XIV. The origin of the five ceremonies of the soul. XV. Bhakti Yoga. XVI. Persons for whom the work is designed. The colophon describes the work to be a part of the Uttara Khaṇḍa of the Padma Puráṇa, but a different codex with a similar beginning has a colophon in which the work is described to be a part of the Matsya Purána, *ante* IV, p. 84.

Beginning. (टी०)। यस्मिन् जातानि भूतानि प्रेतानि च जगत्पतो।
यस्य सर्व्वान्तरो गीतासुबोधिन्या मुदेऽस्तु नः॥ १॥
अप्याजीभट्टो मेधावी वसन् वीरपुराभिधे।
ज्ञानानन्देन गुरुणा प्रेरितस्तस्य वै मुदे॥ २॥
विर्ट्यतिं शिवगीतायास्तनोति सुविबोधिनीं।
मुदे विदग्धकोराणां चन्द्रिकां सुविबोधिनीं॥ ३॥
(मू०)। सूत उवाच। अथातः सम्प्रवक्ष्यामि शुद्धं कैवल्यमुक्तिदं।
अनुग्रहान्महेशस्य भवदुःखस्य भेषजं॥ १॥
न कर्म्मणामनुष्ठानैर्न दानैस्तपसापि वा।
कैवल्यं लभते मर्त्त्यः किन्तु ज्ञानेन केवलं॥ २॥
रामाय दण्डकारण्ये पार्व्वतीपतिना पुरा।
या प्रोक्ता शिवगीताख्या गुह्याद् गुह्यतमा हि सा॥ ३॥
यस्याः श्रवणमात्रेण नृणां मुक्तिर्ध्रुवं भवेत्।
पुरा सनत्कुमाराय स्कन्देनाभिहिता हि सा॥ ४॥
सनत्कुमारः प्रोवाच व्यासाय मुनिसत्तमाः।
मह्यं कृपातिरेकेण प्रददौ वादरायणः॥ ५॥

End. (मू०)। इत्युक्त्वा प्रययुः सर्व्वे सायं सन्ध्यामुपासितुं।
स्तुवन्तः सूतपुत्रं ते सन्तुष्टा गोमतीतटं॥ ६५॥

Colophon. इति श्रीपद्मपुराणे उपरिभागे शिवगीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीशिवराघवसंवादे शिवगीताधिकारिनिरूपणं नाम षोडशोऽध्यायः ॥ १६ ॥

(टी०)। अतनोच्छिवगीतोपनिषद्बोधसुचन्द्रिकां।

अप्याजीभट्टः प्रियतां ज्ञानानन्दोऽनया गुरुः ॥

इति श्रीशिवगीताटीकायां अप्याजीभट्टविरचितायां सुबोधिन्यां षोडशोऽध्यायः।

विषयः। अत्र षोडश अध्यायाः सन्ति। तत्र १ मे,—शिवभक्त्युत्कर्षकथनं। २ ये,—वैराग्योपदेशः। ३ ये,—विरजादीक्षानिरूपणं। ४ र्थे,—शिवप्रादुर्भावः। ५ मे,—रामाय शिवेन महापाशुपतनामकास्त्रदानवृत्तान्तं। ६ ष्ठे,—शिवविभूतियोगनिरूपणं। ७ मे,—रामे शिवेनात्मनो विश्वरूपतादर्शनं। ८ मे,—शरीरोत्पत्तिकथनं। ९ मे,—देहस्वरूपनिर्णयः। १० मे,—जीवस्वरूपकथनं। ११ शे,—जीवगत्यगतिनिरूपणं। १२ शे,—उपासनाविधिः। १३ शे,—मुक्तिभेदनिरूपणं। १४ शे,—पञ्चकोशोपपादनं। १५ शे,—भक्तियोगनिरूपणं। १६ शे, शिवगीताधिकारिनिरूपणं ॥

No. 1778. श्राद्धेन्दुः।

Substance, country-made paper, 13 × 5 inches. Folia, 41. Lines, 10 on a page. Extent, 1,300 s'lokas. Character, Nágara. Date, Sm. 1845. Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Incorrect.

S'ráddhendu. A dissertation on the nature of S'ráddha, and the mode of performing it during the new-moon. Anonymous.

Beginning. अथ श्राद्धं निरूप्यते श्रद्धया ब्राह्मणेभ्यो यत् पितॄनुद्दिश्य दीयते ऋषयः श्राद्धमित्याहुः।

End. विष्णुं स्मृत्वा कर्म्मेश्वरार्पणं कुर्य्यादिति सङ्क्षेपः। इति दर्शश्राद्धप्रयोगः।

Colophon. इति श्राद्धेन्दुः समाप्तः।

विषयः। श्राद्धपदार्थनिरूपणं। दर्शश्राद्धप्रयोगकथनञ्च ॥

No. 1779. आचारचन्द्रोदयः ।

Substance, country-made paper, 13½ × 7¼ inches. Folia, 283. Lines, 16 on a page. Extent, 4,500 s'lokas. Character, Nágara. Date, Sm. 1869. Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Incorrect.

A'chára-chandrodaya. A digest of the diurnal duties of the faithful. By Mahes'a Kavi, pupil of Purushottama of Mithilá, and disciple of Vitthala. The work is divided into eight books, of which the *first* treats of the duties at dawn, immediately after rising from bed. The *second*, the study of the Vedas and the collection of materials for religious rites. The *third*, earning of livelihood for the maintenance of the family, and the duties of faithful women. The *fourth*, of midday duties. The *fifth*, of the five daily sacrifices, including the midday meal. The *sixth*, of duties after the midday meal, and of the nature of food. The *seventh*, of hearing of the Puráṇas. The *eighth*, of nocturnal duties.

Beginning. गोपीवल्लभवल्लभं गुरुतमं दीक्षागुरुं विट्ठलं
वन्देऽहं पुरुषोत्तमं कविवरं विद्यागुरुं मैथिलं ।
यत्पादाम्बुजसेवया अतितरां श्रीकृष्णसेवारति-
र्मैत्रीमत्सु सदा सभासु विदुषां विद्याविलासोदयः ॥ १ ॥
विश्वं यत् कुरुते बिभर्त्ति हरते शैलूषवत् प्रत्यहं
यच्छ्रामप्रभवास्तुवन्ति निगमाः साङ्गाः सशास्त्रागमाः ।
संसारार्णवतारणाय जगतां यन्नाम नौका दृढा
तद्वन्दे सहजप्रकाशममलं चैतन्यरूपं महः ॥ २ ॥
ज्ञात्वा गोकुलमर्द्दितं मघवता विस्मापयन् भूधरं
धृत्वा वामकरे करीव कमलं योऽपाद्‌पायाद्‌ ब्रजं ।
गुञ्जाहारमयूरमौलिमुरलीपीताम्बरालङ्कृतो
गोपीलोचनचुम्बितो विजयते गोपालचूडामणिः ॥ ३ ॥
अस्त्यैरावति रोधसीह नगरं विद्वज्जनालङ्कृतं
धर्म्मश्रीसदनं विटङ्कविलसत् प्रासादमालम्बितं ।
स्मृत्याम्नायविधाननित्यनियतैर्वर्णाश्रमैः सेवितं
नाम्नालाहपुरं पुरन्दरपुरीगर्व्वापहं पश्चिमे ॥ ४ ॥

सेवा यत्र गुरौ हरौ च निरता धर्म्मेषु कार्य्येष्वधी-
स्तर्के वादमतिर्गजेषु च मदः मारीषु मारोन्नयः।
बन्धो वेणिषु मानतापनपथे खेद्दयोर्दीपके
द्वारे देवगृहस्य दण्डघटना संदृश्यते नान्यतः॥ ५॥
तस्मिन् राजसभासु लब्धविभवः कालूः कवीनां प्रियो
ह्यासीदुत्पलवंशपङ्कजरवीराजन्यचूडामणिः।
येनादायि हिरण्यमन्नमचला गावः सवत्सा हरेः
प्रीत्यै विप्रवरेषु बन्धुजनतावर्गेषु मानर्द्धयः॥ ६॥
तत्पुत्रोऽजनि दन्धुवर्गनिरतो धर्म्मैकचित्तोऽनिशं
ब्रह्मण्यो गुरुदेवपूजनमतो नानूनरेन्द्राग्रणीः।
येनेदं कुलकैरवं विधिरुचा नित्यं विकाशीकृतं
धर्म्माचारयशःप्रतापविभवैर्वर्त्तते सर्वोपरि॥ ७॥
जातास्तत्तनयास्त्रयः सुविनया गोपीशपादाश्रयाः
ज्येष्ठस्तत्र परोपकारकुशलः ख्यातः स धारीति यः।
वापीकूपतड़ागदेवभवनारामादिनिर्म्माणकृद्-
दाता बन्धुजनाश्रयो नृपसभालब्धैकपूजोदयः॥ ८॥
तस्यानुप्रभवो बलैकविभवो दाता सदा धर्म्मधी-
र्लोके यो भगवान(?) इत्यभिहितो यस्यानुजो माधवः।
रूपेणानुजगाम यो रतिपतिं भोगैः सुराणां पतिं
भक्त्या दैत्यपतिं नये भृगुपतिं शीले कुरूणां पतिं॥ ९॥
तद्धर्म्मपत्नी समसूत वंसा(?) नारायणानेत(?) जनार्द्दनादीन्।
सुतान् सुराभान् गुरुदेवभक्तान् ग्रन्थेशसक्तिर्विदिताखिलार्थान्॥ १०॥
तेनाचारसभीप्सुता सविनयं विज्ञापितो धीमता
श्रीसारस्वतदुर्गशर्म्मतनयो नाम्ना महेशः कृती।
ग्रन्थे यत्र हि माधवादिरभवत् सार्थः प्रकाशान्तिकः
शब्दस्तं कुरुते हिताय जगतामाचारचन्द्रोदयं॥ ११॥

End. यावत् खे रविचन्द्रतारकगणा दीप्यन्ति दिव्यप्रभाः
यावत् सप्तधराधरा भुवि गजाः सन्त्यष्ट सप्तार्णवाः।
पाताले किल कोककूर्म्मभुजगा यावद् भुवं बिभ्रति
तावन्माधवकीर्त्तिरस्तु भुवने मोहान्धकारापहा॥

Colophon. इति श्रीमदुत्पलवंशावतंसविद्वज्जनमानसराजहंसनानूनरेन्द्रप्रतापकीर्त्तिकौमुदी-

विशदीकृतदिग्वलयश्रीमाधवप्रकाशे महेशकविदर्शिते सदाचारचन्द्रोदयेऽष्टमभागकृत्यपरिच्छेदः ।

प्रदर्शितो धीरमहेशशर्म्मणा सुपूजितो वाजसनेयिकर्म्मणा ।
प्रकाशितो माधवदासवर्म्मणा प्रयुज्यतां सर्व्वमनेन शर्म्मणा ॥

इति श्रीआचारचन्द्रोदयः सम्पूर्णः ॥

विषयः । अत्राष्टभागाः सन्ति । तत्र प्रथमे भागे.—आदौ धर्म्माचारप्रशंसा । ततः सदाचारलक्षणं । ततः सदाचारप्रमाणपरामर्शः । ब्राह्ममुहूर्त्तकृत्यं । प्रातर्मङ्गलालोकनं, मूत्रोत्सर्गादिविधिश्च । शौचाचारविधानं । कमण्डलुमार्जनं । देहमलशुद्धिः । आचमननिर्णयः । दन्तकाष्ठविधिः । शिखाबन्धविधिः । प्रातर्देहस्नानक्रिया, होमकालनिर्णयश्च । नित्यदानविधिः ।

द्वितीये भागे.—वेदाभ्यासविधिः । अभिवादक्रिया । कार्य्याकार्य्यनिर्णयः । कुशसङ्ग्रहणविधिः ।

तृतीयभागे.—पोष्यवर्गार्थसाधनं । धनार्जनविधिः । स्त्रीणां धर्म्मप्रशंसा । सहानुगमनविधिः ।

चतुर्थभागे,—मध्याह्नस्नानकथनं । स्नानप्रसङ्गक्रियोक्तिः । रात्र्यादिस्नाननिर्णयः । महानिशालक्षणं । समुद्रस्नानकथनं । नद्यादिस्नानकथनं । तडागस्नाननिर्णयः । उष्णोदकस्नानविधिः । मलस्नानविधानं । तैलाभ्यङ्गनिर्णयः । गौणस्नानकथनं । नदीलक्षणं । नदीरजोनिर्णयः । नित्यकर्म्मपरित्यागनिमित्तानि । धौतवस्त्रपरीधानं । सोत्तरीयविधानं । तिलकविधानं । शङ्खचक्रादिधारणं । तुलसीमणिमालादिधारणं । सन्ध्याप्रशंसायां गौणकालनिर्णयः । पवित्रलक्षणोक्तिः । पवित्रधारणविधिः । सन्ध्याविधानं । गायत्रीजपनिर्णयः । जपमालाविधानं । रुद्राक्षस्य फलोदयजपभेदकथनं । काम्यजाप्यक्रियादिकं । सन्ध्याप्रयोगः । ब्रह्मयज्ञविधिः । तर्पणविधानं । भीष्मकृतर्पणं । पद्मविष्णुपुराणीयतर्पणं । तर्पणप्रयोगः । जलाशये विष्णुपूजाविधानं । तान्त्रिकसन्ध्याविधानं । नित्यकाम्यभेदेन देवपूजाप्रशंसा । अशौचपूजनविधिः । निर्म्माल्योद्वासनविधिः । पूजाधिकारिनिरूपणं । दीक्षोक्तिः । प्रतिमालक्षणं । भूतशुद्धिः । अर्घ्यादिविधिः । पुष्पदानविधिः । पूजोपचारगणनं । पञ्चदेवप्रशंसनं । विष्णुपूजाधारविधिः । शालग्रामप्रशंसनं । शालग्रामभेदकथनं । शालग्रामपूजाधिकारिणः । द्वारिकाचक्रपूजोक्तिः । देवानां वैगुण्ये प्रतिष्ठात्यागः । विष्णुपूजोपचाराणां फलोक्तिः । घण्टावादनमाहात्म्यं । शङ्खपूजाफलं । गीतादिस्तोत्रमहिमा । अष्टाक्षरजपमहिमा । पुरुषसूक्तादिमन्त्रपूजादि । आसनविधानं । महापुराणीयपूजा । अष्टाक्षरपूजनं । विष्णवेश्मकरणं । पञ्चायतनपूजनं । पूजापराधकथनं । वैष्णवस्तुतिलक्षणं ।

पञ्चमभागे,—पञ्चयज्ञविधिः। गोग्रासविधिः। गृहस्थाश्रमकथनं। भोजनविधिः।

षष्ठभागे,—भोजनोत्तरकर्म्मविधानं। भोज्याभोज्यनिर्णयः। स्वाभाविकाभक्ष्यकथनं। निमित्ताभक्ष्यकथनं। मांसाशनविधानं। दूषितान्नशुचिः।

सप्तमभागे,—पुराणश्रवणविधिः।

अष्टमभागे,—होमादिविधिः। नक्तं शयनविधिः। दारोपगमनिर्णयः। रजस्वला-गर्भवतीधर्म्मोक्तिः। शास्त्राधिकारिकथनं॥

No. 1780. स्फोटचटकम्।

Substance, country-made paper, 14 × 6 inches. Folia, 17. Lines, 10 on a page. Extent, 400 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, new. Prose. Incorrect.

Sphoṭa-chaṭaka. On the power of sound in expressing the meaning of words—a philosophical dogma founded on the theory of eternity of sound. By Krishṇa Bhaṭṭa, son of Raghunátha, and grandson of Govardhana, of the clan of Mauli. The dogma is held in great repute by grammarians of the Nyáya school.

Beginning. पित्रोः पादयुगं नत्वा जानकीरघुनाथयोः।
मौन्नी+कृष्णभट्टेन तन्यते स्फोटचण्टका॥
शाब्दिकानां वाच्यलक्ष्यव्यङ्ग्यार्थप्रतिपादकानां वाचिकलाक्षणिकव्यञ्जकानां शब्दा-न्तः, तन्निष्ठा जातिर्वा स्फोट इति व्यवहारः।

End. समादेकवर्णात्मकोऽखण्डवाक्यस्फोटो वाचक इति सिद्धं।

Colophon. इति श्रीमन्मौनिकुलतिलकायमानगोवर्द्धनभट्टात्मजजानकीजानिरघुनाथभट्टा-त्मजश्रीकृष्णकृतस्फोटचटका सम्पूर्णा॥

विषयः। अष्टौ स्फोटशब्दाः। तत्र वर्णपदवाक्याखण्डपदाखण्डवाक्यभेदेन व्यक्तिस्फोटाः पञ्च। वर्णपदवाक्यभेदेन जातिस्फोटाः त्रयः।

No. 1781. वेदान्तार्या, आर्याव्याख्याऽभिधटीकासहिता।

Substance, country-made paper, $10\frac{1}{4} \times 5\frac{3}{4}$ inches. Folia, 33. Lines, 12 on a page. Extent, 300 s'lokas. Character, Nágara. Date, Sm. 1895. Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Incorrect.

Srátmanirúpaṇa-prakaraṇa, or *Srátmánanda-prakaraṇa* alias *Vedántáryá.* A compendium of the Vedánta doctrine, in a set of verses in the A'ryá metre. By S'aṅkara A'chárya. Attached to the text is a commentary entitled A'ryávyákhyá, by Sachchidánanda Sarasvatí. Hall's Contributions, p. 104.

Beginning. (टी०)। प्रचण्डपापषण्डविखण्डनोद्यतं त्रयीशिरोऽर्थप्रतिपादने रतं।
दुधैर्नुतं योगकलाभिराहृतं नमामि तं शङ्करं दैशिकं ततं॥ १॥
इह सकलशिष्टाग्रणीर्भगवान् शङ्कराचार्य्यः जिज्ञासुजनानुकम्पया सकलवेदान्त-सिद्धान्तरहस्यप्रदर्शनपरं वेदान्तप्रकरणमारभमानस्तत्रादौ श्रीगुरुनमस्काररलक्षणं मङ्गलाचरणमार्य्याद्वितयेनाकरोत् श्रीगुर्व्विति॥
(सू०)। श्रीगुरुचरणद्वन्द्वं वन्देऽहं मथितदुःसहद्वन्द्वं।
शान्तिग्रहोपशान्तिं पांशुमयं यस्य भसितमातनुते॥ १॥
दैशिकवरं दयालुं वन्देऽहं निहतसकलसन्देहं।
यच्चरणद्वयमनुभवमुपदिशति तत्पदस्यार्थं॥ २॥
संसारदावपावकसन्तप्तः सकलसाधनोपेतः।
स्वात्मनिरूपणनिपुणैर्वाक्यैः शिष्यः प्रबोध्यते गुरुणा॥ ३॥

End. (सू०)। अज्ञानान्धविहन्ता विरचितविज्ञानपङ्कजोल्लासः।
मानसगगनतलं मे भासयति श्रीनिवासगुरुभानुः॥

Colophon. इति श्रीमत्परमहंसपरिव्राजकाचार्य्यश्रीशङ्कराचार्य्यकृतस्वात्मनिरूपणप्रकरणं समाप्तं।
(टी०)। चैतन्यद्युतिरुचिराङ्गो दूरनिरस्तश्यामलासङ्गः।
हृदयसरोजे वरजे भ्रमति भ्रमरो विलक्षणः कश्चित्॥
इति श्रीसच्चिदानन्दसरस्वतीविरचिता आर्य्याव्याख्या समाप्ता।

विषयः। आत्मतत्त्वनिरूपणं।

No. 1782. परिभाषेन्दुशेखरकाशिका।

Substance, country-made paper, $10\frac{1}{4} \times 6\frac{1}{4}$ inches. Folia, 164. Lines, 11 on a page. Extent, 4,715 s'lokas. Character, Nágara. Date, Sm. 1916. Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Paribháshendu-s'ekhara-kás'iká or simply *Kás'iká.* A commentary on the Paribhashendu s'ekhara, of Nages'a Bhaṭṭa. By Vaidyanátha Bhaṭṭa, surnamed Paiyaguṇḍa, son of Mahádeva by Vení. The

Paribháshendu-s'ekhara itself is a commentary on the grammatical aphorisms of Páṇini. See my Catalogue of Sanskrit MSS. in the Library of the Asiatic Society, pp. 57, 58.

Beginning. वैद्यनाथः पायगुण्डो नत्वा नागेश्वरं गुरुं ।
विवृतिं परिभाषेन्दुशेखरे तनुतेऽगदाम् ॥
प्रारीप्सितस्य ग्रन्थस्य निर्व्विघ्नपरिसमाप्त्यर्थमिष्टदेवतानतिरूपं मङ्गलमाचरन् शिष्यशिक्षायै व्याख्यातृश्रोतॄणामनुषङ्गतो मङ्गलाय च निबध्नाति नत्वेति ।

End. गमकं बोध्यमित्यन्यत्र विस्तर इति सर्व्वमनवद्यमिति शिवं ।

Colophon. इति श्रीमत्पायगुण्डोपाख्यमहादेवसुतवेणीगर्भजवैद्यनाथभट्टकृतपरिभाषेन्दुशेखर-काशिका समाप्ता ।

विषयः । परिभाषेन्दुशेखरव्याख्यानं ।

No. 1783. मानसोल्लासवृत्तान्तविलासः, मूलसहितः ।

Substance, country-made paper, 12¼ × 6 inches. Folia, 41. Lines, 7—11—12—14—15 on a page. Extent, 2,007 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Mánasollása-vṛittánta-vilása alias *Dakshiṇá-múrti-stotra-vártika.* A gloss on a commentary, called Mánasollása, on a hymn by S'aṅkara A'chárya, in praise of Dakshiṇá Múrti. By Vis'varúpa A'chárya. The commentary is by Ráma Tírtha. The hymn is a short one of ten stanzas, but in it S'aṅkara has condensed the essence of the Vedánta. Hall's Contributions, p. 110.

Beginning. (टी०) । प्रोद्यच्छाखमहावटद्रुमतटे योगासनस्थं प्रभुं
प्रत्यक् तत्त्वबुभुत्सुभिः प्रतिदिशं प्रोद्वीक्ष्यमाणाननं ।
मुद्रां तर्कमयीं दधानममलं कर्पूरगौरं शिवं
हृद्यन्तं कलये स्फुरन्तमनिशं श्रीदक्षिणामूर्त्तिकं ॥
नत्वाथ शङ्कराचार्य्यमुख्यान् सर्व्वान् गरीयसः ।
मानसोल्लासवृत्तान्तं वर्णयामि यथामति ॥
इह हि भाष्यकारः श्रीमच्छङ्कराचार्य्यनामा मन्दमतीन् तत्त्वजिज्ञासूननुग्रहीतुं दक्षिणामूर्त्तिस्तोत्रव्याजेन समस्तवेदान्तार्थरहस्यमाविष्कार दशभिः पद्यबन्धैः तच्छिष्येण विश्वरूपाचार्य्येण सुरेश्वरापरनाम्ना तत्पद्यप्रबन्धार्थतत्त्वं तात्पर्य्यतो

मानसोल्लासनाम्ना वार्त्तिकात्मना ग्रन्थसन्दर्भेणाविष्कृतं तमिमं ग्रन्थं यथाशक्ति विवृणोमि तत्र शिष्टाचारसंरक्षणाय मङ्गलाचरणं द्योतयत्ययमाद्यः श्लोकः मङ्गलमिति ।

(मू॰)। मङ्गलं दिशतु मे विनायको मङ्गलं दिशतु मे सरस्वती ।
मङ्गलं दिशतु मे महेश्वरो मङ्गलं दिशतु मे महेश्वरी ॥ १ ॥
आत्मलाभात् परो लाभो नास्तीति मुनयो विदुः ।
तल्लाभार्थं कविः स्तौति स्वात्मानं परमेश्वरं ॥

End. (मू॰)। प्रकाशात्मिकया शक्त्या प्रकाशप्रभयाकरः ।
प्रकाशयति यो विश्वं प्रकाशोऽसौ प्रकाशतां ॥ १४ ॥

Colophon. इति श्रीदक्षिणामूर्त्तिस्तोत्रार्थप्रतिपादके प्रबन्धे मानसोल्लासे दशमोल्लासमङ्ग्रहः ।
(टी॰)। दशमश्लोकव्याख्योपसंहारश्लोकः इति श्रीदक्षिणामूर्त्तिस्तोत्रार्थप्रतिपादक इति ।
इति श्रीमानसोल्लासप्रबन्धोऽयं यथामति ।
व्याख्यातो रामतीर्थेन गुरुदेवप्रसादतः ॥
अनेन भगवान् श्रीमद्दक्षिणामूर्त्तिरीश्वरः ।
गुर्व्वात्मा प्रियतां नित्यं तत्त्वज्ञानप्रदः सतां ॥
इति श्रीदक्षिणामूर्त्तिस्तोत्रव्याख्याप्रबन्धमानसोल्लासवृत्तान्तविलासः सम्पूर्णः ॥

विषयः। शङ्कराचार्य्येण दक्षिणामूर्त्तिस्तोत्रव्याजेन समस्तवेदान्तार्थरहस्यं यैर्दशभिः पद्यैराविष्कृतं तेषां दशपद्यानां तत्त्वं शङ्कराचार्य्यशिष्येण विश्वरूपाचार्य्येण वार्त्तिकात्मना मानसोल्लासग्रन्थेनाविष्कृतं ॥

No. 1784. चन्द्रालोकः, चन्द्रालोकप्रकाशाख्यटीकासहितः ।

Substance, country-made paper. 15 × 6½ inches. Folia, 40. Lines, 2—4—5—6 on a page. Extent, 800 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Incorrect.

Chandráloka. A treatise on rhetoric. By Jayadeva, the author of the Gítagovinda. Attached to the text is a commentary by Pradyotana Bhaṭṭáchárya, son of Balabhadra. The commentary was compiled by order of Prince Vírabhadra, son of king Rámachandra, and grandson of Vírasiñha, a Bundella chieftain. The text is divided into ten "rays"

or *Mayukhas.* Contents: I. Faulty definitions of poetry. II. Faults of poems. III. Characteristics of poetry. IV. Merits of poetry. V. Rhetorical ornaments. VI. Taste in poetry. VII. Rhetorical use of words. VIII. Irony. IX. Application of words. X. Context or relation of words. A part of the 5th Chapter has been noticed under No. 605. *Ante* II, p. 52.

Beginning. (टी०)। पृथ्वी पङ्गुतां न च वहति नभस्तुङ्गतामुत्तमाङ्गात्
पाणिप्रक्षेपयोग्यं दधति दशदिशः किञ्च नैवावकाशं।
कुर्य्यां किं वानुकुर्य्यां त्रिपुरविजयिनस्ताण्डवे चिन्तयेत्थं
व्यग्रः स्वर्गादिहेतुस्त्रिदशगणनुतः श्रेयसे भैरवोऽस्तु ॥ १ ॥
मम सहजविरोधी निर्जितोऽनेन भित्त्वा
धनुरिति बहुला यत् प्रीतिभाजा स्मरेण।
स्रगिव कुवलयानामादरेणोपनीता
जयति जनकजाया राघवेणाङ्गदृष्टिः ॥ २ ॥
यस्य स्थितौ तु नगरी महत्ययोध्या भवत्यखिला।
इति रघुवंशादधिको जयति वन्ध्येलाभिधो वंशः ॥ ३ ॥
देवपतेरिव शक्तिर्यस्य जये भूभृतां प्रथिता।
श्रीवीरसिंहदेवस्तत्र धरामण्डले जातः ॥ ४ ॥
दशरथतो रघुपतिरिव तस्मादिह वीरभानुभूपालः।
स्थावद्धधर्म्मसेतुर्जगति समुद्रे समुद्भूतः ॥ ५ ॥
तत्तनयो नयनिर्म्मलकीर्त्तिः स्वर्निम्नगाकमले।
श्रीरामचन्द्रदेवो दूषणहन्ता समुन्नमति ॥ ६ ॥
श्रीवीरभद्रदेवो वैरिवधूगीतसत्कीर्त्तिः।
जयति तदीयस्तनयः कविमैत्री देवतारामः ॥ ७ ॥
क्रियते तस्य निर्देशाच्चन्द्रालोकप्रकाशोऽयं।
शरदागम इति विदितो भट्टाचार्य्येण यत्नेन ॥ ८ ॥
विघ्नविध्वंसकामनया कृतं मङ्गलं शिष्यशिक्षायै निबध्नाति उच्चैरिति।
(मू०)। उच्चैरस्यति मन्दतामरसतां जाग्रत्कलं कैरव-
ध्वंसं हसयते च या सुमनसामुल्लासिनी मानसे।
दृष्टोद्यन्मदनाशनाचिरमला लोकत्रयीदर्शिका
सा नेत्रत्रितयीव खण्डपरशोर्वाग्देवता दीव्यतु ॥ १ ॥

चंद्रा चिन्मयचित्तचन्द्रमणयः संवर्द्धयध्वं रसान्
रे रे स्वैरिणि निर्विचारकविते मास्मत्प्रकाशीभव।
उल्लासाय विचारवीचिनिचयालङ्कारवारांनिधे-
श्चन्द्रालोकमयं स्वयं वितनुते पीयूषवर्षः कृती ॥ १ ॥

End. (मू०)। महादेवः सत्रप्रमुखमखविध्येकचतुरः
सुमित्रा तद्भक्तिप्रणिहितमतिर्यस्य पितरौ।
प्रणीतस्तेनासौ सुकविजयदेवेन रचित-(?)
श्चिरं चन्द्रालोकः सुखयतु मयूखैर्दशदिशः ॥

Colophon. इति श्रीपीयूषवर्षपण्डितश्रीजयदेवविरचिते चन्द्रालोकेऽभिधास्वरूपो नाम मयूखः समाप्तश्चायं ग्रन्थः ॥

(टी०)। श्रीवीरभद्रभूपतिलब्धनिदेशेन यत्नेन।
चन्द्रालोकमयूखो दशमः स्पष्टार्थतां नीतः ॥

इति श्रीमहाराजाधिराजश्रीरामचन्द्रदेवात्मजयुवराजश्रीवीरभद्रदेवादिष्टमिश्रवलभद्रात्मजमकलशास्त्रारविन्दप्रद्योतनभट्टाचार्य्यविरचितचन्द्रालोकप्रकाशे शरदागमे दशमो मयूखः। समाप्तश्चायं ग्रन्थः।

विषयः। अत्र दश मयूखाः सन्ति। तत्र १ मे,—अन्यकृतकाव्यलक्षणदूषणं। २ ये,—काव्यदोषनिर्णयः। ३ ये,—काव्यलक्षणादिकथनं। ४ र्थे,—काव्यगुणनिर्णयः। ५ मे,—काव्यालङ्कारनिरूपणं। ६ ष्ठे,—काव्यरसनिरूपणं। ७ मे,—शब्दार्थानां व्यञ्जनात्मकव्यापारनिरूपणं। ध्वन्यात्मकोत्तमकाव्यलक्षणञ्च। ८ मे,—गुणीभूतव्यङ्गात्मकमध्यमकाव्यस्य लक्षणं, विभजनञ्च। ९ मे,—शब्दानां लक्षणावृत्तिनिरूपणं। १० मे,—शब्दानां अभिधावृत्तिनिरूपणं।

No. 1785. अनुबन्धदर्शनं।

Substance, country-made paper, 14 × 6 inches. Folia, 84. Lines, 9—10 on a page. Extent, 1,800 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, new. Prose. Incorrect.

Anubandha-dars'ana. The relation of effect and cause or motive—a Vedánta disquisition. By Ṭhákuradása. Four kinds of relations are noticed: 1st, subject; 2nd, motive; 3rd, agent; 4th, object.

Beginning. महेशञ्च तातं नत्वा ठाकुरदासमञ्जकं ।
सुखबोधाय बालानां कुर्व्वेऽनुबन्धदर्शनं ॥ १ ॥
गुरुं नत्वा विश्वं विविधमतसारज्ञकुशलाः
सुधा निश्चित्यैवोपरतिकरवैराग्यमननाः ।
ततोऽहं कुर्व्वे वै निखिलजनमोचैकफलदं
चिदानन्दे शुद्धे अनवरतचेतोमननकं(?) ॥ १ ॥

End. पूर्णानन्दः श्रवणविषयो ज्ञाततायाः अखण्डः
ज्ञातस्यैव ननु फलमात्मेति ताभ्यां विचारः ।
ख्यातो योगः कथितविषयोऽस्याधिकारी स्वकामः
न्यस्ता कण्ठे नु हरियशमेयं कृतिः प्राज्ञ(?) विष्णोः ॥

Colophon. समाप्तिसूचकवाक्यं नास्ति ।

विषयः । अत्र विषयप्रयोजनाधिकारिसम्बन्धरूपानुबन्धचतुष्टयवद्वेदान्तशास्त्रस्य प्रथमं विषयरूपानुबन्धनिरूपणं । ततः प्रयोजनरूपानुबन्धनिरूपणं । ततः अधिकारिरूपानुबन्धनिरूपणं । ततः सम्बन्धरूपानुबन्धनिरूपणं ॥

No. 1786. मीमांसार्थसङ्ग्रहकौमुदी ।

Substance, country-made paper, 12½ × 6¼ inches. Folia, 24. Lines, 4—19—20 on a page. Extent, 1,332 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Mímáṅsártha-saṅgraha-kaumudí. A commentary on Laugákshi's analysis of the Mímáṅsá doctrine of Jaimini. By Rámes'vara, a S'ivite mendicant, pupil of Sadás'ivendra Sarasvatí, who was a pupil of Gopálendra Sarasvatí.

Beginning. आद्यो यो हेतुर्विश्वसर्गे महेशो यज्ञादीनां को हयनिःश्रेयदेवः ।
भूतानां भर्त्ता सर्व्वभूतान्तरात्मा हृद्यं मे कार्य्यं तत्प्रणामः करोतु ॥ १ ॥
श्रीजैमिनिनये ग्रन्थः प्रवेशाय निरूपितः ।
विदुषा तत्र बालानां प्रवेशाय वितन्यते ॥ २ ॥
इह खलु परमकारुणिकेन मुनिना धर्म्माधर्म्मविवेकाय द्वादशलक्षणी मीमांसा प्रणीता तत्र हि प्रवेशाय शिशूनामर्थसङ्ग्रहाख्यं प्रकरणं प्रारभमाणो लौगाक्षि-

भास्करः शिष्टाचारपरिप्राप्तं प्रचयगमनादिफलकमिष्टदेवतानमस्कारलक्षणं मङ्गलमाचरयति वासुदेवमित्यादिना ।

End. तस्मादेव गुरुतरादभीष्टमाप्तं गोपालाश्रमपदगीयमानदैवात् ।
येनोमाधवचरणाब्जमेविना + तं वन्दे मद्दिमगुरुं विशालबुद्धिं ॥ १ ॥
या काशी निखिलगुरोर्महेश्वरस्य प्राणान्ते सकलशिवप्रदा प्रसिद्धा ।
यत्राहं सकलसुरेशलब्धतत्त्वस्तत्रेयं सुजनहितप्रदा निबद्धा ॥ २ ॥

Colophon. इति श्रीमत्परमहंसपरिव्राजकाचार्य्यगोपालेन्द्रसरस्वतीश्रीपूज्यपादशिष्यश्रीसदाशिवेन्द्रसरस्वतीशिष्येण श्रीरामेश्वरेण शिवयोगिभिक्षुणा विरचिता, मीमांसार्थसङ्ग्रहकौमुदी चरमत्वं समगात् ॥

विषयः । जैमिनिप्रणीतपूर्व्ववेदविचारात्मकद्वादशाध्यायकमीमांसाशास्त्रस्य अर्थसङ्ग्रहप्रकरणं यत् लौगाक्षिभास्करेण कृतं तस्य व्याख्यानं ।

No. 1787. प्रमाणमाला ।

Substance, country-made paper, 12 × 5 inches. Folia, 9. Lines, 13—15—17—18 on a page. Extent, 420 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Correct.

Pramáṇa-málá. A string of Vedántic evidences on the nature of the Deity, and the relation of the emancipated to Him in refutation of the Nyáya and other doctrines on the subject. By A'nandabodha A'chárya. Hall's "Contributions," p. 150.

Beginning. आनन्दमात्मानमसत्यभेदं प्रणम्य विज्ञानतनुं मुकुन्दम् ।
प्रधाने(?) तस्य सदोपयुक्तां प्रमाणमालां रचयामि रम्यां ॥
आनन्दो दुःखाभावो भवति तदनिरूप्यत्वात् यदित्थं तत्तथा यथा घटः ।

End. आत्मस्वभावमधिकृत्य मुकुन्दमेषामानाभिधानवरजे(?) मनोज्ञमाला ।
आनन्दबोधयतिना निभिन्ना गुण,नामानन्दहेतुरकलङ्कधिया व्यधायि ॥

Colophon. इति श्रीमत्परमहंसपरिव्राजकाचार्य्यश्रीमदानन्दबोधाचार्य्यकृतं प्रमाणमालाख्यं प्रकरणं समाप्तं ।

विषयः । मोक्षकारणसाक्षात्कारविषयानन्दस्य प्रमाणद्वारा भावरूपत्वसाधन ।

No. 1788. स्मृतिभास्करः ।

Substance, country-made paper, 11½ × 5½ inches. Folia, 136. Lines, 11 on a page. Extent, 2,000 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Incorrect.

Smriti-bháshkara. On propitiatory and protective rites and ceremonies, a Smriti treatise. By Nílakaṇṭha.

Beginning. यो लीलया सन्तनुते च विश्वं तत्पालयत्यात्मनि विश्वरूपे ।
लयं नयत्याशु च पूर्णरूपः शिवं तनोत्वाशु रविर्ममासौ ॥
महो महत्वमाराध्य समाकर्ण्य गुरोर्गिरं ।
समुद्यतो नीलकण्ठो वक्तुं शान्तिकपौष्टिकं ॥

End. धर्म्मं कामं प्रसाधयति तस्य पिनष्टि पापं ।
यः कारयेत् सकलदोषहरां महार्थां
शान्तिं प्रशान्तहृदयः पुरुषः सदैव ॥

Colophon. इति श्रीनीलकण्ठरचितः स्मृतिभास्कराख्यो ग्रन्थः ।

विषयः । शान्तिकपौष्टिककर्म्मनिरूपणं ।

No. 1789. वैयाकरणमतोन्मज्जनटीका वृत्त्युल्लासः ।

Substance, country-made paper, 13½ × 6 inches. Folia, 19. Lines, 6—10—11 on a page. Extent, 523 s lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, new. Prose and verse. Incorrect.

Vaiyákaraṇa-matonmajjana-ṭíká alias *Vrittyullása.* A commentary on the Vaiyákaraṇa-matonmajjana, a disquisition on the philosophy of grammar. The name of the author not ascertained.

Beginning. जगतः पितरौ नत्वा पार्व्वतीपरमेश्वरौ ।
गुरुभिर्ये कृताः स्लोकाष्टीका तेषां वितन्यते ॥

End. सा च ब्रह्मात्मिकेति तु परमार्थ इत्यवधेयं ।

Colophon. इति वैयाकरणमतोन्मज्जनटीकायां वृत्त्युल्लासे शक्तिसाधुत्वनिरूपणोल्लासः सप्तमः ।

विषयः । वैयाकरणमतोन्मज्जनस्य व्याख्यानं ।

No. 1790. जगन्नाथप्रकाशः ।

Substance, country-made paper, 14 × 6 inches. Folia, 215. Lines, 8—10—11—12 on a page. Extent, 5,136 s'lokas. Character, Nágara. Date, Sm. 1838. Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Incorrect.

Jagannátha-prakás'a. A Smriti treatise, treating of—1st, virtue, vice and duty. II. Caste. III. Sacraments. IV. Diurnal religious duties. V. Times meet for fasts. VI. Loyalty and expiations. VII. Impurity of the person from birth or death in one's family. VIII. . S'ráddhas and gifts. IX. Religious calendar. X. Emancipation. By Súra Mis'ra; compiled by order of Jagannátha of the Kamboja clan.

Beginning. मतङ्गजमुखं नुमः सकलसिद्धिसम्पादकं
क्रियासु सकलैः सुरैर्महितपादपद्मं सदा ।
स्फुरद्दशनरोचिषा धवलितास्यमीशाङ्गवद्
विभूतिपरिभूषितं बहुलविघ्नविध्वंसनं ॥ १ ॥
यस्य निश्वासतो जाताः पुरुषार्थप्रवर्त्तकाः ।
चत्वारो निगमाः सिद्धाः सिद्धिदाः सर्व्वदेहिनां ॥ २ ॥

End. अज्ञानध्वान्तनाशं विकशितसकलस्वान्तकल्हारजातं
धर्म्मानुष्ठानकामी जनकृतनिचयं प्रीणितः प्राणिकोकं (?) ।
प्रत्यादिष्टारिवर्गप्रमुदितमनसा श्रीजगन्नाथनाम्ना
निर्द्दिष्टोऽसौ व्यधत्त प्रकटितयशसा सूरमिश्रः प्रकाशं ॥ १ ॥
अशेषकाम्बोजकुलावतंसः श्रीमज्जगन्नाथ इति प्रसिद्धः ।
अकारयद्धर्म्मनिबन्धमेतं धराधिपेऽप्यर्कबले नरेशे ॥

Colophon. इति श्रीकाम्बोजवंशावतंसमहोग्रप्रतापपरमधार्म्मिकश्रीजगन्नाथप्रकाशे दशमी प्रभा पूर्णा ।
शैलाग्निवसुचन्द्रेषु विक्रमादित्यवत्सरे ।
आत्मारामेण लिखितो जगन्नाथप्रकाशकः ॥
कार्त्तिकस्यासिते पक्षे सुधांशुग्रहवासरे ।
षष्ठी च अपराह्ले तु जम्बूदेशे शुभे परे ।

विषयः । अत्र दशप्रभाः सन्ति । तत्र प्रथमप्रभायां,—आदौ संसारस्य असारतानिरूपणं,

ततः अधर्म्मनिन्दया प्राणिजन्मनिरूपणं, ततः धर्म्मप्रशंसया प्राणिजन्मनिरूपणं, कर्म्मप्राधान्यकथनञ्च ।

द्वितीयप्रभायां,—वर्णजन्मनिरूपणं, वर्णानां मध्ये ब्राह्मणस्य स्तुतियोग्यत्व-कथनञ्च ।

तृतीयप्रभायां,—द्विजशरीरसंस्कारार्थं गर्भाधानादिसंस्कारविधिः ।

चतुर्थप्रभायां,—सर्व्वाचारपुरःसरमाह्निकाचारनिरूपणं ।

पञ्चमप्रभायां,—व्रताचरणाङ्गीभूतसमयनिरूपणं ।

षष्ठप्रभायां,—राजदर्शनीयव्यवहारनिरूपणं, प्रायश्चित्तनिरूपणञ्च ।

सप्तमप्रभायां,—जननमरणाशौचशुद्धिनिरूपणं ।

अष्टमप्रभायां,—श्राद्धकल्प-दानादिविधानं ।

नवमप्रभायां,—चैत्रादिद्वादशमासकृत्यनिरूपणं, पूर्त्तारामविधानञ्च ।

दशमप्रभायां,—ईश्वरविचारेण कैवल्यनिरूपणं । काम्बोजकुलावतंसश्रीजगन्नाथस्य आदेशेन सूरमिश्रः ग्रन्थमिममकरोत् अतोऽस्य ग्रन्थस्य जगन्नाथप्रकाशेति नाम सिद्धं ॥

No. 1791. सुब्विभक्त्यर्थविवेकः ।

Substance, country-made paper, 14 × 6½ inches. Folia, 34. Lines, 4—12 on a page. Extent, 1,054 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, new. Prose. Incorrect.

Subvibhaktyartha-viveka. A dissertation on the philosophy of the inflectional affixes collectively called sup. Anonymous.

Beginning. अथ सुब्विभक्त्यर्थो विविच्यते । तत्र सुप्त्वं स्वौजसमौडित्याद्यनुशासनानुशासितप्रत्ययत्वं । तार्किकास्तु प्रकृत्यर्थधर्म्मिकस्वार्थसङ्ख्यान्वयबोधकविभक्तित्वं सुप्त्वं ।

End. प्रायेण याज्ञिक इत्यादौ प्रायशब्दस्यावच्छेदकावच्छिन्नयज्ञविद्यावानिति बोधः । नाम्ना सुतीक्ष्ण इत्यादौ नामज्ञाप्यतीक्ष्णत्ववानिति बोधः स्व— ।

Colophon. (इतः परं खण्डितं ।)

विषयः । सुब्विभक्तीनामर्थविवेचनं ।

No. 1792. गजसूत्रव्याख्या ।

Substance, country-made paper, 14 × 6½ inches. Folia, 22. Lines, 6—12 on a page. Extent, 692 s'lokas. Character, Nágara. Date, Sk. 1772, Sm. 1916. Place of deposit, Calcutta, Government of India. Appearance, new. Prose and verse. Incorrect.

Gajasútra-vyákhyá. A commentary on a Sútra of Páṇini which is commonly called Gajasútra from the circumstance of its referring to elephants for illustration. It is the 67th sútra of the 3rd section of the First Book. By S'ivaramendra Yati.

Beginning. शिवं शिवपदं नित्यं रामं रमदतां वरं ।
इन्द्रप्रमुखदेवेशं सरस्वत्याश्रयं भजे ॥ १ ॥
सूत्रवार्त्तिकभाष्याणामाश्रयं वाङ्मयस्य : ।
वृत्तिकृत्प्रमुखाः सर्व्वे वभ्रमुर्गजसूत्रके ॥ २ ॥
अतो भाष्यमवष्टभ्य सूत्रव्याख्यापुरःसरं ।
वृत्तिकृतप्रमुखग्रन्थान् दूषये युक्तिपूर्व्वकं ॥ ३ ॥

End. इत्थं भाष्यादिग्रन्थान् वृत्त्यादिग्रन्थांश्चालोच्य को वा भाष्यकारानुमतोऽर्थ इति मात्सर्य्यमुत्सार्य्य सुधियो विदांकुर्व्वन्तु ।

Colophon. शाके नेत्राचलाद्रीन्दौ जयनामकवत्सरे ।
मासि भाद्रपदे कृष्णद्वादश्यां शुक्रवासरे ॥
णेरणाविति सूत्रस्य व्याख्यानं फणिसम्मतं ।
शिवरामेन्द्रयतिना कृतं संस्थितिमाश्रितं ॥

विषयः । गजसूत्रव्याख्यानं ।

No. 1793. पराशरस्मृतिः, विद्वन्मनोहराख्यटीकासहिता ।

Substance, country-made paper, 14 × 6 inches. Folia, 218. Lines, 10—11—12—13 on a page. Extent, 7,000 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, new. Prose and verse. Incorrect.

Parás'ara Smṛiti. The Institutes of Parás'ara, with a commentary by Nanda Paṇḍita *alias* Vináyaka Paṇḍita. The specific name of the commentary is *Vidvan-manohará.* The text is divided into 12 chapters, and treats of—I, characteristics of the present Kali age. II, Duties of

householders in that age. III, Impurity of person resulting from birth or death in a family. IV, Expiations for minor offences. V, Obsequies for persons who have cherished the sacred household fire. VI, Expiations for manslaughter &c. VII, Purity and impurity. VIII—IX, Expiations for killing cows &c. X, Expiations for incest. XI, Expiations for eating rice prepared by a Chaṇḍála, and for other offences of the same class. XII, Expiations for heinous offences.

Beginning. (टी०)। श्रीवत्साङ्कितवक्षसः प्रणयिनो नित्यार्च्चने संविधा-
माधातुं निहितं गिरीन्द्रसुतयोत्सङ्गे स्वयं धूर्ज्जटेः।
चूडाचुम्बिकलङ्कपङ्किलकलं चन्द्रं मृणालभ्रमा-
दादातुं करमुत्क्षिपन्तमसकृद्‌ढुण्ढिं चिरं भावये ॥ १ ॥
यं साक्षात्कर्त्तुमाद्यं पुरुषमविकृतिं योगिनः शुद्धचित्ता
मैत्राद्यैः क्लेशकर्म्मोद्भवविविधविपाकाशयैरप्रमृष्टं।
भेदख्यातिं प्रपद्य प्रकृतिपुरुषयोराश्रयन्ते सवीजं
योगं तं श्रीसहायं हरिमनिशमहं सच्चिदानन्दमीडे ॥ २ ॥
धर्म्माधिकारिकुलकैरवकाननेन्दुश्रीरामपण्डितसुतेन विनायकेन।
व्याख्यायते कलियुगोचितवर्णधर्म्मशास्त्रं पराशरमुखोद्गतमल्पशब्दैः ॥ ३ ॥
(मू०)। अथातो हिमशैलाग्रे देवदारुवनालये।
व्यासमेकाग्रमासीनमपृच्छन्नृषयः पुरा ॥ १ ॥
मानुषाणां हितं धर्म्मं वर्त्तमाने कलौ युगे।
शौचाचारं यथावच्च वद सत्यवतीसुत ॥ २ ॥

End. (मू०)। यथाध्ययनकर्म्माणि धर्म्मशास्त्रमिदं तथा।
अध्येतव्यं प्रयत्नेन नियतं स्वर्गकामिना ॥ ८२ ॥
(टी०)। पराशरस्मृतेर्व्याख्या ज्ञानाभिख्या प्रकाशिता।
येनान्तरात्मना सोऽयमनया प्रियतां हरिः ॥ ५ ॥

Colophon. इति श्रीधर्म्माधिकारिरामपण्डितात्मजनन्दपण्डितापरनामधेयविनायकपण्डित-कृतौ पराशरस्मृतिविवृतौ विद्वन्मनोहरायां द्वादशोऽध्यायः ॥

विषयः। अत्र द्वादशाध्यायाः सन्ति। तत्र १ मे,—कलिधर्म्मनिरूपणं। २ ये,—कलियुगे गृहस्थधर्म्मनिरूपणं। ३ ये,—ब्राह्मणक्षत्रियविट्शूद्राणां जननमरणाद्यशौच-निरूपणं। ४ र्थे —प्रकीर्णकादिप्रायश्चित्तकथनं। ५ मे,—आहिताग्निसंस्कार-निरूपणं। ६ ष्ठे,—प्राणिहत्याप्रायश्चित्तकथनं। ७ मे,—द्रव्यशुद्ध्यादिकथनं।

८मे,—गोवधप्रायश्चित्तादिकथनं। ९मे,—संरक्षणार्थं रोधबन्धनाद्यैा गवां मरणे प्रायश्चित्ताभावइत्यादिकथनं। १० मे,—अगम्यागमनादिप्रायश्चित्तकथनं। ११शे,—चाण्डालान्नादिभोजनप्रायश्चित्तकथनं। १२शे,—महापातकप्रायश्चित्तकथनं।

No. 1794. उक्थपद्धतिः।

Substance, country-made paper, 10½ × 4½ inches. Folium, 1. Lines, 12. Extent, 14 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Uktha Paddhati. Guide to the performance of the Uktha rite. Anonymous.

Beginning. अथ ब्रह्मचारिणामप+++न्यां (?) प्रस्थानविधिं व्याख्यास्यामः उदगयनकाले वैष्णवं नवकपालं निर्वपेदौपासने वा।

End. ब्राह्मणायावनेत्य दद्यादन्नत इति वन्नत इति।

Colophon. इत्युक्थसूत्रं द्वादशमं परिशिष्टं।

विषयः। उक्थसूत्रनिरूपणं।

No. 1795. प्रवराध्यायपरिशिष्टं।

Substance, country-made paper, 10½ × 4½ inches. Folia, 5. Lines, 3—7 on a page. Extent, 65 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Pravarádhyáya Paris'ishṭa. A supplement to Kátyáyana's chapter on Pravaras, or genealogy of the Vedic Ṛishis. Anonymous. Some attribute it to Kátyáyana himself.

Beginning. अगस्त्यः करञ्जयः कनाटाः सुरोधसो योगाध्मपनाः पुलस्त्यः पुलहः क्रतुमाहेन्द्रा मयोभवा इमे।

End. कात्यायनेन व्यरचि विप्राणां हितकाम्यया।
अध्यायः प्रवराख्योऽयं पुरा ब्रह्मविनिर्म्मितः॥

Colophon. इति प्रवराध्यायसञ्ज्ञकं परिशिष्टं समाप्तं।

विषयः। विप्राणां प्रवरनिरूपणं।

No. 1799. प्रतिज्ञासूत्रपरिशिष्टं ।

Substance, country-made paper, 10½ × 4⅓ inches. Folium, 1. Lines, 12. Extent, 14 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Pratijñásútra Paris'ishṭa. A supplement to the Pratijñá-sútra of Kátyáyana—on the accents of the White Yajur Veda. Anonymous.

Beginning. अथ प्रतिज्ञामन्त्रब्राह्मणयोर्वेदनामधेयन्तस्मिन् शुक्ले यजुष्याम्नाये माध्यन्दिनीयके मन्त्रे स्वरप्रक्रिया त्र्यनुदात्तो मूर्द्धि उदात्तः श्रुतिमूले स्वरितः ।

End. पदाद्यस्य संयुक्ताकारस्येषद्दीर्घता च भवतीषद्दीर्घता च भवति । १ ॥

Colophon. इति प्रतिज्ञासूत्रं परिशिष्टमङ्कुकं ।

विषयः । उदात्तादिस्वरप्रक्रियाकथनं ।

No. 1800. निगमपरिशिष्टं ।

Substance, country-made paper, 10⅓ × 4¾ inches. Folia, 14. Lines, 6—7—9 on a page. Extent, 250 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Nigama Paris'ishṭa. A supplement to the Nigama-sútra of Kátyáyana. Anonymous.

Beginning. स्थानाकृतिजातिगुणक्रियारूपविशेषेभ्योऽन्यत्वं । चीराग्निनदीसुरावीजमस्मक-सिद्धत्वात्तेजस्विषु तिष्ठते ।

End. यज्ञेषु तेषां गच्छन्ति तद्विदः ॥ २२ ॥

Colophon. इति कात्यायनकृतौ चतुर्दशपरिशिष्टं समाप्तं ॥

विषयः । निगमकाण्डस्य परिशिष्टं ॥

No. 1801. ऐतरेयब्राह्मणभाष्यं ।

Substance, country-made paper, 11 × 4¾ inches. Folia, 485. Lines, 8—10 on a page. Extent, 13,395 s'lokas. Character, Nágara. Date, Sm. 1932. Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Aitareya Bráhmaṇa Bháshya. A commentary on the Aitareya Bráhmaṇa of the Ṛig Veda. By Sáyaṇa A'chárya. The codex comprises the 1st, 2nd, 3rd, 4th, and 6th Pañchikás.

Beginning. वागीशाद्याः सुमनसः सर्व्वार्थानामुपक्रमे ।
यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननं ॥ १ ॥
यस्य निश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्म्ममे तमहं वन्दे विद्यातीर्थमहेश्वरं ॥ २ ॥
यत्कटाक्षेण तद्रूपं दधद्बुक्कमहीपतिः ।
आदिशन्माधवाचार्य्यं वेदार्थस्य प्रकाशने ॥ ३ ॥
ये पूर्व्वोत्तरमीमांसे ते व्याख्यायातिसङ्ग्रहात् ।
कृपालुर्म्माधवाचार्य्यो वेदार्थं वक्तुमुद्यतः ॥ ४ ॥

End. तस्मात् कारणात् प्राकृतमत्र सम्भूय न संशंसेत् । अभ्यासोऽत्राध्यायसमाप्त्यर्थः ॥
इति त्रिंशोऽध्यायो दशमः खण्डः ॥

Colophon. इति श्रीसायणाचार्य्यविरचिते माधवीये वेदार्थप्रकाशे ऐतरेयब्राह्मणे त्रिंशोऽध्यायः । समाप्तेयं षष्ठपञ्चिका ॥

विषयः । ऐतरेयब्राह्मणप्रथम-द्वितीय-तृतीय-चतुर्थ-षष्ठपञ्चिकाव्याख्यानं । (पञ्चमपञ्चिका तु नात्र लब्धा ।)

No. 1802. साङ्ख्यप्रवचनसूत्रवृत्तिः, सूत्रसहिता ।

Substance, country-made yellow paper, 16½ × 8 inches. Folia, 44. Lines, 10 on a page. Extent, 1,720 s'lokas. Character, Nágara. Date, Sm. 1869. Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Correct.

• *Sáṅkhya-pravachana-sútra-vṛitti.* An exposition of the Sáṅkhya aphorisms of Kapila. The name of its author is not apparent in the codex, but I have been informed that it is Aniruddha. In Mr. Hall's Contributions, p. 1, Aniruddha's work is entered under the name of *Aniruddha-vritti.*

Beginning. विनायकं नमस्कृत्य विष्णुं हृद्यं सरस्वतीं ।
लक्ष्मीं गङ्गां महेशानं वृत्तिं कर्त्तुं समारभे ॥
पुरुषः खलु वैराग्यान्मोक्षसाधनशास्त्रे प्रवर्त्तते । वैराग्यञ्च द्विधा स्यात् । शोका-

दिना वा जन्मान्तरीयदुरितक्षयाद्वा। तथा च श्रुतिः यदहरेव विरज्येत्तदहरेव प्रव्रजेदिति। शास्त्रे प्रवृत्तस्य परमवैराग्यमुच्यते। तथाह पतञ्जलिः। दृष्टानुश्रविकविषयवितृष्णस्य वशीकारसञ्ज्ञा वैराग्यं। तत्परं पुरुषख्यातेर्गुणवैतृष्ण्यं। तदेव परं वैराग्यं वत्तृमतिपरमकारुणिको मुनिर्जगदुद्दिधीर्षुः कपिलो मोक्षशास्त्रमारभमाणः प्रथमसूत्रञ्चकार। अथ त्रिविधेति।

End. यद्वेति यद्वा तद्वेति कर्म्मक्षयाद्वा ज्ञानाद्वा अन्यतो वेति स्वस्वामिभावसम्बन्धोच्छित्त्या संसारोच्छित्तिः पुरुषार्थः तदुच्छित्तिः पुरुषार्थ इति वीप्साध्यायपरिसमाप्तौ। एष सत्कार्य्यसिद्धान्तः पूर्व्वमेव निरूपितः। तन्त्रतः प्रतिपादित्वान्न हि स्यात् पुनरुक्तता॥

Colophon. इति साङ्ख्यप्रवचनसूत्रवृत्तौ षष्ठोऽध्यायः।

विषयः। अथ त्रिविधदुःखात्यन्तनिवृत्तिरत्यन्तपुरुषार्थ इत्यादिसाङ्ख्यसूत्रव्याख्यानं।

No. 1803. क्रमसंहिता, पूर्व्वार्द्धं।

Substance, country-made paper, 9½ × 4½ inches. Folia, 410. Lines, 7 on a page. Extent, 1,2?4 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Krama-sañhitá, Púrvárddha. The first part of the text of the Mádhyandiní Sañhitá written in the Kramapátha form. Vide ante, III, p. 200. The work is extremely rare.

Beginning. इषे त्वा। त्वोर्ज्जे। ऊर्ज्जे त्वा। त्वा वायवः। वायवः स्थ। स्थ देवः। देवो वः। वः सविता। सविता प्र। प्रार्पयतु। अर्पयतु श्रेष्ठतमाय। श्रेष्ठतमाय कर्म्मणे। श्रेष्ठतमायेति श्रेष्ठतमाय।

End. इवत्स्वा जुषन्तां। इवत्स्वेति इव। स्वा। जुषन्तां सोम्यम्। सोम्यम्मधु। मध्विति मधु॥ ८१॥

Colophon. इति वाजसनेयसंहितायां क्रमपूर्व्वविंशतितमाऽध्यायः॥ २०॥ समाप्तः॥

विषयः। यजुर्वेदक्रमपाठनिरूपणं।

No. 1804. क्रमसंहिता, उत्तरार्द्धं ।

Substance, country-made paper, 9½ × 4½ inches. Folia, 239. Lines, 7 on a page. Extent, 1,235 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Krama-sañhitá, Uttarárddha. The second part of the work described under the last preceding No.

Beginning. इममे । मे वरुण । वरुणः शृधि । शृधी हवं । हवमद्य । अद्या च । च मृडय । मृडयेति । मृडय । त्वामवस्युः । अवस्युराचके । आचके । चक इति चके ॥ १ ॥

End. योऽसौ । असावादित्यः । आदित्यः पुरुषः । पुरुषः सः । सोऽसौ । असावहं । अहमित्यहं ॥ १४ ॥ ॐ खं । खं ब्रह्म । ब्रह्मेति ब्रह्म ॥

Colophon. इति क्रमसंहितायां चत्वारिंशोऽध्यायः ॥ ४० ॥

विषयः । यजुर्वेदक्रमपाठनिरूपणं ।

No. 1805. पातञ्जलभाष्यवार्त्तिकं ।

Substance, country-made paper, 11 × 4½ inches. Folia, 177. Lines, 9 on a page. Extent, 6,596 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India, also another copy at Murshidábad, Gopáladása Mahanta. Appearance, new. Prose. Incorrect.

Pátanjala-bháshya-várttika alias *Yoga-várttika.* A gloss on a commentary commonly attributed to Vyása on the Yoga aphorisms of Patanjali. By Vijñána Bhikshu. Hall's Contributions, p. 10.

Beginning. यस्मिन्नाचरमोऽपि नित्यविमलोपाधेर्गुणैरीश्वरो
हेयैः क्लेशमुखैर्गुणैर्विरहितो मुक्तः सदा निर्गुणः ।
सोऽस्मात्वगुणैः(?) स्वपरि गदितान् (?) स्वांशान् कृपासागरो
दीनान् मोदयतु प्रभुर्गुणमयं पाशं दहन् लीलया ॥ १ ॥
श्रीपातञ्जलभाष्यदुग्धजलधिर्विज्ञानरत्नाकरो
वेदव्यासमुनीन्द्रबुद्धिखनितो योगीन्द्रपेयामृतः ।
भूदेवैरमृतं तदन्त(?) मथितुं विज्ञानविज्ञैरिह
श्रीमद्वार्त्तिकमन्दरो गुरुतरो मन्थानदण्डोऽर्प्यते ॥ २ ॥

No. 1796. मूल्याध्यायविवरणं ।

Substance, country-made paper, $10\frac{1}{2} \times 4\frac{1}{2}$ inches. Folia, 7. Lines, 4—8 on a page. Extent, 100 s'lokas. Character, Nágara. Date, Sm. 1933. Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Múlyádhyáya-vivarana. A commentary on Kátyáyana's rules relating to the valuation of cattle &c., when substitutes for these have to be given in a rite. By Gopálají.

Beginning. श्रीगोपालं गोपीगोपैः परीतं नत्वा सम्यक् श्रीगुरून् जीवदेवान् ।
मूल्याध्याये भाष्यमेतद्विधत्ते गोपालः श्रीयाज्ञिकानां हितार्थं ॥ १ ॥
तत्रादावाचार्य्यो अभ्यर्हितत्वात् सर्व्वयागप्रदेयत्वाच्च गोमूल्यमेव वदन्ति ।

End. कर्षमाणेन ताम्रपणो बोध्य इत्यर्थः द्विरभ्यासो ग्रन्थसमाप्तिसूचकः ।

Colophon. इति श्रीकात्यायनकृतौ मूल्याध्याये गोपालजीकृतं विवरणं समाप्तं ।

विषयः । कात्यायनकृतमूल्याध्यायस्य व्याख्यानं । मूल्याध्याये तु गोमूल्यादिनिरूपणं ।

No. 1797. उपदेशरत्नमाला ।

Substance, country-made paper, $11\frac{1}{4} \times 3\frac{1}{4}$ inches. Folia, 35. Lines, 11 on a page. Extent, 1,156 s'lokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Verse. Incorrect.

Upades'a-ratnamálá. Lessons on the relation of the human to the divine spirit and on emancipation,—or a summary of the Vedánta doctrine. By Vijñána Bhikshu.

Beginning. विलाप्यात्मनि यो विश्वं तत्त्वाच्चे कोऽवशिष्यते ।
अद्वितीयः स एकात्मा भूयान्नः पतिरीश्वरः ॥
छान्दोग्याद्यनुसारेण गुरुशिष्यविधानतः ।
ब्रह्मात्मतत्त्वविद्येयं विज्ञानेनोपदिश्यते ॥
श्रीमदैत्यहरिपर्य्यन्तपूर्व्वाचार्य्यक्रमागतं ।
वेदान्ततत्त्वं सङ्क्षिप्तमिदन्नाकर्ण्यतां बुधैः ॥

End. इति सङ्क्षेपतः प्रोक्तं तुभ्यं वेदान्तशासनं ।
आदेशरत्नमालेयं विदां स्यात् कण्ठभूषणं ॥
स्वात्मभूतमहामायाशक्तिवैभवसाक्षिणे ।
ब्रह्मविष्णुमहेशादिमूर्त्तये ब्रह्मणे नमः ॥ दशमखण्डस्य शेषार्द्धः ॥

Colophon. इत्युपदेशरत्नमालायां विद्याफलोपदेशो दशमः खण्डः ॥ इति विज्ञानभिक्षुविरचितमुपदेशरत्नमालाख्यं वेदान्तप्रकरणं समाप्तं ॥

विषयः । अत्र प्रथमे खण्डे ब्रह्मात्मतोपदेशः । २ये खण्डे,—व्यावहारिक-पारमार्थिकात्मद्वयोपदेशः । ३ये खण्डे,—व्यावहारिक-पारमार्थिकात्मनोः स्वरूपोपदेशः । ४र्थे खण्डे,—जीवात्मपरमात्मनोरन्योन्यविवेकोपदेशः । ५मे खण्डे,—ब्रह्माद्वैतोपदेशः । ६ष्ठे खण्डे,—ब्रह्मचिन्मात्रसत्यतोपदेशः । ७मे खण्डे,—सृष्ट्यादिप्रक्रियोपदेशः । ८मे खण्डे,—ब्रह्मविद्यास्वरूपोपदेशः । ९मे खण्डे,—विद्याङ्गोपदेशः । १०मे खण्डे,—विद्याफलोपदेशः ॥

No. 1798. तैत्तिरीयकोपनिषदालोकः ।

Substance, country-made paper, $11\frac{1}{4} \times 3\frac{1}{4}$ inches. Folia, 21. Lines, 10 on a page. Extent, 651 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Correct.

Taittiríyakoponishadáloka. A gloss on the Taittiríya Upanishad. By Vijñána Bhikshu. It forms a part of a comprehensive essay on the philosophy of the Upanishads, which bears the title of *Vedántáloka.*

Beginning. शन्नो मित्रः शं वरुण इत्यादिस्तैत्तिरीयकोपनिषद्व्याख्यायते नित्यकाम्यानि कर्म्माणि पूर्व्वमुपदिश्येदानीं ब्रह्मविद्यादौ विद्यारम्भे गुरुशिष्याभ्यामनुष्ठेयं मङ्गलं निबध्नाति शन्नो मित्र इति ।

End. अतो न पौनरुक्त्यं इत्युपनिषत् इयं रहस्यविद्येत्यर्थः । इति तृतीयः प्रपाठकः ।

Colophon. इति विज्ञानभिक्षुकृते वेदान्तालोके तैत्तिरीयकोपनिषदालोकः समाप्तः ॥

विषयः । तैत्तिरीयकोपनिषद्व्याख्यानं ।

End. योगग्रन्थसहस्राणां सर्व्वोपनिषदां तथा ।
सताञ्च यत्र तात्पर्य्यं सोऽर्थो व्यासेन भाषितः ॥
व्याख्यातस्य यथाशक्ति निर्मत्सरधिया मया ।
एतेन प्रियतामीशो यस्तात्मा सर्व्वदेहिनां ॥

Colophon. इति श्रीविज्ञानभिक्षुविरचिते पातञ्जलभाष्यवार्त्तिके कैवल्यपादश्चतुर्थः ।
समाप्तञ्चेदं दर्शनं ।
पराशरीयपुराणे । अल्पाक्षरमसन्दिग्धं सारवद्विश्वतो मुखं ।
अस्तोभमनवद्यं तत् सूत्रं सूत्रविदो विदुः ॥ १ ॥
सूत्रार्थो वर्ण्यते यत्र पदैः सूत्रानुसारिभिः ।
स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः ।२॥
उक्तानुक्तदुरुक्तानां चिन्ता यत्र प्रवर्त्तते ।
तं ग्रन्थं वार्त्तिकं प्राहुर्वार्त्तिकज्ञा मनीषिणः ॥ ३ ॥

विषयः । व्यासकृतस्य पतञ्जलियोगसूत्रभाष्यस्य व्याख्यानं ।

No. 1806. अनुवाकाध्यायः ।

Substance, country-made paper, $10\frac{1}{2} \times 4\frac{3}{4}$ inches Folia, 6. Lines, 3—6—7 on a page. Extent, 40 s'lokas. Character, Nágara. Date, Sm. 1933. Place of deposit, Calcutta, Government of India. Appearance, new. Prose. Incorrect.

Anuvákádhyáya. An index to the Anuvákas of the Ṛig Veda.

Beginning. ब्रह्माणं सम्प्रणम्यादौ देवानामेकपारगं ।
अनुवाकान् प्रवक्ष्यामि ब्रह्मणा विहितान् पुरा ॥ १ ॥
शिष्याणामुपकाराय यज्ञसौकर्य्यसिद्धये ।
उपयुक्तान् यज्ञकाले जपहोमार्चनादिषु ॥ २ ॥

End. एकीकृत्य समाख्यातं त्रिशतं त्र्यधिकं मतम् त्रिशतं त्र्यधिकं मतम् ॥

Colophon. इति श्रीअनुवाकाध्यायः समाप्तः ॥

विषयः । अनुवाककथनं ।

No. 1807. आपस्तम्बसूत्रवृत्तिः, वा आपस्तम्बसूत्रदीपिका ।

Substance, country-made paper, 11 × 4¾ inches. Folia, 37. Lines, 9 on a page. Extent, 1,000 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

A'pastamba-sútra-vritti alias *A'pastamba-sútra-dípiká.* A commentary on the Kalpa Sútra of A'pastamba. By Rudradatta. The codex contains only the first Prasna.

Beginning. शुक्लाम्बरधरं देवं शशिवर्णं चतुर्भुजं ।
प्रसन्नवदनं ध्यायेत् सर्व्वविघ्नोपशान्तये ॥ १ ॥
आज्ञा श्रुतिः स्मृतिर्यस्य यस्य यज्ञाः सभाजनाः ।
नमः परस्मै विश्वस्य तस्मै श्रीवत्सलक्ष्मणे ॥ २ ॥
आदिमं ब्रह्मणः कोषं मध्यः चितिपरावरं(?) ।
अपास्तरोषपाप्मानमापस्तम्बमृषिं मुनिं ॥ ३ ॥
आपस्तम्बीयसूत्रार्थेष्वन्यथाज्ञानसंशयात् ।
सूत्रदीपिकया वृत्त्या रुद्रदत्तः परास्यति ॥ ४ ॥

End. आहवनीये प्रचालितायामष्टौ ॥

Colophon. इति भट्टरुद्रदत्तप्रणीतायामापस्तम्बसूत्रवृत्तौ सूत्रदीपिकायामष्टमं पटलं समाप्तं ।
प्रथमः प्रश्नः समाप्तः ।

विषयः । आपस्तम्बसूत्रीयप्रथमप्रश्नस्य व्याख्यानं ।

No. 1808. माण्डूक्योपनिषदालोकः ।

Substance, country-made paper, 11¼ × 3¼ inches. Folia, 5. Lines, 10 on a page. Extent, 167 s'lokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Correct.

Mánḍukyopanishadáloka. A gloss on the Mánḍukya Upanishad of the Atharva Veda. By Vijñána Bhikshu. This is a part of the comprehensive work referred to under No. 1798.

Beginning. ओमित्येतदक्षरमिदं सर्व्वमित्यादिर्माण्डूक्योपनिषद्व्याख्यायते ओमिति ब्रह्मणो नाम ।
हृदयविग्रहो देवो भावग्राह्यो मनोमयः ।

End. अतएव च शास्त्रीयेणैवाभेदारोपेणानाद्यविवेकाच्छब्दार्थयोरविभागलक्षणाभेदः शास्त्रोक्त उपपद्यत इति दिक्।

Colophon. इति विज्ञानभिक्षुकृते वेदान्तालोके माण्डूक्योपनिषदालोकः समाप्तः ॥

विषयः। माण्डूक्योपनिषद्व्याख्यानं।

No. 1809. श्वेताश्वतरोपनिषदालोकः।

Substance, country-made paper, $10\frac{1}{2} \times 3\frac{1}{4}$ inches. Folia, 33. Lines, 11 on a page. Extent, 1,023 s'lokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

S'vetás'vataropanishadáloka. A gloss on the S'vetás'vatara Upanishad. By Vijñána Bhikshu. Another part of No. 1798.

Beginning. प्रथमपत्रं नास्ति।

End. मन्त्रोद्धारवदस्पष्टा(?) वेदान्ता देवकोपमाः।
अत्र निर्णीतसिद्धान्तगणैर्नेया मुमुक्षुभिः ॥

Colophon. इति विज्ञानभिक्षुकृते वेदान्तालोके श्वेताश्वतरोपनिषदालोकः समाप्तः ॥

विषयः। श्वेताश्वतरोपनिषद्व्याख्यानं ॥

No. 1810. कैवल्योपनिषदालोकः।

Substance, country-made paper, $11\frac{1}{2} \times 3\frac{1}{4}$ inches. Folia, 8. Lines, 10 on a page. Extent, 164 s'lokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Correct.

Kaivalyopanishadáloka. A gloss on the Kaivalya Upanishad of the Atharva Veda. By Vijñána Bhikshu. Another part of No. 1798.

Beginning. ॐ अथाश्वलायन इत्याद्या कैवल्योपनिषद्व्याख्यायते। इयञ्चोपनिषत् शतरुद्रीयनाम्ना बहुलस्मृतिषूच्यते स्कन्दपुराणादिभिः सङ्क्षेपतो व्याख्याता च। अत्रापि चान्ते वक्ष्यति यः शतरुद्रीयमधीत इति। दीर्घश्च शतरुद्रीयशब्दः श्रुत्यन्तरवाचीति भेदः।

End. अतः कैवल्यप्रदत्वादियं कैवल्योपनिषद्गीयते।

Colophon. इति विज्ञानभिक्षुकृते वेदान्तालोके कैवल्योपनिषदालोकः समाप्तः ॥ इति कैवल्योपनिषत् ॥

विषयः । कैवल्योपनिषद्व्याख्यानं ॥

No. 1811. मैत्रेयोपनिषदालोकः ।

Substance, country-made paper, 11¾ × 3¼ inches. Folia, 26. Lines, 10 on a page. Extent, 850 s'lokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Correct.

Maitreyopanishadáloka. A gloss on the Maitri Upanishad of the Black Yajur Veda. By Vijñána Bhikshu. Another part of No. 1798.

Beginning. अथ मैत्रेयोपनिषद्व्याख्यायते अनयैव च मैत्रेयोपनिषद्व्याख्यया मैत्रायणीपनिषत्प्रारम्भागोऽपि व्याख्यातप्रायो भविष्यति काण्व-माध्यन्दिनयोरिवाल्पमेव भेदादिति ।

End. अन्तर्वेदिस्येति द्विरावृत्तिरुपनिषत्समाप्त्यर्था ॥ इति चतुर्थप्रपाठकालोकः ॥

Colophon. इति विज्ञानभिक्षुकृते वेदान्तालोके मैत्रेयोपनिषदालोकः समाप्तः ॥

विषयः । मैत्रेयोपनिषद्व्याख्यानं ।

No. 1812. कठवल्ल्युपनिषदालोकः ।

Substance, country-made paper, 11¼ × 3¼ inches. Folia, 24. Lines, 10 on a page. Extent, 626 s'lokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Correct.

Kaṭhavallyopanishadáloka. A gloss on the Kaṭha Upanishad of the White Yajur Veda. By Vijñána Bhikshu. Another part of No. 1798.

Beginning. उशन् ह वै वाजश्रवस इत्याद्या कठवल्ल्युपनिषत् यथाश्रुता व्याख्यायते ।

End. तथा गुरुशिष्यावावामन्योन्यं मा विद्विषावहै नो शान्तिरस्तु निर्वचनमादरात् ॥ इति द्वितीयाध्याये तृतीया वल्ली ॥

Colophon. इति विज्ञानभिक्षुकृते वेदान्तालोके कठवल्ल्यालोकः समाप्तः ।

विषयः । कठवल्ल्युपनिषद्व्याख्यानं ।

No. 1813. मुण्डकोपनिषदालोकः ।

Substance, country-made paper, 11¼ × 3½ inches. Folia, 17. Lines, 10 on a page. Extent, 279 s'lokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Correct.

Mundakopanishadáloka. A gloss on the Mundaka Upanishad of the Atharva Veda. By Vijñána Bhikshu. Another part of No. 1798.

Beginning. ब्रह्मा देवानां प्रथमः सम्बभूवेत्यादिर्मुण्डकोपनिषत् यथाश्रुता व्याख्यायते ब्रह्मा चतुर्मुखो देवानां स्थूलविग्रहधारिणां प्रथमः प्रथमजो बभूव तत्र ब्रह्मगुणयोगेन गौणब्रह्मत्वं श्रुतिर्दर्शयति ।

End. नमः परमर्षिभ्य इति परमं ब्रह्म साक्षाद्दृष्टवन्तो ये तदुपदेष्टारो ब्रह्माद्यस्तेभ्यो नमः द्विर्वचनमुपनिषत्समाप्त्यर्थं ॥ तृतीयमुण्डकालोकः ॥

Colophon. इति विज्ञानभिक्षुकृते वेदान्तालोके मुण्डकालोकः समाप्तः ॥

विषयः । मुण्डकोपनिषद्व्याख्यानं ॥

No. 1814. पाकयज्ञनिर्णयः ।

Substance, country-made paper, 9¾ × 4½ inches. Folia, 115. Lines, 7 on a page. Extent, 1,500 s'lokas. Character, Nágara. Date, Sm. 1933. Place of deposit, Calcutta, Government of India. Appearance, new. Prose and verse. Incorrect.

Pákayajña-nirnaya. Directions for the performance of those Vedic rites which are reckoned under the generic name of Pákayajña, *i. e.*, those in which rice has to be cooked for offerings. Seven separate rites are included under this head. By Chandrachúda Bhatta, son of Umápati Bhatta Súri.

Beginning. यस्यानुग्रहमात्रेण सज्जनैः पुण्यकर्मभिः ।
ब्रह्मात्मज्ञानसम्प्राप्त्या सर्वज्ञत्वमवाप्यते ॥ १ ॥
तमादिगुरुमात्रेयं भक्तानुग्रहकारणं ।
नमामि परमानन्दं ज्ञानविज्ञानसिद्धये ॥ २ ॥
उमामहेश्वरं देवमापस्तम्बं मुनींस्तथा ।
तत्सूत्रभाष्यकारादीन् पितरौ च पितामहं ॥ ३ ॥

उमापतितनूजेन चन्द्रशेखरशर्म्मणा ।
विलोक्य सूत्रभाष्यञ्च विविधाः पद्धतीस्तथा ॥ ४ ॥
क्रियते पाकयज्ञानां पद्धतेश्च विनिर्णयः ।
यदत्र स्खलितं किञ्चिच्छोध्यं तद्वुद्धवेदिभिः ॥ ५ ॥

End. धर्म्मेश्वरात्मजश्रीमदुमाशङ्करसूनुना ।
कृतोऽयं चन्द्रचूडेन पाकयज्ञादिनिर्णयः ॥
विक्रमाब्दे तथा कृष्णे मार्गशीर्षे च सोमजे ।
एकादशामयं ग्रन्थो वाराणस्यां समापितः ॥

Colophon. इति पौराणिकधर्म्मभट्टसूनुश्रीमद्विद्वन्मुकुटमाणिक्यउमापतिभट्टसूरिसूनुचन्द्रचूडभट्टकृतः पाकयज्ञनिर्णयः समाप्तः ।

विषयः । पाकयज्ञपद्धतिनिरूपणं ।

No. 1815. साङ्ख्यकारिका, साङ्ख्यचन्द्रिकाख्यटीकासहिता ।

Substance, country-made paper, 12¼ × 5½ inches. Folia, 12. Lines, 14 on a page. Extent, 1,008 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Correct.

Sáñkhya-káriká. Memorial verses on the principles of the Sáñkhya doctrine of Kapila. By I's'varakṛishṇa. Attached to the text is a commentary entitled Sáñkhya-chandriká, by Náráyaṇa Tírtha, pupil of Rámagovinda Tírtha. The text has been published by Dr. H. H. Wilson, along with a commentary by a Gauḍapáda, an English translation of the text by H. T. Colebrooke, and of the commentary by the editor. German and French versions of the text have also been published.

Beginning. (टी०) । श्रीरामगोविन्दसुतीर्थपादकृपाविशेषादुपलभ्य बोधं ।
श्रीवासुदेवादधिगत्य सर्व्वशास्त्राणि वक्तुं किमपि स्पृहाणः ॥ १ ॥
प्रकृतिं पुरुषञ्चैव नत्वाचार्य्यान् गुरूंस्तथा ।
नारायणः साङ्ख्यमूले तनुते साङ्ख्यचन्द्रिकां ॥ २ ॥
(मू०) । दुःखत्रयाभिघाताज्जिज्ञासा तदपघातके हेतौ ।
दृष्टे सापार्था चेन्नैकान्तात्यन्ततोऽभावात् ॥ १ ॥

End. (मू०) । सप्तत्यां किल येऽर्थास्तेऽर्थाः कृत्स्नस्य षष्टितन्त्रस्य ।
आख्यायिकाविरहिताः परवादविवर्ज्जिताश्चापि ॥ ७२ ॥

Colophon. इति साङ्ख्यकारिकाग्रन्थः समाप्तः ।

(टी०)। तथा चाचैतत् षष्टिपदार्थविवेचनान्नेदं प्रकरणं किन्तु तन्त्रमेवेति सिद्धं ॥ १२ ॥

इति रामगोविन्दतीर्थशिष्यनारायणतीर्थकृता साङ्ख्यचन्द्रिका समाप्ता ॥

विषयः। साङ्ख्यदर्शनस्य मतनिर्णयः ॥

No. 1816. स्वरोदयटीका ।

Substance, country-made paper, 11 × 5½ inches. Folia, 123. Lines, 13 on a page. Extent, 5,000 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India, also another copy at Murshidábád, with Gopáladása Mahanta. Appearance, old. Prose. Correct.

Svarodaya-ṭiká. A commentary on the Svarodaya which is a treatise on austromancy, charms and philters. By Narahari.

Beginning. नतिं कृत्वा गणेशाय विघ्नविध्वंसकारिणे ।
निर्विघ्नकृतिसार्थाय कमलापतये नमः ॥ १ ॥
हरिवंशकविः स्वार्थं परार्थञ्च स्वरोदये ।
व्याख्यानं मातृकादीनां स्वराणां नामजन्मनां ॥ २ ॥
गुरुभ्यो बहुधा श्रुत्वा यथाज्ञानं यथाधिया ।
नरहरी भिधा(?) टीका इति राज्ञा वितन्यते ॥ ३ ॥
अथ कविरानन्दरूपं ब्रह्म नमस्करोति अव्यक्तमिति ।

End. नदीतीरे शुभे देशे भूभागे शुभे दिने रिक्तादर्शान्यतिथौ शनिकुजान्यवारे शान्त्युत्तरे काले लो+गं भुवि क्षिपेत् ॥

Colophon. इति श्रीनरहरिकृतौ स्वरोदयटीकायां मृत्युञ्जयमन्त्रः । औषधयन्त्रमन्त्रबलानि समाप्तानि, समाप्तोऽयं ग्रन्थः ॥

विषयः। ज्योतिःशास्त्रानुसारतः भविष्यद्गणनाविषयकस्वरोदयाख्यग्रन्थव्याख्यानं ।

No. 1817. सूर्य्यसिद्धान्तविवरणं ।

Substance, country-made paper, 13¼ × 4¼ inches. Folia, 222. Lines, 9 on a page. Extent, 5,550 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Súrya-siddhánta-vivaraṇa. A commentary on the Súrya-siddhánta of Bháskara Ácharya. By Bhúdhara, son of Devadatta, and grandson of Soma S'armá of the Bharadvája clan, an inhabitant of Kámpilya on the banks of the river Sindhu.

Beginning. यस्योदये निखिलविश्वसरोजपत्रमुज्जृम्भते भवति सङ्कुचितं तदस्ते ।
तं विश्ववन्द्यसुरवन्दितपादपद्मं सव्येतराच्युतदृशं प्रणमामि सूर्य्यं ॥ १ ॥
काम्पिल्ये सुरसिन्धुवन्धुरतटे ज्योतिर्विदामग्रणी-
र्भारद्वाजकुलेऽमले समभवत् श्रीसोमशर्म्माह्वयः ।
तत्पुत्रो नृपवृन्दवन्दितपदः श्रीदेवदत्ताभिधः
कीर्त्त्या निर्म्मलयोज्ज्वलाः समतनोद्यः पङ्क्तिसङ्ख्या दिशः ॥ २ ॥
भूधरस्तत्सुतः सूर्य्यसिद्धान्तं विवृणोत्यदं ।
गुरूणां पादयुगल-कमल-भ्रमरायितः ॥ ३ ॥

End. तत्कथमित्युक्ते कदा कार्त्तिकवर्षे वैशाखे मासि सूर्य्यः प्रायेण कृत्तिकानक्षत्रस्थो भवति तदैव गुरुः कृत्तिकानक्षत्रे रोहिणीनक्षत्रस्थो वा ॥

Colophon. खण्डितत्वात् समाप्तिसूचकवाक्यं नास्ति ।

विषयः। सूर्य्यसिद्धान्तस्य व्याख्यानं ।

No. 1818. वैयाकरणभूषणसारः, भूषणसारदर्पणाख्य-टीकासहितः ।

Substance, country-made paper, 14 × 6 inches. Folia, 283. Lines, 10 on a page. Extent, 8,500 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, new. Prose. Incorrect.

Vaiyákaraṇa-bhúshaṇasára. An abridgement of a large work by the author on the syntax and philosophy of grammatical structure. By Koṇḍa Bhaṭṭa, son of Rangojí, and nephew of Bhaṭṭojí. The grammatical text selected for comment is that of Páṇiní, and the philosophical idea worked out is called *spota-váda,* or the eternity of sound. Vide my 'Catalogue of Sanskrit Grammars in the Library of the Asiatic Society of Bengal,' p. 117. Annexed to the text is a commentary entitled Darpaṇa by Harivallabha, son of Vallabha Prabhátíya, of Kúrmáchala.

Beginning. (टी॰)। रमाप्रेमासक्तं जगदवनदक्षं मधुहृतं
श्रुतीनामादानाद्धिजनितवेदाननमुदं।
अखण्डानन्दाढ्यं निखिलजनहृत्कञ्जनिलयं
हयग्रीवं वन्दे प्रकृतकृतिविघ्नच्युतिकृते ॥ १ ॥
सत्येकस्मिन्नपि बाधके समवहितसाधकसत्त्वादपि कार्य्योत्पत्तेरदर्शनादपेक्षित-प्रारिप्सितप्रत्यूहापोहायानुष्ठितं भगवत्स्तुतिरूपमङ्गलं शिष्यशिक्षार्थमादौ नि-बध्नाति श्रीलक्ष्मीरमणमित्यादिना ॥
(मू॰)। श्रीलक्ष्मीरमणं नौमि गौरीरमणरूपिणं।
स्फोटरूपं यतः सर्व्वं जगदेतद्विवर्त्तते ॥ १ ॥
अशेषफलदातारं भवाब्धितरणे तरिं।
शेषाशेषार्थलाभार्थं प्रार्थये शेषभूषणं ॥ २ ॥
पाणिन्यादिमुनीन् प्रणम्य पितरं रङ्गोजिभट्टाभिधं
द्वैतध्वान्तनिवारणादिफलिकां पुंभाववाग्देवतां।
दुण्ढिं गौतमजैमिनीयवचनव्याख्यातृभिर्दूषितान्
सिद्धान्तानुपपत्तिभिः प्रकटये तेषां वचो दूषये ॥ ३ ॥
प्रारिप्सितप्रतिबन्धकोपशमनाय कृतं श्रीफणिस्मरणरूपं मङ्गलं शिष्यशिक्षार्थं निबध्नंश्चिकीर्षितं प्रतिजानीते ॥

End. (मू॰)। अशेषभूषणदातारमपि सर्व्वेश्वरं गुरुं।
श्रीभूषणसारेऽस्मिन् प्रार्थये शेषभूषणं ॥

Colophon. इति श्रीमत्पदवाक्यप्रमाणपारावारीणधुरीणरङ्गोजिभट्टात्मजकौण्डभट्टकृते वैया-करणभूषणसारे स्फोटवादः समाप्तः ॥
(टी॰)। पूर्णात्मने इतीति पूर्णत्वमप्रतिहतेच्छत्वं तेन रूपेणात्मनो नतिश्च निज-ग्रन्थप्रचारेच्छाया अपि विषयसिद्ध्यर्थं इति बोध्यं।
इति कूर्माचलाभिजनोत्प्रभातीयोपनामकपण्डितश्रीवल्लभात्मजहरिवल्लभविर-चिते भूषणसारदर्पणे स्फोटनिरूपणं ॥

विषयः। अत्र वैयाकरणतात्पर्य्यविषयीभूतार्थप्रकाशनं। तत्रादौ लडाद्यर्थनिरूपणं। ततो नामार्थनिरूपणं। ततः समासशक्तिनिरूपणं। ततः शक्तिस्वरूपनिरूपणं। ततो नञर्थनिर्णयः। तत उपसर्गनिपातार्थनिरूपणं। ततस्तद्धितकृतामर्थनिरूपणं। ततः अभेदैकत्वसङ्ख्यानिर्णयः। ततः सङ्ख्याविवक्षानिर्णयः। ततः क्त्वाद्यर्थनिर्णयः। ततो वर्णस्फोटनिरूपणं। ततः पदवाक्यस्फोटनिरूपणं। ततो व्यक्तिस्फोटनिरूपणं। ततो जातिस्फोटनिरूपणं ॥

No. 1819. प्रयोगोत्तमरत्नमाला ।

Substance, country-made yellow paper, 13 × 3¾ inches. Folia, 295. Lines, 7 on a page. Extent, 6,762 s'lokas. Character, Bengali. Date, Sk. 1723. Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Prayogottama-ratnamálá. A discourse on Sanskrit grammar. By Purushottama Vidyávágís'a Bhaṭṭácharya. Written by order of king Nandadeva. The codex contains six chapters, and extends to conjugations. Something more is wanted to complete the work.

Beginning. श्रीनन्दसूनोर्वंदनारविन्दमुपास्महे यत्र नितान्तमेव ।
स्फुरच्छ्रुतीनां परमं रहस्यं स्मिताश्रयानन्दमयं विभाति ॥
अमृताधिकमाधुरीधुरीणाधरनिर्य्यासगुणार्ज्जितेन ।
वेणुरणितेन जगन्ति रञ्जयन्तं भगवन्तं घनकान्तमानमीडे ॥
श्रीनन्ददेवस्य गुणैकसिन्धोर्महामहेन्द्रस्य यथानिदेशं ।
यत्नात् प्रयोगोत्तमरत्नमाला वितन्यते श्रीपुरुषोत्तमेन ॥

End. सन्ध्यभावः पौनरुक्त्यं विभक्तीनाञ्च लोपनं ।
व्याख्येयव्याख्ययोरैक्यं सुखबोधकृते कृतं ॥

Colophon. द्विजकुलकमलप्रकाशकैकभास्करमहामहोपाध्यायश्रीविद्यावागीशभट्टाचार्य्यनिर्म्मितप्रयोगोत्तमरत्नमालायां कृत्सु षष्ठो विन्यासः सम्पूर्णः ।

विषयः । अत्र सन्धिप्रकरणावधिकृत्प्रकरणपर्य्यन्तं पदानां प्रयोगकथनं ॥

No. 1820. आनन्दलहरी, सटीका ।

Substance, country-made paper, 13 × 4½ inches. Folia, 60. Lines, 11 on a page. Extent, 2,000 s'lokas. Character, Nagara. Date, Sm. 1810. Place of deposit, Calcutta, Government of India. Appearance, old. Verse. Incorrect.

Ánandalahari, Saṭíka. A hymn to S'iva with a commentary. The text is attributed to S'aṅkara Áchárya, the commentary is anonymous. The object of the hymn is to identify S'iva with all the other leading gods and goddesses.

Beginning. शिवः शक्त्या युक्तो यदि भवति शक्तः प्रभवितुं
न चेदेवं देवो न खलु कुशलः स्पन्दितुमपि ।

अतस्त्वामाराध्यां हरिहरविरिञ्च्यादिभिरपि
प्रणन्तुं स्तोतुं वा कथमकृतपुण्यः प्रभवति ॥

End. प्रदीपज्वालाभिर्दिवसकरनीराजनविधिः
सुधासूतेश्चन्द्रोपलजललवैरर्घ्यघटना ।
स्वकीयैरम्भोभिः सलिलनिधिसौहित्यकरणं
स्वकीयाभिर्वाग्भिस्तव जननि वाचां स्तुतिरियं ॥

विषयः । स्तोत्रव्याजेन पार्व्वत्यारूपादिवर्णनम् ।

No. 1821. न्यायसिद्धान्तमुक्तावलीदीपिका ।

तत्र फलाशेराप्तवचनाद्वा अर्थप्रमितिः। तत्र प्रत्यक्षं बलवद् विशेषेण स्वरूपमितिकरणत्वात्। इत्यादि।

End. नापच्छेदन्यायेन श्रुतिबाधः, तत्रानियतपौर्व्वापर्य्यविषयसञ्चारात्, न स्वेष्टार्थसिद्धये,—अतिप्रसङ्गात् द्वयोर्विषयव्यवस्थया विरोधोपशमने अन्यतरबाधस्य अन्याय्यत्वात्—इति शम्।

Colophon. इति शिरोमणिकृतसर्व्वदर्शनशिरोमणिः सम्पूर्णः।

विषयः। सङ्क्षेपेण केषाञ्चित् दर्शनानां तात्पर्य्यकथनं। तत्र प्रथमतः प्रमाणप्रमेययोः स्वरूपनिरूपणं। चार्व्वाकदर्शनमतकीर्त्तनं। माध्यमिकमतकथनं। योगाचारमतकथनं। सौत्रान्तिकमतकथनं। वैभाषिकमतकथनं। आर्हतदर्शनमतं। लैङ्गदर्शनमतकथनं, तत्,—स्वतन्त्रास्वतन्त्रभेदेन द्विविधप्रमेयः, स्वतन्त्रो भगवान् महेश्वरः, तदधीनचेष्टावदर्थः अस्वतन्त्रः। स च त्रिविधः,—विद्या, कला, पशुश्चेति। तत्र-पशुगुणरूपा विद्या द्विविधा,—बोधरूपा अबोधरूपा चेति। सोऽयं बोधः चेतननिष्ठः, अबोधस्तु अचेतनवृत्तिरिति। चेतनपरतन्त्रा कला द्विविधा,—कार्य्याख्या कारणाख्या चेति। तत्र भूततन्मात्ररूपा कार्य्याख्या, कारणाख्या तु त्रयोदशविधकरणरूपा। अथ पशुत्वसम्बन्धी पशुः,—स च द्विविधः, साञ्जनो निरञ्जनश्चेति,—तत्र शरीरादिसम्बन्धी प्रथमः, तद्रहितो द्वितीयः। तत्र महेश्वरजीवात्मसम्बन्धरूपः क्रियालक्षणः, क्रियोपरमलक्षणश्चेति द्विविधो योगः। तदभ्यासेन हि आत्मवृत्तिदुष्टभावलक्षणस्य मलस्य अपगमे मनोजवित्व-कामरूपित्वविकरणधर्म्मित्वरूपेयं मुक्तिः सिद्ध्यतीति ज्ञेयं। शैवदर्शनमतं। शाक्तदर्शनमतकथनं,—तत्र शक्तिरेका प्रमेया, सा च अजड़ा प्रकृतिरित्यभिधीयते। तत्र प्रकृतिरेकापि स्वेच्छया द्विविधा भवति—पराची प्रतीचीभेदात्। पराची खलु परिणामस्वभावा; तथा अस्वतन्त्राः शिवादयः अजड़परिणामाः। अथेच्छया चित्तादयो जड़परिणामाश्च। अतः शक्तिरेकापि बहुधा अभिधीयते। तन्त्रोक्तयोगानुष्ठानेन जड़त्वनिवृत्तौ सत्यां पराच्यां परिणामस्थैर्य्ये च सति प्रतीचीस्वरूपोत्पत्तौ या सम्पत्तिः सा मुक्तिरित्यवधेयं। कापिलदर्शनमतं। कौमारिलदर्शनमतं। तथा हि,—अस्तु यथाप्रसिद्धि प्रमाणप्रमेयजातं धर्म्मानुष्ठानादेव निःश्रेयसाधिगमः, काम्यप्रतिषिद्धयोरनारम्भात् आरब्धस्य च उपभोगक्षयात् नित्यानुष्ठानेन प्रत्यवायपदवेदनीयप्राप्स्यमानपापस्य पुण्यस्य च अनारब्धकर्म्मणः निःशेषेण विध्वंसात् स्वात्मन्यवस्थानं मोक्ष इति। काणाददर्शनमतं। अक्षपाददर्शनमतं। पातञ्जलदर्शनमतं। पाणिनीयदर्शनमतकीर्त्तनञ्च। (येषां दर्शनानां मतं प्रसिद्धं, नात्र तेषां तात्पर्य्यं विवृतमिति ज्ञेयम्।)

No. 1848. स्मृतिपरिभाषा ।

Substance, country-made paper, 10 × 4 inches. Folia, 56. Lines, 6 on a page. Extent, 1,237 s'lokas. Character, Maithili. Date, ? Place of deposit, Magrâṇi, Post Madhubani, Darbhaṅgá, Paṇḍit Kiṅáiláa Jhá. Appearance, old. Prose and verse. Correct.

Smṛiti-paribháshá. Dissertations on the principal technical terms used in Smṛiti works and general rules regarding Smṛiti rituals. By Vardhamána Mahámahopádhyáya.

Beginning. साधर्म्यं यत्र सर्व्वेषां वैधर्म्यञ्चापि सर्व्वतः ।
पारेवाङ्मनसं विष्णुं तं कथञ्चिदुपास्महे ॥
अथ सार्व्वत्रिकी परिभाषा । तत्र विष्णुः—
स्नातोऽधिकारी भवति दैवे पित्र्ये च कर्म्मणि ।
पवित्राणां तथा जप्ये दाने च विधिदेशिते ॥
पवित्राणां मन्त्राणां मन्त्रः पवित्रमुच्यते । इति सूत्रकारवचनात् ।

End. विधिना तु यदा दत्ता पात्रे धेनुः सदक्षिणा ।
दाता तारयते जन्तून् फलानामयुतैः शतैः ॥
अयुतैः शतैरिति सहार्थे तृतीया ।
पात्राण्याध्यात्मिकी मुख्या विशुद्धाश्चाग्निहोत्रिणः ।
देवताश्च तथा मुख्या गोदानं श्रोतदुत्तमं ॥

Colophon. इति महामहोपाध्यायवर्द्धमानकृता स्मृतिपरिभाषा समाप्ता ।

विषयः । स्नानदानजपादौ सार्व्वत्रिकीपरिभाषाकथनं । कर्त्तुरङ्गादिनियमकथनं । त्रिविध-क्रियानिरूपणं । एतद्विमर्षणञ्च । कार्य्यविशेषमौनताविधानं । ब्रह्मप्राजापत्यादितीर्थनिरूपणं । व्रतस्थस्य कदाचित् प्राणरक्षार्थं जलपानादिविधिकीर्त्तनं । उपवासनियमकथनं । कुशनिरूपणादिकं । पवित्रादिलक्षणं । परिमाणनिरूपणादिकं । सप्तव्रीहिकथनं श्यामाकादिचतुर्द्दशविधग्राम्यारण्यौषधिकथनं । अष्टादशधान्यकथनं । गन्धादिनिरूपणं । सर्व्वगन्धपारिभाषिकलक्षणं । धातुनिरूपणं । मुख्यालाभे प्रतिनिधिविधानं । हविष्यद्रव्यनिरूपणं । स्थालीपाकविधिकीर्त्तनं । होमद्रव्यनिरूपणं । होमविधानं । चतुर्व्विधसामनिरूपणानन्तरं कर्म्मविशेषे तन्नियमनं । तत्र मन्त्रमनविचारादिकं । सङ्क्रान्तिनिरूपणं । तत्र विहितकर्म्मविवेचनञ्च । ग्रहणनिर्णयः । ग्रहणस्नानविधानं । तिथिद्वैधे व्यवस्थानिरूपणं । एकादश्युपवासनिरूपणं । पौर्णमासीनिरूपणं । दुर्गाद्यानिरूपणं ।

पर्व्वनिरूपणं । अमावस्यानिरूपणं । सर्व्वत्र व्रतेषु इतिकर्त्तव्यतानिरूपणं । स्वव्रतघ्नानि । भावाभावविषयभेदाद् व्रतस्य द्वैविध्यनिरूपणं । सामान्यव्रतकीर्त्तनं । मत्स्यमांसादिभोजनादिनियमकथनं । माघस्नानादिविधिः । दानविधिः । तत्र दानलक्षणादिविवेचनं । विड़ालव्रत-वकव्रतादिलक्षणं । गोदानविधानादिकीर्त्तनञ्च ।

No. 1849. सङ्ख्यापरिमाणनिबन्धः ।

Substance, country-made paper, 10 × 4 inches. Folia, 53. Lines, 7 on a page. Extent, 1,608 s'lokas. Character, Maithili. Date, ? Place of deposit, Magráṇí, Post Madhubaní, Darbhángá. Paṇḍit Kánáilála Jhá. Appearance, old. Prose and verse. Correct.

Saṅkhyá-parimáṇa-nibandha. An essay on 'number and weight' with reference to Smṛiti rites and domestic rules and observances. Every injunction in the Smṛitis involving a question of weight, or number, or dimension, or time is taken up and discussed with a view to a settlement of the purport of the injunction. The size of the tooth-brush, the number of days a cow should not be milked, how many days she should be milked partially and when fully, the length and the number of threads meet for a Brahmanical cord, the quantity in which particular offerings are to be made, the number of days for mourning for particular castes, weights, their standard and calculation, periods of time, and how to calculate them, &c., &c., are taken up seriatim and specific rules laid down to prevent misunderstanding and mistakes. By Kes'ava Kavindra. The work was compiled in the city of Benares.

Beginning. राधापीनपयोधरभूधरधाराधरः कृष्णः ।
शेषफणावल्लीकोमलकमलवनीषट्पदः पायात् ॥
देवतागणकिरीटनिष्पतत्पारिजातमकरन्दतुन्दिलौ ।
दूरवारितसमस्तकल्मषौ ढुण्ढिराजचरणौ स्तवीमहि ॥
काशीविश्वेश्वरो दण्डपाणिः श्रीकालभैरवः ।
गङ्गा भवानी विघ्नेशः प्रयच्छन्तु समीहितम् ॥
तीरभुक्तिमहीपालपरिषन्मुख्यसूरिणा ।
श्रीकेशवकवीन्द्रेण निबन्धोऽयं विधीयते ॥

सङ्ख्यामानगुरुत्वादेर्विधायकनिषेधकौ ।

श्रुतिस्मृतिपुराणादिवाक्यैः स्पष्टीकरोम्यहम् ॥

तत्रादौ मूलपरिभाषा । तत्र सङ्ख्यायां तावद् यजुर्वेदे । इत्यादि ।

End. उशनाः । द्वौ मासौ पाययेद्वत्सं तृतीये द्विगुणं दुहेत् ।

चतुर्थे त्रिस्तनं दुह्याद् यथान्यायं यथाबलम् ॥

Colophon. इति सन्मिश्रश्रीकेशवविरचितः सङ्ख्यापरिमाणनिबन्धः समाप्तः ॥

विषयः । तत्रादौ मूलपरिभाषायां सङ्ख्यानामकीर्त्तनं । हस्तादिपरिमाणनिरूपणं । कालपरिमाणकथनं । अन्नादिपरिमाणकथनं । तत्र द्रोणाढकादीनां लक्षणं । गुरुत्वनिरूपणं । तत्र त्रसरेण्वादिलक्षणं । अथ शास्त्रे सङ्ख्यापरिमाणयोः विषयप्रदर्शनप्रसङ्गेन 'एका लिङ्गे गुदे तिस्रः' तथा दन्तकाष्ठमधिकृत्य 'द्वादशाङ्गुलन्तु विप्राणाम्' इत्यादिभिः मूत्रपुरीषोत्सर्गशौचदन्तकाष्ठविचारादिकं । पञ्चपिण्डोद्धारपूर्व्वकं स्नानविधानं । तर्पणविचारः । सन्ध्यावन्दनकालविचारः । सन्ध्यावन्दनयोग्यदेशनिरूपणं । प्राणायामविवेचनं । गायत्रीजपव्यवस्थाकथनं । जपमालानिरूपणं । यज्ञोपवीतविवेचनं । शिखाबन्धनविधिकथनं । कुशनिरूपणं । कुशप्रतिनिधिकथनं । गृहे स्थापनयोग्यप्रतिमालक्षणं । तन्निर्म्माणप्रक्रियादिकथनञ्च । देवतास्नाने घृतादिपरिमाणकथनं । गन्धादिनिरूपणं । पुष्पादिविधानञ्च । पञ्चयज्ञनिरूपणं । आतिथ्यविध्यादिकथनं । पञ्चार्द्रलक्षणं । पक्षिजातिषु तित्तिरिमयूरादिषट्कस्य भोज्यत्वकथनं । मत्स्येषु रोहितपाठीनादीनां षण्णां भक्ष्यत्वकथनं । शशकादिपञ्चकस्य भक्ष्यत्वकथनं । पलाण्डुलसुनादीनामभोज्यत्वनिरूपणं । पत्न्या सार्द्धं भोजने दोषकथनं । अप्रजायां कन्यायां जामातृगृहे भोजननिषेधः । दानविधिकीर्त्तनं । प्रतिग्रहविधिः । व्यतिपातगजच्छायादिषु दानमाहात्म्यकीर्त्तनं । मन्वन्तरानिरूपणं । काश्यादिमहातीर्थषट्ककथनं । धान्यादिद्वादशकस्य सर्व्वतो ग्राह्यत्वकथनं । ब्रह्माण्डदानादिषोडशमहादानविधानं । अष्टकाश्राद्धकालादिनिरूपणं । सर्व्वत्र दक्षिणाविधिकीर्त्तनं । अष्टविधनिधुवनकथनं । शवदाहविधिः । सहमरणविधिः । वृषोत्सर्गफलश्रुतिः । प्रेतश्राद्धानि । तीर्थनिरूपणं । गङ्गादिमाहात्म्यकीर्त्तनं । गङ्गायाः गर्भनिरूपणादिकं । गयायां श्राद्धदेशादिनिरूपणं । काशीप्रयागादौ कर्त्तव्यानि । जगन्नाथक्षेत्रादिनिरूपणं । अयोध्यादिमोक्षपुरीसप्तककथनं । व्रतकालनिरूपणमुखेन मासादिलक्षणकीर्त्तनं । षड्रसादिकथनं । षट्तिलकृत्यकथनं । षोडशसंस्कारकथनं । विवाहे वरकन्ययोः वयआदिनिरूपणं । ब्राह्मणानां षट्कर्म्मादिनिरूपणं । चतुर्द्दशविधनरककीर्त्तनं । क्रयविक्रयविधिकीर्त्तनं । प्रायश्चित्तविधिः । स्पर्शदोषाभावविषयनिरूपणं । आततायिनिरूपणं । अकृतप्रणामं शूद्रमुद्दिश्य आ-

भीर्व्वादकरणे दोषकथनं। कन्यादिविक्रये दोषाधिक्यकथनं। भस्मस्नानादिदश-विधस्नानकथनं। पञ्चगव्यपञ्चरत्नादिकथनं। केषाञ्चिद् द्रव्याणां मूल्यनिरूपणं। पुष्करिण्यादिखनने पुण्याधिक्यकथनं। निधिलाभे विधानकथनं। व्रीह्यादिगण-कथनं। व्यवहारनिरूपणं। होमद्रव्यप्रमाणादिकथनं। पूर्णपात्रनिरूपणं। अष्टौ वसवः। चतुर्द्दशविद्याकथनं। सप्तर्षि-सप्तार्णवादिकथनं। देवानां त्रयस्त्रिंशत्कोटि-सङ्ख्यकत्वकथनं। दशविधधर्म्मकथनं। नवविधविषकथनं। राज्याङ्गानि। सन्न्यास-कृत्यनिरूपणं। प्रतिनिधिविवेचनं। अन्नादीनामस्पृश्यस्पर्शने दुष्टत्वकथनं। गोदोह-नकालनिरूपणञ्च।

No. 1850. दत्तात्रेयतन्त्रं।

Substance, country-made paper, 10 × 4½ inches. Folia, 37. Lines, 7 on a page. Extent, 644 s'lokas. Character, Nágara. Date, ? Place of deposit, Magrání. Post Madhubaní, Darbhángá. Paṇḍit Kánáilála Jhá. Appearance, old. Prose and verse. Correct.

Dattátreya Tantra. A Tantra related by S'iva to a sage named Dattátreya, to instruct him in mystic, magic and demoniac rites. Contents: incantations and necromantic rites for bringing on the death of an enemy. Ditto for bringing on dementation. Ditto for bringing on inertness in intelligence, arms, affection, men, clouds, winds, &c. Ditto for bringing on enmity between particular individuals. Ditto for bringing on the ruin of a person. Ditto for securing the good-will and favour of a king, a husband or a woman. Ditto for attracting attention. Ditto for effecting magical exhibitions. Ditto for bringing demons under one's controul. Ditto for alchemical preparations. Ditto for ascertaining the past and the future. Ditto for eating and digesting enormous quantities of food. Ditto for overcoming hunger and thirst. Ditto for producing aphrodisiac effects. Ditto for changing the colour of grey hair. Ditto for bringing on grey hair or baldness. Ditto for finding out hidden treasures. Ditto for bringing on pregnancy. Ditto for preventing abortion, miscarriage and childlessness. Ditto for bringing on success in warfare. Ditto for aphrodisiac medicines. Ditto for alchemical solutions of metals. Ditto for the destruction of manliness. Ditto for overcoming malevolent imps. Ditto for overcoming evils likely to result from ferocious animals. Ditto for preventing mischief from evil dreams and portents.

Beginning. श्रीदत्तात्रेय उवाच। कदाचित् पर्य्यटन् योगी दत्तात्रेयो महामुनिः।
कैलासगिरिमूर्द्धन्यां गतवान् योगराट् प्रभुः॥
कैलासशिखरासीनं देवदेवं महेश्वरम्।
दत्तात्रेयो महायोगी पर्य्यपृच्छत शङ्करम्॥
कृताञ्जलिपुटो भूत्वा पृच्छति भक्तवत्सलम्।
भक्तानाञ्च हितार्थाय कल्पतन्त्रं सुनिश्चितम्॥
कलौ सिद्धिमहाकल्पतन्त्रविद्याविधानकम्। इत्यादि।

End. रविवारे गृहीत्वा तु श्वेतकरवीरमूलकम्।
धारयेद्दक्षिणे हस्ते अग्निबाधाभयं न हि॥

Colophon. इति श्रीदत्तात्रेयतन्त्रे ईश्वरदत्तात्रेयसंवादे सिंहादिभयनिवारणं नाम द्वाविंशः पटलः समाप्तः।

विषयः। मारणोपायकथनं। तत्र द्रव्यादिनिरूपणं। एवं परत्र ज्ञेयं। मोहनोपायकथनं। स्तम्भनोपायकथनं। तत्र आसनस्तम्भनं। बुद्धिस्तम्भनं। शस्त्रस्तम्भनं। सेनास्तम्भनं। नरस्तम्भनं। मेघस्तम्भनं। गर्भस्तम्भनं। विद्वेषणोपायकथनं। उच्चाटनोपायकीर्त्तनं। वशीकरणोपायकीर्त्तनं। तत्र स्त्रीवशीकरणं। पतिवशीकरणं। राजवशीकरणं। आकर्षणोपायकीर्त्तनं। इन्द्रजालकौतुकप्रदर्शनोपायकथनं। यक्षादिमन्त्रसाधनकथनं। रसायनविधिकथनं। कालज्ञानोपायकथनं। प्रभूताहारकरणोपायकथनं। क्षुधापिपासाजयोपायकथनं। वाजीकरणादिकथनं। केशरञ्जनोपायकथनं। केशपातनविधिकथनं। निधिदर्शनोपायकीर्त्तनं। गर्भाधानविधिकथनं। मृतवत्साकाकवन्ध्यादिदोषशान्त्युपायकथनं। जयवादकथनं। वाजीकरणोपायकथनं। द्रावणविधिकथनं। वीर्य्यस्तम्भनं। भूतग्रहनिवारणोपायकथनं। सिंहव्याघ्रादिभयनाशनं। सर्पाग्निभयनिवारणोपायकीर्त्तनञ्च।

No. 1851. हरिहरसुभाषितम्।

Substance, country-made paper, 8 × 3 inches. Folia, 40. Lines, 6 on a page. Extent, 629 s'lokas. Character, Maithili. Date, Sk. 1641. Place of deposit, Chaturí Gráma, Darbhángá, Paṇḍit Mañgaládatta Mis'ra. Appearance, old. Verse. Correct.

Harihara-subháshita. Short poems on various subjects. By Harihara. The poems are of high merit.

Beginning. पायाज्जाया पयोजातजन्मनो मन्मनोमुदम्।
सारदा पारदासारतुल्यधावल्यधारिणी॥

गोविन्दाख्यानपीयूषस्रवैरिव सितीकृताम् ।
व्यासादिवदनाम्भोजभ्रमरीं भारतीं भजे ॥
गौरीगिरिशयोरेकमङ्गालङ्कारकारिणम् ।
मद्वारि + रोङ्गारमयं वस्तु वयं स्तुमः ॥ इत्यादि ।

End. तत्तन्नवीनगुणगुम्फनिषक्तसूक्ति-मुक्तावली हरिहरेण चिरेण चीर्णा ॥

Colophon. इति श्रीहरिहरसुभाषिते परमार्थप्रकरणम् ।

विषयः । मङ्गलाचरणप्रकरणं । बालविनयप्रकरणं । सुहृदुपदेशप्रकरणं । प्रवासप्रकरणं । राजप्रशस्तिप्रकरणं । राजोपसेवनप्रकरणं । राजनीतिप्रकरणं । समयवर्णन-प्रकरणं । शृङ्गाररसप्रकरणं । नायकनायिकाप्रभेदवर्णनप्रकरणं । प्रकीर्णक-प्रकरणं । परमार्थप्रकरणं । प्रबन्धेऽस्मिन् सर्व्वत्र श्लोकाः अतीव रमणीयाः ।

No. 1852. श्राद्धचिन्तामणिभावदीपिका ।

Substance, country-made paper, 8 × 3 inches. Folia, 82. Lines, 10 on a page. Extent, 3,158 s'lokas. Character, Maithilí. Date, ? Place of deposit, Chaturí Gráma, Darbháñgá, Paṇdit Mañgaládatta Mis'ra. Appearance, old. Prose. Correct.

S'ráddha-chintámaṇi-bháva-dípiká. A commentary on Váchaspati Mis'ra's treatise on the S'ráddhas, called *S'ráddha-chintámaṇi.*

Beginning. वागदेवतां प्रणम्यादौ वामदेवेन धीमता ।
श्राद्धचिन्तामणेर्भावो बालबोधाय तन्यते ॥
पितृदेवताकः पितृद्देश्यकः, द्रव्यपदं स्वरूपकीर्त्तनम् । इत्यादि ।

End. धीरा मदीयां कृतिमाकलय्य विधूतसन्देह + + + कारम् ।
निष्कण्टकेनात्र विभावितेन पथा पितॄणां प्रियमाचरन्तु ॥

Colophon. इति महामहोपाध्यायश्रीवामदेवविरचिता श्राद्धचिन्तामणिभावदीपिका समाप्ता।

विषयः । वाचस्पतिमिश्रकृतश्राद्धचिन्तामणेर्व्याख्यानम् ।

No. 1853. द्वैतनिर्णयजीर्णोद्धारः ।

Substance, country-made paper, 10 × 4 inches. Folia, 121. Lines, 7 on a page. Extent, 3,176 s'lokas. Character, Maithilí. Date, ? Place of deposit, Magráṇí, Post Madhubaní, Darbháñgá, Paṇdit, Káṇáilála Jhá. Appearance, fresh. Prose. Correct.

Draita-nirṇaya-jirṇoddhára. A commentary on Váchaspati Mis'ra's Dvaitanirṇaya, on the dualistic theory of the Supreme and the human souls. By Madhusúdana Ṭhakkura.

Beginning. चलानप्यचलीकुर्व्वन्नचलानपि चालयन् ।
वृन्दावनविहारी स्यात् तापहारी हरिर्मम ॥
इतिपद्स्वरसेनेति । शब्दानामौत्सर्गिकार्थपरत्वमित्यादिपदसमभिव्याहारेण—
इदि ।

End. लिखनात् न हृद्दिनं निषिद्धमिति गम्यते ।

Colophon. इति महामहोपाध्यायश्रीमधुसूदनठक्कुरकृतो द्वैतनिर्णयजीर्णोद्धारः समाप्तः ।

विषयः । वाचस्पतिमिश्रकृतद्वैतनिर्णयस्य व्याख्यानम् ।

No. 1854. त्रिलक्षणीभाष्यप्रकाशः ।

Substance, country-made paper, 8 × 4 inches. Folia, 37. Lines, 10 on a page. Extent, 1,017 s lokas. Character, Maithilí. Date, ? Place of deposit, Magráṇí, Post Madhubaní, Darbháṅgá, Paṇḍit Kánáiláḷa Jhá. Appearance, fresh. Prose. Correct.

Trilakshaṇí-bháshya-prakás'a. A commentary on the aphorisms of Sáṇḍilya. The commentator adopts the dualistic theory for his standground.

Beginning. नित्यानुपूर्व्वीदेहाय शब्दमय्यैकमूर्त्तये ।
नमास्तु हरये नित्यमचिन्त्यगतये नमः ॥
नित्यं रुद्रिद्दितं यत्र ब्रह्म सच्चित्सुखात्मकम् ।
तद्भेदनिदानाय तस्मै रागाय ते नमः ॥
पाण्डित्यपरिपाकेन शाण्डिल्येन विनिर्म्मिता ।
विविच्यते भक्तिपरा शतसूत्री त्रिलक्षणा ॥
श्रोतॄनवधापयितुं प्रतिजानीते अथातो भक्तिजिज्ञासा । इत्यादि ।

End. अर्थापत्तेर्विजातीयत्वेऽपि तर्कोपासनादेरिव न ज्ञानात्मकवृत्तित्वमित्याशयः ।

Colophon. इति तृतीयस्य द्वितीयमाह्निकम् । इति तृतीयं लक्षणं समाप्तम् । समाप्ता त्रिलक्षणीमीमांसा । इति त्रिलक्षणीभाष्यप्रकाशः समाप्तः ।

विषयः । परात्मजीवात्मनोरभेदमङ्गीकृत्य शाण्डिल्यशतसूत्रीयस्य व्याख्यानम् ।

No. 1855. चण्डीसपर्य्याक्रमकल्पवल्ली ।

Substance, country-made paper, 11 × 3 inches. Folia, 75. Lines, 10 on a page. Extent, 1,546 s'lokas. Character, Maithilí. Date. ? Place of deposit, the Library of the Rájá of Darbhángá. Appearance, decayed. Prose and verse. Correct.

Chandí-saparyá-krama-kalpavallí. A digest of the rituals of the Tantras on the adoration of the Deví in her different forms. By S'rí-nivása Des'ikendra.

Beginning. वन्दे सिन्धुरराजबन्धुरमुखं बन्धूकपुष्पप्रभं
सिन्दूरारुणकुम्भयुग्मविलसच्चन्द्रार्द्धयुक्शेखरम् ।
गण्डद्वन्द्वगलन्मदद्रवमिलन्मौलीन्दुवृन्दं शनैः
कर्णाभ्यां विनिवारयन्तमनिशं प्रत्यूहविच्छित्तये ॥
श्रीदेशिकेन्द्रं शिरसा प्रणम्य श्रीश्रीनिवासो द्रविडोद्भवोऽहम् ।
श्रीमत्सपर्य्याक्रमकल्पवल्ल्याः श्रीचण्डिकाया यजनं प्रवक्ष्ये ॥
सर्व्वागमाम्नायरहस्यभूतं सर्व्वेप्सितार्थप्रदमाशु लोके ।
स्कन्दाय यड्डामरतन्त्रसारे प्रोक्तं पुरा ह्युवते शिवेन ॥
— — — — — — — — ।
तत्र श्रीमार्कण्डेयपुराणे खिले मेधसं प्रति सुरथवाक्यम् । इत्यादि ।

End. श्रीश्रीनिवासेन विनिर्म्मितायां श्रीमत्सपर्य्याक्रमकल्पवल्ल्याम् ॥
गतः किलायं स्तवकस्तु पञ्चमः सुव + + + + टमोरभाद्यः ॥

Colophon. इति श्रीश्रीनिवासभट्टविरचितायां चण्डीसपर्य्याक्रमकल्पवल्ल्यां पञ्चमस्तवकः ।
समाप्तश्चायं ग्रन्थः ।

विषयः । नवाक्षरमन्त्रनिरूपणमुखेन देव्या माहात्म्यादिकथनं । देवीमाहात्म्यस्य मार्कण्डेयपुराणान्तर्गतत्वेऽपि खिलत्वमिति निरूपणं । एवमध्यायसप्तकमपि देवीमाहात्म्यं सत्र मालामन्त्रोपासनायां विनियुक्तमिति निरूपणं । कार्य्यविशेषे वषट्कारादियुक्तस्य एतन्मन्त्रस्य पुष्ट्यादिसाधकत्वनिरूपणं । चण्डीसपर्य्यायां स्नानतर्पणादिविधिकीर्त्तनं । अर्चनाविधिकथनं । तत्र आसनादिनिरूपणं । विविधन्यासकथनादिकं । पीठपूजाविधिः । देवीमाहात्मीयप्रथमादिचरितस्य ऋषिच्छन्दआदिनिरूपणं । चण्डीसपर्य्याप्रयोगकीर्त्तनं । मानसपूजाविधिकथनं । तत्प्रक्रियाकीर्त्तनञ्च । नैमित्तिकार्चनविधिः । दमनकपूजाविधिः । मदनवस-

न्ययोः पूजाविधिकथनं। पवित्रारोपणविधिः। काम्यपूजाविधिकथनं। ध्यानभेदे फलभेदकथनं। नित्यचण्डिकाध्यानकथनादिकं। नवदुर्गाविधिकथनं। आश्विने नवदुर्गामहोत्सवादिविधानं। शतचण्डीविधिकथनं। अनावृष्ट्याद्यखिलदुरितशान्त्युपायकथनं। मण्डपरचनार्थं प्राचीसाधनविधिकथनं। कुण्डनिर्म्माणविधिकथनं। अग्निस्थापनादिविधिकथनं। अत्र सर्व्वत्र प्रयोगकथनं। कुमारीपूजाविधिः। पूज्यापूज्यकुमारीलक्षणकथनं। स्रुक्स्रुवादिनिर्म्माणप्रक्रियादिकीर्त्तनञ्च।

No. 1856. श्राद्धप्रदीपः।

Substance, country-made paper, 13 × 4 inches. Folia, 74. Lines, 9 on a page. Extent, 2,646 s'lokas. Character, Maithilí. Date, ? Place of deposit, Magráṇí, Post Madhubaní, Darbháṅgá, Paṇḍit Kánáilála Jhá. Appearance, fresh. Prose and verse. Correct.

S'ráddha-pradípa. A digest of the rules for performing S'ráddhas. By Vardhamána Mis'ra.

Beginning. अभिनवरसवेणिः पादपद्मे मुरारे-
मदनमथनमौलेर्मालतीपुष्पमाला।
जयति जयपताका काप्यसौ मोक्षलक्ष्म्याः।
कलिकलुषनिहन्त्री जाह्नवी नः पुनातु॥
हरिं प्रणम्य सर्व्वज्ञं नीलोत्पलदलत्विषम्।
आलोच्य मुनिवाक्यानि श्राद्धस्य विधिरुच्यते॥
ननु किं श्राद्धं तावत, पितृदेवताको द्रव्यत्यागः। पिण्डपितृयज्ञे तर्पणे अतिव्याप्तेः, न च ब्राह्मणभोजनपर्य्यन्तत्वेन स एव विशेष्यः, शूद्रकर्तृकश्राद्धाव्याप्तेः। इत्यादि।

End. तत्पुत्राद्यभावे सतीति मन्तव्यम्।
स्मृतीः पुराणानि च शास्त्रजातं ज्ञात्वा विचार्य्यापि च शास्त्रयुक्त्या।
श्रीवर्द्धमानेन कृतः प्रदीपः स्वान्ते सतां शर्म्म समातनोतु॥

Colophon. इति महामहोपाध्यायश्रीवर्द्धमानविरचितः श्राद्धप्रदीपः समाप्तः। शुभमस्तु।

विषयः। अन्याभिमतश्राद्धलक्षणाक्षेपपूर्व्वकं 'वेदबोधितपात्रालम्भनपूर्व्वको द्रव्यत्यागः श्राद्धमिति श्राद्धलक्षणविवेचनं। द्वादशविधश्राद्धभेदनिरूपणं। श्राद्धकालनिरूपणं।

साग्निनिरग्निभेदात् अवस्थादिनिरूपणं। काम्यश्राद्धकालनिरूपणं। रात्रौ श्राद्धकरणादिनिषेधः। मलमासविवेचनं। श्राद्धदेशनिरूपणं श्राद्धाधिकारिनिरूपणं। श्राद्ध प्रशस्तब्राह्मणनिरूपणं। निषिद्धकथनञ्च। श्राद्धविहितद्रव्याणि। निषिद्धद्रव्याणि च। कुशविवेचनं। निमन्त्रणविधिः। अर्घदाने पात्रविशेषनिरूपणं। गन्धादिपञ्चकनिरूपणं। गौड़ीयप्रयोगाद् विशेषकथनं। परिवेषणविधिकथनं। तत्र काम्यद्रव्यदानविधिकीर्त्तनञ्च। जपविधिः। श्राद्धपरिभाषाकथनं। पार्व्वणश्राद्धप्रयोगकथनं। आमश्राद्धविधिः। एकोद्दिष्टविधानं। सपिण्डीकरणकालादिनिरूपणं। श्राद्धभोजननिषेधविवेचनं। पुत्रमात्रस्य धनहरत्वात् श्राद्धेऽधिकारः कर्त्तव्यञ्च इति निरूपणं। एकोद्दिष्टश्राद्धप्रयोगकथनं। आभ्युदयिकश्राद्धप्रयोगकथनं। विशेषतः श्राद्धाधिकारिनिरूपणञ्च।

No. 1857. आचारचिन्तामणिः।

Substance, country-made paper. 10 × 3½ inches. Folia, 121. Lines, 10 on a page. Extent, 4,128 s'lokas. Character, Maithili. Date, A. D. 1437. Place of deposit, Mujná Gráma, Post Tajapura, Darbháñgá, Paṇḍit Bábulála Páṭhaka; two other copies, Post Madhubaṇi, Magráṇi Gráma, Zilá Darbháñgá, Paṇḍits Kánáilála Jhá and Chhoṭilála Jhá. Appearance, new. Prose and verse. Correct.

Áchára-chintámaṇi. A digest of the rules regarding Áchára. By Váchaspati Mis'ra Mahámahopádhyáya. The author compiled a series of digests, under the generic name of Chintámaṇi, on the different topics treated in the Smṛitis, and also wrote commentaries on several philosophical works. The codex is dated in 433 of Lakshmaṇa Sena's era.

Beginning. आभीरदारकमुदञ्चितकिङ्किणीकमाताम्रपाणिचरणं पुरुषं पुराणम्।
मञ्जीरमञ्जुमरणाधरमम्बुजाक्षमद्वैतचिन्मयमनादिमनन्तमीड़े॥
अथाचाराश्रितो धर्म्म इह वाजसनेयिनाम्।
निबध्यते हरिं नत्वा श्रीवाचस्पतिशर्म्मणा॥
उद्बोधमैत्रशौचानि तथाचमनकारणम्। इत्यादि।

End. यदाह आपस्तम्बः। यावत् सन्निपातश्च सहशय्या। ततो नानासन्निपातः अभिगमः। नाना भिन्नभिन्नेत्यर्थः।

Colophon. इति श्रीमन्महामहोपाध्यायमिश्रश्रीवाचस्पतिविरचित आचारचिन्तामणिः

सम्पूर्णः । लक्ष्मणभूपसम्बन्धिचयस्त्रिंशदधिकशतचतुष्टयाब्दे कार्त्तिककृष्णसप्तम्यां शुक्रे मिश्रश्रीदेवनाथमहाशयानामाज्ञया मिश्रश्रीहरिशर्म्मणा लिखितमाचारचिन्तामणिपुस्तकमिति ।

विषयः । वाजसनेयिनामाचारादिनिरूपणं । तत्र सदाचारशब्दनिर्व्वचनं । सदाचारलक्षणादिकथनञ्च । उद्बोधानन्तरविधिकथनं । मूत्रपुरीषादित्यागविधिः । पापकर्म्मफलनिष्कृत्युपायकीर्त्तनं । अशुभकर्म्मणा देहत्रितयप्राप्तिकथनं । तत्र आतिवाहिकभोगवाय्वनुसारिदेहानां लक्षणकथनं । किञ्च नरकानुभूतदुःखानां तिर्य्यग्योनित्वमनुभूय उत्तीर्णानां मनुष्यत्वेऽपि केषाञ्चित् पापानां लक्षणानि जायन्त इति तन्निरूपणं । मार्गादौ मूत्रोत्सारादिनिषेधकथनं । विशेषेण शौचविधिकथनं । मृत्तिकाग्रहणस्थानादिनिरूपणं । कमण्डलुनिर्म्माणतन्मार्ज्जनादिविधिकथनं । विस्तरेण आचमनविधिकथनं । स्त्रीशूद्रयोराचमनविधिः । इन्द्रियमार्ज्जनविधिः । आचमननिमित्तनिरूपणं । द्विराचमननिमित्तनिरूपणञ्च । दन्तधावनविधिः । दन्तकाष्ठनिरूपणं । तदभावे मुखशुद्धिकथनं । प्रातःस्नानादिविधिकीर्त्तनं । स्नानानन्तरं केशप्रसाधनादर्शाञ्जनादिविधानकथनं । मङ्गलाचारलक्षणतद्विधानादिकथनं । वैधनैमित्तिकादिस्नानविधिः । स्नानयोग्यस्थाननिरूपणं । मन्त्रादिस्नानविधिः । सामान्यतः स्नानप्रक्रियाकथनं । सर्व्वशाखिकसर्व्ववर्णसाधारणस्नानविधिः । स्नानोत्तरकर्म्मविधानं । तिलककरणविधिः । सन्ध्योपासनविधिकीर्त्तनं । तत्प्रयोगकथनादिकं । गायत्रीजपादिविधिः । जपमालानिरूपणं । ब्रह्मयज्ञविधिः । विशेषेण तर्पणविधिकथनं । कातीयतर्पणप्रयोगकथनं । एवं वसिष्ठगोभिलाद्युक्ततर्पणविधिकथनं । तर्पणोत्तरकर्म्मकथनं । तत्र सामान्यतः पूजाप्रकारकथनं । देवपूजाविधिः । पूजाधारनिरूपणं । अर्घ्यदाने विशेषविधिकथनं । पञ्चोपचारविधिकथनं । एवं दश-षोडशअष्टादश-षट्त्रिंशोपचारविधानकथनं । सूर्य्यपूजाविधिः । अत्र पुष्पविवेचनं । धूपनैवेद्यादिनिरूपणञ्च । दुर्गापूजाविधिः । अत्र पुष्पविवेचनं । शिवपूजाविधिः । अत्र पुष्पाणि । धूपादिविधानञ्च । विष्णुपूजाविधिः । शालग्रामादिपूजायां पुष्पादिविधानं । विष्णुनैवेद्यार्थं मांसादिकमपि दातुमर्हतीति निरूपणं । अष्टाक्षरपूजाविधिः । विष्णोरपराधनिरूपणं । पञ्चमहायज्ञविधिः । एतत्प्रयोगकथनञ्च । तत्र मनुष्ययज्ञविधिः । नित्यश्राद्धविधिः । अतिथिपूजाविधिः । सामान्यतः भोजनविधिः । विशेषेण भोज्याभोज्यनिरूपणं । तत्र शस्येषु भोज्यानि । दुग्धानि । पक्षिणः । पशवः । मत्स्याश्च । मांसभक्षणवर्ज्जनयोः विधिविवेचनं । भोजनोत्तरकर्म्मविधानं । शयनविधिः । दारोपगमविधिः । रजस्वलानिरूपणं । तस्या नियमादिकथनञ्च ।

No. 1858. सिद्धान्तसार्व्वभौमः ।

Substance, country-made paper, 13 × 4 inches. Folia, 48. Lines, 12—13 on a page. Extent, 1,966 s'lokas. Character, Maithilí. Date, ? Place of deposit, Rághavapura, Post Madhubani, Darbháñgá. Pandit S'rínátha Jhá. Appearance, new. Verse. Generally correct.

Siddhánta-sárvabhauma. A digest of the several Síddhántas on Indian astronomy. By Munis'vara Sárvabhauma, son of Rañganátha. Contents: Measurement of true solar year &c.; duration of Yugas; motions of planets; measures of months and years and the mode of reckoning them; nodes of planetary orbits; measures of bulk; diameter and motions of the earth; equatorial regions; calculation of latitudes and longitudes; calculation of the apparent motion of planets; zenith and nadir; curved motions of planets; nodes; position of the earth; the orbits of the planets; arcs between the vernal equinoctial point and the equator, &c., &c.

Beginning. विश्वं व्याप्य स्थिता यः सकलसुरनरैर्वन्दितः श्रीनिवास-
तेजोमूर्त्तिः कृपालुर्मुनिवरनिकरैर्ज्ञानदृष्ट्यैव गम्यः ।
ध्यान्तं हत्वा स बोधं सुखकरममितं सच्चिदानन्दरूपः
स्वान्ते तद्भक्तियुक्ते व्यपगतदुरिते सर्व्वदा मे व्यनक्तु ॥
ब्रह्माद्या विबुधगणाः स्वकार्य्यसिद्ध्यै यं विघ्नद्रुमदलनोद्धुरं प्रणम्य ।
नीयन्ते सपदि कृताखिलार्थमेतं दन्तावलिवदनं नमामि नित्यम् ॥
यस्याः प्रसादमासाद्य काव्यं लक्षणलक्षितम् ।
कुर्व्वन्त्यपि जडाः सा मे मुखाब्जेऽस्तु सरस्वती ॥
मन्दोऽप्यहं यच्चरणाब्जसेवा—समाप्तबोधांशवशात् सुधीभिः ।
सिद्धान्ततत्त्वाधिगमैः स्वपच—कृतौ कृतस्ते गुरवो जयन्ति ॥
गूढं सूक्ष्मं स्वसिद्धान्तं मत्वा यस्तच्छिरोमणिम् ।
कृतवान् मनुजव्याजादसौ जयति भास्करः ॥
दैवज्ञवर्य्यगणसन्ततसेव्यपार्श्वः श्रीरङ्गनाथतनयोऽथ मुनीश्वरोऽहम् ।
ग्रन्थान् विभाव्य सकलानपि सार्व्वभौमसिद्धान्तपूर्व्वमपरं स्वधिया करोमि ॥ इत्यादि ।

End. इतिसिद्धान्ततत्त्वार्थे मुनीश्वरकृतेऽभवत् ।
सिद्धान्तसार्व्वभौमोऽयं क्रान्तिसाम्याधिकारकः ॥
अयं जगत्यां प्रहततपरीक्षाद्रष्टज्ञोन्नति+समयोगभेदात् ।
बलातिरेकात् परपातकर्त्ता श्रीसार्व्वभौमः सुतरां विभाति ॥

Colophon. इति पूर्व्वार्द्धम्।

विषयः। कालमानकथनं। सौरवर्षादिनिरूपणं। युगपादादिनिरूपणं। ग्रहाणां चलोन्नतनिरूपणं। मासादिनिरूपणं। अत्र सर्व्वत्र उपपत्तिकथनं। वर्षकालनिरूपणादिकं। वर्षगणनप्रकारादिकथनं। ग्रहाणां पातानयनप्रकारकथनं। परमाण्वादिपरिमाणकथनं। भूगोलस्य व्यासाद्यानयनप्रकारकथनं। निरक्षदेशादिनिरूपणं। व्यानयनप्रकारादिकथनमुखेन भुजशिञ्जिनीकोटिशिञ्जिनीप्रभृतीनां लक्षणकथनं। ग्रहाणां स्फुटक्रियोपपत्तिकथनं। प्रतिवृत्तभङ्गीनिरूपणं। नीचोच्चवृत्तभङ्गीकथनं। ग्रहाणां वक्रगत्यादिनिरूपणं। खेटाद्यानयनप्रक्रियाकथनं। भूगोलसंस्थानादिकथनं। विषुवन्मण्डलक्रान्तिवृत्तादिनिरूपणं। अयनांशनिरूपणं। अत्र यवनादीनां मतकथनञ्च। उदयांशनिरूपणं। अत्र सर्व्वत्रोपपत्तिकथनञ्च।

त्रिप्रश्नाधिकारः। तत्र ग्रहाणां कलाविम्बाद्यानयनप्रक्रियाकथनं। शशिपूर्व्वकाणां षण्णां ग्रहाणां भानिमित्तकथनादिकं। तेषां भानयनप्रक्रियादिकथनञ्च। खेटभागमप्रकारकथनञ्च। शृङ्गोन्नतिनिरूपणं। तत्र सूर्य्यसमीपे ग्रहाणामवस्थानादिनिरूपणमुखेन उच्चनीचदूरत्वादिज्ञानसाधनकीर्त्तनं। ग्रहाणामस्तोदयज्ञानप्रकारकथनं। चन्द्रग्रहणगणनाप्रक्रियादिकथनं। पाताद्यानयनप्रकारः। स्पर्शादिज्ञानोपायकथनं। एवं सूर्य्यग्रहणगणनाप्रक्रियाकथनं। क्रान्तिसाम्यनिरूपणं। व्यस्तायनांशादिनिरूपणञ्च॥

No. 1859. विवादचन्द्रः।

Substance, country-made paper, 10 × 3 inches. Folia, 60. Lines, 8 on a page. Extent, 2,202 s'lokas. Character, Maithilí. Date, Sṁ. 1119. Place of deposit, Magráni Gráma, Post Madhubaṇi, Darbháṅgá, Paṇḍit Chhoṭilála Jhá. Appearance, old. Prose and verse. Correct.

Vivádachandra. A summary of the laws of inheritance, judicature, sale, barter, &c. By Mahádeví, wife of king Chandra Siṅha, under the advice of Misaru Mis'ra.—Contents: Laws regarding loans; possession, mortgage, interest, bail, repayment of debts, legal position of the born-blind, loans for trade, ditto contracted under pressing wants, pledges, sale without proprietory right, coparcenary in trade, gift, servants, manumission of slaves, hire, disputes regarding ownership, delivery after sale, purchase, boundary disputes, laws regarding bridges, treasure trove, protection of crops. Law of inheritance, division of

a deceased father's estate, disqualification to inherit, indivisible property, woman's property, lapsed inheritance, estate of childless persons, joint property. Judicature, defence, rejoinder, evidence, documentary evidence, evidence of possession, witnesses, interrogatories, ordeals, judgment, decision, execution. Twelve kinds of sons.

Beginning. वन्दे श्रीकण्ठवैकुण्ठावकुण्ठौ नतनन्दने ।
विघ्नविच्छेदकुशलौ गिरिजाजलजान्वितौ ॥
श्रीचन्द्रसिंहन्टपतेर्दयिता लषिमा महादेवी ।
रचयति विवादचन्द्रं मिसरुमिश्रोपदेशेन ॥
विवादे व्यवहारे च व्यवस्था यस्य यादृशी ।
निबन्धृभिः कृता साच लिख्यते सूरिणां मुदे ॥
तत्रादा ऋणादानव्यवस्था । यया व्यवस्थया अयमृणमधमर्णो गृह्णाति तच्चिरकालं विना तथैव दद्यात् । इत्यादि ।

End. ब्राह्मणस्य क्षत्रियादिषु नौरसत्वापत्तौ परिगणनं मुख्यत्वकल्पनालाघवाय सर्व्वेषां सवर्णायां व्यवहारयोर्विरोधापत्तेरिति ।

Colophon. इति महामहोपाध्याय श्रीमिसरुमिश्रकृतो विवादचन्द्रः समाप्तः । सन् ११९९ ।

विषयः । ऋणादानव्यवस्थाकथनं । भोग्याधिनिरूपणं । बन्धकनिरूपणं । वृद्धिनिषेधः । प्रतिभूनिरूपणं । ऋणादानविधिः । ज्ञातान्यस्थानव्यवस्थाकथनादिकं । वाणिज्यार्थं ऋणग्रहणे व्यवस्था । कन्याविवाहाद्यापत्कालकृतऋणव्यवस्था । न्यासनिरूपणं । अस्वामिविक्रयः । सम्भूयसमुत्थानविधिः । दत्ताप्रदानिकविधिः । भृतकविधिः । दास्यमोचविधिः । भाटकविधिः । स्वामिपालविवादनिरूपणं । विक्रीयासम्प्रदानविधिः । क्रीतानुशयविधिः । सीमाविवादनिरूपणं । सेतुविधिः । नष्टाकृष्टविधिः । शस्यरक्षाविधिः ॥ दायभागनिरूपणं । प्रमीतपितृकविभागः । भागानर्हविधिः । अविभज्यविधिः । स्त्रीधनविधिः । अवलुप्तविभागविधिः । अपुत्रधनविभागः । संसृष्टधनविभागः ॥ व्यवहारविधिः । तत्र उत्तरविधिः । प्रत्याकलितविधिः । सन्धिविधिः । क्रियादानविधिः । भुक्तिविधिविधिः । साक्षिविधिः । प्रश्नविधिः । दिव्यविधिः । जयपराजयावधारणविधिः । निर्णयविधिः । निर्णीतकृत्यविधिः । द्वादशविधपुत्रनिरूपणादिकञ्च ।

No. 1860. तर्कतत्त्वनिरूपणम् ।

Substance, country-made paper, 11 × 4 inches. Folia, 42. Lines, 9 on a page. Extent, 1,476 s'lokas. Character, Maithili. Date, ? Place of deposit, Magráṇi Gráma, Post Madhubaṇi, Darbháṅgá, Paṇḍit, Chhotílála Jhá. Appearance, old. Prose. Correct.

Turkatattva-nirúpaṇa. An enquiry into the principles of dialectics. By Gokulanátha Mahámahopádhyáya.

Beginning. कथं तर्कमनिष्कृष्य तार्किकास्त्वामुपासतां ।
अतो नाथेन हे नाथ तर्कतत्त्वं निरूप्यते ॥
अथ योऽसावश्रद्धामलापहरणद्वारा पुरुषार्थानामसाधारणं साधनं । इत्यादि ।

End. तस्मात् ।
अनाहार्य्याद् व्यापकतानिर्णयाद्यो ह्यबाधिनः ।
तर्क उत्पद्यते किन्तु पर्य्यवस्य विपर्य्ययम् ॥

Colophon. इति महामहोपाध्यायगोकुलनाथविरचितं तर्कतत्त्वनिरूपणं ।

विषयः । तर्कस्वरूपविवेचनं ।

No. 1861. न्यायकौस्तुभे शब्दपरिच्छेदः ।

Substance, country-made paper, 11 × 4 inches. Folia, 268. Lines, 9 on a page. Extent, 3,851 s lokas. Character, Nágara. Date, Sm. 1841. Place of deposit, Magráṇi Gráma, Post Madhubaṇi, Darbháṅga, Paṇḍit Chhotílála Jhá. Appearance, fresh. Prose. Correct.

Nyáya-kaustubha. A commentary on the Tattvachintámaṇi of Gaṅges'a. By Mahádeva Paṇḍita, surnamed Ponattákara, and son of Mukunda Paṇḍita. The codex contains the chapter treating of S'abda.

Beginning. नत्वा साम्बशिवं मुकुन्दपितरं श्रीकण्ठसंज्ञं गुरुं
भूयः सूक्ष्मधिया विभाव्य च तदुक्तार्थं समस्तं हृदि ।
शब्दे मानवरे विशिष्टविविधव्युत्पत्तिसम्पादके
गूढार्थप्रतिपत्तये वरधियां कुर्वे प्रबन्धं वरम् ॥
अथ शब्दो निरूप्यते । अत्र उपजीव्योपजीवकभावसङ्गत्या उपमाननिरूपणान-
न्तरं शब्दनिरूपणमिति बहवो वदन्ति । इत्यादि ।

End. यथाश्रुतानां मणिगोचराणां निष्कर्षबोधाय बहूक्तियुक्तः ।
अयं महादेवबुधेन यत्नाच्छम्भोर्दयातो रचितो निबन्धः ॥

Colophon. इति श्रीमत्पदवाक्यप्रमाणपारावारीणश्रीमन्मुकुन्दपण्डितात्मजपुणताकरोपनामकमहादेवपण्डितविरचिते न्यायकौस्तुभे शब्दपरिच्छेदः समाप्तः । संवत् १८४१ ।

विषयः । शब्दचिन्तामणिव्याख्यानं ।

No. 1862. न्यायसिद्धान्तमञ्जरी ।

Substance, country-made paper, 8 × 3 inches. Folia, 53. Lines, 9—10 on a page. Extent, 1,992 s'lokas. Character, Maithilí. Date, ? Place of deposit, Magráṇi Grama, Post Madhubaṇi, Darbháṅgá, Paṇḍit Chhoṭiláła Jhá. Appearance, old. Prose. Correct.

Nyáyasiddhánta-mañjarí. An elementary treatise on the Nyáya philosophy. By Jánakinátha Bhaṭṭácharya Chúḍámaṇi. A work of this name by S'ríkrishṇa has been noticed under No. 1408, Vol. IV, p. 31, and a commentary on it under No. 1452 Vol. IV, p. 56.

Beginning. प्रणम्य परमात्मानं जानकीनाथशर्म्मणा ।
क्रियते युक्तिमुक्ताभिर्न्यायसिद्धान्तमञ्जरी ॥
इह किल निखिललोकविमोक्षमुख्योपायमात्मनस्तत्त्वज्ञानमामनन्ति । तच्च प्रमाणाधीनं । प्रमाण निरूप्यते । इत्यादि ।

End. तत्रैव किं मानमिति चेत्; तत् प्रकारिकाप्रक+ + + + इति संक्षेपः ।

Colophon. इति श्रीजानकीनाथभट्टाचार्य्यचूड़ामणिकृता न्यायसिद्धान्तमञ्जरी समाप्ता ।

विषयः । प्रमाणस्वरूपनिरूपणं । करणत्वनिरूपणं । प्रत्यक्षलक्षणं । वैशिष्ट्यानवगाहिज्ञानं (साक्षात्कारः) इतिकथयतो नास्तिकस्य मतखण्डनं । नित्यानित्यभेदाद्द्विविधसाक्षात्कारनिरूपणं । निर्व्विकल्पकसविकल्पकभेदेन अनित्यस्य द्वैविध्यकथनपूर्व्वकं तयोः स्वरूपविवेचनं । वैशिष्ट्यज्ञाननिरूपणं । प्रकारताविशेष्यतादिस्वरूपनिरूपणं । ज्ञातो घट इति प्रतीतेः ज्ञानजन्यो विषयनिष्ठः प्राकट्यापरनामा पदार्थो-ज्ञातता सैव विषयता—इत्यादिभाट्टमतखण्डनं । भासमानवैशिष्ट्यप्रतियोगित्वं प्रकारत्वमितिवादखण्डनं । द्रव्यप्रत्यक्षप्रक्रियानिरूपणं । उद्भूतत्वलक्षणं । द्रव्यगुणकर्म्मादीनां सामान्यलक्षणं । समवायो न प्रत्यक्ष इति वैशेषिकमतखण्डनं । सन्निकर्षनिरूपणं । द्विविधविशेषणतालक्षणविवेचनं । अभावोऽधिकरणस्वरूप इति कथयतां प्राभाकराणां मतखण्डनम् । अभावविभागतल्लक्षणं । अभावो नेन्द्रियग्राह्य-

इति भाट्टमतखण्डनं। योग्यानुपलब्धिस्वरूपचिन्तनं। इन्द्रियाणां लक्षणं। आत्ममनःसंयोगविवेचनं। अनुमानलक्षणं। व्याप्तिलक्षणादिचिन्तनं। अत्र मीमांसकादिमतखण्डनं। चार्वाकमतनिरूपणं। पक्षधर्मतानिरूपणं। परामर्शनिरूपणं। केवलान्वयि-केवलव्यतिरेकि-अन्वयव्यतिरेकिभेदादनुमानस्य त्रैविध्यनिरूपणं। हेत्वाभासविवेचनं। उपाधिस्वरूपचिन्तनं। अवयवस्वरूपविवेचनं। उपमानलक्षणं। उपमितिस्वरूपकथनं। शब्दप्रमाणलक्षणं। शब्दस्य अनुमानेऽन्तर्भाव इति कथयतां वैशेषिकाणां मतखण्डनं। शक्तिवादः। शक्तिग्रहोपायकथनं। ईश्वरनिरूपणं। गवादिपदानां गोत्वे एव शक्तिः आक्षेपात्तु व्यक्तिलाभ इति कथयतां भाट्टानां मतखण्डनं। आक्षेपस्वरूपकथनञ्च। कार्य्यान्वितशक्तिवादखण्डनं। लक्षणाविचारः। समासवादः। व्यञ्जनावृत्तिखण्डनं। कारकवादः। आख्यातवादः। अत्र न्यायभास्करादिमतखण्डनं। आकाङ्क्षायोग्यतादिनिरूपणं। विधिस्वरूपविवेचनं। अपूर्व्ववादः। अर्थवादादिनिरूपणं। शब्दस्य नित्यत्वमभ्युपगच्छतां गुरूणां मतखण्डनं। प्रवर्त्तकज्ञानविचारः। स्फोटवादनिरसनं। अर्थापत्त्यादीनामनुमानादावन्तर्भावकथनं। प्रामाण्यवादः।

No. 1863. तर्कप्रकाशिका।

Substance, country-made paper, 10 × 4 inches. Folia, 125. Lines, 13 on a page. Extent, 4,551 s'lokas. Character, Nágara. Date, ? Place of deposit, Magráṇi Gráma, Post Madhubání, Darbháṅgá, Paṇḍit Chhoṭilála Jhá. Appearance, old. Prose. Correct.

Tarka-prakásiká. A commentary on the chapter on S'abda in the work noticed under the next preceding No. By S'ríkaṇṭha Díkshita, son of Vis'vanátha Díkshita, of Kás'í.

Beginning. जटाजुटलसद्गाङ्गजलभूषितमस्तकम्।
पुनातु गिरिजाप्रेमपात्रमेकमनेकधा॥
उपजीव्योपजीवकभावसङ्गत्या उपमाननिरूपणानन्तरं शब्दं निरूपयन् शिष्यावधानाय प्रतिजानीते अथेति। इत्यादि।

End. इदं रजततया जानामीत्यनुव्यवसाये+पि शुक्तिगोचररजतत्वप्रकारको+वसेय इति।
अतिकर्कशतर्के यद् यदत्र स्फुरितं मम।
सिद्धेश्वरीपदद्वन्द्वरसैतद्विजृम्भनम्॥

योऽसौ काश्यां समुत्पादि विश्वनाथेन धीमता ।
तस्य श्रीकण्ठकृतिनः कृतिः कलयतां मुदं ॥

Colophon. इति श्रीकाशीगर्भसम्भवदीक्षितविश्वनाथात्मजदीक्षितश्रीकण्ठशर्म्मविरचिता तर्कप्रकाशिकाभिधा सिद्धान्तमञ्जरीव्याख्या समाप्ता ।

विषयः । जानकीनाथकृतन्यायसिद्धान्तमञ्जरीनामकन्यायप्रकरणान्तर्गतशब्दपरिच्छेदस्य व्याख्यानं ।

No. 1864. शब्दालोकरहस्यं ।

Substance, country-made paper, 10 × 4 inches. Folia, 312. Lines, 14 on a page. Extent, 16,327 s'lokas. Character, Maithili. Date, ? Place of deposit, Magráṇi Gráma, Post Madhubání, Darbhángá, Paṇḍit Chhoṭíláḷa Jhá. Another copy at Mujaná Gráma, Post Tájapurá, Dvarbháñgá, Paṇḍit Bábuláḷa Jhá. Appearance, old. Prose. Correct.

S'abdáloka-rahasya. A commentary on the S'abdáloka of Pakshadhara Mís'ra. By Gadádhara Bhaṭṭa. The S'abdaloka is itself a commentary on the S'abda Khaṇḍa of Ganges'a's Tattvachintámaṇi.

Beginning. प्रणम्य श्रीमोणगणेकवन्द्यं पादारविन्दं पुरुषोत्तमस्य ।
निगूढभावविष्कुरुते प्रयत्नाद् गदाधरः पक्षधरस्य भावं ॥
सङ्गत्यप्रदर्शने मूलस्य न्यूनता स्यादित्यथशब्दो निरूप्यत इतिप्रतिज्ञावाक्यादेव सङ्गतिरपि लभ्यते इत्याह अथेति । इत्यादि ।

End. इत्यादिना जातेष्यादेस्तत्फलकलखण्डनमयुक्तमित्याशङ्कां निराकुरुते नत्वित्यादिना ।

Colophon. समाप्ता चेयमपूर्व्ववादालोकरहस्यगादाधरी ।

विषयः । पक्षधरमिश्रकृतशब्दमण्यालोकस्य व्याख्यानं ।

No. 1865. सिद्धान्ततत्त्वविवेकः ।

Substance, country-made paper, 13 × 4 inches. Folia, 135. Lines, 12—13 on a page. Extent, 3,950 s'lokas. Character, Maithili, very bad. Date, ? Place of deposit, Rághavapura, Post Madhubaní, Darbhángá, Paṇḍit S'rínátha Jhá. Appearance, new. Prose and verse. Generally correct.

Siddhánta-tattva-viveka. A summary of the different Siddhántas, or original texts on astronomy. By Kamalákara, son of Nṛisiñha, of Devagiri on the banks of the Godávarí river. Contents: Time defined, cycles of Brahmá, Devas &c., measure of time of day and night, effect of longitude on the duration of day, durations of the Yugas, of various eras, current down to the time of the S'aka era, refutation of the opinion of the author of the Siddhánta-śiromaṇi, science of astronomy, excellence of the Súrya-siddhánta, motion of the stars in space, creation, destruction, refutation of the opinion of Bháskara A'chárya on the subject, the poles, mythical character of the signs of the Zodiac, the positions of the Nakshatras, refutation of the opinion of A'rya Bhaṭṭa regarding the motion of the earth, the blueness of the sky accounted for, (due to the quality of darkness *Tamah*), the shape of the earth (like a Kuthbela fruit,) supported in space by divine power, the opinions of the Yavanas on the subject, equatorial regions, position of the terrestrial sphere, longitudes of different places, eternity of the Meru mountain, diameter and circumference of the earth, calculation of the motions &c., of the earth, solstitial movements, drikkáṇas, coldness of the air in high places, conversion of vapours into clouds, causes of rainbows, meteorites &c., cause of earthquakes, (action of subterranean vapours on stones), cause of plagues (foul vapours), orbits of planets, calculation of the discs of heavenly spheres, zenith and nadir, instruments for ascertaining sankrántis, centripetal force, cause of circular motion, of spheres, apparent motion of the celestial spheres, chords of arcs, diagrams, &c., &c.

Beginning. ब्रह्माण्डोदरमध्यगावनिजलोग्न्यर्केन्दुपूर्वग्रह-
चौर्द्धस्थप्रवहान्तगोलरचना सृष्टिर्यथावस्थिता ।
कालेऽस्मिन् गहनेऽव्ययेऽस्ति सततं यस्मादियं + + +
यत्तन्निर्गुणमीशमव्ययपरं ब्रह्मैकतत्त्वं शुभं ॥
यदुत्पत्तिलयौ सान्या सृष्टिर्यस्माच्च देहिनां ।
ब्रह्मादीनां विभुः सोऽयं व्यक्तीभूतः सनातनः ॥
ब्रह्माण्डान्तस्तमोहन्ता भगवांस्तेजसां निधिः ।
नाम्नाऽनिरुद्धः कालात्मा सूर्योऽयं सवितेति च ॥
मण्डलान्तरगोऽजस्रं भुवनानि परिभ्रमन् ।
जलगोलग्रहर्क्षाणां भास्करः सर्वगोऽव्ययः ॥
शास्त्रप्रवर्तको ध्येयः तत्त्वज्ञैः कालबोधकृत् ॥

त्रयीमयः सर्व्ववन्द्यो जयत्येकोऽम्बरस्थितः ।
केचित् प्रत्यक्षसूर्य्याच्च भिन्नोऽयमिति यद्बलात् ॥
वदन्ति मूढ़वादस्याप्रामाण्यात्तदसद्ध्रुवं ॥
यच्छास्त्रवद्वानयनानुसारं ब्रह्मेन्दुपूर्व्वा ऋषयोऽपि चक्रुः ।
स्वं स्वञ्च सिद्धान्तमनल्पकार्थं गूढ़ं सतां गोलविदां सुबोधं ॥
अतिचापमपरम्परावचैः नाश्रितं तदपि सौरमतं तत् ।
तत्कृतेरनवबोधत एवेत्थं किं लेख्यमधुनातनवय्यः ॥
सद्गोलवासनावाद्यैः करणग्रन्थयुक्तितः ।
स्थूलव्यवहारार्थं स्वाचार्य्यत्वप्रसिद्धये ॥
वस्तुतत्त्वमबुद्धैव स्वार्षैः साकं विरोधतः ।
बहुभिर्बहुधा पूर्व्वं सिद्धान्ताः स्वधिया कृताः ॥
अतः सांवत्सराचार्य्यं गुरुं श्रीमद्दिवाकरं ।
नत्वा नृसिंहजोऽर्कस्य मतात श्रीकमलाकरः ।
कृती तत्त्वविवेकाख्यं पूर्व्वास्पृष्टं सवासनं ॥
सिद्धान्तं गोलवित्तुष्ट्यै करोति स्वधियोत्तमं ॥
ब्राह्मं दैवं तथा पित्र्यं प्राजापत्यं गुरोस्तथा । इत्यादि ।

End. अहज्जीर्णमायोदितं प्रोज्झ्य स्वक्तं नवीनत्त्विनानुग्रहाद्गोलयुक्त्या ।
मदुक्तैर्नवीनत्वनर्व्वप्रतीत्यै चिरं प्राक्तनोक्तं सदैवास्तु लोके ॥
यः करोति स्वनाम्ना ज्ञः परस्योत्कृष्टकल्पनां ।
स शीघ्रं चयमाप्नोति जनिष्वान्त्यजयोनिषु ॥

Colophon. इति श्रीकमलाकरविरचिते सिद्धान्ततत्त्वविवेके सोत्तरप्रश्नाधिकारः ।
अथात्र सार्द्धाम्बरदस्त्रसंख्यपलांशकैरस्ति च दक्षिणस्यां ।
गोदावरीसौम्यविभागसंस्थं दुर्गञ्च यद्देवगिरीतिनाम्ना ॥
प्रसिद्धमस्मान्नृप १६ योजनैः प्राग्याम्यान्तराशास्थितपाथरी च ।
विदर्भदेशान्तरगास्ति रम्या राज्ञां पुरी तद्गतदेशमध्ये ॥
तस्यास्तु किञ्चित् परभाग एव सार्द्धद्वितुल्यैः किल योजनैश्च ।
गोदा वरीवर्त्ति सदैव गङ्गा या गौतमप्रार्थनया प्रसिद्धा ॥
अस्याः सतां सौम्यतटोपकण्ठे ग्रामोऽस्ति गोलाभिधया प्रसिद्धः ।
तथैव याम्ये पुरुषोत्तमाख्या पुरी तयोरन्तरगा स्वयं सा ॥
यस्यां सदानन्दकुले रमन्ते गृहाग्नि++स्वगुणास्तरुण्यः ।
परस्परं शीकरसेचनाद्यैर्न्कैनक्रो भाषणतत्परा ला ॥

विषयः। कालस्वरूपादिकथनं। ब्राह्माद्दैवादिमानकथनं। अहोरात्रमानादिनिरूपणं। भचक्रभ्रमणेन लङ्कादौ दिनरात्रिविभागादिकथनं। कृतादियुगपादनिरूपणं। वर्षनिरूपणं। आद्यपुरुषात् स्वायम्भुवमनोरारभ्य शालिवाहनशाकेन्द्रं यावत् यावन्तो वत्सरा अतीताः तन्निरूपणं। अत्र सिद्धान्तशिरोमणिमताक्षेपः। ज्योतिषशास्त्रागमकथनं। सूर्य्यसिद्धान्तप्रशंसा। प्रवहानिलेन भचक्रभ्रमणकथनं। इति भगणमानाध्यायः। सृष्टिप्रलयचिन्तनं। अत्र भास्कराचार्य्योक्तोदयान्तरवासनानिराकरणं। ध्रुवस्थानादिनिरूपणं। मेषादिराशीनां कल्पितत्वकथनं। नक्षत्रचक्रसंस्थानादिनिरूपणं। प्रवाहमस्वीकुर्व्वतो भूभ्रमणञ्चाभ्युपगच्छत आर्य्यभट्टस्य मतखण्डनं। नीलं नभ इति प्रतीतेर्भ्रमत्वकथनं। अम्बरस्थितं तम एव नीलतया संदृश्यते इति निरूपणञ्च। कपित्थफलवद्वृत्तः स्थिरोऽयं भूगोलः परेशशक्त्यैव व्योम्नि तिष्ठतीतिनिरूपणं। अत्र यावनमतकथनं। निरक्षदेशनिरूपणं। भूगोलसंस्थानं। यमकोटिरोमकसिद्धपुराणामवस्थित्यादिकथनं। मेरुस्थानादिनिरूपणं। भूगोलपरिधिव्यासादिनिरूपणं। गणितप्रक्रियाकथनं। दिनाद्यानयनप्रक्रियाकथनं। दृक्फलनिरूपणं। भूगोलात् ऊर्द्धस्थितस्य वायोः शीतत्वकथनं। तत्र वाष्पादीनां मेघादिरूपेणोत्पत्तिकथनञ्च। इन्द्रचापोल्कापातादीनां कारणकथनं। पाषाणादिभिः कठिनाया भूमेः वाष्पनिःसरणकाले कम्पः शब्दश्च जायते इत्यनेन भूमिकम्पकारणनिरूपणं, भूस्थविषमस्वभावात् दूषिता वाष्पाः व्हदेहलग्नाः महामारीं जनयन्तीति मारीभयकारणनिरूपणञ्च। ग्रहाणां कक्षामानकथनं। बिम्बज्ञानार्थं गणितप्रक्रियाकथनं। ग्रहाणां नीचोच्चकर्णनिरूपणं। विषुवसंक्रान्त्यादिज्ञानार्थं यन्त्रादिकथनं। ध्रुवाकर्षणतो गोलभ्रमणकथनं। प्रवहवायवशात् भचक्रं गच्छतीति वादाक्षेपः, अक्षांशानयनादिप्रक्रियानिरूपणं। ज्यानयनादिप्रक्रियाकथनं। क्षेत्रदर्शनविधिः। क्षेत्राणामुत्पत्तिकथनं। उत्क्रमशिञ्जिन्यादिप्रक्रियादिकथनं। व्यासाद्यानयनप्रकारकथनं। गणितसाधनप्रकारकथनं। कुण्डविचारः। सवासनग्रहस्फुटनिरूपणं। केन्द्रानयनप्रकारकीर्त्तनं। गोलानां संस्थानादिकथनं। प्रतिमण्डलाद्यगोलनिरूपणं। प्रतिवृत्तगोलादिज्ञानसाधनादिप्रक्रियाकथनं। सूर्य्यस्य बिम्बसञ्चारज्ञानोपपत्तिकथनं। स्फुटार्कसिद्ध्यर्थमाकाशगोलस्वरूपसन्दर्शनप्रक्रियाकथनं। एवं चन्द्रमङ्गलादीनां फलोपपत्तिप्रदर्शनं। ग्रहाणामुच्चनीचत्वादिज्ञानसाधनकीर्त्तनं। तेषां वक्रगत्यादिज्ञानप्रक्रियाकथनं। ग्रहाणां पातज्ञानप्रक्रियाकथनं। सृष्ट्याद्यकाले भमण्डलस्य स्थानादिकथनं। अयनांशनिरूपणं। संक्रान्तिनिरूपणं। शिरोमणिसिद्धान्तसार्व्वभौमाद्युक्तकर्णसाधनप्रक्रियादूषणं। ग्रहस्पष्टाधिकारप्रक्रियाकथनं। त्रिप्रश्नाधिकारकथनं। निरक्षदेशादिनिरूपणं। विषुवरेखाद्यानयनप्रक्रियादिकथनं। अर्क्कादीनां भुजांशाद्या

नक्षत्रप्रक्रियाकथनं। दिग्देशकालानां ज्ञानोपायकथनं। अक्षिप्रयन्त्रादिस्वरूप-कथनं। यन्त्रोन्नतांशानां वैचित्र्यकथनं। सवासनग्रहाणां बिम्बस्वरूपकथनं। सूर्य्य-बिम्बादृग्गोलकानां ग्रहाणां प्रभाप्राप्तिकथनं। सूर्य्यादीनां व्यासादिनिरूपणं। बिम्बक्षेत्रसंस्थानादिप्रक्रियाकथनं। ग्रहबिम्बवशेन नक्षत्रबिम्बज्ञानोपायनिरूपणं। सूर्य्यकक्षादिज्ञानोपायकथनं। चन्द्रार्कबिम्बान्तरसूत्रयुक्तिकथनं। छायाक्षेत्रदर्श-नप्रक्रियाकथनं। चन्द्रशृङ्गोन्नत्यधिकारः। ग्रहाणामुदयास्तज्ञानसाधनप्रक्रियाक-थनं। चन्द्रार्कयोः ग्रहणसम्भवकथनं। ग्रहणमानादिप्रकारादिकथनं। स्पर्शवि-मुक्तिकालाद्यानयनप्रक्रियाकथनं। तत्र लम्बनसाधनार्थमुदयास्तचिह्नितले क्षेत्रसं-स्थानादिकथनं। परिलेखाधिकारः। ग्रहनक्षत्रयुत्यधिकारः। विविधचन्द्रादिना-बिम्बादिज्ञानसाधनप्रक्रियादिकथनं। प्रश्नादिनिरूपणञ्च।

No. 1866. मुद्राप्रकाशः।

Substance, country-made paper. 13 × 4 inches. Folia, 20. Lines, 9 on a page. Extent, 105 s'lokas. Character, Maithilí. Date, ? Place of deposit, Mujaná Gráma, Post Tájapurá, Darbhángá, Paṇḍit Bábulála Páṭhaka. Appearance, fresh. Prose and verse. Correct.

Mudrá-prakás'a. Descriptions of the various kinds of gesticulation required when worshipping particular divinities. By Rámakis'ora S'armá.

Beginning. दुरितहरिहरायैर्देवहन्दैर्नमस्यं ददद्भिमतमर्थं भक्तिभाजां जनानां।
परिहृतसकलार्थैर्योगिभिर्ध्यायमानं हरचरणसरोजं चेतसाद्य भजध्वं॥
नत्वा गुरुपदं रामकिशोरेणेष्टसिद्धिदं।
साधकानां मुदे मुद्राप्रकाशोऽयं विरच्यते॥
देवानां मुदं हर्षं राति ददातीति मुद्रा। तथा च मन्त्रदर्पणे।
रचनां सम्यग् ज्ञात्वा पूजायां दर्शयेन्मुद्रां।
तदियं मुद्रा कथिता देवेभ्यो यन्मुदं राति॥ इत्यादि।

End. यो जज्ञे सुकृती धरासुरवराद्धीरोत्तमाद्राघवात्
तस्माद्रामकिशोर ईश्वरसमाद्यो रुद्रनारायणात्।
जातो दृग्गगरस्थिताधरधरामाने शकाब्दे गते
तेनासौ त्रिपुरारिराजनगरे मुद्राप्रकाशः कृतः॥

Colophon. इति श्रीरामकिशोरशर्म्मविरचितमुद्राप्रकाशः समाप्तः ।

विषयः । तत्रादौ मुद्राशब्दनिर्वचनपुरःसरं मुद्राणां प्रमाणकथनमुखेन मुद्रालक्षणव्याख्यानं । तत्र अङ्कुशमुद्राकथनं । कुन्तमुद्रा । कुम्भमुद्रा । तत्त्वमुद्रा । कालकर्णीमुद्रा । वासुदेवाख्या मुद्रा । सौभाग्यदण्डिनी मुद्रा । रिपुजिह्वाग्रगा मुद्रा । कूर्म्ममुद्रा । त्रिखण्डा मुद्रा । गालिनी मुद्रा । मत्स्यमुद्रा । आवाहनीमुद्रा । स्थापनीमुद्रा । सन्निधापनीमुद्रा । सन्निरोधनीमुद्रा । सम्मुखीकरणीमुद्रा । सकलीकरणीमुद्रा । अवगुण्ठनीमुद्रा । अमृतीकरणीमुद्रा । धेनुमुद्रा । परमीकरणीमुद्रा । लेलिहानमुद्रा । गन्धमुद्रा । पुष्पमुद्रा । धूपमुद्रा । तत्त्वमुद्रा । प्राणमुद्रा । अपानमुद्रा । व्यानमुद्रा । उदानमुद्रा । समानमुद्रा । ग्रासमुद्रा । लिङ्गमुद्रा । योनिमुद्रा । त्रिशूलमुद्रा । मालामुद्रा । वरमुद्रा । अभयमुद्रा । मृगीमुद्रा । खट्वाङ्गमुद्रा । कपालमुद्रा । डमरुमुद्रा । शङ्खमुद्रा । चक्रमुद्रा । गदामुद्रा । पद्ममुद्रा । वेणुमुद्रा । श्रीवत्समुद्रा । कौस्तुभमुद्रा । वनमालामुद्रा । ज्ञानमुद्रा । विल्वमुद्रा । गारुड़मुद्रा । नृसिंहमुद्रा । वाराहमुद्रा । हयग्रीवमुद्रा । धनुर्मुद्रा । वाणमुद्रा । शरमुद्रा । परशुमुद्रा मोहनीमुद्रा । काममुद्रा । गणेशमुद्रा । दण्डमुद्रा । पाशमुद्रा । अङ्कुशमुद्रा । विघ्नमुद्रा । लड्डुकमुद्रा । वीजपूरमुद्रा । खड्गमुद्रा । चर्म्ममुद्रा । मुशलमुद्रा । दौर्गीमुद्रा । संक्षोभमुद्रा । द्रावणमुद्रा । आकर्षणमुद्रा । वशीकरणमुद्रा । उन्मादनमुद्रा । महाङ्कुशमुद्रा । खेचरीमुद्रा । वीजमुद्रा । योनिमुद्रा । अक्षमुद्रा । मालामुद्रा । वीणामुद्रा । भूतिनीमुद्रा । महायोनिमुद्रा । दैत्यधूमनीमुद्रा । लेलिहानामुद्रा । लक्ष्मीमुद्रा । सप्तजिह्वामुद्रा । शूकरीमुद्रा । हंसीमुद्रा । मृगीमुद्रा । प्रार्थनामुद्रा । संहारमुद्रा । अशनिमुद्रा । नादमुद्रा । विस्मयमुद्रा । विन्दुमुद्रानिरूपणञ्च ।

No. 1867. गङ्गाभक्तितरङ्गिणी ।

Substance, country-made paper, 12 × 3 inches. Folia. 26. Lines, 11 on a page. Extent, 1,322 s'lokas. Character, Maithilí. Date, ? Place of deposit, Mujaná Gráma, Post Tájapurá, Darbhángá, Paṇdit Bábulála Páṭhaka. Appearance, old. Prose and verse. Correct.

Gangábhakti-tarangiṇí. A dissertation on the sanctity of the River Ganges, and the various forms in which it should be adored. By Gaṇapati, a resident of Mithilá, and a scion of the family of the king of Dhárá.

Beginning. रूपं साचात् प्रातभेशं द्रवत्वं पुञ्जीभूतं सर्व्वगीर्व्वाणतेजः ।
व्यक्तीभूतं ब्रह्मविघ्नं निहन्यादारम्भेऽस्मिन् गाङ्गमम्भो मदीयं ॥
मद्विद्याकुलयोर्विशेषमखिलं विज्ञाय नान्यैः ददौ
वृत्तिं यस्य पितामहाय मिथिलाभूमण्डलाखण्डलः ।
श्रीधारेश्वरसूनुरन्वहममावभ्यस्य भाट्टं मतं
गङ्गाभक्तितरङ्गिणीं गणपतिर्ब्रूते सतां प्रीतये ॥
प्रमाणमात्रं प्रथमं व्यवस्था तदनन्तरं ।
ततः प्रयोगः संक्षेपात् तरङ्गेषूपवर्ण्यते ॥
तत्रादौ प्रभवप्रकरणं । विष्णुपुराणे । इत्यादि ।

End. व्रते तु यदेव यत्र फलं श्रुतं तदेव तत्र सङ्कल्पवाक्ये योज्यं । सुगममन्यदिति ।
नानर्थिवाक्यरचना+परिश्रमेण ग्रन्थस्य गौरवभयान्न कृतः प्रयत्नः ।
दिङ्मात्रमेतदुपदर्शितमित्यमेव विज्ञैर्विचिन्त्य वचनान्तरमूहनीयं ॥
एतन्नित्यमुपासनाभिरसकृत् किञ्चित् प्रसन्नासि चे-
न्मह्यं देवि तदा कृताञ्जलिरहं त्वामद्य याचे वरं ।
श्रीयोगीश्वरसम्भवस्य कृतिनः कीर्त्तिप्रसूर्ज्जायतां
विद्वद्भिः परिशीलिता कृतिरियं कल्पान्तरस्थायिनी ।
श्रीगङ्गा विजयतेतराम् ॥

विषयः । गङ्गामाहात्म्यकीर्त्तनं । तत्र गङ्गातीरनिवासफलं । गङ्गाभक्तिफलं । जलपानफलं । गङ्गादर्शन-स्तवन-स्नानादिफलकथनं । अयनविषुवसंक्रान्तिसाम-तिथिनक्षत्रादि-स्नानफलकथनं । चन्द्रसूर्य्योपरागादौ स्नानविधिकथनं । दशहराविधिकथनं । देशविशेषे गङ्गास्नानविधिकथनं । उत्तरपश्चिमवाहिन्यादिस्नानफलकथनं । गङ्गासरःसङ्गमस्नानविधिः । एवं गङ्गाकौशिकीसङ्गम-गङ्गागण्डकीसङ्गम-हरिद्वार-प्रयाग-गङ्गासागरस्नानादिविधिकथनं । गङ्गायां मरण-श्राद्धादिफलकथनं । तत्र अर्द्धोदकलक्षणकथनं । अस्थिप्रक्षेपादिविधिः । मुण्डनादिविधिकथनं । अर्द्धो-दयादियोगविशेषे गङ्गास्नानसङ्कल्पवाक्यादिकथनं । एवं सर्व्वत्र सङ्कल्पवाक्य-कथनञ्च ।

No. 1868. स्मृतितत्त्वविवेकः ।

Substance, country-made paper, 14 × 4 inches. Folia, 98. Lines, 7 on a page. Extent, 2,758 ślokas. Character, Maithilí. Date, ? Place of deposit, Magráṇi, Post Madhubani, Darbhángá, Paṇḍit Chhoṭí Jhá. Appearance, fresh. Prose and verse. Correct.

Smriti-tattva-viveka. A summary of the Smṛiti rules regarding domestic rites and ceremonies. By Vardhamána Mahámahopádhyáya Mahádharmádhikárí. He was chief judge in the court of some king whose name is not given.

Beginning. पाणिभ्यामुपजातवेपथुतया यत्नेन यः कम्पितो
येन स्वेदजलौघपूरिततया नापेक्षितोऽम्बुग्रहः ।
सन्ध्यार्थत्वरयेव यो मुकुलितः सव्ये करे कम्बुना
साहश्यं गतवान् स पातु + + + मायन्तनोर्घाञ्जलिः ॥
अनेकार्थो वेदः प्रतिऋषिविभिन्नाः स्मृतिगिरो
निबन्धारः स्वं स्वं मतमनुसरन्तो विसदृशाः ।
यथा देशे देशे नरि नरि तथा सम्प्रति पृथक्
सदाचारस्तस्मादनवधृतदुःस्थो विधिपथः ॥
तथाभूते चास्मिन् परिमितगिरो यद्यपि वयं
वहिर्द्वासिद्धान्तस्थितिमनुपपन्त्यारुहयितुं ।
तथापि स्रेयानामुभयमतयुक्तिप्रणयना-
दपि स्यादस्लाघ्या इति कुमतिरुत्तम्भयति नः ॥
श्रुत्वा दक्षेभ्यो बहुधा गुरुभ्यो विचार्य्य बुद्ध्या विविधान् निबन्धान् ।
स्मृतिस्थितिद्वैतनिवृत्तिहेतुः श्रीवर्द्धमानेन कृतो विवेकः ॥
— — — — — — इह यद्यपि श्रुत्यादीनां स्वपरविरोध उपक्षिप्तः तथापि धर्म्मविचारे स एव उपायः तस्य तदेकमानकत्वात् । इत्यादि ।

End. एकः प्रायेण स+ग्धि विपर्य्येति विमुह्यति ।
अतो बहुभिरालोक्य कृतिरेषा मया कृता ॥

Colophon. इति महाधर्म्माधिकारिमहामहोपाध्यायश्रीवर्द्धमानकृतौ स्मृतितत्त्वविवेकः समाप्तः।

विषयः । श्रुत्यादीनां विरोधे बलाबलनिरूपणं । आचारादीनां विरोधे बलीयस्त्वादिकथनं । मूलश्रुत्यनुमानप्रक्रियादिविवेचनं । तुल्यबलविरोधे विकल्पादिकथनं । श्रुतिलिङ्गप्रकरणादीनां विरोधे बलाबलनिरूपणमुखेन तेषां स्वरूपादिकथनं । अवान्तरभेदप्रदर्शनेन प्रत्येकं स्पष्टीकरणञ्च । धर्म्मस्वरूपविवेचनं । तदनुष्ठानफलादिनिरूपणञ्च । नित्यनैमित्तिककाम्यकर्म्मस्वरूपकथनादिकं । अत्र सर्व्वत्र तार्किकसमयानुसारेण अतीव सूक्ष्मानुसन्धानेन विषया निरूपिता इति ज्ञेयं । विधिविचारः । धर्म्मे श्रुतिस्मृतिसदाचाराणां प्रामाण्यप्रदर्शनं । धर्म्मशास्त्रनिरूपणादिकं । तेषां संज्ञादिनिरूपणञ्च । शिष्टाचारनिरूपणं । द्वैतविषयकप्रकीर्णककथ-

नमुखेन शस्यादिविधानं। नवान्नश्राद्धादौ ब्रीह्यादिविधिचिन्तनं। मलमासनिरूपणं। तत्कृत्यविधानञ्च। अपरपक्षश्राद्धविधिः। सपिण्डनादिश्राद्धनिरूपणादिकं। मासपक्षादीनामुल्लेखकरणावश्यकतानिरूपणं। चान्द्रमासादिलक्षणं। अपरपक्षश्राद्धविधिः। सामान्यतः श्राद्धवेलानिरूपणं। प्रतिमानिर्म्माणविधानकीर्त्तनं। संक्षेपतो मन्त्रोपदेशप्रकारकथनञ्च।

No. 1869. प्रत्यक्षमणिरश्मिचक्रं।

Substance, country-made paper, 11 × 4 inches. Folia, 156. Lines, 10 on a page. Extent, 6,265 s'lokas. Character, Maithilí. Date, ? Place of deposit, Magráṇí, Post Madhubaní, Darbháṅgá, Paṇḍit Chhoṭilála Jhá. Appearance, fresh. Prose. Correct.

Pratyaksha-maniras'mi-chakra. A commentary on the 'Pratyaksha-khaṇḍa' of the 'Tattva-chintámaṇi' of Gáṅges'a. By Gokulanátha Upádhyáya.

Beginning. दिवि वक्षःस्थले विष्णोर्गङ्गेशवदने + वि।
चिन्तामणीशवन्द्रास्य रश्मिचक्रं प्रकाश्यते॥
गुणातीत इति। गुणपदस्य प्रकृतितत्त्वपरिणामेषु—इत्यादि।

End. पुरोवर्त्तिरजतमिति व्यवसायादिवत् ततो न प्रवृत्तिरित्यर्थः। बाधेनेति सद्देतिशेषः। भ्रान्तिनाशादिति शम्।

Colophon. इति महोपाध्यायश्रीगोकुलनाथोपाध्यायविरचितं प्रत्यक्षमणिरश्मिचक्रं समाप्तं।

Beginning. अथ धर्म्ममभिधातुमुपक्रमते जैमिनिः। अथातो धर्म्मजिज्ञासेति प्रथमसूत्रेण अथ शब्दो मङ्गलं। अतो मङ्गलानन्तरं धर्म्मप्रश्न इति। अत्रोत्तरं यथा चोदनालक्षणोऽर्थो धर्म्म इति। अत्र भट्टमते चोदना प्रेरणा फलभावनेति यावत् इत्यादि।

End. किन्तु रेखे परि दर्भास्तरणेन प्रकृतिवन्न्यायावगतादृष्टार्थरेखाङ्गस्यावाधे सति वाधानौचित्यात् रेखाप्राप्तिर्नावनेजनाधारयोः समुच्चय इति ध्येयं।

Colophon. इति महामहोपाध्यायश्रीचन्द्रशेखरकृता धर्म्मदीपिका समाप्ता।

विषयः। धर्म्मलक्षणादिनिरूपणं। अर्थवादादिप्रामाण्यनिरूपणं। अदृष्टनिरूपणं। कर्म्मभेदप्रतिपादनं। फलनिरूपणं। मन्त्रादीनां लक्षणादिनिरूपणं। प्रधानाङ्गादिलक्षणं विधिस्वरूपनिरूपणानन्तरं तद्भेदनिरूपणं। परिसंख्यानियमादिस्वरूपकथनं। क्रमप्रमाणबलावलनिरूपणं। अधिकरणनिरुक्तिः। श्रुतिलिङ्गाधिकरणनिरूपणं। यज्ञाधिकरणनिरूपणं। खादिरन्यायकथनं। दर्व्वीहोमाधिकरणं। विकल्पविवेचनं। कपालाधिकरणं। वेदो वेतिन्यायनिरूपणं। पाशाधिकरणं। आग्नेयिन्यायनिरूपणं। सर्व्वेष्टाधिकरणं। हविरुभयत्वाधिकरणं। प्रतिनिध्यधिकरणं। फलचमसन्यायनिरूपणं। आरुण्यन्यायनिरूपणं। प्राजापत्यन्यायनिरूपणं। तदादितदन्तन्यायनिरूपणं। मुख्यार्थन्यायनिरूपणं। सन्निपातन्यायनिरूपणं। सर्व्वशक्त्यधिकरणं। योगसिद्ध्यधिकरणं। तन्त्रप्रसङ्गन्यायनिरूपणं। तत्र कर्म्मण्यारम्भन्यायनिरूपणं। पशुपुरोडाशन्यायनिरूपणं। कौण्डपायिनामयनन्यायनिरूपणं। शस्त्राधिकरणं। अक्ताधिकरणं। मन्त्राधिकरणं। पर्णमयीन्यायनिरूपणं।

हिरण्याधिकरणं। रोदनार्थवादन्यायनिरूपणं। यूपाधिकरणं। यूपाहवनीयन्यायनिरूपणं। खलेवालीन्यायनिरूपणं। पदपांशुन्यायनिरूपणं। पदाहवनीयन्यायनिरूपणं। उपांशुयागन्यायनिरूपणं। विश्वजिन्न्यायनिरूपणं। तिर्य्यगधिकरणं। व्यक्तिविचारः। आरम्भकालनियमेऽभ्युदयेष्ट्यधिकरणं। गुर्व्वनुगमाचरणन्यायनिरूपणं। संयोगपृथक्त्वन्यायनिरूपणं। योगङ्गन्तन्यायनिरूपणं। आरम्भनीयेष्टिन्यायनिरूपणं। स्फ्यास्त्रिष्टेन्याधिकरणं। नालौकिकं लौकिकेऽङ्गमिति भद्रसूत्रन्यायनिरूपणं। रात्रिसत्त्रन्यायनिरूपणं। विरोधाधिकरणं। आचारप्रसङ्गन्याय निरूपणं। विध्यनुवादकथनं। वैकृतविशेषपदप्रफलनिरूपणञ्च।

No. 1920. श्राद्धादर्शः।

Substance, country-made paper, 14 × 5 inches. Folia, 152. Lines, 6 on a page. Extent, 3,000 S'lokas. Character, Maithili. Date, ? Place of deposit, Darbhángá, Pandit Kánáiláli Jhá. Appearance, old. Prose and verse. Correct.

S'ráddhádars'a. A summary of the various rites included under the name of S'ráddha. By Mahes'vara Mis'ra, Mahámahopádhyáya.

Beginning. महेश्वरं नमस्कृत्य महेश्वरेण धीमता।
आदर्शेन च शास्त्राणां श्राद्धादर्शो विरच्यते॥
तत्र कस्तावत् श्राद्धपदशक्यतावच्छेदक इति निरूप्यते। तत्र केचित् सम्बन्धपदोपनीतान् पितॄनुद्दिश्य हविस्त्यागः श्राद्धमिति। तन्न। इत्यादि।

End. अत एव देहाशुद्धावपि गयाश्राद्धपिण्डदानादिकं कर्त्तव्यमिति सर्व्वं समञ्जसं।

Colophon. इति महामहोपाध्यायश्रीमहेश्वरमिश्रकृतः श्राद्धादर्शः सम्पूर्णः।

विषयः। श्राद्धस्वरूपविवेचनं। तत्र सर्व्वत्र मुण्डनविधिकथनं। कुशोत्पाटनविधिः। व्रणस्य स्वतोदूषकताकथनं। रौहिणकालनिर्णयः। संवत्सराभ्यन्तरे मलमासपाते श्राद्धविधिः। संक्रान्तिश्राद्धविधानं। कृत्रिमपुत्रेण [illegible]या सपिण्डने कृत दाहकर्त्ता प्रेतपदेनैव पिण्डा देया इति कथनं। रात्रिश्राद्धनिषेधः। नवमदिने पितृमरणे ज्ञाते दशमेऽह्नि सर्व्वपिण्डदानविधिः। मुहूर्त्तानामितिकर्त्तव्यता। दक्षिणाग्रपवित्रलविचारः। मलोहविचारः। उभयदिने त्रयःहलाभे विधानकथनं। दिनपदस्य तिथौ शक्तिरितिविवेचनं। श्राद्धकालनिरूपणं। श्राद्धदेशगुणविचारः। आम्र-

समाधानादिविधिः । योगिप्रशंसा । अवनेजनविधिः । आद्यान्नादिपरिवेषणव्यवस्था । सौवर्णादिपात्रविधिः । दक्षिणादानविचारः । पर्णनरदाहविधिः । आभ्युदयिकश्राद्धकालाः । परभूमौ श्राद्धकरणे भूस्वाम्यन्नदानविधानं । तर्पणविधिः । श्राद्धाधिकारिनिरूपणं । श्राद्धदिने पुनर्भोजनादिविवेचनं । अमावास्याष्टकादिश्राद्धविधिः । श्राद्धे जाताशौचे विधिनिरूपणं । त्र्यहाशौचे चतुर्थदिने श्राद्धं । त्रिपक्षादौ सपिण्डीकरणमितिकथनं । वृषोत्सर्गविधिः । शूद्रस्य अमन्त्रवत् कर्म्मकथनं । अपरपक्षश्राद्धविधिः । शस्त्रादिहतश्राद्धविधिः । एकोद्दिष्टविधिः । श्राद्धेपशुघाते दोषाभावकथनं । तीर्थश्राद्धविधिकथनञ्च ।

No 1921. गृहस्थरत्नाकरः ।

Substance, country-made paper, 13 × 4 inches. Folia, 131. Lines, 12. on a page. Extent, 5,070 s'lokas. Character, Maithilí. Date, ? Place of deposit, Darbhángá, Bábu Guṇes'vara Siñha. Appearance, old. Prose and verse. Correct.

Gṛihastha-ratnákara. A digest of the duties of householders. By Chaṇḍes'vara Ṭhakkura, son of Víres'vara Ṭhakkura. Both the father and the son have the title of Mahásándhi-vigrahika, or "minister of peace and war," but to what king they rendered their services as foreign ministers does not appear in the text. Contents: the characteristics of household *(gárhasthya)* duties. Marriage, selection of brides, bridegrooms, ages of bridegrooms and brides, donor of brides, *Svayamvara* or selection of the bridegroom by a bride, prohibited degrees of relationship, different kinds of marriage, good and evil of marriages, polygamy, marriage by a junior before an elder brother or sister. domestic penalties, performance of and officiating at sacrifices, Bráhmaṇs for whom sacrifices should not be performed. Daily duties (*A'hnika*), discharge of excretions, purification, washing of the mouth. Morning duties of S'udras, necessity for washing of the mouth, a second washing, when required, when it is not required, brushing of the teeth, morning bath, ceremonial bathing, prayers at the three diurnal conjunctions, unguents. The object indicated by Om, repetition of particular mantras a number of times, offering of water to the manes, rites which should follow it, the five daily *yajanas*, hospitality to beggars, meals, articles fit for food, birds, beasts, fish, propriety of abstaining from flesh-meat,

discussion on the propriety of abstaining from injury to animals, wine, duties after meals. Duties of women while in their courses, duties on festive days. Duties of Bráhmaṇas, religious duties, earning of livelihood, livelihood in times of distress, agriculture, commerce, rearing of animals for sale, interest, duties during famines, &c., acceptance of gifts. Duties of Kshatriyas and Vaisyas, religious duties, earning of livelihood, proprietorship. Duties of S'udras, religious duties, earning of livelihood. Theft, penance, purification. Duties of pupillage (*Brahmacharya*), restraint of the passions, abjuring of family ties, dwelling with a tutor, regulation of speech, travelling, abstinence from assaults and worldly objects, abstinence from looking at particular objects, and from gifts to S'udras, suppression of anger, &c., abstinence from human society, what to be forsaken and what not.

Beginning. नमो गिरीन्द्रनन्दिनीपदारविन्दरेणवे ।

उज्झित्वा दिगम्बरं वरतरं वासोवसानस्थिरं
हित्वा भैक्ष्यमनातुरो रतिकरं स्थानं समालम्बितः ।
त्यक्त्वा भस्मकृताङ्गरागसुरभिः श्रीखण्डसारद्रवै-
र्देवः पातु हिमाद्रिजापरिणयं कृत्वा गृहस्थः शिवः ॥
अध्याप्य श्रुतिमङ्गषट्कसहितां यो ब्रह्मचर्य्याश्रये-
गार्हस्थे समयोजयद्द्विजगणान् वित्तैः कृतार्थीकृतान् ।
स श्रीमान् सहितः समस्तसचिवश्रेणीषु चण्डेश्वरो-
मीमांसाशरणं गृहस्थविषयं प्रस्तौति रत्नाकरं ॥
गार्हस्थ्याख्यस्तरङ्गोऽत्र प्रथमं परिकीर्त्त्यते । इत्यादि ।

End. न पितुस्त्यागः । पूर्व्वन्नाशुद्धौ । विष्णुः ।
भार्य्यापुत्रश्च सख्यश्च संहृष्टाः पापकर्म्मभिः ।
परिभाष्य परित्याज्याः पतितोऽपि तथैव च ॥

Colophon. इति सप्रक्रियमहासान्धिविग्रहिकठक्कुरश्रीवीरेश्वरात्मजसप्रक्रियमहासान्धिविग्रहिकठक्कुरश्रीचण्डेश्वरविरचिते गृहस्थरत्नाकरे त्याज्यात्याज्यतरङ्गः समाप्तोऽयं ।

विषयः । गार्हस्थ्यधर्म्मनिरूपणं । दारपरिग्रहविधिकथनं । विवाह्याविवाह्यकन्यानिरूपणं । वरनिरूपणं । कन्यावरवयःक्रमनिरूपणं । दातृनियमकथनं । कन्यास्वयंवरविधिः । सम्बन्धनिरूपणं । विवाहभेदकथनं । ब्राह्मादिविवाहलक्षणं । विवाहगुणागुणनिरूपणं । अधिवेदनविधिकीर्त्तनं । परिवेदननिषेधः । आवसथ्या-

धानविधिकथनं। यजनयाजनविधिकथनं। अयाज्यब्राह्मणकथनं। आह्निककृत्यनिरूपणं। मूत्रपुरीषोत्सर्गविधिकथनं। शौचविधिकथनं। आचमनविधिकथनं। शूद्राधिकारे प्रातःकृत्यादिनिरूपणं। आचमननिमित्तनिरूपणं। द्विराचमनविधिकथनं। आचमनापवादकथनं। दन्तधावनविधिकथनं। प्रातःस्नानादिविधिकथनं। क्रियास्नानविधिः। सन्ध्योपासनविधिः। मार्ज्जनविधिः। ओङ्कारस्वरूपकथनादिकं। जपविधिः। तर्पणविधिः। तर्पणोत्तरकर्म्मनिरूपणं। पञ्चमहायज्ञविधिः। तत्र अतिथिपूजाविधिः। भोजनविधिः। भोज्याभोज्यनिरूपणं। भोज्येषु पक्षिनिरूपणं। पशुनिरूपणं। मत्स्यनिरूपनञ्च। मांसभक्षणवर्ज्जनकथनं। पशुहिंसाविधिनिषेधविवेचनं। मद्यादिनिन्दाकीर्त्तनं। भोजनोत्तरकर्म्मनिरूपणं। रजस्वलाकर्म्मनिरूपणं। पर्व्वकृत्यनिरूपणं। ब्राह्मणानां कर्म्मनिरूपणं। धर्म्मकथनं। वृत्तिविधानञ्च। आपद्वृत्तिनिरूपणं। कृषिकार्य्यविधिः। वाणिज्यविधिः। पाशुपाल्यविधिः। कुशीदविधिः। अन्यविधा आपद्वृत्तिः। प्रतिग्रहविधिः। क्षत्रियवैश्ययोः कर्म्मनिरूपणं। धर्म्मकथनं। वृत्तिविधानञ्च। द्वयाणां धर्म्मास्वत्वनिरूपणं। शूद्राणां कर्म्मनिरूपणं। धर्म्मकीर्त्तनं। वृत्तिविधानञ्च। स्तेयापवादकथनं। यमनिरूपणं। शौचविधिः। ब्रह्मचर्य्यविधिः। निगमादिकथनं। कुलनाशनकथनं। निवासविधिकथनं। वाच्यावाच्यनिरूपणं। गमनप्रवेशनविधिः। अनाक्रमणीयनिरूपणं। अनधिष्ठेयनिरूपणं। अनवलोकनीयनिरूपणं। शूद्राय अप्रदेयानि। क्रोधादीनां परिवर्ज्जनविधिः। सङ्करपरिवर्ज्जनविधिः। त्याज्यात्याज्यनिरूपणञ्च।

No. 1922. पुरुषपरीक्षा।

Substance, palm-leaf, 12 × 2 inches. Folia, 150. Lines, 5 on a page. Extent, 2,420 s'lokas. Character, Maithilí. Date, L. S. 504. Place of deposit, Darbháṅgá, Paṇḍit Kánáilála Jhá. Appearance, old. Prose and verse. Correct.

Purusha-parikshá. A tale illustrating good conduct. By Vidyápati, a paṇḍit of S'iva Siṅha of Mithilá. Printed and translated into English by the late Rájá Kálíkrishṇa, Bahádur.

Beginning. ब्रह्मापि यां नौति नुतः सुराणां यामर्च्चितोऽप्यर्चयतीन्दुमौलिः।
यां ध्यायति ध्यानगतोऽपि विष्णुस्तामादिशक्तिं शिरसा प्रपद्ये॥

धीरेषु मान्यः सुधियां वरेण्यो विद्यावतामादिविलेखनीयः ।
श्रीदेवसिंहक्षितिपालसूनु-ञ्जीयाच्चिरं श्रीशिवसिंहदेवः ॥
शिशूनां सिद्धार्थं नयपरिचितेर्नूतनधियां
मुदे पौरस्त्रीणां मनसिजकलाकौतुकजुषां ।
निदेशान्निःशङ्कं सदसि शिवसिंहक्षितिपतेः
कथानां प्रस्तावं विरचयति विद्यापतिकविः ।
नयानुरोधेन गुणेन वाचि कथारसस्यापि कुतूहलेन ।
बुधोऽपि वैदग्ध्यविशुद्धचेताः प्रबन्धमाकर्णयिता न किं स ॥
पुरुषाः परिचीयन्ते युक्तेरस्याः परीक्षया ।
तत् पुरुषपरीक्षायां कथा सर्व्वमनःप्रिया ॥
आसीदाससमुद्रक्षितिपतिसहस्रशिरोमालारजोरञ्जितपादपद्मश्चन्द्रातपायां पुरि इत्यादि ।

End. भुक्त्वा राज्यसुखं विजित्य परितो हत्वा रिपून् सङ्गरे
हुत्वा चैव हुताशनं मखविधौ भृत्वा धनैरर्थिनः ।
वाग्वत्यां भवसिंहदेवन्टपतिस्त्यक्त्वा शिवाग्रे वपुः
पूतो यस्य पितामहः स्वरगमद्दारद्वयालङ्कृतः ॥
सङ्करीपुरसरोवरकर्त्ता हेमहस्तिरथदानविदग्धः ।
भाति यस्य जनको रणजेता देवसिंहन्टपतिर्गुणराशिः ॥
यो गौड़ेश्वरसज्जनेश्वररणक्षोणीषु लब्ध्वा यशो-
दिक्कान्ताचयकुन्तलेषु नयते कुन्दस्रजामास्पदं ।
तस्य श्रीशिवसिंहदेवन्टपतेर्विज्ञप्रियस्याज्ञया
ग्रन्थं ग्रन्थिलदण्डनीतिविषये विद्यापतिर्व्यातनोत् ॥

Colophon. इति समस्तप्रक्रियाविराजमानरूपनारायणमहाराजाधिराजश्रीमच्छिवसिंहदेवपादानामाज्ञया श्रीविद्यापतिविरचितायां पुरुषपरीक्षायां पुरुषार्थपरिचयो नाम चतुर्थः,—परिच्छेदः । समाप्तश्चायं ग्रन्थः ।
वेदपञ्चशते गौड़े माघे च प्रथमे तिथौ
नारायणेन लिखिता पुस्ती विद्यापतेः कवेः । लसं ५०४ ।

विषयः । चन्द्रातपायां पुरि पारावारोनाम राजा आसीत् । तस्य सर्व्वावयवसुन्दरी पद्मावती नाम कन्यका बभूव । अथ राजा तस्याः शैशवापगममवलोक्य तदनुरूपं वरमनुसन्दधानः किं करवाणीति चिन्तयमानः सुबुद्धिनामानमृषिमपृच्छत् । भगवन् ! कमेतस्या वरं करवाणीति । मुनिराह । राजन् ! पुरुषं वरं

कुरु। तेनैवमभिहितो राजा प्राह। अये कथमपुरुषोऽपि वरः सम्भवति। मुनिरुवाच। महाराज! पृथिव्यां बहवः पुरुषाः पुरुषाकाराश्च सन्ति। तत् पुरुषाकारान् परित्यज्य पुरुषं वरय इति ब्रवीमि। अथ राजप्रार्थनया मुनेः पुरुषलक्षणादिकथनं। तत्र शौर्य्यविवेकोत्साहादिसम्पन्न एव पुरुष इति निरूपणं। शौर्य्यादीनां लक्षणकीर्त्तनं। क्रमेण दानवीरकथाकीर्त्तनं। दयावीरकथा। युद्धवीरकथा। सत्यवीरकथा। चौरकथा। भीरुकथा। क्षपणकथा। अलसकथा। अप्रतिभकथा। मेधाविकथा। सुबुद्धिकथा। वञ्चककथा। पिशुनकथा। अबुद्धिकथा। संसर्गवर्व्वरकथा। शस्त्रविद्यकथा। शास्त्रविद्यकथा। वेदविद्यकथा। लोकविद्यकथा। उभयविद्यकथा। उपविद्यकथा। गीतविद्यकथा। नृत्यविद्यकथा। इन्द्रजालविद्यकथा। पूजितविद्यकथा। अवनद्धविद्यकथा। अविद्यकथा। खण्डितविद्यकथा। हास्यविद्यकथा। तान्त्रिकविद्यकथा। तामसकथा। अनुशयिकथा। महेच्छकथा। मूढकथा। वक्राशकथा। सावधानकथा। अनुकूलनायककथा। दक्षिणकथा। विदग्धकथा। धूर्तकथा। घस्मरकथा। निर्व्विण्णकथा। निःस्पृहकथा। लब्धसिद्धिकथाकीर्त्तनञ्च।

No. 1923. चतुर्वर्गचिन्तामणिः, प्रायश्चित्ताध्यायः।

Substance, country-made paper, 10 × 5 inches. Folia, 287. Lines, 11 on a page. Extent, 3, 436 s'lokas. Character, Nágara. Date, ? Place of deposit, Darbhángá, Bábu Guṇes'vara Siñha. Appearance, new. Prose and verse. Generally correct.

Chaturvarga-chintámaṇi. A complete digest of all Smṛiti rules. By Hemádrí. The codex contains the part which relates to expiations.

Beginning. कमलादयितं + + कमलासनसंस्तुतं।
कमलाक्षमहं वन्दे कमलाकरशायिनं॥
अथेदानीं हेमाद्रिकारिणा लोकोपकारार्थं सर्व्वपुराणस्मृतिसंहितावेदज्योतिषवैद्यागमश्रौतस्मार्त्तसूत्रेषु ग्रन्थानालोच्य ब्रह्मक्षत्रियविशां शूद्रादीनाञ्च ब्रह्महत्यामारभ्य वाङ्मनःकायसम्भवानि हिंसादीनि सम्भवन्ति तेषां पापानामपनोदनं प्रायश्चित्ताध्याये लिख्यते। इत्यादि।

End. धर्म्मशास्त्रमार्गेण उक्तप्रत्याम्नायरूपेण स्वद्रःसमर्थ्यं अखण्डं प्राचोदीच्याङ्गसहितं आचरिष्ये-इति संकल्प्य उक्तमार्गेण कुर्य्यादिति। कृष्णार्पणमस्तु।

Colophon. पौषमासे शुक्लपक्षे एकादश्यां सोमवासरे लिखितं।

विषयः। वर्णाश्रमभेदेन प्रायश्चित्ताकरणे दोषकीर्त्तनं। अनेकप्रकारप्रायश्चित्तकथनं। ब्रह्महत्यादिमहापातकादिनिरूपणं। ब्रह्महत्याप्रायश्चित्तं। गुरुहत्याप्रायश्चित्तं। अनेकविधगुरुनिरूपणं। क्षत्रियस्य विप्रहत्या-प्रायश्चित्तं। वैश्यस्य विप्रहत्याप्रायश्चित्तं। शूद्रस्य विप्रहत्याप्रायश्चित्तं। ब्राह्मणस्य क्षत्रियहत्याप्रायश्चित्तं। तस्य वैश्यशूद्रहत्याप्रायश्चित्तं। क्षत्रियस्य वैश्यहत्याप्रायश्चित्तं। वैश्यस्य क्षत्रियबध-प्रायश्चित्तं। शूद्रस्य वैश्यहत्याप्रायश्चित्तं। वैश्यस्य शूद्रहत्याप्रायश्चित्तं। चाण्डालादिबधप्रायश्चित्तं। ब्रह्मचाण्डालग्रामचाण्डालबधप्रायश्चित्तं। चाण्डालजननकारण-कथनं। ग्रामचाण्डालादिकथनं। सुरापानप्रायश्चित्तं। एकादशप्रकारसुराकथनं। स्तेयप्रायश्चित्तं। सुवर्ण-रजतताम्र-कांस्य-धान्यवस्त्रादिस्तेयप्रायश्चित्तं। गुरुतल्पगमन-प्रायश्चित्तं। संसर्गप्रायश्चित्तं। उपपातकप्रायश्चित्तं। तत्र गोबधप्रायश्चित्तं। गोवत्स-वृषभ-बलीवर्द्दादिहननप्रायश्चित्तं। गजाश्वोष्ट्रखरमहिषी-महिषाज-मेषादिबधप्राय-श्चित्तं। वृक्षच्छेदप्रायश्चित्तं। आश्रमराहित्यप्रायश्चित्तं। भृतकाध्ययनाध्यापनप्राय-श्चित्तं। गुर्व्वधिक्षेपप्रायश्चित्तं। अनज्ञातप्रायश्चित्तं। अनज्ञातलक्षणं। पण्यविक्रय-प्रायश्चित्तं। निन्दितार्थोपजीवनप्रायश्चित्तं। कृषिबलप्रायश्चित्तं। हिंसायन्त्रविधान-प्रायश्चित्तं। वार्द्ध्यजीवनप्रायश्चित्तं। मनुष्यविक्रयप्रायश्चित्तं। आत्म-सुत-पत्नी-मातृ पुत्र-विक्रयप्रायश्चित्तं। धेनु-गज-अनडुह-महिषी-महिष-अज-खर-उष्ट्र-हरिण-रुरु-अश्व-आरण्यमृगादिविक्रयप्रायश्चित्तं। गोधूम-मुद्ग-तण्डुल-धान्य-गुड़-लवण-का-र्पास-नीली-पलाण्डु-लशुन-गृञ्जन- हिङ्गु-रस-हरिद्रादिमूलत्र्यम्बकादिफल-धर्म्म-दासी-दन्त-नख-उपकेश्य-अन्न-गो-मधु-मांस-शालग्रामादि-पुष्प-तुलसी- रत्नादि-रुद्राक्ष-सुवर्ण- रजत-ताम्र-कांस्यादि-शस्त्र-गृहोपकरण-कस्तूर्य्यादि-वस्त्र-धर्म्म-स्मृति-नामप्रभृतिनानावस्तुविक्रयप्रायश्चित्तं। सकलीकरणप्रायश्चित्तं। मलिनीकरणप्रा-यश्चित्तं। निक्षेपहरण-धेनुहरण-गोवत्सहरण-अनडुह-महिषी-महिष-गज-अश्व उष्ट्र-खर-अज-मृग-भूमि-स्वदत्त-रत्न-कन्या-नारी-वेश्या-पुरुष-दासी-शय्या-यान-पा दुका-छत्र--चामर-पुष्प-फल-कन्दादि-कोषशाक-पत्र-इन्धन-जल-भक्ष्य-भोज्य--त्र्य-म्बकरुद्राक्ष-गुड़-क्षीर-त्रिकटु-रसौषधि-गृहोपकरण-शस्त्रादिहरणप्रायश्चित्तकथनं। मार्गनिरोधप्रायश्चित्तं। तड़ागादिहरणप्रायश्चित्तं। परिधानप्रतिग्रहप्रायश्चित्तं। कूट-साक्ष्यप्रायश्चित्तं। पुस्तकादिहरणप्रायश्चित्तं। शालग्रामहरणप्रायश्चित्तं। अपाचीक-रणप्रायश्चित्तं। चाण्डालस्त्री-रजकी-चर्म्मकारस्त्री-नटस्त्री-वरुड़स्त्री-कैवर्त्तस्त्री-मेद-

स्त्री-भिल्लस्त्री-स्वर्णकारस्त्री-शौविकस्त्री-तचकस्त्री--मांसविक्रयिस्त्री-कुलालस्त्री-शौण्डिक-स्त्री-कारुस्त्री-नापितस्त्री-रजस्वला-विधवा-वेश्या-दासी-पाषण्डपतितादिस्त्रीगमनप्रायश्चित्तं। कन्यागमनप्रायश्चित्तं। कन्यादूषणप्रायश्चित्तं। पुंमैथुनप्रायश्चित्तं। खरोष्ट्र-वड़वा-वत्स-महिषाजादिमैथुनप्रायश्चित्तं। अवकीर्णिप्रायश्चित्तं। मिथ्यारोपप्रायश्चित्तं। अभिशस्तप्रायश्चित्तं। कुग्रामवासप्रायश्चित्तं। कुत्सितसेवाप्रायश्चित्तं। खरोष्ट्रानडुन्म-हिषवत्सारोहणप्रायश्चित्तं। ऊढ़ायाः पुनरुद्वाहप्रायश्चित्तं। मातृसहवन्धुपरिणये-प्रायश्चित्तं। स्वदारपरित्यागप्रायश्चित्तं। पितृगेहे असंस्कृतकन्यारजस्वलाप्रायश्चित्तं। कारागृहनिवासप्रायश्चित्तं। वन्दिगृहीतानां नारीणां प्रायश्चित्तं। रोगनिवृत्त्यर्थं मद्यादिपानप्रायश्चित्तं। जातिभ्रंशकरणप्रायश्चित्तं। परान्नभोजनप्रायश्चित्तं। दीर्घ-सत्रभोजनादिप्रायश्चित्तं। शूद्रसत्रभोजने प्रायश्चित्तं। शूद्रगृहे वेश्यागृहे च स्वयं पाकादिभोजने प्रायश्चित्तं। एकादश्यां भोजने प्रायश्चित्तं। नवश्राद्धनवश्राद्धयोः प्रतिग्रहादिप्रायश्चित्तं। क्रीतान्नादिभोजनप्रायश्चित्तं। पर्य्युषितान्नभोजनप्रायश्चित्तं। दुर्भक्ष्यभक्षणप्रायश्चित्तं। दुष्टशाकभक्षणप्रायश्चित्तं। कारणं विना क्षत्रियान्नपर-मान्नभोजनप्रायश्चित्तं। व्रात्यकुण्ठि-कुण्ड-गोलक-यति-दम्पति-शिष्यान्नादिभोजनप्रा-यश्चित्तं। पत्न्या सह भोजनप्रायश्चित्तं। शूद्रभाण्डभोजनादिप्रायश्चित्तं। पतितदु-ष्टाक्रान्तपङ्क्तिभोजनप्रायश्चित्तं। पलाण्डुलशुनादिभक्षणप्रायश्चित्तं। श्वेतवृन्तक-वक्र-शिग्रुवृन्ताकादिभक्षणप्रायश्चित्तं। ताम्रपात्रे गव्यादिभोजनप्रायश्चित्तं। पीतशेष-जलपानप्रायश्चित्तं। खरी-उष्ट्री-हरिणीप्रभृतीनां क्षीरपानप्रायश्चित्तं। मनुष्यपशुप-क्ष्यादिमलमूत्रादिभक्षणप्रायश्चित्तं। भोजनकाले दीपनिर्व्वापणप्रायश्चित्तं। एक-हस्तवामहस्तादिना भोजनप्रायश्चित्तं। ग्रहणकाले भोजनादिप्रायश्चित्तं। सन्ध्यादि-कर्म्मकाले भोजनकाले च चाण्डालध्वनिश्रवणप्रायश्चित्तं। सत्कर्म्माचरणे शूकरा-दिदर्शनप्रायश्चित्तं। रजस्वलास्पृष्टान्नभोजनप्रायश्चित्तं। द्विर्भोजनप्रायश्चित्तं। देव-पूजायां वैश्वदेवपरित्यागप्रायश्चित्तं। उष्णोदक-कूपोदकस्नानप्रायश्चित्तं। मृत्तिका-हीनशौचप्रायश्चित्तं। भोजने स्तनपानवायूत्सर्गादौ प्रायश्चित्तकथनं। अन्योन्यस्पृष्टा-न्नभोजनप्रायश्चित्तं। शिवनिर्म्माल्यभोजनप्रायश्चित्तं। नीलवस्त्रधारणप्रायश्चित्तं। दुर्मृ-तब्राह्मणदाहविषये प्रायश्चित्तं। दुर्मृतवाहकानां प्रायश्चित्तं। मूल्यं गृहीत्वा-शववहनप्रायश्चित्तं। धनिष्ठापञ्चकमरणप्रायश्चित्तं। नन्दादितिथिमरणप्रायश्चित्तं। शवपतनादिप्रायश्चित्तं। दहनयोग्यस्य निखातकरणप्रायश्चित्तं। एवं खनन-योग्यस्य दहनप्रायश्चित्तं। दहनाभावप्रायश्चित्तं। पिण्डोपहतिप्रायश्चित्तं। अस्थि-सञ्चयनात् प्राक् प्रेताग्निनाशे प्रायश्चित्तं। अस्थ्युपहतप्रायश्चित्तं। परिषेधप्रायश्चित्तं। विधायकप्रायश्चित्तं। अनुवादकप्रायश्चित्तं। देशान्तरमरणप्रायश्चित्तं। देशान्त-

विषयः। रमृतानामस्थिशरीराभावे प्रायश्चित्तं। व्रणे कृम्युत्पाते प्रायश्चित्तं। मृतस्य पुनर्ज्जीवन प्रायश्चित्तं। देशान्तरगामिनो द्वादशवर्षादूर्द्धं परलोकक्रियानन्तरं पुनरागमन-प्रायश्चित्तं। सूतकद्वितये मृतस्य प्रायश्चित्तं। सहगमनभीतायाः प्रायश्चित्तं। मृतस्याहिताग्नेर्लौकिकाग्निना दहने प्रायश्चित्तं। गर्भिण्या मरणे प्रायश्चित्तं। सूतिका-रजस्वलयोर्मरणे प्रायश्चित्तं। आहिताग्नेर्दुर्म्मरणप्रायश्चित्तं। शृगालादिदष्टप्राय-श्चित्तं। विप्राणां गर्भाधानादिषोड़शकर्म्मपरित्यागप्रायश्चित्तं। वेदाभ्यासपरित्याग-प्रायश्चित्तं। अनध्याये वेदपाठप्रायश्चित्तं। राक्षसादिविवाहप्रायश्चित्तं। परिवित्ति-प्रायश्चित्तं विवाहमध्ये रजोदर्शनप्रायश्चित्तं। स्थालीपाककाले अग्निशान्तिप्राय-श्चित्तं। आग्नेयस्थालीपाकादूर्द्धं औपासनलोपप्रायश्चित्तं। अन्वारम्भणीयलोपप्राय-श्चित्तं। प्रतिपद्धोमलोपप्रायश्चित्तं। आग्रयणलोपप्रायश्चित्तं। गृहस्थानां ब्रह्मयज्ञ-लोपप्रायश्चित्तं। देवतार्च्चनपरित्यागप्रायश्चित्तं। वैश्वदेवपरित्यागप्रायश्चित्तं। एको-द्दिष्टश्राद्धाकरणप्रायश्चित्तं। पार्व्वणादौ अर्घ्यपात्रादिविस्मरणप्रायश्चित्तं। पार्व्वणवि-स्मृतिप्रायश्चित्तं। अग्निहोत्रत्यागप्रायश्चित्तं। उपरागप्रायश्चित्तं। गृहस्थस्य धर्म्मा-तिक्रमे प्रायश्चित्तं। मानसिकस्नानविधिकीर्त्तनं। निषिद्धदिवसे ताम्बूलभक्षणप्रा-यश्चित्तं। तुलादिषोड़शमहादानानामितरेषाञ्च दानानां प्रतिगृहीतॄणामाचार्य्या-दीनां प्रायश्चित्तं। अपमृत्युहरणमार्ज्जनविधिः। केषुचित्पापेषु नदीस्नानरूपं प्रायश्चित्तं। तत्र पुण्यनद्यादिनिरूपणं। गजाश्वादिप्रतिग्रहप्रायश्चित्तं। तुलादिषु प्रतिगृहीतॄणां प्रायश्चित्तप्रयोगकथनं। धर्म्मविक्रयिणः प्रतिग्रहप्रायश्चित्तं। नाम-विक्रयिणः प्रतिग्रहप्रायश्चित्तं। स्मृति-सोमादिविक्रयिणः प्रतिग्रहप्रायश्चित्तं। पुरो-डाशभक्षणप्रायश्चित्तं। अयाज्ययाजनप्रतिग्रहप्रायश्चित्तं। तप्तमुद्राधारिभ्यः प्रतिग्रह-प्रायश्चित्तं। लिङ्गधारिणां प्रायश्चित्तं। गायत्रीप्रदातुः प्रायश्चित्तं। परार्थं गाय-त्रीजपकर्त्तॄणां प्रायश्चित्तं। ग्रामप्रतिग्रहप्रायश्चित्तं। कुष्माण्डप्रतिग्रहप्रायश्चित्तं गो-भूमि-तिल-स्वर्ण-घृत-वस्त्र-धान्य-गुड़-रजत-लवणादिप्रतिग्रहप्रायश्चित्तं। केश-वादिचतुर्व्विंशतिमूर्त्ति-प्रतिग्रहप्रायश्चित्तं। दशावतारप्रतिग्रहप्रायश्चित्तं। राम-लक्ष्मण-श्रीमूर्त्ति-चक्रपाणि-शिवलिङ्ग-शङ्ख-घण्टादि-ताम्र-कांस्य--तिलपात्रादिप्रतिग्र-हप्रायश्चित्तं। हरिहर-अर्द्धनारीश्वरप्रतिग्रहप्रायश्चित्तं। दुर्ज्जनात प्रतिग्रहप्राय-श्चित्तं। दुर्ज्जनलक्षणं। आततायिनः प्रतिग्रहप्रायश्चित्तं। पाषण्डात् प्रतिग्रहप्रा-यश्चित्तं। पाषण्डलक्षणं। कुण्ड-गोलकयोः प्रतिग्रहप्रायश्चित्तं। वेश्या-व्यभिचारि-णी-भर्त्तृघ्नीभ्यः प्रतिग्रहप्रायश्चित्तं। आसां लक्षणञ्च। चाण्डालदर्शनादिप्रायश्चित्तं। परिवेत्तृप्रतिग्रहप्रायश्चित्तं। पुस्तकादिप्रतिग्रहप्रायश्चित्तं। व्रात्यनटादिभ्यः प्रति-ग्रहप्रायश्चित्तं। आभीरात् प्रतिग्रहप्रायश्चित्तं। चातुर्मास्यव्रतादिषु प्रतिग्रहप्राय

विषयः। श्चित्तं। कार्त्तिक-माघ-वैशाखव्रतादिषु प्रतिग्रहप्रायश्चित्तं। नानाविधफलप्रतिग्रह-प्रायश्चित्तं। मकरसंक्रान्तौ प्रतिग्रहप्रायश्चित्तं। कारणं विना स्वसतीपत्नीत्याग-प्रायश्चित्तं। अश्व-महिष-धेनुप्रति-ग्रहप्रायश्चित्तं। सन्यासिनः प्रतिग्रहप्रायश्चित्तं। पतितात् प्रतिग्रहप्रायश्चित्तं। मठपतेः सन्न्यासिनः प्रतिग्रहप्रायश्चित्तं। महापात-किसंसर्गप्रायश्चित्तं। रहस्यकृत-ब्रह्महत्याप्रायश्चित्तं। रहस्यकृतसुरापानप्राय-श्चित्तं। रहस्यकृतसुवर्णस्तेयप्रायश्चित्तं। रहस्यकृतगुरुतल्पगमनप्रायश्चित्तं। चान्द्रा-यणादिकृच्छ्रलक्षणादिकीर्त्तनं। यवमध्य-पिपीलिकादिचान्द्रायणलक्षणं। महा-चान्द्रायणादिविधिकथनं। प्राजापत्यकृच्छ्रादिलक्षणं। तप्तकृच्छ्रादिलक्षणं। पराक-यावक-सान्तपन-महासान्तपनातिकृच्छ्रादीनां लक्षणं। माहेश्वर-ब्रह्म-धान्य-सुवर्ण-कृच्छ्रादीनां लक्षणं। चान्द्रायणादीनां सर्व्वेषां प्रत्याम्नायकीर्त्तनञ्च। कदली-विवाहरूपप्रायश्चित्तकथनं। नारायणबलिविधिकीर्त्तनं। वैष्णवश्राद्धविधिः। प्रायश्चित्तादौ एतच्छ्राद्धावश्यकताकीर्त्तनं। नान्दीश्राद्धविधिः। प्रायश्चित्तलक्षणादि-कीर्त्तनं। अघमर्षणस्नानविधिः। महासंकल्पस्वरूपकथनादिकं। अधिकारिभेदेन प्रायश्चित्तसंख्यादिकथनं। मुण्डनादिविधिकथनं। सुवासिनीप्रायश्चित्तकथनं। विधवायाः पापविशेषकथनपूर्व्वकं प्रायश्चित्तकीर्त्तनञ्च।

No. 1924. पितृभक्तिः।

Substance, country-made paper, 12 × 4 inches. Folia, 56. Lines, 6 on a page. Extent, 1,155 s'lokas Character, Maithilí. Date, ? Place of deposit, Mujoná, Post Tájpura, Darbhángá, Paṇḍit Bábulála Páṭhaka; another at Magránigrám, Post Madhubaní, Darbhángá, Paṇḍit Chhoṭí Jhá. Appearance, fresh. Prose and verse. Correct.

Pitṛibhakti. The duty of a son to the manes of his father,—a treatise on various kinds of S'ráddhas. By S'rídatta.

Beginning. कातीयकल्पं महकर्कभाष्यं भूपाल-गोपालमतादि दृष्ट्वा।
सताञ्च वाक्यानि निशम्य सम्यक् यजुर्व्विदां श्राद्धविधिं विधास्ये॥
तत्र पूर्व्वदिने वस्त्रशुद्धिर्गृहशुद्धिः शरीरशुद्धिश्च कर्त्तव्या। निरामिषमेकभक्तञ्च
निमन्त्रणन्तु पूर्व्वदिनप्रदोषान्तरे वा श्राद्धदिने वा। इत्यादि।

End. विज्ञाननिर्म्मलमलङ्करणं गुणानामादर्शबिम्बवदपि प्रतिवीक्षितानां।
चेतस्यमत्कृतिमुदं सततं बुधानामन्तः प्रविश्य पितृभक्तिरियं तनोतु॥

नन् गौरवमात्रेण कार्य्योपेक्षाच पण्डितैः ।
यत आह मनुर्ग्राह्यं बालादपि सुभाषितं ॥

Colophon. इति महामहोपाध्यायसत्पण्डितश्रीदत्तविरचिता पितृभक्तिः समाप्ता ।

विषयः । यजुर्वेदिनां श्राद्धविधानकथनं । तत्र निमन्त्रणादिविधिकथनं । श्राद्धप्राक्कालीनश्राद्धदिनकृत्यनिरूपणं । श्राद्धपरिभाषाकथनं । पार्व्वणश्राद्धप्रयोगकथनं । श्राद्धलक्षणविवेचनं । श्राद्धाङ्गनिरूपणं । पार्व्वणैकोद्दिष्टादिषु इतिकर्त्तव्यताभेदनिरूपणं । सपिण्डीकरणश्राद्धविधिकथनं । स्त्रीशूद्रकर्त्तृकश्राद्धविधिकथनं । अपुत्रस्य पार्व्वणश्राद्धं न कर्त्तव्यमितिकथनं । अशौचातिरिक्तमृताहश्राद्धप्रतिबन्धके विशेषकथनं । शूद्रेणादश्यामपि पतितश्राद्धकर्त्तव्यतानिरूपणं । षाण्मासिकश्राद्धविधिकथनं । पिण्डपितृयज्ञप्रकारकथनं । पतिपुत्ररहितायाः स्त्रियाः सपिण्डननिषेधकथनं । प्रेतश्राद्धधर्म्मकथनादिकं । आमश्राद्धविधिकथनं । नान्दीमुखश्राद्धविधिः । तत्र सपिण्डीकरणानधिकारिणा कनिष्ठेन असपिण्डितेऽपि पितरि नान्दीश्राद्धं कर्त्तव्यमितिनिरूपणं । एकोद्दिष्टश्राद्धप्रयोगकथनं । आद्यश्राद्धविधिकथनं । सपिण्डनश्राद्धप्रयोगकथनं । आभ्युदयिकश्राद्धप्रयोगकथनञ्च ।

No. 1925. काल्युपनिषत् ।

Substance, country-made paper, 9 × 3 inches. Folia, 3. Lines, 7 on a page. Extent, 45 s'lokas. Character, Maithilí. Date, ? Place of deposit, Mujoná, Post Tájapura, Darbhángá, Pandit Yáges'vara Páṭhaka. Appearance, new. Prose. Correct.

Kályupanishad. On the divinity of Dakshiṇa-kálika : alleged to be a part of the Atharva Veda, but not included in the collections of the Atharva Veda Upanishads ordinarily met with—most probably a forgery.

Beginning. अथ हैनां ब्रह्मस्वरूपिणीमाप्नोति कामः रेफो दीर्घनेत्रविन्दुरूपिणीं तां । त्रिगुणामादौ कूर्च्चद्वयं कूर्च्चवीजं व्योमसद्यस्वरमेलनरूपं तद्द्वयं भुवनाद्व्योमज्वलनः देहशून्यमेलनरूपं तद्द्वयेति दक्षिणाकालिकेति च इत्यादि ।

End. स संसारार्णवं तीर्त्वा सर्व्वमन्त्रसिद्धिं लब्ध्वा केवलभैरवो भवति ।

Colophon. इत्यथर्व्ववेदे काल्युपनिषत् समाप्ता ।

विषयः । श्रीदक्षिणकालिकायाः ब्रह्मस्वरूपत्वकथनपूर्व्वकं तदुपासनप्रकार-माहात्म्यादिकीर्त्तनं ।

No. 1926. गङ्गोपनिषत् ।

Substance, country-made paper, 9 × 3 inches. Folia, 3. Lines, 7 on a page. Extent, 43 s'lokas. Character, Maithilí. Date, ? Place of deposit, Mujoná, Post Tájapura, Darbháñgá, Paṇḍit Yáges'vara Páṭhaka. Appearance, new. Prose. Correct.

Gañgopanishad. An eulogium on the river Ganges: called an Upanishad, but not affiliated to any of the Vedas.

Beginning. यां देवा देवसरितं पितरश्च पर्य्युपासते । यान्हषयः सा नो देवसरिद्देवानां पापं हन्तु धर्म्मसाविन्नौं । यां मूर्ध्नि धत्ते ईशानोऽमृतत्वाय शितिकण्ठः परातनः । तामहं देवीमुपाश्रये । मातेव सा मामवतु । इत्यादि ।

End. य इमां विद्यामधीते तरति ब्रह्महत्यां तरति स्तेयं तरति पारदारिकत्वं लभतेऽभिमतं सर्व्वमधीयानो मासमेकमिति ॥

Colophon. इति श्रीगङ्गोपनिषत् समाप्ता ।

विषयः । गङ्गाया उत्पत्त्यादिकथनपूर्व्वकं माहात्म्यकीर्त्तनं ।

No. 1927. सूर्य्योपनिषत् ।

Substance, country-made paper, 11 × 3 inches. Folia, 3. Lines, 6 on a page. Extent, 36 s'lokas. Character, Maithilí. Date, ? Place of deposit, Mujoná, Post Tájapura, Darbháñgá, Paṇḍit Yáges'vara Páṭhaka. Appearance, new. Prose. Correct.

Súryopanishad. On the adoration of the Sun as the supreme divinity: called an Upanishad, but not affiliated to any of the Vedas.

Beginning. अथ सूर्य्याथर्व्वशीर्षं व्याख्यास्यामः । ब्रह्मऋषिर्गायत्रीच्छन्द आदित्यो देवता हंसाग्निनारायणयुक्तं वीजं हृल्लेखाशक्तिर्वियदादिसर्गसंयुक्तं कीलकं धर्म्मार्थकाममोक्षसिद्ध्यर्थे जपे विनियोगः । षट्स्वरारूढ़वीजेन षड़ङ्गरक्ताम्बुजसंस्थितं सप्ताश्वरथिनं इत्यादि ।

End. हस्तादित्ये जपति स महामृत्युं तरति य एवं वेद । इत्युपनिषत् ।
ॐ सह नाववतु सह नौ भुनक्तु सह वीर्य्यं करवावहै । तेजस्विनावधीतमस्तु मा विद्विषावहै । ॐ शान्तिः ३ ।

Colophon. इति सूर्य्योपनिषत् ।

विषयः । सूर्य्यस्य परब्रह्मत्वकथनं । तन्मन्त्रादिकथनपूर्व्वकं माहात्म्यकीर्त्तनञ्च ।

No. 1928. गणेशोपनिषत् ।

Substance, country-made paper, 11 × 3 inches. Folia, 3. Lines 6 on a page. Extent, 34 s'lokas. Character, Maithilí. Date, ? Place of deposit, Mujoná, Post Tájapura, Darbháñgá, Paṇḍit Yáges'vara Páthaka. Appearance, new. Prose. Correct.

Gaṇeśopanishad. On the adoration of Gaṇeśa as the Supreme Divinity—an apocryphal work.

Beginning. अथ गणेशाथर्व्वशीर्षं व्याख्यास्यामः । ॐ नमस्ते गणपतये । त्वमेव प्रत्यक्षं तत्त्वमसि त्वमेव केवलं कर्त्तासि त्वमेव केवलं कर्त्तासि । अवत्वस्मान् त्वमेव केवलं हर्त्तासि त्वमेव केवलं सर्व्वं खल्विदं ब्रह्मासि त्वञ्च साक्षादात्मासि नित्यमृतं वच्मि सत्यं वच्मि । इत्यादि ।

End. महानद्यां प्रतिमासन्निधौ जप्त्वा सिद्धमन्त्रो भवति महाविघ्नात् प्रमुच्यते महादोषात् प्रमुच्यते स सर्व्वविद्भवति य एवं वेद । इत्युपनिषत् । ॐ सह नाववत्वित्यादि । ॐ शान्तिः ३ ।

Colophon. इति गणेशोपनिषत् ।

विषयः । गणेशस्य परब्रह्मस्वरूपत्वकथनं । माहात्म्यादिकीर्त्तनञ्च ।

No. 1929. दुर्गोपनिषत् ।

Substance, country-made paper, 11 × 3 inches. Folia, 2. Lines, 6 on a page. Extent, 20 s'lokas. Character, Maithilí. Date, ? Place of deposit, Mujoná, Post Tájapura, Darbháñgá, Paṇḍit Yáges'vara Páṭhaka. Appearance, new. Prose. Correct.

Durgopanishad. On the adoration of Durgá as the Supreme Divinity : alleged to be a part of the Atharva s'iras Upanishad of the Atharva Veda.

Beginning. अथातो दुर्गां व्याख्यास्यामः । अथाश्वलायनो भगवन्तं परमेष्ठिनं परिसमेत्योवाच । किं जगत्कारणं किं बन्धमोक्षयोः किं त्रयाणां देवानां ब्रह्मविष्णुरुद्राणां किं दशावताराणां इत्यादि ।

End. अन्ते दुर्गातत्त्वं परब्रह्म भवतीत्याह परमेष्ठी भगवानाश्वलायनं भगवन्तं । ॐ सह नावित्यादि । ॐ शान्तिः ३ ।

Colophon. इत्यथर्व्वशिरसि दुर्गोपनिषत् ।

विषयः । दुर्गायाः परब्रह्मत्वकीर्त्तनादिकं ।

No. 1930. अद्भुतसागरसारः ।

Substance, country-made paper, 12 × 4 inches. Folia, 96. Lines, 6 on a page. Extent, 1,816 s lokas. Character, Maithili. Date, ? Place of deposit, Mujoná, Post Tájapura, Darbháñgá, Paṇḍit Yáges'vara Páṭhaka. Appearance, fresh. Prose and verse. Correct.

Adbhuta-ságara-sára. Portents, their consequences, and the means of obviating the same. By Mahápaṇḍit Chaturbhuja. Contents: Fall of vultures and hawks. Portents in connection with celestial luminaries, meteors, rainbows, &c. Appearance of cities near those objects. Portents in connection with the rising and the setting of the sun. Ditto with the moon. Ditto with Ráhu, the ascending node, and other planets. Wars of planets. Portents in connection with rains, with Nakshatras, with winds, with fires, with dawn and vesper, with shadows. Recondite peculiarities in earthquakes, reservoirs of water, conflagrations, sacred images, Indra's flag,* vegetables, houses, music, dress, arms, men, boils, tremors, dreams, the human body, parturition, elephants, horses, cattle, dogs, jackals, crows, and herons; their effects on human destiny, and the mode of obviating those effects.

Beginning. गृध्रश्येन + चिकस्य कपोतोलूकचातकाः ।
वाद्गुलीवककङ्कास्य पतन्ति यस्य वेश्मनि ॥
ध्वजे रथे महोत्पातं वाल्मीके जायते मधु ।
धूनां प्ररोदनञ्चैव द्वारञ्च कटकटायते ॥
हमनज्ञातमात्रस्य तत्क्षणे दन्तदर्शनं ।
जननं जातदन्तस्य सुतोत्पत्तिः शिरो विना ॥ इत्यादि ।

End. विष्णुधर्म्मोत्तरे । अद्भुते तु समुत्पन्ने यदि वृष्टिः शिवा भवेत् ।
सप्ताहाभ्यन्तरे ज्ञेयमद्भुतं निष्फलं हि तत् ॥
वटकलिकायां, यदि विकारसम्भः पर्ज्जन्यस्त्यजति सप्तरात्रात् प्रशममुपगच्छतीति ॥

Colophon. इति महापण्डितचतुर्भुजविरचिताद्भुतसागरसारः समाप्तः ।

विषयः । गृध्रश्येनादिपतनादिरूपाद्भुतकथनपूर्व्वकं प्रत्येकतत्प्रतीकारोपायकीर्त्तनं । तत्र आदित्यादीनामद्भुतकथनपूर्व्वकं तच्छान्तिकथनं । उल्कापात-शक्रधनुः-परिवेष-गन्धर्व्वनगर-विकृतवृष्टिरूपनाभसाद्भुतकथनपूर्व्वकं तच्छान्तिकथनं । विशेषेण

* Something like a May-pole set up on the 12th of the waxing moon in the month of Bhádra, on the occasion of a festa in honor of Indra

सूर्य्याद्भुतादिकीर्त्तनं । तत्र उदयादिफलवर्णनञ्च । एवं चन्द्रस्य अद्भुतादिकथनं । राहोरद्भुतादिकथनं । तत्र अयन-मास-दिक्-ग्रास-वर्ण-ग्रहणसमाद्यद्भुतकथनादिकं । पञ्चभङ्गकथनं । एवं मङ्गलबुधादीनां ज्ञेयं । ग्रहयुद्धाद्भुतवर्णनं । रव्यादिवर्णाद्भुतकीर्त्तनं । नक्षत्राद्भुतवर्णनं । निर्घाताद्भुतकथनं । दिक्दाहाद्भुतवर्णनं । सन्ध्यद्भुतवर्णनं । छायाद्भुतकथनं । भूकम्पाद्भुतकथनं । जलाशयाद्भुतकथनं । अग्न्यद्भुतकथनं । देवप्रतिष्ठाद्भुतवर्णनं । शक्रध्वजाद्भुतकथनं । वृक्षलताफलपुष्प-शस्यान्नाद्यद्भुतकथनं । गृहाद्यद्भुतकथनं । वाय्वाद्यद्भुतकथनं । वस्त्राद्भुतकथनं । शस्त्राद्यद्भुतवर्णनं । मानुषाद्भुतवर्णनं । पिटकाद्भुतकथनं । स्यन्दनाद्भुतकथनं । स्वप्नाद्भुतवर्णनं । कायारिष्टाद्भुतवर्णनं । प्रसवाद्भुतवर्णनं । गजाद्भुतवर्णनं । अश्वाद्भुतवर्णनं । वृष-महिषाद्यद्भुतवर्णनं । कुक्कुराद्भुतवर्णनं । शृगालाद्भुतकथनं । काकाद्भुतकथनं । कङ्काद्यद्भुतकथनं । एतेषां शान्त्युपायकथनञ्च । अद्भुतानां फलपाकसमयकथनादिकं ।

No. 1931. अष्टविकृतिः ।

Substance, country-made paper, 10 × 3 inches. Folia, 12. Lines, 6 on a page. Extent, 147 s'lokas. Character, Maithilí. Date, ? Place of deposit, Mujoná, Post Tájapura, Darbhángá, Paṇḍit Yáges'vara Páṭhaka. Appearance, new. Verse. Correct.

Ashṭa-vikṛiti. On the eight different artificial forms in which the texts of the Vedas are written, and the merit of getting them by-heart and reciting them under particular restrictions. Anonymous. (*Vide ante*, Vol. III, p. 199).

Beginning. अथ जटाद्यष्टविकृतीनां लक्षणानि लिख्यन्ते । तत्र विकृतीनां पाठे फलं पङ्क्तिपावनत्वं ।

जटादिविकृतीनां ये पारायणपरायणाः

महात्मानो द्विजाः श्रेष्ठास्ते ज्ञेयाः पङ्क्तिपावनाः । इत्यादित्यपुराणात् ।

अन्यान्यपि विष्णुलोकादीनि फलानि इत्यादि ।

End. शिखां पूर्व्वोक्तामुच्चार्य्य विपर्य्यासेन तानि पदानि उच्चार्य्य पुनः क्रमेण तानि पदान्युच्चारयेत् । अयं विकृतिविशेषो घन इति प्रोक्तः ऋषिभिः ।

Colophon. इत्यष्टविकृतिः समाप्ता ।

विषयः। जटाद्यष्टविकृतीनां पारायणे फलश्रुतिकीर्त्तनं। जटालक्षणादिकथनं। विकृतिषु क्रमभेदव्यवस्थापनं। मालालक्षणादिकथनं। एवं शिखा-रेखा-ध्वज-दण्ड-रथ-घनानां लक्षणादिकथनं। सर्व्वत्र उदाहरणप्रदर्शनञ्च।

No. 1932. वर्णरत्नदीपिका, शिक्षा।

Substance, country-made paper, 10 × 3 inches. Folia, 24. Lines 6 on a page. Extent, 276 s'lokas. Character, Maithilí. Date, ? Place of deposit, Mujoná, Post Tájapura, Darbhángá, Paṇḍit Yáge'svara Páthaka. Appearance, new. Verse. Correct.

Varṇaratna-dípiká, S'ikshá. On the pronunciation of letters and syllables, their accents, quantities, and powers—an abstract of one of the Prátiśákhyas, but the school to which it belongs is not mentioned. By Amares'a, of the Bharadvája Gotra.

Beginning. श्रेयो दिशतु नः कृष्णः कंसमातङ्गकेशरी।
राधाकेलिकलाभिज्ञो गोपीवादकुतूहली॥
उत्पन्नो यः कुले वंशे बुद्धिमान् कृतनिश्चयः।
अमरेश इतिख्यातो भरद्वाजकुलोद्वहः॥
सोऽहं शिक्षां प्रवक्ष्यामि प्रातिशाख्यानुसारिणीं।
बालानां पाठशुद्ध्यर्थं वर्णज्ञानादिहेतवे॥
जपादिशुभकार्य्येषु पुमान्नाधिकृतो भवेत्।
सम्यक् पाठं विना यस्मात् तन्निमित्तं वदाम्यहं॥ इत्यादि।

End. अमरेशकृतामेतां शिक्षां यो धारयेत् सुधीः।
विद्वज्जनसभामध्ये जयं स लभते ध्रुवं॥
वादे यस्य चतुर्म्मुखोऽपि जड़तां धत्ते क्षणं विस्मितो
वर्णोच्चारणकौतुके पुनरयं वाचस्पतिर्मूकतां।
सोऽयं वादिघनानिलः प्रमुदितो वाचालदर्पं हरन्
भूमीन्द्रैरभिपूजितो विजयते नाम्नामरेशः सुधीः॥

Colophon. इत्यमरेशकृता वर्णरत्नदीपिका शिक्षा समाप्ता।

विषयः। वर्णसंज्ञा-विक्रिया-स्वरादिनिरूपणं।

No. 1933. कृत्यतत्त्वार्णवः ।

Substance, country-made paper, 12 × 3 inches. Folia, 112. Lines 11 on a page. Extent, 4,426 s'lokas. Character, Maithilí. Date, ? Place of deposit, Darbhángá, Paṇḍit Mádhava Jhá. Appearance, new. Prose and verse. Correct.

Krittya-tattvárṇava. On fasts, penances, pilgrimages and other religious duties enjoined on householders. By S'rínátha Áchárya, son of S'rıkara.

Beginning. श्रीगोविन्दपदाम्भोजद्वन्द्वसद्वन्द्वसाधनं । वन्दे वृन्दारकधुनीमकरन्दमनोहरं ॥
श्रीकराचार्य्यपुत्रेण श्रीमच्छ्रीनाथशर्म्मणा। प्रीतये विदुषाञ्चक्रे कृत्यकालविनिर्णयः॥
श्रौते विधौ कालकृतो विरोधः प्रायः सदैव प्रथितो बुधानां।
अतस्तदुच्छेदकृते मुनीनां विचार्य्य वाचो विदधामि तत्त्वं ॥
नानाविदेशिविदुषां मतमाकलय्य चोद्यत्तमं यदभिलिख्य समर्पयामि।
यद्वां बुधा विषयशङ्कुलिकाप्रवाहे दुराद्विहाय कुरुतादरमत्र गाढ़ ॥
इह खलु नित्यनैमित्तिकादियाज्ञैदिककर्म्माणि इत्यादि।

End. आगमोक्तमन्त्रोऽपि विधिवत्ताज्ञय एव पठनीयः। अधिकं विवेकार्णवे ज्ञेयमिति।
विचार्य्य वाचो मुनिपुङ्गवानां निबन्धजातञ्च महार्णवाद्य ।
मया कृतः कालविनिर्णयोऽयं सदा बुधानां + + मातनोतु ॥
कृत्यतत्त्वार्णवो नाम निबन्धो रचितो मया ।
शोधनीयमत्र विबुधा व्यवस्थारत्नराशिभिः ॥

Colophon. इति श्रीनाथाचार्य्यकृतकृत्यतत्त्वार्णवः समाप्तः।

विषयः । कर्म्मणः प्राधन्यकथनपूर्व्वकं तिथिनक्षत्रवारादीनामङ्गत्वनिरूपणं। संवत्सरनिरूपणं। तत्र मासपदशक्यतावच्छेदकनिर्णयः। अयनादिनिरूपणं। रूढयौगिकादिविवेचनं। षाण्मासिकश्राद्धकालविवेचनं। सौरादिमासलक्षणं। अत्र विविधमतोपन्यासपूर्व्वकं तत्खण्डनं। अधिमासनिर्णयः। अत्र कर्त्तव्याकर्त्तव्यनिरूपणं। संक्रान्तिनिरूपणं। मन्दा-मन्दाकिन्यादिसप्तविधसंक्रान्तिस्वरूपकथनं। ग्रहणनिरूपणादिकं। सामान्यतिथिषु कर्म्माङ्गत्वनिरूपणं। प्रतिपदादिषु तिथिषु विहितानां कर्म्मणां व्यवस्थादिकथनं। एकादशीव्रतविधिकथनं। तत्र दशमीद्वादश्योर्नियमकीर्त्तनञ्च। वैशाखमासकृत्यनिरूपणं। तत्र गङ्गास्नानविधिकथनं। युगादिश्राद्धविधानं। युगादिनिरूपनञ्च। ज्यैष्ठकृत्यनिरूपणं। तत्र कृष्णाष्टम्यां शिवपूजनविधान। सावित्रीव्रतव्यवस्थादिकथन आषाढ़चतुर्थ्यां मनसापूजनविधिः।

वषयः। अरण्यषष्ठीविधानं। दशहराक्षत्यनिरूपणं। पुरुषोत्तमदर्शनविधानञ्च। आषाढ़कृत्यनिरूपणं तत्र हरिशयनविधानं। चातुर्म्मास्यव्रतविधिः। तत्र द्रव्यविशेषवर्ज्जने फलविशेषनिरूपणं। श्रावणकृत्यनिरूपणं। मनसापञ्चमीविधिकथनं। अशून्यशयनव्रतविधानं। भाद्रकृत्यनिरूपणं। तत्र जन्माष्टमीविधानं। अघोरचतुर्द्दशीविधानं। चन्द्रादर्शनविधानं। हरितालिकानिरूपणं। दुर्व्वाष्टमीव्रतविधिः। अनन्तव्रतविधानं। अगस्त्योदयविधिकथनञ्च। आश्विनकृत्यनिरूपणं। तत्र गजच्छायादिनिरूपणं। दुर्गोत्सवादिविधिकथनं। महाष्टम्युपवासविधिः। खञ्जनदर्शनविधिः। व्रीहिपाकश्राद्धविधिः। कोजागरकृत्यनिरूपणञ्च। कार्त्तिककृत्यनिरूपणं। तत्र सुखरात्रिपूजादिविधानं। उल्कादानादिविधिः। द्यूतप्रतिपद्विधिः। भ्रातृद्वितीया। उत्थानविधानं। वकपञ्चकविधिकथनादिकञ्च। मार्गशीर्षकृत्यकथनं। तत्र नवान्नश्राद्धविधानं। पौषकृत्यनिरूपणं। तत्र अष्टकाश्राद्धादिविधानं। महाभद्राविधिकथनं। अन्वष्टकाश्राद्धविधानञ्च। माघकृत्यनिरूपणं। तत्र दधिसंक्रान्तिव्रतविधानं। प्रातःस्नानविधिः। पञ्चम्यां श्रीपूजनविधिः। माघीसप्तमीविधिः। भीष्माष्टमीविधिः। भैमीविधिः। शिवरात्रिकृत्यकथनञ्च। फाल्गुनकृत्यनिरूपणं। चैत्रकृत्यनिरूपणं। वारुण्यादिविधिकथनं। भूतिव्रतविधिः। अशोककलिकापानविधिः। अनङ्गार्चनविधानञ्च। प्रकीर्णकविधिः। तत्र तिथ्यादिषु भक्ष्याभक्ष्यनिरूपणं। गङ्गास्नानफलकथनप्रसङ्गेन तद्धर्मादिनिरूपणं। तिथिषु पुण्यतरादिनिरूपणं। भोजनादिविधिकथनं। महानिशादिकालनिरूपणं। महागुरुनिपाते कर्त्तव्याकर्त्तव्यनिरूपणं। स्नानतर्पणजपादिविधिकथनं। दानादिविधिकथनं। पतिव्रताकृत्यनिरूपणं। शूद्रकृत्यनिरूपनञ्च।

No. 1934. शुद्धिविवेकः।

Substance, country-made paper, 13 × 3 inches. Folia, 64. Lines, 8 on a page. Extent, 1856 s'lokas. Character, Maithilí. Date, ? Place of deposit, Mujoná, Post Tájapura, Darbháñgá, Paṇdit, Bábuláła Páṭhaka; another copy at Magráṇi, Post Madhubaní, Darbhañgá, Paṇdit Choṭí Jhá, and another at Murshidábád, Rájá Rámachánd Siñha. Appearance, fresh. Prose and verse. Incorrect.

S'uddhi-viveka. An essay on impurity of the person resulting from birth and death in one's family, or from other causes. By Rudradhara,

son of Lakshmídhara, and younger brother of Haladhara. Both the father and the brother had the title of Mahámahopádhyáya. The author says that "though there are current the Ratnákara, Párijáta, Mitákshará, Háralatá and others, his work would be gratifying to those that did not delight in them." This affords a clue to his date.

Beginning. हरतु दुरितजातं केशवस्यैकबाहुर्विपुलगलविलान्तः केशिनः सम्प्रविष्टः ।
मुखपवनमिवास्य शमितुं संप्रवृत्तः कुवलयदलनीलः पञ्चशीर्षो भुजङ्गः ॥
चिरन्तनानेकनिबन्धसिद्धः स्वसम्प्रदायानुगतस्फुटार्थः ।
नत्वा हरिं रुद्रधरेण सम्यक् वितन्यते शुद्धिविवेक एषः ॥
सन्त्येव रत्नाकरपारिजातमिताक्षराहारलतादयोऽन्ये ।
तथापि तत्रालसमानसानां भवेत् प्रमादाय मम प्रयासः ॥
शुद्धिस्तावदखिलविहितकर्म्माधिकारापादको धर्म्मविशेषः । इत्यादि ।

End. ततो रजस्वलाशुद्धिरुच्छिष्टस्पर्शने च सा ।
स्वभावशुद्धिश्च तथा क्रमेणात्र प्रकीर्त्तिताः ॥

Colophon. इति महामहोपाध्यायलक्ष्मीधरात्मजमहामहोपाध्यायश्रीहलधरानुजतनश्रीरुद्रधरकृतः शुद्धिविवेकः समाप्तः ॥ शुभम् ।

विषयः । शुद्धिपदार्थविवेचनं । सामान्यतः सर्व्ववर्णानां जननमरणयोः शुद्धिनिरूपणं । तत्र अशौचनियमकथनं । अशौचसङ्करव्यवस्थाकथनं । स्वाशौचादिकथनं । मृत्युविशेषाशौचनिरूपणं । निर्हारादिनिरूपणं । तदधिकारिनिरूपणं । और-सपुत्रादिलक्षणं । मापिण्डनिरूपणं । देहाशुद्धिनिरूपणं । स्नानशुद्धिकथनं । तैजसादिद्रव्यशुद्धिकथनं । पक्वान्नद्रव्यशुद्धिकथनं । भूमिशुद्धिकथनं । जल-शुद्धिकथनं । रजस्वलाशुद्धिकथनं । उच्छिष्टादिस्पर्शनशुद्धिकथनं । स्वभा-वशुद्धिनिरूपणञ्च ।

No. 1935. समयप्रदीपः ।

Substance, country-made paper, 14 × 4 inches. Folia, 60. Lines, 6 on a page. Extent, 1,327 s'lokas. Character, Maithilí. Date, ? Place of deposit, Mujoná, Post Tájapura, Darbhángá, Pandit, Bábulála Jhá. Appearance, new. Prose and verse. Correct.

Samaya-pradípa. Descriptions of some of the leading fasts, penances, and periodical optional rites, Vratas. By S'rídatta Mahámahopá-

dháya. Contents: Commencement of Vratas; duties on the day of a Vrata; effect of mourning on the day of a Vrata; meaning of the word Vrata; rules regarding fasting; the fast on the 11th of the moon; rules regarding Vratas to be performed at night. Effect of intercallary months on Vratas; Vratas in honor of Gaṇes'a; ditto of Súrya; ditto of S'iva; ditto of Vishṇu; Vrata on the 12th lunation of S'rávana; Vrata of sleeping on the ground for a fixed period; Vratas in honor of Brahmá; ditto of Nágas; Vrata on the 5th lunation of Mágha, "the nonwriting fifth," *Álekhya-pañchamí;* Vratas in honor of the Deví (Durgá); minor fasts and penances; the adoration of Lakshmí on the 5th of the waxing moon in Chaitra; the Vrata of Damanabhañjiká, or thyme festival, on the 14th of the same month; calendar of fasts for the 12 months of the year; rites for the day when the sun passes from one to another sign of the Zodiac; ditto for the commencement of a Yuga, a cycle of Manu, and other cycles.

Beginning. श्रेयः समादिशतु सान्द्रसपत्नघाते निद्रायिते त्वपि दृशौ भुजगस्य शय्य ।
संवाह्यमानचरणाम्बुजजातहर्षो लक्ष्मीमुखेक्षणपरः परमेश्वरो वः ॥
निबन्धेषु निबद्धानि वचनानि विचिन्वतः ।
श्रीदत्तेन व्रतादीनां क्रमसाकृष्य लिख्यते ॥
तत्र पूर्व्वदिने स्नानादिना शरीरशुद्धिं कृत्वा निरामिषमेकवारं भुक्त्वा दन्तान् संशोध्य—इत्यादि ।

End. अपहरतु ततः सकलं सम्यक् कर्म्मप्रचारमुपनयतु ।
समयप्रदीप एष स्थितिसेतु सतां गृहे नूनं ॥

Colophon. इति महामहोपाध्यायश्रीदत्तकृतौ समयप्रदीपे प्रकीर्णक परिच्छेदः सम्पूर्णः । शुभं ।

विषयः । व्रतारम्भविधानकथनं । व्रतदिनकर्त्तव्यताकथनं । जननमरणाशौच पूर्व्वगृहीतव्रतानुष्ठानं तत्र आरम्भनिषेधश्च । व्रतशब्दार्थविवेचनं । उपवासविधिकथनं । एकादश्यादिव्रततिकर्त्तव्यताकथनं । नक्तव्रतविधिकथनं । अधिमासविवेचनं । गणेशव्रतकथनं । सूर्य्यव्रतकथनं । शिवव्रतकथनं । विष्णुव्रतकथनं । श्रवणद्वादशीव्रतकथनं । अशून्यशयनव्रतकथनं । ब्रह्मव्रतकथनं । नागव्रतकथनं । आलेख्यपञ्चमीव्रतकथनं । देवीव्रतकथनं । सामान्यव्रतादिकथनं । चैत्रशुक्लपञ्चम्यां लक्ष्मीपूजनविधिकथनं । तत्र चतुर्द्दश्यां दमनभञ्जीविधिकथनं । एवं द्वादशमासेषु प्रत्येकं कृत्यविधिकीर्त्तनं तत्तत्कालनिरूपणञ्च । संक्रान्तिकृत्यकथनं । युगाद्यामन्वन्तरादिनिरूपणञ्च ।

No. 1936. मन्त्रार्थदीपिका।

Substance, country-made paper, 11 × 3½ inches. Folia, 92. Lines, 10 on a page. Extent, 3,202 s'lokas. Character, Maithilí. Date. ? Place of deposit, Mujoná, Post Tájapura, Darbhángá, Paṇḍit Yáges'vara Páṭhaka. Appearance, old. Prose. Correct.

Mantrártha-dípiká. Explanations and uses of the mantras used during daily worship. By S'atrughna Mahámahopádhyáya, by order of Mahárájádhirája Dharmachandra.

Beginning. तनावाल्लोलायां भयचकितगोपालतरुणी-
दृगन्तैरुन्मीलत्कुवलयदलश्रेणिसुभगैः।
हठादापूर्णायां तपनतनयानीरनिवह-
भ्रमेण प्रत्तेशुं कृतकरपुटो रक्षतु हरिः।
श्रुत्वा तातपणं सुदारुणतरं कामाभिरामाकृति-
र्जानक्या निभृतातिकातरदृशा साकूतमालोकितः।
श्रीरामः स पुनातु धूर्जटिधनुर्भङ्गे यदङ्गेऽभवद्
रोमाञ्चस्य मिषेण गूढहृदयानन्दादमन्दाङ्कुरः॥
आदेशादथ राज्ञस्तस्य श्रीधर्मचन्द्रस्य।
मन्त्रार्थदीपिकेयं क्रियते शत्रुघ्नशर्म्मणा सम्यक्।
उग्रटे मन्त्रव्याख्या गुणविष्णौ ब्राह्मणसर्व्वस्वे।
वेदविलासिन्यामपि कौशलमीदृ्शं तथापि मे सद्भिः॥
— — — — — — प्रथमं वेदार्थज्ञानप्रशंसा। तत्र कूर्म्म-
पुराणे। इत्यादि।

End. हलायुधे+उग्रटेऽपि चार्थस्तो विशेषो मयि नावलेपः।
रत्नाकरे किं मणयो न सन्ति ततः समाकर्षति यः स धन्यः॥

Colophon. इति महाराजाधिराजश्रीमद्धर्म्मचन्द्रकारितमहामहोपाध्यायश्रीशत्रुघ्नविरचि-
तायां मन्त्रार्थदीपिकायां ज्ञानकाण्डविवरणं समाप्तं।

विषयः। स्नान-सन्ध्या-देवार्चन-श्राद्ध-शतरुद्रीय-वैवाहिकादीनां मन्त्राणां विनियोगादि-
कथनपूर्व्वकं व्याख्यानं।

No. 1937. चित्ररूपविचारः ।

Substance, country-made paper, 10 × 3 inches. Folia, 24. Lines, 10 on a page. Extent, 645 s'lokas. Character, Nágara. Date, ? Place of deposit, Mujoná, Post Tájapura, Darbhángá, Paṇḍit Yáges'vara Páṭhaka. Appearance, old. Prose. Correct.

Chitrarúpa-vichára. A Nyáya disquisition on colors as a characteristic of species. By Harirâma.

Beginning. रूपत्वं नीलादिषट्कान्यवृत्ति न वा। अत्र प्राञ्चः। नानाजातीयरूपवदवयवारब्धोऽवयवी नीलपीताद्यव्याप्यवृत्तिरूपवान् सविषयावृत्तीत्यादि ।

End. नीलादिभेदेन विभिन्नसन्निकर्षहेतुतया वाऽरूपाद्व्याप्यवृत्तिमतमेव साधीयः ।

Colophon. इति हरिरामकृतचित्ररूपविचारः ।

विषयः । रूपत्वजातिनिरूपणप्रसङ्गेन नवीनमतखण्डनपुरःसरं प्राचीनमताभ्यर्हितत्वकीर्त्तनं ।

No. 1938. ज्योत्स्ना ।

Substance, country-made paper, 11 × 4 inches. Folia, 92. Lines, 7 on a page. Extent, 901 s'lokas. Character, Nágara. Date, ? Place of deposit, Mujoná, Post Tájapura, Darbhángá, Paṇḍit Yáges'vara Páṭhaka. Appearance, fresh. Prose. Correct.

Jyotsná. A commentary on Kátyáyana's Vájasaneyí Prátiśákhya. By Rámachandra Paṇḍita, son of Siddheśvara Yogivara. The work was completed on the 10th of the waxing moon in the month of A'śvina, in the S'aka year 1736.

Beginning. यस्य भृङ्गावलिः कण्ठे स्नुतदानाम्बुपूरिते ।
भाति रुद्राक्षमालेव स वः पायाद्गणाधिपः ॥
श्रीरामं सद्गुरुं नत्वा याज्ञवल्क्यमुनिं तथा ।
कात्यायनकृते प्रातिशाख्ये वाजसनीयके ॥
माध्यन्दिनानुसारेण ज्योत्स्नाख्या विवृतिर्लघुः ।
क्रियते सुखबोधार्थं मन्दानां रामशर्म्मणा ॥
जपादौ नाधिकारोऽस्ति सम्यक्पाठमजानतः ।
प्रातिशाख्यमतो ज्ञेयं सम्यक्पाठस्य सिद्धये ॥

स्वरसंस्कारयोश्छन्दसि नियमः । १ । प्रतिसूत्रमेतत् । स्वराणामुदात्तादीनां संस्काराणां लोपागमवर्णविकाराणाञ्च नियमो वक्ष्यमाणसूत्रैर्विहितानां नियत पठनं छन्दसि माध्यन्दिनीये स्यात् । इत्यादि ।

End. कानिचित् शाखान्तरविषयाणि नाशे च इत्यादीनि कानिचित् व्याकरणसिद्धान्यपि स्थितोपस्थितादौ विशेषप्रदर्शनार्थं लिखितानि । अहःपतौ रेफमित्यादीनि । अङ्काग्निसप्तकुमिते १७३९ शकेश्वरवत्सरे इषशुक्लाद्दशम्यां श्रीसिद्धेश्वरतनूभुवा रामेण रचिता प्रातिशाख्यज्योत्स्ना समर्पिता श्रीरामसिद्धेश्वरगुरुचरणाम्बुरुहद्वये ।

Colophon. इति श्रीमद्विद्वन्मुकुटरत्नश्रीसिद्धेश्वरयोगिवरसूनूरामचन्द्रपण्डितविरचिता ज्योत्स्नाख्या प्रातिशाख्यविवृतिः समाप्ता ।

विषयः । कात्यायनकृतवाजसनेयिप्रातिशाख्यस्य व्याख्यानं ।

No. 1939. वसन्तराजटीका ।

Substance, country-made paper. 13 × 3 inches. Folia, 220. Lines, 7 on a page. Extent, 2,082 s'lokas. Character, Nágara. Date, ? Place of deposit, Mujoná. Post Tájapura, Darbhángá, Paṇḍit Bábulála Páṭhaka. Appearance, fresh. Prose. Correct.

Vasantarája-ṭíká. A commentary on the Vasantarája, a work on omens and portents. By Bhánuchandra Gaṇi.

Beginning. स्वस्ति श्रीमदनं यदीयवदनं वेधा विधायाद्भुतं
वीक्ष्याश्चर्य्यमवाप मस्पृहतया सम्मार्ज्जयन् वाससा ।
लेशं तत्र तथाविधैरनुगुणैर्वैषम्यमापादितं
मन्ये सम्प्रति लक्ष्यते + + पथे शीतद्युतेर्मण्डलं ॥
आनम्रत्रिदशेन्द्रमौलिमुकुट ाद्दामरत्नांशुभि-
र्यत्पादद्वितयं विचित्ररचनाभङ्गीभिरङ्गीकृतं
दिङ्नागैश्च यदीयकीर्त्तिरतुला कर्णावतंसीकृता
स श्रीवीरविभुर्द्दधातु भवतां शश्वन्मनावाञ्छितं ।
यस्त्रैलोक्यरमाभिरस्पृहतया सानन्दमालोकित-
स्तीक्ष्णैः स्वर्गवधूकटाक्षविशिखैर्यो लक्ष्यतां नागमत् ।

स्थानैश्वात्ममुत्यितैस्व निखिलान् मा+न् समावेदयन
स श्रीमान् भुवनावतंसकमणिः पायादपायात् प्रभुः।
तद्बुद्धिवैभवकृतेऽत्र वसन्तराजमच्छाकुनस्य विवृतिं प्रणयत्यभिज्ञः।
श्रीहरचन्द्रचरणाम्बुजचञ्चरीकः श्रीसाहिराजकृतसत्कृतिभानुचन्द्रः॥
इह हि ग्रन्थकृन्निर्विघ्नसमाप्तिकामो मङ्गलमाचरेदित्यादि।

End. वसन्तराजेति। पूर्व्वव्याख्यातविशेषणविशिष्टे वसन्तराजशाकुने यस्यश्य प्रभावकीर्त्तनं कृतं।

Colophon. इति श्रीशत्रुञ्जयकरमोचनादिसुकृतकारिमहोपाध्यायश्रीभानुचन्द्रगणिविरचितायां वसन्तराजटीकायां प्रभावकथनं नाम विंशतितमो वर्गः। श्रीरस्तु। शुभमस्तु॥

वषयः। वसन्तराजीयशकुनशास्त्रस्य व्याख्यानं।

No. 1940. वाक्यवादः।

Substance, foolscap paper, 12 × 2½ inches. Folia, 5. Lines, 7 on a page. Extent, 140 s'lokas. Character, Maithilí. Date, ? Place of deposit, Mujoná, Post Tájapura, Darbháñgá, Paṇḍit Bábulála Páṭhaka. Appearance, new. Prose. Correct.

Vákyaváda. On the Philosophy of grammar, or the relation of words and their contexts. By Achala Upádhyáya.

Beginning. अथ किमिदं वाक्यं। एकतिङ्वाक्यमिति भाष्यात्। एकतिङन्तार्थस्वविशेष्यकबोधजनकपदत्वम्बा वाक्यमिति वैयाकरणाः। इत्यादि।

End. परन्तु पदार्थतावच्छेदकरूपविशेषणस्य क्वचिदपि न परामर्शः॥

Colophon. इति वाक्यवादेऽचलोपाध्यायकृतः समाप्तः।

विषयः। वाक्यस्वरूपनिरूपणमुखेन पदानां कुत्र शक्तिरिति समासेन तन्निर्णयकथनं।

No. 1941. पदार्थखण्डनव्याख्या।

Substance, country-made paper, 11 × 2 inches. Folia, 57. Lines, 6 on a page. Extent, 1,779 s'lokas. Character, Nágara. Date, Sk. 1641. Place of deposit, Mujoná, Post Tájapura, Darbháñgá, Paṇḍit Bábulála Páṭhaka; another at Mágraní, Post Madhubani, Darbháñgá, Paṇḍit Chhoṭi Jhá. Appearance, old. Prose. Correct.

Padártha-khaṇḍana-vyákhyá. A commentary on Raghunátha S'iromaṇi's Padártha-khaṇḍana—a Nyáya treatise. By Raghudeva Nyáyálaṅkára Bhaṭṭácbárya.

Beginning. नन्दसूनुपदद्वन्द्वं निधाय हृदि चिन्तया ।
तनोति कुतुकं किञ्चिद्रघुदेवः समासतः ॥
कामद्दलध्वतमस्तयुगधनुः पौष्यमद्भुतमुदीच्य कुप्यतः ।
धूर्जटेर्नयनयो + + + + हन्तु सर्व्वजगतामुपद्रवं ॥
पदार्थतत्त्वं यदिदं शिरोमणिर्निर्णीतवान् जीर्णमतस्य दूषणे ।
तदेव तर्केण विचारयामः सदर्थकेनेतरखण्डनेन ॥
अवसरसङ्गत्या पदार्थतत्त्वं निर्वक्तुं शिष्यावधानाय प्रतिजानीते अथेत्यादि ।

End. पदार्थखण्डनाकूतपुरुहूतपुरोहितं ।
शिरोमणिमहं वन्दे शिरोमणिमिवाद्भुतं ॥
श्रीमद्दीधितिकारकल्पितघटाकोलाहलव्याकुले
मार्गे सञ्चरणाय यन्निगदितं सिद्धान्तसद्रतरत् ।
दैवात्तेन भवेद्यदीह सहसा प्रौढापराधे मम
चन्तव्यः कृतिभिः + + यदि भवेद्यत्नानुरूपो वलिः ।

Colophon. इति श्रीरघुदेवन्यायालङ्कारभट्टाचार्य्यविरचिता पदार्थखण्डनव्याख्या समाप्ता । शाके १६४१ ।

विषयः । रघुनाथशिरोमणिकृतपदार्थखण्डनस्य व्याख्यानं ।

No. 1942. नैषधप्रकाशः ।

Substance, country-made paper, 13 × 4 inches. Folia, 225. Lines, 10 on a page. Extent, 6,890 s'lokas. Character, Maithili. Date, ? Place of deposit, Mujoná-grám, Post Tájapura, Darbhángá, Paṇḍit, Bábulála Páṭhaka. Appearance, old. Prose. Correct.

Naishadha-prakás'a. A commentary on the epic poem called Naishadha. By S'rínátha A'chárya, Mahámahopádhyáya.

Beginning. श्रीमन्नारायणं नत्वा काव्ये श्रीहर्षनिर्म्मिते ।
प्रकाशनं यथाप्रज्ञं श्रीनाथेन विधीयते ॥

प्रणम्य मौलिना वन्द्यान् सम्प्रदायविदः सतः।
त्याज्यं त्याज्यमसद्वाक्यं सदल्पमपि लिख्यते ॥
ये सदर्थमजानन्तो वृथावचनविस्तरैः।
दूषयन्ति कवेः काव्यं धिक्तान् पण्डितमानिनः ॥
यद्दित्थं करटो गत्वा सिन्धोरुपरि कायति ।
तत् किं स वेत्ति गाम्भीर्य्यं रत्नानि च तदाश्रये ॥
अथ काव्यस्य वस्तुनिर्द्देशमुखत्वं सूचयन्नलवर्णनमाह निपीयेति । इत्यादि ।

End. श्रीहर्षमिति पूर्ब्ववत् ।

Colophon. इति महामहोपाध्यायश्रीनाथाचार्य्यविरचिते नैषधप्रकाशे सप्तमः सर्गः ।

विषयः। श्रीहर्षकृतनैषधचरितमहाकाव्यस्य सप्तमसर्गान्तं व्याख्यानं ।

No. 1943. रसमञ्जरीप्रकाशः ।

Substance, country-made paper, 12 × 4½ inches. Folia. 25. Lines, 10 on a page. Extent, 1,092 s'lokas. Character, Maithilí. Date, ? Place of deposit, Naduyár-grám, Post Madhubani, Darbhángá, Paṇḍit Maṇilála Jhá. Appearance, old. Prose. Correct.

Rasamanjarí-prakás'a. A commentary on the Rasamanjarí of Bhánudatta. By Náges'a Bhaṭṭa, son of S'iva Bhaṭṭa, surnamed Kála. A work on erotics.

Beginning. सामिनीलोत्पलश्यामं वपुर्य्यस्य विभाति सः।
यामिनीदयितद्योतनानः सोऽस्तु शिवाय नः ॥
नागेशभट्टनामा शिवभट्टसुधीसुतो मुदे विदुषाम् ।
रसमञ्जरीप्रकाशं रचयामि मितैर्वचोभिरर्श+नैः ॥
अमाशङ्क्येति । सर्व्वत्र करणत्वेनान्वेति । आद्यपदे बहुतरप्रियापदकमलस्य तथाविधप्रदेशे प्रथमपातेन + + +वनतरूनां पुष्पमेव न तु फलं पुष्पाणि वा एकपुष्पावचयकृतेऽपि श्रमो मास्त्विति भावेन—इत्यादि ।

End. एवञ्च स्पृहनीयदर्शनत्वं दामोदरत्वेन व्यसनशालिता, तेन दुर्ल्लभत्वं, लोचनविषयो भवतु । स्यन्दसन्दोहः प्रस्रवमारसङ्घः । तेन सुन्दरी तद्वती चासौ सुन्दरीति वा । १३७ । पद्येनैकत्वमविवक्षितम् ॥ १३८ ॥

Colophon. इति श्रीकालोपनामकशिवभट्टसुतनागेशभट्टकृतो रसमञ्जरीप्रकाशः समाप्तः ॥
विषयः । भानुदत्तकृतरसमञ्जर्य्या व्याख्यानम् ॥

No. 1944. लिङ्गार्च्चनचन्द्रिका ।

Substance, country-made paper, 13 × 5 inches. Folia, 120. Lines, 8 on a page. Extent, 3,332 s'lokas. Character, Maithili. Date, ? Place of deposit, Naḍuyár-grám, Post Madhubaní, Darbhángá, Paṇḍit Nandílála Jhá. Appearance, new. Prose and verse. Correct.

Liṅgárchana-chandriká. A digest of the rules for the adoration of S'iva, giving all the rituals in detail. By Sadáśiva, son of Gadádhara, and grandson of Vishṇu, of the race of Daśaputra. Compiled under the auspices of king Jayasiṅha.

Beginning. उमाकटितटस्फुरत् करिवराननालोकन-
प्रसन्नहृदयं धिया सदयमिन्दुचूडं भजे ।
प्रणम्य गिरिजाधवं भजनमात्रदत्तेप्सितं
स्मितानननमनामयं प्रियमुमासहायं मुदा ॥
वंशेऽस्मिन् दशपुत्रनामनि महान् विष्णुर्द्विजाग्रस्त्वभूत्
सूनुस्तस्य सुधीर्गदाधर इति ख्यातो जगत्याख्यया ।
तत्पुत्रेण सदाशिवेन विदुषा दृष्ट्वा निबन्धान् पुरा
श्रीलिङ्गार्च्चनचन्द्रिका विरचिता विद्वच्चकोरैर्मुदा ॥
विविच्य गुणगौरवं गणविवेक+मत्सरं
विहाय कथयन्तु तद्यदिह दूषणं सज्जनाः ।
न फल्गुजनदूषणैः किमपि हीयते मामकं
दिनान्धगणगर्हणाः किमु हिमेशखेदावहाः ॥
तत्र पूज्यस्वरूपापरिज्ञाने पूजाया अफलत्वादादौ साम्बसदाशिवस्य श्रुतिस्मृत्यादौ
सर्व्वोत्तमत्वं सर्व्वाभीष्टप्रदत्वञ्च प्रदर्श्यते । तथा च श्रुतिः । इत्यादि ।

End. मीमांसानयमांसलातिविमला प्रज्ञा तथा भूयसी
दृष्टिः श्रौतनिबन्धचारचतुरा येषां सदाचारिणाम् ।
तेषां दृष्टिपथं प्रयातु सुहृदां सन्दर्भ एष स्थितः
किं वान्यैर्निजदोषदुष्टमतिभिः प्राज्ञेतरैः प्रार्थितैः ॥

राज्ञः श्रीजयसिंहनामनृपतेस्तोषाय या निर्म्मिता
श्रीलिङ्गार्च्चनचन्द्रिकातिविमला विद्वच्चकोरेष्टदा।
तां पश्यन्तु परीक्षकाः सहृदया निष्पक्षपाता बुधा-
स्तेनेयं गुणवत्तरा हि भविता गौरीपतेस्तुष्टये॥

Colophon. इति पदप्रमाणज्ञेन श्रीमद्ब्रह्मपुत्रकुलावतंसेन सदाशिवेन विरचिता लिङ्गार्च्चनचन्द्रिका समाप्ता।

विषयः। श्रुतिस्मृतिपुराणप्रमाणेन सर्व्वेभ्यो देवेभ्यः शिवस्य श्रेष्ठत्वनिरूपणं। एकत्वेऽपि देवस्य मूर्त्तिभेदेन मन्त्रव्यवस्थाकथनं। शिवं विहाय अन्यदेवभजने दोषकथनं। शिवार्च्चनमाहात्म्यकीर्त्तनं। लिङ्गमाहात्म्यकथनं। पद्मराग-काश्मीर-पुष्पराग-विद्रुमादिमयलिङ्गभेदेन फलभेदकथनं। पारद-बाण-हैम-शिलामयलिङ्गानां क्रमेण ब्राह्मणादीनां शुभदातृत्वकथनं। अधिकारिभेदात् अन्यविधलिङ्गपूजनावश्यकतानिरूपणं। कलौ पार्थिवलिङ्गस्य प्रधान्यकथनं। कामनाविशेषे लिङ्गपूजायां विशेषकथनं। नित्यं शिवपूजाया अकरणे प्रत्यवायकथनमुखेनाख्यायिकाकथनं। शिवपूजाधिकारिनिरूपणं। स्त्रीशूद्राभ्यां प्रतिष्ठितलिङ्गस्पर्शे दोषकथनं। रुद्राक्षव्यतिरेकेण शिवपूजने दोषकथनं। त्रिपुण्ड्रविधिः। भस्मधारणविधिः। भस्मभेदानां वर्णभेदेन फलविशेषकथनं। शरीरे लिङ्गाद्यङ्कनमाहात्म्यकीर्त्तनं। तप्ताङ्कधारणे दोषकथनं। नैमित्तिकादिभस्मस्नानविधिः। रुद्राक्षलक्षणादिकथनं। एकमुखादिरुद्राक्षमाहात्म्यकीर्त्तनं। शिवस्य षोड़शोपचारेण पूजाविधिः। विल्वपत्रनिरूपणं। पुष्पादिदानविधिः। लक्षविल्वपत्रैः पूजनविधिः। शिवपूजनयोग्यपुष्पादिनिरूपणं। पुष्पविशेषदाने फलविशेषकथनं। लक्षपुष्पपूजाविधिः। गन्धनिरूपणं। जलनिरूपणं। नैवेद्यनिरूपणं। महानैवेद्यलक्षणकथनं। अभिषेकविधिः। दक्षिणाविधिः। नमस्कारविधिः। शिवपूजायामुद्डुखलमावश्यकमितिनिरूपणं। निर्म्माल्यग्रहणविधिः। प्रसादग्रहणाधिकारिनिरूपणं। लिङ्गनिर्म्माणादिविधिः। लिङ्गस्थापनविधिः। तत्र शूद्रस्य नाधिकार इति निरूपणं। प्रतिष्ठाकालादिनिरूपणं। लिङ्गप्रतिष्ठाप्रयोगकीर्त्तनं। जीर्णोद्धारविधिः। अत्र प्रयोगकथनञ्च। लक्षपार्थिवलिङ्गप्रक्रियाकथनं। काम्यपूजाविधिः। शैवव्रतविधिः। उद्यापनविधानकथनञ्च। बौधायनोक्तनित्यपूजाविधानकीर्त्तनं। स्त्रीशूद्रयोर्नाममन्त्रेण पूजाविधानं। पूजाव्यतिक्रमे प्रायश्चित्तकीर्त्तनञ्च।

No. 1945. पलपीयूषलता ।

Substance, country-made paper, 11, × 4 inches. Folia, 6. Lines, 5 on a page. Extent, 95 s'lokas. Character, Maithilí. Date, ? Place of deposit, Naḍuyár-grám, Post Madhubani, Darbhángá, Paṇḍit Maṇiláala Jhá. Appearance, old. Prose and verse. Correct.

Pala-píyúsha-latá. A treatise on the canonical use of flesh-meat. By Madanamanohara, Mahámahopádhyáya, son of Madhusúdana, Mahámahopádhyáya, Paṇḍitarája. The work is divided into seven chapters fancifully named stavakas or "clusters of flowers." Contents: I, Propriety of offering flesh-meat to gods and the manes,—it ensures the fourfold blessing,—impropriety of guests not accepting flesh-meat. II, Patina, rohita, and other kinds of fish fit for use. III, Turtles, sheep, &c., fit for food; opinion that sheep is fit for offering to Párvatí. IV, pigeons, peacocks, wild fowl, larks, dadhigríva, partridges and other land birds fit for food. Birds unfit for food, characteristics of kids fit for use. V, Spotted deer, black antelope, solid-hoofed boar, fit for food according to some; wild boars, though not solid-hoofed, fit for use; buffaloes fit for food in Nepal. VI, Characteristics of Várdhrínasa, castrated, white, old goat, and the kinds fit for food, meat of this animal especially fit for the gratification of Vishṇu. VII, Opinion that flesh-meat was fit for food only in former ages, refuted. Days when flesh-meat should not be used, philosophy of sacrifices.

Beginning. संसारतापहतये हृदये निधाय श्रीरामचन्द्रचरणद्वयमादरेण ।
वाक्यानि सम्यगवधार्य्य मनीश्वराणां मांसादिनिर्णयवचांसि विचारयामि ॥
येनाचारः सतामुक्तः सर्व्ववर्णाश्रमागतः ।
आद्योऽधिपः स लोकानामाज्ञा तस्याश्रितु पलम् ॥
तत्र यावन्मांसस्य दैवपित्र्यकर्म्मणि प्रतिपाद्यमानस्य पुरुषार्थचतुष्टये साधनत्वं वेदसिद्धं. पशूंश्चक्रे वायव्यानारण्या ग्राम्याश्च ये इत्यादि । तेन देवा अयजन्त इत्यन्तश्रुतेः । अग्नीषोमीयं पशुमालभेत । वायव्यं पशुमालभेत । इत्यादि ।

End. प्रवर्त्तको वापि निवर्त्तको वा जनस्य कस्याप्यहमस्मि यद्यपि ।
तथापि विद्यारसिकाः प्रयत्नमेनं समालोकयितु यतन्ताम् ॥

Colophon. इति महामहोपाध्यायपण्डितराजमधुसूदनात्मजमहामहोपाध्यायश्रीमदनमनोहररचितायाः पलपीयषलतायाः सप्तमः स्तवकः । गौरीपतिना लिखितमिदम् ॥

विषयः । प्रथमस्तवके,—दैवपित्र्यकर्म्मणि दीयमानस्य मांसादेः पुरुषार्थचतुष्टयसाधनत्व-कथनं। श्राद्धादौ निमन्त्रितस्य मांसाद्यभोजने निन्दार्थवादकथनञ्च ।

द्वितीयस्तवके,—पाठीनरोहितादिविहितमत्स्यनिरूपणं ।

तृतीयस्तवके,—कूर्म्ममेषादीनां भक्ष्यत्वकथनं। मेषस्तु पार्व्वत्य इति केषाञ्चिन्मत-कीर्त्तनञ्च ।

चतुर्थस्तवके,—चित्रग्रीवमयूरवनकुक्कुटादीनां स्थलचराणां पक्षिणां भक्ष्यत्व-कथनं। भारद्वाज-दर्भिग्रीव-चकोरादीनां स्थलचराणां भक्ष्यत्वकथनं। निषिद्ध-पक्षिनिरूपणं। विहितच्छागनिरूपणञ्च ।

पञ्चमस्तवके,—चित्रमृग-कृष्णसार-एकशफवराहाणां भक्ष्यत्वनिरूपणं। आरण्य-वराहोऽपि भक्ष्य इति केषाञ्चिन्मतकथनञ्च। नेपालदेश एव महिषो भक्ष्यः नान्यत्रेतिनिरूपणं ।

षष्ठस्तवके,—वार्श्रीणसलक्षणकथनपूर्व्वकं तस्य भक्ष्यत्वकीर्त्तनं। अस्य विष्णुप्री-तिजनकत्वकथनञ्च ।

सप्तमस्तवके,—मांसादिभक्षणविधिर्युगान्तरीय इति मतखण्डनं। मांसभक्षणादौ निषिद्धदिनकथनं। वैधहिंसाविवेचनं ।

No. 1946. शान्तिरत्नम् ।

Substance, country-made paper, 12 × 4 inches. Folia, 22. Lines, 6 on a page. Extent, 354 s'lokas. Character, Nágara. Date, Sm. 1915. Place of deposit, Naváni-grám, Post Mádhepurá, Darbhángá, Pandit Lála Jhá. Appearance, new. Prose and verse. Generally correct.

S'ántiratna. Rules for the reading of the Chaṇḍí section of the Márkaṇḍeya Puráṇa. By Kamalákara Bhaṭṭa, son of Rámakrishṇa, grandson of Ráyaṇa Bhaṭṭa, great-grandson of Rámes'vara Bhaṭṭa.

Beginning. नत्वा सीतापतिं रामं भवाब्धितरणे तरिम् ।
गृहस्थानां हितार्थाय शान्तिरत्नं वितन्यते ॥
अथ वाराहीतन्त्रे,—चण्डीपाठे फलं देवि शृणुष्व गदतो मम ।
संकल्पपूर्व्वं संपूज्य न्यस्याङ्गेषु मनून् क्रमात् ॥
पठनाद्बलिदानाद्धि सिद्धिमाप्नोति साधकः । इत्यादि ।

End. विशेषस्तु मत्कृतनिर्णयसिन्धौ नवरात्रनिर्णये ज्ञेयः ।

श्रीमन्नारायणाख्यात् समजनि विबुधो रामकृष्णाभिधान-
स्तत्सूनुः सर्व्वविद्याजलनिधिजिचुलीकारतः कुम्भजन्मा ।
दृष्ट्वा नानानिबन्धान् व्यरचयदतुलं ग्रन्थमन्याकराख्यः (?)
पित्रोः पादाब्जभृङ्गो रघुपतिपदयोः संश्रयं प्राप्य यत्नात् ॥
यो भाट्टतन्त्रगहनार्णवकर्णधारः शास्त्रान्तरेषु निखिलेषु च मर्म्मवेत्ता ।
यो ऽत्र श्रमोऽस्ति विहितः कमलाकरेण प्रीतोऽमुनास्तु सुकृती बुधरामकृष्णः ॥

Colophon. इति श्रीमत्पदवाक्यप्रमाणपारीणरामेश्वरभट्टसूनुनारायणभट्टसुतसीमन्तकरामकृ-
ष्णभट्टात्मजकमलाकरभट्टकृतं शान्तिरत्नं समाप्तम् । शुभमस्तु । संवत् १९१५ ।

विषयः । चण्डीपाठविधिकथनं । तत्र पूजाविधिकथनं । पूजापद्धतिकथनञ्च ।

No. 1947. जयलक्ष्मीः ।

Substance, country-made paper, 15 × 5 inches. Folia. 130. Lines, 11 on a page. Extent, 5,137 s'lokas. Character, Nágara. Date, ? Place of deposit, Naváni-grám, Post Mádhepurá, Darbhángá, Paṇḍit Lála Jhá. Appearance, new. Prose. Slightly correct.

Jayalakshmí. A commentary on the Svarodaya—a work on divination by the voice. By Harivañsa Kavi.

Beginning. नतिं कृत्वा गणेशाय विघ्नविध्वंसहेतवे ।
निर्व्विघ्नकृतिनाशाय कमलापतये नमः ॥
हरिवंशकविः स्वार्थे न परार्थे स्वरोदये ।
व्याख्यानं मातृकादीनां स्वराणां नामजन्मनां ॥
गुरुभ्यो बहुधा श्रुत्वा यथाज्ञानं दयाधिया ।
जयलक्ष्मीर्मया टीका राज्ञीतुल्या विरच्यते ॥
अथ कविर्वाक्स्वरूपं ब्रह्म नमस्करोति । अयतामिति । अयतां कञ्चरणादि-
मितकृष्णादिरचितं । इत्यादि ।

End. फुल्लपद्मजवाजातिपुष्पाणि सितसर्षपाः ।
मध्वाज्यमिश्रितं स्नानं जीवस्य मुनिभाषितम् ॥

Colophon. इति श्रीहरिवंशकविविरचिता स्वरोदयटीका जयलक्ष्मीः समाप्ता ।

विषयः । स्वरोदयाभिधानज्योतिर्निबन्धस्य व्याख्यानम् ।

No. 1948. आह्निकसंक्षेपः ।

Substance, country-made paper, 12 × 4 inches. Folia, 10. Lines, 6 on a page. Extent, 175 s'lokas. Character, Maithilí. Date, ? Place of deposit, Naváni-grám, Post Mádhepura, Darbháñgá, Paṇḍit, Lála Jhá. Appearance, fresh. Prose and verse. Correct.

A'hnika-saṅkshepa. A summary of the rituals for daily worship according to the rules of the Yajur Veda. By Vámadeva Upádhyáya, compiled for the use of Lálá Ṭhakkura.

Beginning. आराध्य हरिपादाब्जं वामदेवेन धीमता ।
आह्निकं लिख्यते लालाठक्कुरस्य प्रमोदकं ।
ब्राह्मे मुहूर्त्ते उत्थाय नेत्रे मुखञ्च प्रक्षाल्य मधुसूदनं चिन्तयेत् । तद्यथा —
प्रातः स्मरामि भवभीतिमहार्त्तिशान्त्यै नारायणं गरुडवाहनमब्जनाभम् ।
ग्राहाभिभूतवरवारणमुक्तिहेतुं चक्रायुधं तरुणवारिजपत्रनेत्रम् ॥ इत्यादि ।

End. ऋतुगमनेन च प्रीतः स्नानेन पत्नी आचमनमात्रेण शुद्ध्यति ।

Colophon. इति शत्रुमर्द्दनहरिपरायणश्रीवामदेवोपाध्यायविरचितः श्रीलालाठक्कुरप्रमोदक-
आह्निकसंक्षेपः समाप्तः ॥

विषयः । यजुर्वेदिनां संक्षेपेण आह्निककृत्यनिरूपणम् ।

No. 1949. यवनजातकम् ।

Substance, country-made paper, 12 × 5 inches. Folia, 24. Lines, 8 on a page. Extent, 461 s'lokas. Character, Maithilí. Date, ? Place of deposit, Naváni-grám, Post Mádhepura, Darbháñgá, Paṇḍit, Lála Jhá. Appearance, fresh. Verse. Correct.

Yavana-játaka. On horoscopy for women. Anonymous.

Beginning. श्रीभारतीं गणपतिं रविचन्द्रभौमसौम्येन्द्रपूज्यभृगुभास्करिराहुकेतून् ।
नत्वा जनार्दनपितामहशङ्करांश्च रम्यं पुरन्ध्रिजननस्य फलं करोति ॥
तथायनफलम् । ऐश्वर्य्यसन्ना + + कान्तिस्तनुः सन्तोषयुक्ता मितधीः सुवेशा ।
नारी सदाचाररता प्रसन्ना सौम्यायने चन्द्रमुखी सुशीला ॥ इत्यादि ।

End. सौभाग्ययोगे + विद्याङ्गना चेत् सदा भवेत् सज्जनधर्म्मपत्नी ।
य + + योगैरथ वानुभूतैः सा राजपत्नी जनिता पुरन्ध्री ॥

Colophon. इति यवनजातके स्त्रीजातकयोगाध्यायः । शुभमस्तु ।

विषयः । स्त्रीणां जातकनिरूपणम् ।

No. 1950. साधकसर्व्वस्वम् ।

Substance, country-made paper, 12 × 5 inches. Folia, 16. Lines, 7 on a page. Extent, 249 s'lokas. Character, Nágara. Date, ? Place of deposit, Naváni-grám, Post Mádhepurá, Darbháṅgá, Paṇḍit Lála Jhá. Appearance, new. Prose and verse. Incorrect.

Sádhakā-sarasva. Rituals for the worship of Vaṭukabhairava. By Prúnanátha, of Málava.

Beginning. श्रीदेव्युवाच । भगवन् देवदेवेश रहस्यं वटुकस्य मे ।
ब्रूहि येन वशीकुर्य्युः साधका भैरवं शिवम् ॥
श्रीशिव उवाच । शृणु देवि परं गोप्यं कथयामि शुभानने ।
रहस्य सिद्धिदं साचाद् वटुकस्य महात्मनः ॥ इत्यादि ।

End. त्रिवारं प्रोच्चयेद् विद्वान् देवशुद्धिरितीरिता ।
पञ्चशुद्धिं विधायेत्थं पश्चाद् यजनमाचरेत् ॥

Colophon. इति श्रीमालवीयप्राणनाथरचिते साधकसर्व्वस्वे द्वितीयः परिच्छेदः समाप्तः ।
शुभमस्तु ।

विषयः । १ मे परिच्छेदे वटुकस्य वीरसाधनविधिकथनं । तत्र प्रयोगकथनञ्च । वटुकभैरवस्य दीपविधिकथनं । मुद्राविधिकीर्त्तनं । २ ये परिच्छेदे,—आसनादिनिरूपणं । पञ्चशुद्धिविधिकीर्त्तनञ्च ।

No. 1951. कुसुमाञ्जलिप्रकाशप्रकाशिका ।

Substance, country-made paper, 12 × 4 inches. Folia, 50. Lines, 21 on a page. Extent, 5,250 s'lokas. Character, Maithilí. Date, Sk. 1715. Place of deposit, Naduyára-grám, Post Madhubaní, Darbháṅgá, Paṇḍit Kanṭu Jhá. Appearance, fresh. Prose. Correct.

Kusumáñjali-prakás'a-kás'iká. A gloss on the commentary of Vardhamána, on the Kusumáñjali of Udayana. By Bhagíratha Ṭhakkura. The work of Udayana has been edited and translated into English by Dr. E. B. Cowell.

Beginning. भावयद्भक्तजनताचेतःकमलकोरकान् ।
वन्दे सन्देहतिमिरविच्छेदनिहिरं महः ॥

यः कैशोरे विश्वविख्यातकर्म्मा वर्म्माचार्य्यः श्रीमहादेवशर्म्मा ।
तत्सोदर्य्यो वर्द्धमानस्य सूक्तौ भावं मेघः सम्यगाविष्करोति ॥
कामद इति । कामः काम्यं काम्यत इति कर्म्मव्युत्पत्त्या । अथ च कामं कन्दर्प
दहन्नपि कामद इति विरोधद्योतनायापि । ज्ञानमय इत्यभिव्याप्तौ मयट यथा
जलमयो देश इत्यत्र व्याप्तिश्च देशकालाभ्यां । इदञ्चेशस्य ईश्वराभिन्नत्वपक्षे ।
अन्यथा शिवस्य संसारित्वेनानुपपत्तेः । स्थाणुः स्थिरः । स्थाणुर्दारुविशेषो ज्ञानमय
इति विरोधद्योतनायापि—इत्यादि ।

End. किञ्चित् प्रवक्तृकेति । सातत्यं प्रशब्दार्थ इति नाध्यापकेनार्थान्तरमिति ध्येयम् ॥
धीरा धरणिभवानी यमजनि चन्द्रात् भगीरथं तनयम् ।
तस्य कृतावेतस्यां सन्तः सन्तोषमाचरत ॥
आसीदनुपमः पृथ्व्यां महादेवः कुलाग्रणीः ।
अनुजस्तस्य कृतवान् इमां व्याख्यां भगीरथः ॥

Colophon. इति महामहोपाध्यायठक्कुरश्रीभगीरथविरचिता कुसुमाञ्जलिप्रकाशप्रकाशि-
का समाप्ता ।
शाके वाणधराधराधरधरासम्भासिते कार्त्तिके
मासेऽक्षीणपयोज + + विलसत्पक्षे हरेः सत्तिथौ ।
गीर्व्वाणेज्यदिने व्यलीलिखदिदं श्रीरूपनाथः सुधीः
स्वार्थं श्रीमति सर्व्वसीम्नि सुधियां मोदाय नत्वा हरिम् ॥

विषयः । वर्द्धमानेन उदयनाचार्य्यकृतकुसुमाञ्जलिप्रकरणस्य प्रकाशाभिधेया या कृता
व्याख्या तस्या व्याख्यानम् ।

No. 1952. ज्ञानप्रदीपः ।

Substance, country-made yellow paper, 12 × 3½ inches. Folia, 38. Lines, 6 on a page. Extent, 555 s'lokas. Character, Nágara. Date, Sm. 1916. Place of deposit, Navání-grám, Post Mádhepurá, Darbhâṅgá, Paṇdit Lála Jhá. Appearance, new. Verse. Generally correct.

Jnána-pradípa. A set of questions and answers on the elements of astronomy and astrology. Author's name not known.

Beginning. श्रीमद्गङ्गाधरसुतं चन्द्ररेखावतं सितम् ।
सिद्धिदं सर्व्वविद्यानां वन्दे दन्तावलाननम ।

ज्ञानप्रदीपकं नाम शास्त्रं लोकोपकारकम् ॥
प्रश्नादर्शं प्रवक्ष्यामि सर्व्वशास्त्रानुसारतः ॥
भूतभव्यवर्त्तमाने शुभाशुभनिरीक्षया ।
पञ्चप्रकारमार्गञ्च चतुष्केन्द्रबलाबलम् ॥
आरूढच्छत्रवर्गञ्च उदयादिबलाबलम् । इत्यादि ।

End. द्वितीये वा तृतीये वा शुक्रस्येन्दौ समागमः ।
अनेनैव क्रमेणैवं सर्व्वं वीक्ष्य वदेत् स्फुटम् ॥

Colophon. इति ज्ञानप्रदीपग्रन्थः समाप्तः ।

वषयः । (प्रश्नग्रन्थोऽयम्) तत्र ग्रहाणां मित्रनिर्णयकथनं । रिपुनिरूपणञ्च । तेषां बलाबलनिरूपणं । आरूढवक्रनिरूपणं । राशीनां छत्रनिरूपणं । स्त्रीपुरुषादिभेदकथनञ्च । प्रश्नलग्नादिनिरूपणं । ऋतुमूलादिज्ञानोपायकीर्त्तनं । जीवकाण्डकथनं । तत्र मनुष्यादिभेदज्ञानोपायकीर्त्तनं । चिन्तनविधिकथनञ्च । नष्टद्रव्यागमादिनिर्णयः । लाभालाभप्रश्नादिचिन्तनविधिः । रोगशान्त्यादिचिन्तनविधिः । स्वप्नकाण्डम् । कलहादिचिन्ता । पुत्रादिचिन्ता । शल्यादिचिन्तनं । दृष्ट्यादिचिन्तनं । सामान्यप्रश्नचिन्तनं । वाणिज्यादिचिन्तनं ।

No. 1953. शान्तिकल्पप्रदीपः, वा कृत्यपल्लवदीपिका ।

Substance, country-made paper, 9 × 3½ inches. Folia, 50. Lines, 10 on a page. Extent, 9,228 s'lokas. Character, Nágara. Date, Sm. 1851. Place of deposit, Naváni-grám, Post Mádhepura, Darbháñgá, Pandit Lála Jhá. Appearance, fresh. Prose and verse. Correct.

S'ántikalpa-pradípa alias *Kṛitya-pallava-dípiká.* A miscellany on expiations, magical incantations and witchcraft. By S'ríkrishṇa Vidyávagíśa Bhaṭṭáchárya. Contents, Characteristics of rites for expiations, and magical incantations. Appropriate seats for different castes when engaged in such rites; imprecations; how to overcome their malific influences; expiatory rites for curing fevers; incantations for bringing the dead to life; expiatory rites for curing colic and other diseases; incantations for attracting persons towards oneself; ditto for causing stolidity; ditto, for causing other injuries to enemies.

Beginning. कृत्यादेवीं नमस्कृत्य तथा त्रिपुरसुन्दरीम् ।
भद्रकालीञ्च देवेशीं तथा षट्कर्म्मदेवताम् ॥

श्रीकृष्णविद्यावागीशभट्टाचार्य्येण धीमता ।
क्रियते विदुषां प्रीत्यै कृत्यपल्लवदीपिका ॥
श्रोधाज्ज्वलन्तीं ज्वलनं वमन्तीं दृष्टिं दहन्तीं दितिजं ग्रसन्तीम् ।
भीमं नदन्तीं प्रणमामि कृत्यां रोरूयमाणां चुधयोग्रकालीम् ॥
उन्मत्तभैरवीतन्त्रम् फेत्कारी डामरी तथा ।
तथा च मालिनीतन्त्रे तेभ्यः कालोत्तरादपि ॥
सिद्धयोगेश्वरीतन्त्राद् योगिनीजालशावरात् ।
सर्व्वतन्त्रात् समाकृष्य षट्कर्म्मविधिरुच्यते ॥ इत्यादि ।

End. गवां सुवर्णनिष्काणां भूमिं वा शस्यशालिनीम् ।
सर्व्वशान्तिमवाप्नोति सर्व्वरचाकृतं भवेत् ॥

Colophon. इति श्रीकृष्णविद्यावागीशभट्टाचार्य्यकृतः शान्तिकल्पप्रदीपः समाप्तः । सं॰वत् । १८५१ । आषाढ़ शुदि ।

विषयः । शान्ति-वश्य-स्तम्भन-विद्वेषोच्चाटन-मारणानां लक्षणकथनं । तत्र वर्णादिभेदेन आसनादिनिरूपणं । अभिचारविधिकीर्त्तनं । तदुपशमनादिविधिकथनञ्च । ज्वरशान्तिविधिः । मृतसञ्जीवणीविधानं । शूलरोगादिशान्तिविधानं । आकर्षणविधिकथनं । स्तम्भनकर्म्मविधिः । एवं विद्वेषणादीनां विधानकीर्त्तनञ्च ।

No. 1954. योगरत्नमाला वृत्तिसहिता ।

Substance, country-made paper, 11 × 4 inches. Folia, 24. Lines, 12 on a page. Extent, 705 s'lokas. Character, Nágara. Date, Sm. 1895. Place of deposit, Naduyár-grám, Post Madhubaní, Darbhángá, Paṇdit Maṇiláḷa Jhá. Appearance, fresh. Generally correct.

Yoga-ratnamálá alias *A'scharya-ratnamálá.* Magical rites, incantations and sorcery. By Nagárjuna A'chárya, with a commentary composed in the Samvat year 1295 = A. D. 1238, by Guṇákara, a S'vetámbara Yati. Contents: Rites and incantations for bringing persons under one's control; injuring enemies; making them absent-minded; producing images of absent persons; making pictures cry; making oneself invisible; producing amusements; stopping the burning effect of fire; making water immoveable; producing hobgoblins; causing the falling of hairs; making arms innocuous; causing vagabondism; producing eclipses; bringing on frenzy; poisoning and its antidotes; jugglery

with balls; cure of quarternary fevers; exorcising devils; overcoming malific influences of demons; planets producing extraordinary lights; magic collyrium; moonlight; curing barrenness; producing sights of tigers; causing barrenness; multiplying objects; causing stoppage of several secretions; causing colic; causing leprosy; preventing longevity in cattle; causing abortion; blowing out lamps; cure for scorpion bites; preventing clouds from raining; producing magic pictures; jugglery with conch-shells; destroying the firmness of busts; causing shrinking of particular parts of the body; causing hemorrhage; producing magic pustules; causing blindness; causing disputes; disappearing from the sight of people; causing exudations to flow from the temples of fictile elephants; bringing on flowers and fruits on trees; converting milk into butter; converting whey into curds; bringing the dead to life; producing magic lights in darkness.

Beginning. वृत्तेः,— गुरुचरणकमलममलं प्रणम्य नागार्ज्जुनप्रणीतायाः ।
विवृतिं सुखावबुद्ध्यै वक्ष्येऽहं योगरत्नमालायाः ॥
इह शास्त्रारम्भे आचार्य्यनागार्ज्जुनपादाः शिष्टसमयपालनार्थं शास्त्रेोपादेयताञ्च
दर्शयितुं गुरुपादनतिं कुर्व्वन्तः प्रथममार्य्यामाहुः । विमलेति ।
मूलस्य,—विमलमतिकिरणनिकरप्रभिन्नमच्छिष्यकमलसंघाताः ।
सकलभुवनैकदीपा जयन्ति गुरुभास्करा भुवने ॥
स्पष्टाक्षरपदसूत्रैर्गुरुमतरत्नाकरात् समुद्धृत्य ।
ग्रथिता परिस्फुरन्ती निगद्यते योगरत्नमालेयं ॥ इत्यादि ।

End. मूलस्य,— आचार्य्ययोगरत्नमाला नागार्ज्जुनविरचितानुभवसिद्धा ।
सकलजनहृदयदयिता समर्पिता सूचनो जयति ॥ १४० ॥

Colophon. इति श्रीनागार्ज्जुनाचार्य्यविरचिता योगरत्नमाला समाप्ता ।
वृत्तेः,— आत्मस्मरणाय मया विवृता नागार्ज्जुनप्रणीतेयं ।
आश्चर्य्यरत्नमाला श्वेतनटद्वटीकान्तः ॥
श्रीनृपविक्रमसमये द्वादशनवषड्ङ्किते वर्षे ।
रचिता गुणाकरेण श्वेताम्बरभिक्षुणा विवृतिः ॥
इति सिद्धघटीयश्वेताम्बरपण्डितश्रीगुणाकरविरचिता नागार्ज्जुनप्रणीतयोगरत्न-
मालावृत्तिः समाप्ता। संवत् १८९५ । आश्विन सुदि ।

विषयः । वशीकरणविधिकथनं । विद्वेषणविधिः । उच्चाटनविधिः । रूपदर्शनविधिः । चित्र-
रोदनविधिः । अन्तर्द्धानविधिः । कुतूहलजननविधिः अग्निस्तम्भनविधिः ।

जलस्तम्भनविधिः । पिशाचीकरणविधिः । लोमशातनविधिः । शस्त्रस्तम्भविधिः । देशान्तरभ्रमणविधिः । अकालग्रहणदर्शनविधिः । आवेशविधिः । विषप्रयोगविधिः । विषापहारविधिः । गुटिकासिद्धिकथनं । चातुर्थिकज्वरापहारविधिः । भूतनाशनविधिः । ग्रहमोचनविधिः । ज्योतिर्दर्शनविधिः । अञ्जनविधिः । ज्योत्स्नाविधिः । बन्ध्यापुत्रजननविधिः । आम्रदर्शनविधिः । बन्ध्याकरणविधिः । वृद्धिकरणविधिः । शुक्रस्तम्भनविधिः । स्थूलकरणविधिः । कुष्ठीकरणविधिः । काकघातोद्वेगकरणविधिः । गोधनजीवनविधिः । गर्भमोचनविधिः । दीपनिर्व्वाणविधिः । वृश्चिकविषापहरणविधिः । मेघादिजलस्तम्भविधिः । पटगतचित्रदर्शनविधिः । शत्रुमृत्य्वाकर्षणविधिः । कुचनाशनविधिः । अङ्गविशेषसङ्कोचनविधिः । रक्तप्रवाहनविधिः । रात्रिमोहनधूपविधिः । अन्धीकरणविधिः । कलहकरणविधिः । अन्तर्द्धानविधिः । स्तम्भगजसदविधिः । द्रुमफलपुष्पाकर्षणविधिः । दुग्धस्य घृतापादनविधिः । तक्रस्य दधिकरणविधिः । मृतसञ्जीवनविधिः । नारीपुरुषगुह्यबन्धमोचविधिः । आसनबन्धविधिः । अन्धकारे ज्योतिर्दर्शनविधिः ।

No. 1955. बालविवेकिनी ।

Substance, country-made paper, 12 × 8 inches. Folia, 16. Lines, 6 on a page. Extent, 360 s'lokas. Character, Maithili. Date, ? Place of deposit, Naduyára-grám, Post Madhubaní, Darbhángá, Pandit, Manilála Jhá. Appearance, fresh. Prose. Correct.

Bálavivekiní. A commentary on Kálidása's S'rutabodha—a manual of versification. By Tárachandra, a Káyastha.

Beginning. यत्स्मृत्यैव समस्तदुःखशमनं सम्पद्यते देहिनां
यत्पादाब्जरजोजुषो न पुनरावृत्तिं लभन्ते जनाः ।
यत्कीर्त्तिर्विमलीकरोति विमला गङ्गेव लोकत्रयं
तं श्रीवल्लभमम्बुजाक्षमनघं वन्देऽनवद्यं गुरुम् ॥
ताराचन्द्राभिधेयेन बालव्युत्पत्तिहेतवे ।
क्रियते श्रुतबोधस्य टीका बालविवेकिनी ॥
छन्दोज्ञानं कथं मे स्यादिति कयातिप्रियतमया परिपृष्टस्य कालिदासस्य श्रुतच्छन्दोग्रन्थोक्तौ प्रवृत्तिस्तामेवाह छन्दसामिति । तां प्रत्यग्रे वक्ष्यमाणानां काव्यादिषु लोकप्रसिद्धानामार्य्यादीनां छन्दसां लक्षणमहं संप्रवक्ष्यामीत्यन्वयः । इत्यादि ।

End. व्याख्याने श्रुतबोधस्य गणवर्णविवेचनम्।
मत्कृतं तेन मे कृष्णः परमात्मा प्रसीदतु ।

Colophon. इति कायस्थकुलालङ्कारताराचन्द्रकृता श्रुतबोधटीका बालविवेकिनी समाप्ता ।

विषयः । कालिदासकृतश्रुतबोधाभिधानच्छन्दोग्रन्थस्य व्याख्यानम् ।

No. 1956. आचारादर्शः ।

Substance, palm-leaf, 13 × 2½ inches. Folia, 109. Lines, 5 on a page. Extent, 2,430 s'lokas. Character, Maithilí. Date, ? Place of deposit, Pilkhoyáḍ-grám, Post Madhubaní, Darbhángá, Paṇḍit Bábu Jhá; another copy at Magrání-grám, Post Madhubaní, Zillah Darbhángá, Paṇḍit Chhoṭi Jhá; another copy at Benares, Bábu Haris'chandra. Appearance, old. Prose and verse. Correct.

A'chárádars'a. A digest of daily religious and *quasi* religious duties. *A'chára.* By S'rídatta, Mahámahopáddhyáya. It includes all the leading topics of A'chára. A commentary on this work had been noticed under No. 1914 (*ante*, p. 233).

Beginning. दीक्षितो रणयज्ञेषु विबुधानन्ददायिषु ।
हरिरब्धिसुतावक्त्रसोमपीती पुनातु वः ॥
अहोरात्राश्रितो धर्म्म इह वाजसनेयिनां ।
निबध्यते निबन्धो यो धर्म्मशास्त्रनिबन्धृभिः ॥
तत्र मनुः । ब्राह्मे मुहूर्त्ते बुध्येत धर्म्मार्थौ चानुचिन्तयेत् । इत्यादि ।

End. समूलवचनाभोगो मीमांसान्यायनिर्म्मलः ।
श्रीदत्तेन सतामेष आचारे दर्पणः कृतः ॥
दुरुक्तमपि सूक्तं मे मन्वादिवचनाश्रितं ।
अपि चर्म्मोदकं तीर्थसलिलान्तर्गतं शुचि ॥

Colophon. इति श्रीमहामहोपाध्यायश्रीदत्तकृत आचारादर्शः समाप्तः ।

विषयः । प्रातःकृत्यनिरूपणं । तत्र मूत्रपुरीषोत्सर्गविधिकथनं । शौचविधिकथनं । आचमनविधिकथनं । आचमननिमित्तकथनं । द्विराचमननिमित्तकथनं । आचमनानुकल्पविधिकथनं । आचमनापवादकथनं । दन्तधावनविधिकथनं । प्रातःस्नानादिविधिकथनं । अचिरोदितसूर्य्यदर्शनमाहात्म्यादिकथनं । केशप्रसाधनादिविधिकथनं । शुभाशुभदर्शनफलकीर्त्तनं ।वामनब्राह्मणादिदर्शने नमस्कारकर्त्त-

व्रताकथनं। वेदपाठादिविधिकथनं। विशेषेण स्नानविधिकथनं। सरोवरादौ स्नाने फलविशेषकथनं। नदीलक्षणादिकथनं। नैमित्तिकस्नानविधिकथनं। अस्पृश्यस्पर्शने स्नानविधानं। काम्यस्नानविधिः। कात्यायनोक्तस्नानप्रयोगकथनं। सन्ध्योपासनविधिकथनं। जपादिविधिकथनं। कुशनिरूपणं। तदाहरणकालादिनिर्णयश्च। उपवीतादिविधिकथनं। तर्पणविधिकथनं। जीवत्पितृकेनापि यमतर्पणपर्य्यन्तं कर्त्तव्यमितिनिरूपणं। देवतर्पणादिविधिकथनं। कात्यायनोक्ततर्पणप्रयोगकथनं। तर्पणोत्तरकर्म्मनिरूपणं। पूजादिप्रकारकथनं। देवपूजायां पूजाधारादिनिरूपणं। पुष्पधूपादिनिरूपणं। वैश्वदेवबलिकर्म्मविधिकथनं। पञ्चयज्ञविधिकथनं। नित्यश्राद्धविधिकथनं। तत्प्रयोगकथनञ्च। भिक्षादानादिविधिकथनं। अतिथिपूजादिविधिकथनं। भोजनविधिकथनं। पङ्क्तिभोजनविधिकथनं। भोजनोत्तरकर्म्मनिरूपणं। शयनविधिकथनं। दारोपगमनविधिकथनञ्च।

No. 1957. शारीरकमीमांसान्यायसंग्रहः।

Substance, country-made paper, 12 × 4 inches. Folia, 5. Lines, 6 on a page. Extent, 1,139 s'lokas. Character, Nágara. Date, ? Place of deposit, Pilkhoryád-grám, Post Madhubaní, Darbhángá, Paṇḍit, Bábu Jhánjhá. Appearance, old. Prose, Correct.

S'áríraka-mímáṅsá-nyáya-saṅgraha. An epitome of the Vedánta doctrine, explaining briefly the leading topics of the different Adhikaraṇas, and supplying all the *pros* and *cons.* By Prakásátma Yati.

Beginning. अथातो ब्रह्मजिज्ञासा। प्रणम्य प्रणतार्त्तीनां हर्त्तारं विष्णुमव्ययं।
शारीरकस्य संक्षेपात् क्रियते न्यायसङ्ग्रहः॥
अत्र विधिः खलु सर्व्वत्र विशिष्टकार्य्यन्यतोऽप्राप्तविषयतत्साध्यफलानुबन्धत्रयमपेक्ष्य प्रवृत्तिपर्य्यन्तो भवति। इत्यादि।

End. तस्मात् कार्य्यब्रह्मप्राप्तिः सगुणविद्याविषयिकेयमिति सिद्धं॥

Colophon. इति श्रीभगवत्प्रकाशात्मविरचिते शारीरकमीमांसान्यायसङ्ग्रहे चतुर्थाध्यायस्य। चतुर्थः पादः। समाप्तोऽयं ग्रन्थः॥

विषयः। ब्रह्मसूत्रशङ्करभाष्यीयपूर्व्वपक्षोत्तरपक्षाधिकरणप्रतिपादितानामनेकसूत्राणां मध्ये तत्तदधिकरणप्रथमसूत्रपरिग्रहपूर्व्वकं संक्षेपेण समस्ताधिकरणार्थनिरूपणं।

No. 1958. द्वैतनिर्णयप्रकाशः ।

Substance, palm-leaf, 12 × 2 inches. Folia, 107. Lines, 5 on a page. Extent, 2,153 s'lokas. Character, Maithilí. Date, ? Place of deposit, Pilkhoyáḍ-grám, Post Madhubaní, Darbhángá, Paṇḍit Bábu Jhánjhá. Appearance, old. Prose and verse. Correct.

Dvaitanirṇaya-prakás'a. A commentary on Váchaspati Mis'ra's work on duality, named Dvaitanirṇaya. By Madhusúdana Miśra, Mahámahopádhyáya.

Beginning. चलानप्यचलीकुर्व्वन्नचलानपि चालयन् ।
वृन्दावनविहारी स्तात् तापहारो हरिर्मम ॥
इति पादस्य रसेनेति । शब्दानामौत्सर्गिकपरत्वमित्यादिपदसमभिव्याहारेण उपाह्वाते गौरित्यादौ स्वरूपपरत्वस्य निरूढ़त्वादिति भावः । इत्यादि ।

End. उपनयनकालनिर्णयः स्मार्त्तवार्णे,—इष्ट्या तदुत्तरेतिरत्नाकरलिखनान्न इष्टिदिनं निषिद्धमिति गम्यते ॥

Colophon. इति महामहोपाध्यायश्रीमधुसूदनमिश्रकृतो द्वैतनिर्णयप्रकाशः समाप्तः ।

विषयः । वाचस्पतिमिश्रकृतद्वैतनिर्णयस्य व्याख्यानं, तदनुक्तांशनिरूपणञ्च ।

No. 1959. मीमांसापल्लवं ।

Substance, country-made paper, 11 × 4 inches. Folia, 65 Lines, 7 on a page. Extent, 1,680 s'lokas. Character, Maithilí. Date, Sk. 1667. Place of deposit, Pilkhoyáḍ-grám, Post Madhubaní, Darbhángá. Paṇḍit Bábu Jhánjhá. Appearance, old. Prose. Correct.

Mímáṅsá-pallava. A dissertation on the philosophy of religious rites. By Indrapati, Mahámahopádhyáya.

Beginning. जित्वा शङ्खसुरद्विषं धृतवते वेदान् निमग्नां धरा-
मुद्धर्त्तुं कमठाकृतिं कृतवते कोलाकृतिं कुर्व्वते ।
देवारातिहिरण्यदैत्यदलने मैत्रीं तनुं बिभ्रत
विद्वद्भार्गववाङ्कजाकृतिकृते तुभ्यं नमः श्रीपते ।
सिद्धान्तसन्तानमधीत्य जैमिनेर्गोपालभट्टस्य गुरोः सकाशात् ।
संक्षेपतस्तालनमात्रमर्षां नत्वा शिवामिन्द्रपतिः करोति ॥

यं लेभे रुक्मिणी देवी स्तूरेशचिपतेः सुतं।
स तनोति शिवं नत्वा मीमांसारसपल्वलं॥
अविवेको मिथिलायां शिशुरेको धीरमर्थयति।
बालकखेलनहेलनबुद्ध्या कोपो मयि त्याज्यः॥
इह खलु त्रिविधा विषयो भवन्तीति। इत्यादि।

End. तथा च तत्र रागप्राप्तनिषेधवत् भ्रान्तिप्राप्तस्य बाधमङ्गीकृत्य न विकल्प इति।

Colophon. इति महोपाध्यायश्रीमदिन्द्रपतिकृतं मीमांसापल्वलं समाप्तं। शाके १६६७।

विषयः। विधिस्वरूपविवेचनं। श्रुति-लिङ्ग-वाक्य-प्रकरण-स्थान-समाख्यानां स्वरूपादिनिरूपणं। मन्त्राणामर्थप्रकाशकत्वं शक्त्यैव न तु लक्षणयेतिनिरूपणं। स्तोत्राणामदृष्टार्थकत्वनिरूपणं। ऊहविवेचनं। आवाहनमन्त्रादावनूहकथनं। व्रत-श्राद्ध-याग-इष्टि-दान-स्नान-पूजादीनां प्रकृतिकथनं। एकादशीप्रसङ्गेन काम्योपवासक्रमकीर्त्तनं। अधिकाराकाङ्क्षाभेदेन द्विविधप्रकरणनिरूपणं। पार्व्वणश्राद्धप्रकृतिविवेचनं। द्रव्यगुणादीनां विरोधे द्रव्यादीनामुपादेयत्वनिरूपणं। सोमयागप्रकृतिविवेचनं। इच्छोत्सर्गेतिकर्त्तव्यताचिन्तनं। निषेधनिरूपणं। परिसंख्यानिरूपणं। प्रधानस्य विकल्पनिरूपणं। तस्य अनुकल्पचिन्तनञ्च। प्रधानाङ्गयोः सङ्कोचेन विरोधपरीहारसम्भवे अङ्गसङ्कोचस्यैव उचितत्वकथनं। उद्देश्यविधेयतादिविवेचनं। श्रुतिलिङ्गादीनां बलाबलनिरूपणं। अतिदेशनिरूपणञ्च।

No. 1960. दिव्यदीपिका।

Substance, country-made paper, 14 × 4 inches. Folia, 20. Lines, 6 on a page. Extent, 600 s'lokas. Character, Maithili. Date, Sk. 1694. Place of deposit, Pilkhoyáḍ-grám, Post Madhubani, Darbhángá, Paṇḍit Bábu Jhánjhá. Appearance, old. Prose and verse. Correct.

Divya-dípiká. A digest of the laws regarding oaths, affirmations, and ordeals. By Dámodara Ṭhakkura. The work was compiled under the auspices of Muhammad Shah.

Beginning. श्रीमन्महम्मदभूपाललब्धमानेन सर्व्वदा।
दामोदरेण क्रियते दिव्यानामत्र निर्णयः॥
तत्र याज्ञवल्क्यः। तुलाग्न्यापो विषं कोशो दिव्यानीह विशुद्धये। इत्यादि।

End. नाष्टम्याञ्च चतुर्द्दश्यां प्रायश्चित्तपरीक्षणम्।

न परीक्षाऽधिमासे च शनिभौमदिने भवेत् ॥

Colophon. इति दामोदरठक्कुरकृता दिव्यदीपिका सम्पूर्णा । शाके १६६४ ।

विषयः। साहसाभियोगे, धनाभियोगे, पातकाभियोगे च दिव्यविधानकीर्त्तनं। शीर्षकावष्टम्भादीनां लक्षणादिकथनं। तत्र महाभियोगे शुद्धिदानेच्छायां शिरोवादं विनापि दिव्यकरणावश्यकताकथनं। अपराधविशेषे तण्डुलकोषादिप्रयोगविधिकीर्त्तनं। सर्व्वदिव्यसाधारणेतिकर्त्तव्यताकथनं। वर्णविशेषेण परीक्षाविशेषविधिकथनं। तुलादौ प्रत्येकमितिकर्त्तव्यतानिरूपणं। वर्णविशेषेण परीक्षास्थानादिनिरूपणं। परीक्षाविषये प्राड्विवाककृतकथनं। अनल-विष-कोश-तण्डुल-तप्तमाषादिना परीक्षाप्रकारकथनं। धर्म्माधर्म्मपरीक्षाविधिकथनं। फालविधिकथनं। विविधशपथविधिकथनं। परीक्षादिकालनिरूपणञ्च।

No. 1961. पदार्थधर्म्मसङ्ग्रहः ।

Substance, country-made paper, 12 × 4 inches. Folia, 40. Lines, 7 on a page. Extent, 949 s'lokas. Character, Maithilí. Date, ? Place of deposit, Pilkhoyáḍ-grám, Post Madhubaní, Darbháñgá, Paṇdit Bábu Jhánjhá. Appearance, new. Prose. Correct.

Padártha-dharma-saṅgraha. An elementary exposition of the categories of the Vaiśeshika doctrine. By Prasastapáda. This work is distinct from the author's commentary on the Vaiśeshika Aphorisms which is popularly called *Prasastapáda-bháshya*, or *Dravya-bháshya.*

Beginning. प्रणम्य हेतुमीश्वरं मुनिं कणादमन्वतः ।
पदार्थधर्म्मसङ्ग्रहः प्रवक्ष्यते महोदयः ॥
द्रव्यगुणकर्म्मसामान्यविशेषसमवायानां षण्णां पदार्थानां साधर्म्म्यवैधर्म्म्याभ्यां तत्त्वज्ञानान्निःश्रेयसाधिगमः। तच्चेश्वरचोदनाभिव्यक्ताद्धर्म्मादेव। अथ के द्रव्यादयः पदार्थाः किञ्च तेषां साधर्म्म्यवैधर्म्म्यञ्चेति। इत्यादि।

End. तस्माच्चात्मवृत्तिरत एव चातीन्द्रियः सत्तादीनामिव प्रत्यक्षेषु वृत्त्यभावात् स्वात्मगतसम्वेदनाभावाच्च तस्मादिह बुद्ध्यनुमेयः समवाय इति सिद्धम्।

Colophon. समाप्तञ्च प्रबन्धाख्यं प्रकरणं कृतिरियं प्रशस्तपादपादानाम् ॥

विषयः। वैशेषिकसूत्रमवलम्ब्य द्रव्यगुणकर्म्मादीनां लक्षणकथनं। साधर्म्म्यवैधर्म्म्यादिनिरूपणञ्च।

No. 1962. पदार्थीयदिव्यचक्षुः ।

Substance, country-made yellow paper, 12 × 4 inches. Folia, 48. Lines, 8 on a page. Extent, 1,016 s'lokas. Character, Maithili. Date, ? Place of deposit, Pilkhoyáḍ-grám, Post Madhubaní, Darbháṅgá, Paṇḍit Bábu Jháṇjhá. Appearance, new. Prose. Correct.

Padárthíya-divya-chakshu. An elementary exposition of the categories of the Nyáya Philosophy. By Umápati Upádhyáya, son of Ratnapati Upadhyáya.

Beginning. रत्नावतीरत्नपत्योः पित्रोः पूर्व्वतपोबलात् ।
आतनोति पदार्थीयदिव्यचक्षुरुमापतिः ॥
द्रव्यगुणकर्म्मसामान्यविशेषसमवायाभावाः पदार्थाः सप्त । पृथिव्यप्तेजोवाय्वाकाश-
कालदिगात्ममनांसि द्रव्याणि नव । रूपरसगन्धस्पर्शसंख्यापरिमाणपृथक्त्वसंयोग-
विभागपरत्वापरत्वगुरुत्वद्रवत्वस्नेहसंस्कारशब्दबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्म्माधर्म्मा
गुणाश्चतुर्विंशतिः । इत्यादि ।

End. विभागनाशकतायाश्च विनिगमकस्य असम्भवेन सर्व्वैजात्यनानात्वेऽत्यन्तगौरवा-
दितिसंक्षेपः । इति द्रव्यनाशदर्शनं ।

Colophon. इति वेदवेदाङ्गपारगश्रीरत्नपत्युपाध्यायात्मजश्रीमदुमापति-उपाध्यायविरचितं
पदार्थीयदिव्यचक्षुः सम्पूर्णं ।

विषयः । द्रव्यगुणकर्म्मसामान्यविशेषसमवायाभावरूपसप्तपदार्थनिरूपणं । एतन्न्यूनाधिकत्व-
शङ्कानिरसनञ्च ।

No. 1963. द्रव्यकिरणावलीप्रकाशः ।

Substance, palm-leaf, 11 × 2 inches, Folia, 99. Lines, 6 on a page. Extent, 3,359 s'lokas. Character, Maithili. Date, L. S. 421. Place of deposit, Pilkhoyáḍ-grám, Post Madhubaní, Darbháṅgá, Paṇḍit Bábu Jháṇjhá. Appearance, old, decayed. Prose. Correct.

Dravya-kiraṇávalí-prakáśa. A commentary on Udayana A'chárya's Dravya-kiraṇávalí—a treatise on the Nyáya doctrine. By Vardhamána, Mahámahopádhyáya, son of Gaṅgeśvara.

Beginning. मिलन्मन्दाकिनीमञ्जीदामां मूर्ध्नि पुरद्विषः।
विश्ववीजाङ्कुरप्रख्यां वैधवीं तां कलां नमः॥
कर्त्तव्यविघ्नविघातकं रविनमस्कारं निवध्नाति। विद्येति। यदितिसामान्यतोऽपि कर्त्तृनिर्द्देशे विद्याऽविद्ययोः सन्ध्यारजनीभ्यां रूपणा + + + ता लभ्यते। विद्येव या पूर्व्वसन्ध्या तदुदयोद्रेकादविद्येव या रजनी ततक्षये सति यदुदेति उदयगिरिशिखरमधिरोहति। सन्ध्या च रात्रेर्न भागविशेषः। निरस्तैतद्द्वीपवर्त्तिरविरश्मिजालस्य कालविशेषस्य रात्रित्वात् सन्ध्यायाश्चात्र द्वीपे कतिपयतत्सत्त्वात्। अत एव रात्रिसन्ध्ययोः धर्म्मशास्त्रे पृथगभिधानं। इत्यादि।

End. यस्तर्कतन्त्रशतपत्रसहस्ररश्मिर्गङ्गेश्वरः सुकविकैरवकाननेन्दुः।
तस्मात्मतोऽतिगहनां किरणावलीं तां प्राकाशयत् कृतिमुदे बुधवर्द्धमानः॥

Colophon. इति महामहोपाध्यायश्रीगङ्गेश्वरात्मजमहामहोपाध्यायश्रीवर्द्धमानविरचितो द्रव्य किरणावलीप्रकाशः सम्पूर्णः इति। लसं ४२१।

विषय। उदयनाचार्य्यकृतद्रव्यकिरणावलीग्रन्थस्य व्याख्यानं।

No. 1964. कुमारव्याख्यासुधा।

Substance, palm-leaf, 11 × 2 inches. Folia, 190. Lines, 5 on a page. Extent, 3,198 s'lokas. Character, Maithilí. Date, ? Place of deposit, Pilkhoyáḍ-grám, Post Madhubani, Darbhángá, Paṇḍit Bábu Jhánjhá. Appearance, old, decayed. Prose. Correct.

Kumáraryákhyá-sudhá. A commentary on Kálidása's Kumárasambhava—an epic poem. By Raghupati. The commentary extends to the 8th canto of the work, though an opinion seems to prevail that Kálidása stopped his work at the close of the 7th canto.

Beginning.—— शिरः सञ्जातविघ्नगजटा
सम्यग्व्यूढ-नवीन + + + + + चन्द्रौषधीवासभूः।
सेवानम्रसुरेन्द्र + + मुकुटप्रत्युप्तरत्नत्विषि
प्रोद्भिन्नामलपद्मखावभिधरस्त्वां पातु गङ्गाधरः॥
+ + + + + विबुधैः कृतात्र टीका प्रसिद्धार्थनिरुक्तिरुच्चा।
इयन्तु गूढार्थविवेचनाय वितन्यते श्रीरघुणा प्रयत्नात्॥
परतोषविधौ इच्छा कृतिभिः क्रियते कृतिः।
अस्माकन्तु खलोद्वेगतज्जनाज्जनकारणं॥

इह तावत् सकलसुरसार्थे दुर्द्धर्षतारकाख्यमहासुरपराभूतत्रैलोक्यार्थकदर्थापनोदाय कुमारजन्म। तस्य च पार्व्वतीनन्दनत्वेन तस्या अपि हिमालयसुतात्वेन हिमालयादिवर्णनरूपवस्तुनिर्द्देशं महाकविचक्रचूड़ामणिः कालिदासमिश्रः कुमारसम्भवकाव्येन आरभते। तथा च दण्डी। सर्गबन्धो महाकाव्यमित्यादि प्रसिद्धमेव। सरस्वतीकण्ठाभरणेऽप्युक्तं। निर्द्दोषं गुणवत्काव्यमलङ्कारैरलङ्कृतं। — — — — — अस्तीति। उत्तरस्यां दिशि। इत्यादि।

End. श्लोकस्यास्य मालिनीच्छन्दः। तल्लक्षणञ्च। ननमयययुतेयं मालिनी भोगिलोकैः॥

Colophon. इति कुमारव्याख्यासुधायां श्रीरघुपतिविरचितायां सुरतवर्णना नामाष्टमः सर्गः सम्पूर्णः। शुभमस्तु।

विषयः। कालिदासकृतकुमारसम्भवकाव्यस्य अष्टमसर्गान्तं व्याख्यानं॥

No. 1965. प्रायश्चित्तप्रदीपः।

Substance, palm-leaf, 12 × 2 inches. Folia, 86. Lines, 5 on a page. Extent, 1,593 s'lokas. Character, Maithilí. Date, ? Place of deposit, Pilkhoyáḍ-grám, Post Madhubaní, Darbhángá, Paṇḍit Bábu Jháṇjhá. Appearance, old. Prose and verse. Correct.

Práyaśchitta-pradípa. A digest of the laws regarding expiations for various offences. By S'aṅkara Miśra, son of Bhavanátha Miśra, Mahámahopádhyáya. Contents: The philosophy of expiation. Differences in expiations on account of differences of age, sex and condition of offenders. Shaving off the hair of the head as an expiation, prohibited in the case of learned men. Rules for calculating the price of cattle when the gift of it is prescribed as an expiation but it cannot be had. Rules for the expiatory rite called Prájápatya. Expiation on the part of a Bráhmaṇ owner for the killing of cows. Observances enjoined for the day preceding the day of expiation. Expiation for the killing of pregnant cows. Expiation for accidental death of cows. Expiation for killing by one act more than one cow. Expiation for killing of one cow by several persons. Expiation for the death of cattle resulting from neglect in keeping them. Accusation of killing a cow. Expiation for selling cattle. Expiation for castrating cattle. Brief notes on expiations for killing Bráhmaṇs, drinking spirituous liquors, and other heinous offences. Expiation for eating forbidden food. Expiations for incestuous connexions. Time meet for expiations.

Beginning. ऊर्द्धबद्धजटाजूटक्रोड़क्रीड़त्सुरापगं ।
नमामि यामिनीकान्तकान्तभालस्थलं हरं ॥
अथ प्रायश्चित्तस्वरूपं निरूप्यते । तत्र हारीतः । प्रयतत्वाद्दोपचितमित्यादि ।

End. अत एव रात्रौ कथमपि प्रायश्चित्तं कर्त्तुं न शक्यते इति सुधीभिश्चिन्तनीयं ।

Colophon. इति महामहोपाध्यायमिश्रश्रीभवनाथात्मजमिश्रश्रीशङ्करकृतः प्रायश्चित्तप्रदीपः समाप्तः ।

विषयः । प्रायश्चित्तस्वरूपविवेचनं । बाल्यादिभेदेन प्रायश्चित्तविधिकथनं । विद्वदादीनां मूण्डनादिनिषेधः । धेनुमूल्यनिर्णयः । प्राजापत्यादिव्रतानिर्णयः । ब्राह्मणस्वामिकादिगोबधप्रायश्चित्तं । प्रायश्चित्तपूर्व्वकृत्यनिरूपणं । गर्भिण्यादिगोबधप्रायश्चित्तं । गवां निपातने प्रायश्चित्तकथनं । एकप्रयत्नकृतबहुगोबधप्रायश्चित्तकथनं । बहुकर्त्तृकैकगोबधप्रायश्चित्तं । अपालननिमित्तगोबधप्रायश्चित्तकथनं । गोबधापवादकथनं । गोविक्रयादिप्रायश्चित्तं । मुष्कमोषणादिप्रायश्चित्तकथनं । संक्षेपेण ब्रह्महत्या-सुरापानादीनां प्रायश्चित्तकथनं । अभक्ष्यभक्षणप्रायश्चित्तकथनं । अगम्यागमनादिप्रायश्चित्तकथनं । प्रायश्चित्तकालनिरूपणञ्च ।

No. 1966. रसदीपिका ।

Substance, palm-leaf, 11 × 1½ inches. Folia, 53. Lines, 5 on a page. Extent, 978 s'lokas. Character, Maithilí. Date, ? Place of deposit Pilkhoyáḍ-grám, Post Madhubaní, Darbhángá, Paṇḍit Bábu Jhánjhá. Appearance, old, decayed. Prose. Correct.

Rasa-dípiká. A commentary on the 'Meghadúta' of Kálidása. By Jagaddhara, Mahámahopádhyáya.

Beginning. तद्धालानलशान्तये सुरधुनीतत्कालकूटोल्लस-
ज्ज्वालाज्वालविधूतयेऽन्तकरस्तत्कामशुद्धौ प्रिया ।
तत्पीडतदर्पसर्पणविधौ यस्मिन् मयूरामनो-
नित्यं किङ्करशङ्कराय विभवे तस्मै नमः शम्भवे ॥
छन्दोऽलङ्करणं कोषान् भरतं पाणिनेर्मतं ।
विभाव्य क्रियते टीका श्रीजगद्धरसूरिणा ॥
तत् कालिदासकविनिर्म्मितभव्यकाव्ये
टीका मयाल्पमतिनापि वितन्यते यत् ।
हासाय दुर्ज्जनगणस्य भवेन्न चैतदुच्चैः पदं यदभिकाङ्क्षति सर्व्व एव ॥

इह तावदेवं श्रूयते यन्मानसे सरसि कनककमलकाननरक्षणाय धनाध्यक्षेण यक्ष एको नियुक्तः। स च कदाचिदतिविषमकुसुमवाणवाणवेदनादीनमनसा निज-मानिनीमानापनोदनाकूतं भावयतीति विभावितचेतसा मम नियोगोऽवधी-रित इति तदैव सममेकवत्सरं तव वियोगो भवत्विति तं शप्तवानिति। तामेतां प्रसिद्धिमनुबन्ध्य कालिदासमिश्रः खण्डकाव्यं कर्त्तुमुपक्रमते। कश्चिदित्यादि।

End. नानालङ्कृतसुन्दरीरसवशा नानागुणानां निधि-
र्नानाभावविभावनैकचतुरा नानार्थसम्बोधिनी।
तत्तद्दूषणशून्यतोऽज्ज्वलतनूरन्याङ्गनेव स्थिरा
टीकेयं परिशीलयन्तु कृतिनस्तेभ्यो नतिर्मामकी॥

Colophon. इति महामहोपाध्यायश्रीजगद्धरविरचिता रसदीपिका समाप्ता।

विषयः। कालिदासकृतमेघदूतकाव्यस्य व्याख्यानं।

No. 1967. गोभिलगृह्यभाष्यं।

Substance, palm-leaf, 11 × 2 inches. Folia, 201. Lines, 6 on a page. Extent, 4,060 slokas. Character, Maithilí. Date, L. S. 431. Place of deposit, Pilkhoyáḍ-grám, Post Madhubaní, Darbhángá, Paṇḍit Bábu Jhánjhá. Appearance, old. Prose. Correct.

Gobhila-gṛihya-bháshya. A commentary on the Gṛihya Aphorisms of Gobhila. By Náráyaṇa, son of Mahábala. The extent of the work is described to be 4,966 ślokas.

Beginning. विश्वस्य कारणं विष्णुं प्रणम्य क्रियते मया।
गृह्याख्यायाः स्मृतेर्भाष्यं विवेकार्थमसंभ्रमं॥
अथातो गृह्याकर्म्माण्युपदेक्ष्यामः। अथ कोऽस्य सम्बन्धः। उच्यते धर्म्मार्थकाम-मोक्षा इतीहाखिलः पुरुषार्थः। तेषां धर्म्मः प्रधानं। तन्मूलावर्थकामौ। तथा च व्यासः। इत्यादि।

End. यस्य कीर्त्तिरकीर्त्तिर्वा ग्लानिमद्यापि नर्च्छति।
महाबलः सुविख्यातो वामदेवसुतोऽभवत्॥
नारायणाख्यस्तस्यापि नारायण इवापरः।
पुत्रो महाबलस्याभूत् सदा स्वाध्यायवत्सलः॥
तेन सन्देहनाशाय कर्म्मणां तुष्टिकृत्सतां।
गोभिलाचार्य्यगीतायाः स्मृतेर्भाष्यमिदं कृतं॥

तद्दै + + + + द्वेषैर्विश्वैर्मध्यस्थद्वत्तिभिः ।
कलाप्रद्वौ विद्यायालमास्थं मदनुकम्पया ॥
न चात्रातीव कर्त्तव्यं दोषदृष्टिपरं मनः ।
दोषो ह्यविद्यमानोऽपि दुर्वृत्तानां प्रकाशते ॥
स्वाभिप्रायेण हि मया किञ्चिदप्यत्र नेरितं ।
प्रश्नान्नवाण्णा नालोच्य कल्पमेत्यादिनाभ्यर्था ॥
यद्यत्र साधु तत्साधु यच्चासाधु क्वचित् कृतं ।
सतानास्याजमंयोगात् साधु तद् भवति ध्रुवं ॥
नदीपतेः पयः सर्व्वं यस्मा + + नुपीयते ।
बलाहकमुखस्पृष्टं तदेव स्वादुतामियात् ॥
साध्वप्यसाधुतां गच्छेदसतां मुखसङ्गमात् ।
असा + + सपेयं स्यात् सरिदम्बु सागरे ॥
अत्र श्लोकसहस्राणि चतुःपञ्चशतानि च ।
षट् षष्टिश्च तथा श्लोकाः संख्या नारायणोदिताः ॥
+ + + + + +

Colophon. इति श्रीमद्गोभिलाचार्य्यविरचितगृह्यभाष्ये चतुर्थः प्रपाठकः परिपूर्ण इति ॥ लसं ४३१ ज्यैष्ठमास ।

विषयः । गोभिलगृह्यसूत्रस्य व्याख्यानं ।

No. 1968. किरणावली ।

Substance, palm-leaf, 12 × 1½ inches. Folia, 80. Lines, 5 on a page Extent, 1,938 s'lokas, Character, Maithilí, Date, L. S E. 568. Place of deposit, Pilkhoyáḍ-grám, Post Madhubaní, Darbhángá, Paṇḍit Bábu Jhánjhá. Appearance, old. Prose. Correct.

Kiraṇávalí. A brief exposition of the categories of the Vaiśeshika doctrine. By Udayana Achárya. A commentary on this work has been noticed under No. 1080, Vol. III, p. 50. The text itself is accepted as a commentary on the Padárthoddeśa of Prasastapáda Achárya. Mr. Hall says that Udayana compiled only two books. Hall's Contributions, p. 65.

Beginning. विद्यामन्थ्याद्योऽद्रेकाद्विद्यारजनीचये ।
यदुदेति नमस्तस्मै कस्मैचिद्विश्वतस्त्विषे ॥

यतो द्रव्यं गुणाः कर्म्म तथा जातिः पराऽपरा ।
विशेषाः समवायो वा तमीश्वरमुपास्महे ॥
अर्थानां प्रविवेचनाय जगतामन्तस्तमःशान्तये-
सन्मार्गस्य विलोकनाय गतये लोकस्य यात्रार्थिनः ।
तत्तत्तामसभूतभीतय इमां विद्यावतां प्रीतये
व्यातेने किरणावलीमुदयनः सत्तर्कतेजोमयीं ॥
अतिविरससमारं मानवार्त्तादिहीनं प्रविततबहुवेलप्रक्रियाजालदुःस्थं ।
उदधिसममतन्त्रं तन्त्रमेतद्वदन्ति प्रखलजनधियो ये तेऽनुकम्प्यास्त एते ॥
शास्त्रारम्भे सदाचारपरम्परापरिप्राप्ततया कायवाङ्मनोभिः कृतं परापरगुरु-नमस्कारं शिष्यान् शिक्षयितुमादौ निबध्नाति प्रशस्येति। कर्त्तव्यापेक्षया प्रणामस्य पूर्व्वकालत्वात् क्त्वानिर्द्देशः । इत्यादि ।

End. न हि मूर्त्तत्वमात्रेण क्रिया-इत्यत आह प्रयत्नादृष्टपरिग्रहादिति । क्वचित् प्रयत्न-परिग्रहात् क्वचिददृष्टपरिग्रहादित्यर्थः ॥

Colophon. इतिशब्दाद् द्रव्यपरिसमाप्तौ । इत्युदयनाचार्य्यविरचितायां किरणावल्यां द्रव्य-पदार्थः समाप्त इति । लसं ५३८ ॥

विषयः । प्रशस्तपादाचार्य्यकृतस्य वैशेषिकसूत्रमर्मज्ञप्रव्याख्यानरूपस्य पदार्थधर्म्मसङ्ग्रहाभि-धानस्य ग्रन्थस्य द्रव्यपदार्थविवेचनान्तं व्याख्यानं ।

No. 1969. आरब्ययामिनीप्रथमखण्डः ।

Substance, country-made yellow paper, 11 × 5 inches. Folia, 475. Lines, 9—10 on a page. Extent, 15,841 s'lokas. Character, Nágara. Date, Sk. 1800. Place of deposit, Madhubaní, Darbhángá, G. A. Grierson, Esq., C. S. Appearance, new. Prose and verse. Incorrect.

Árabyayáminí. A translation from the English of the Tales of the "Arabian Nights Entertainments." By Jagadbandhu S'armá. The work extends to the first fifty nights, and was prepared under the patronage of the late Rájá S'ambhuchandra, a zamindar of Kákiníyá, in the district of Rangpur. It must have been prepared within the last fifteen or twenty years.

Beginning. शान्तं तुरीयमद्वैतं शिवं ब्रह्म सनातनं ।
अनन्तं चिन्मयं नौमि सान्द्रानन्दं परात्परं ॥
सान्द्रानन्दप्रदा या कलुषचयहरा भ्रामरीपीठसंस्था
त्रिस्रोतस्तीरगेहा निखिलभयहरा भीमरूपा सुरूपा ।

भूगोलोकाभिधानं नरपतिनगरं सर्व्वतः पाति पूर्णा
तस्या आनन्दमय्याः पदकमलयुगेऽभीष्टसिद्धै स्मरामः॥

— — — — — — — —

भूपं श्रीशम्भुचन्द्रो गुणिगणगणितः पण्डितः श्रीयुतः +
भूगोलोकाभिधाने + तन्नगरसमे काकिनापत्तनेऽस्मिन्।
दीनानां दैन्यरोगान् गदमिव+धनान् दापयन् दुर्गतेभ्यो-
नित्यं धन्वन्तरे+ सुविमलयशसा नाशयन् भाति भूमौ॥

— — — — — — — —।

तस्य भूपतिवर्य्यस्य कृपाद्दन्दवशम्बदः।
आदेशेन समभ्या + विक्रमाख्यपुरस्थितः॥
श्रीजगद्बन्धुविप्रोऽहं राज्ञाज्ञप्तः प्रवर्त्तितः।
सन्दर्भरचने तस्मिन् निर्लज्ज इव साम्प्रतं॥

— — — — — —

श्रीगुरोः करुणामङ्गाद् भूपवाक्यादियं भुवि।
आरब्ययामिनी भातु जनामोदविवर्द्धिका॥
पुरा किलाशेषशस्यसमवायसंयुतसुशोभित विलसितकुसुमकुलचलितमधुव्रतस-
चयमञ्जुलगुञ्जितभाषितमनोरञ्जितकोकिलकुलपित—इत्यादि।

End. अकाण्डधरणीतले भवति यस्य भूपस्य भो
मनुष्यनिवहैः सदा प्रथितकीर्त्तिसङ्कीर्त्तनं।
नृपस्य विमलं यशो लसति नाथ नित्यं यथा
सुपूर्णरजनीपतिः शरदि भाति निःसन्निभः॥
श्रीमत्श्रीशम्भुचन्द्रो नरपतितिलकः सर्व्वदेशप्रसिद्धः
काकीनायां नगर्य्यां विलसति सुकृती योऽतिश्रीमान् वरीयान्।
स्मारं स्मारं तदाज्ञां तनुत इति मुदा श्रीजगद्बन्धुविप्रा-
विज्ञोऽस्याः पुस्तिकाया निजगुणवशतः चामयेद्दोषनङ्गान्॥

Colophon. इत्यारब्ययामिन्यां सहरीयारसहर्ज्यादिसम्वादे प्रथमखण्डं नाम पञ्चपञ्चाशत्तमः सर्गः॥ शुभं भूयात्। शाके १८००।

विषयः। (म्लेच्छभाषीयारब्ययामिनीग्रन्थादवतारितोऽयं ग्रन्थः)। तत्र प्रथमे सर्गे,—पारस्यदेशे सहरीयार सहजिनाणयोरुत्पत्त्यादिकथनं। तत्र संस्कृतभाषया पारसिकशब्दानां व्युत्पत्तिकथनञ्च। तयोराज्याभिषेकादिवर्णनं। सहजिनाणस्य भार्य्यायाः व्यभिचारादिवर्णनञ्च। २ ये सर्गे,—सहजिनाणस्य दुश्चिन्तादिविव-

रणकीर्त्तनं। सहरीपारस्य मृगयादिवृत्तान्तकथनं। २ ये सर्गे,—सहजिनाण-सहरीपारयोरन्योन्यं दर्शनेन अनुतापादिवर्णनं। सहरीपारमन्त्रिणो वृत्तान्त-कथनं। काफ्रिपुत्रस्य वृत्तान्तकथनं। सहरीपार-महजिनाणयोराच्यदर्शनपूर्व्वकं भ्रमणवृत्तान्तकथनं। चतुर्थादि-सर्गे,—उभयोर्दैत्यदर्शनविवरणं। प्रसुप्ते दैत्ये-नाभ्यां दैत्यकामिनीप्रसादनात् अङ्गुरीयप्राप्तिकथनं। स्वदेशगमनपूर्व्वकं प्रत्यह-विवाहवर्णनादिकं।

No. 1970. अद्वैतदीपिका, द्वितीयपरिच्छेदः।

Substance, country-made paper, 12 × 3 inches. Folia, 58. Lines, 8 on a page. Extent, 1,668 s'lokas. Character, Maithilí, Date, ? Place of deposit, Magraṇi, Post Madhubaní, Darbháṅgá, Paṇḍit Kánái Jhá. Appearance, old. Prose. Correct.

Advaita-dípiká. A dissertation on the non-dual theory of the Vedantists in refutation of the Nyáya doctrine of the duality of the soul. By Nṛisiñha A'srama, pupil of Jagannátha A'srama. The codex comprises only the second book of the work. Hall's Contributions, p. 157.

Beginning. नरहरिवपुषा यो दारयन् दानवेरः प्रकटयति पुमर्थौ भेदहृष्टाविनीशः।
निजगुणमयमायामात्रमात्रादिभेदो गुरुतरदयया मां पातु लक्ष्मीसहायः॥
जगन्नाथाश्रममुनेश्चित्रं चरणरेणवः वाचामगोचरेऽप्यर्थे मूकं वाचालयन्ति मां॥
अथास्य परस्माद्विभागः परीच्यते। तत्र जीवपरयोः स्वाभाविको भेदः पारमा-र्थिक इति केचित्। इत्यादि।

End. तदुक्तं सर्व्वं वस्तु ज्ञाततयाऽज्ञाततया वा साक्षिचैतन्यस्य विषय इति। तस्मात्।
चिन्मात्रविषयाधारमज्ञानं भेदविभ्रमे।
हेतुर्द्दर्पणवत्तस्य निवृत्तौ हतकल्पता॥
यन्मायया पृथग्भूतः सदानन्दैकविग्रहः।
हरिरप्यहमीशानं तं भज पुरुषोत्तमं॥

Colophon. इति श्रीमत्परमहंसपरिव्राजकाचार्य्यभगवज्जगन्नाथाश्रमश्रीचरणशिष्यश्रीनृसिंहा-श्रमकृताद्वैतदीपिकायां विभागप्रक्रियाख्यो द्वितीयः परिच्छेदः समाप्तः।

विषयः। प्रथमपरिच्छेदोनास्ति। द्वितीये तु,—जीवपरयोः पारमार्थिक औपाधिको वा भेद इति जिज्ञासायां प्रत्यचं तावज्जीवब्रह्मणोर्भेदे प्रमाणं, नाहं सर्व्वज्ञो नाहं

निर्दुःख इत्यनुभवात्। तथा अनुमानमपि जीवब्रह्मभेदे प्रमाणं तथाहि ब्रह्म-जीवप्रतियोगिकधर्म्मिसत्तासमानसत्ताकभेदवत् दुःखाननुभवितृत्वात् अभ्रान्तत्वात् असंसारित्वाच्च घटवत् जीवो ब्रह्मप्रतियोगिकधर्म्मिसत्तासमानसत्ताकभेदवान् अ-सर्व्वज्ञत्वात् असर्व्वशक्तिमत्त्वात् अस्वतन्त्रत्वाच्च घटवदित्यादिना पारमार्थिकतया जीवब्रह्मणोर्भेदमङ्गीकुर्व्वतां मतमुपन्यस्य एतत्खण्डनपुरःसरं जीवपरयोरौपा-धिकोऽनिर्व्वचनीयश्च भेद इति भगवदाचार्य्यमतसंस्थापनं।

No. 1971. अद्वैतदीपिका, (तृतीयपरिच्छेदः)।

Substance, country-made paper, 11 × 3 inches. Folia, 85. Lines, 8 on a page. Extent, 3,127 s'lokas. Character, Maithili. Date, ? Place of deposit, Magráṇí, Post Madhubaní, Darbhángá, Paṇḍit Kánái Jhá. Appearance, old. Prose. Correct.

Advaita-dípiká. The third book of the work described under the last preceding No.

Beginning. उपनिषदवबोधं बोधमानन्दकन्दं निजगुणगणकान्तं कान्तमम्भोजयोनेः।
परिहृतपरसत्त्वं सत्त्वमेतस्य नूनं नरहरिवपुरेशं धाम कामं प्रपद्ये॥
गुरुचरणकृपा मे कञ्चुकीकुर्व्वती मां नरहरिचरणेच्छां चारयत्यात्मदुर्गे।
अहमिति विगताधिः सञ्चराम्यात्मयाग्यं कपटमतिविलासैर्भेदिभिर्भिन्नमार्गे॥
निरवधिनिर्म्मलवर्त्तिप्रकटनशीलप्रभोः स्नेहात्।
औपनिषदात्मदीपः कुरुतात् कल्याणकारिणीं विद्यां॥
अथ महावाक्यात् तत्पदार्थो ब्रह्म निरूप्यते तदवाप्तेरेव मुमुक्षाकाङ्क्षिपुरुषा-र्थतया तदवगमं विना जिज्ञासाऽनिवृत्तेः प्रकृतवाक्यार्थज्ञानायोगाच्च। इत्यादि।

End. तस्मात् सत्यज्ञानानन्दात्मकं निर्गुणमुदासीनं ब्रह्म वेदार्थ इति सिद्धं।
सत्यज्ञानसुखस्वरूपमभ्रतं शुद्धाद्वितीयं परं
वेदान्तैकविनिश्चयं हरिहरत्यादिसंशब्दितं।
ब्रह्माम्नायवचोविचारविदितं यद्रूपमन्याद्दृशं
तद्देव्या विभवः परं मरुपयस्तुल्यो दुरूहो हरेः॥

Colophon. इति श्रीमत्परमहंसपरिव्राजकाचार्य्यभगवज्जगन्नाथाश्रमश्रीचरणशिष्यश्रीनृसिंहा-श्रमकृताद्वैतदीपिकायामौपनिषद्दीपिकाख्यस्तृतीयः परिच्छेदः॥

विषयः। मुमुक्षुणा ब्रह्मजिज्ञासा कर्त्तव्या, तत्र ब्रह्मणि तावत् न प्रत्यक्षं प्रमाणं, तस्य रूप-स्पर्शादिहीनतया बाह्यप्रत्यक्षागोचरत्वात्, तथा मनसः केवलस्य भोक्तृतद्धर्म्म-

मानग्राहकत्वात् तद्विषयत्वं स्फुटमेव। ननु कार्य्यत्वहेतुः कर्तृजन्यत्वनियतः क्षित्यादिकर्त्तारमनुमापयतीति चेदिदमपि न विचाररमणीयं, तथाहि न तावत् कार्य्यमात्रे कृतिमतः कारणत्वग्रहः सम्भवति, घटादेः कृतिजन्यत्वे अवधृते हि तत्तत्कार्य्यत्वेन तद्व्याप्तिग्रहः, तत्र च तदवधारणमन्वयव्यतिरेकाभ्याञ्चेत् कस्तर्हि कार्य्यव्यतिरेकप्रयोजकः कृतिव्यतिरेकः, संसर्गाभाव इति चेत् तदपि न क्षोदक्षमं, तथाहि कृत्यत्यन्ताभावस्य कार्य्यव्यतिरेकाप्रयोजकत्वादित्यनया दिशा ब्रह्मणो मानान्तरागोचरत्वं सप्रपञ्चं प्रदर्श्य तस्य औपनिषदज्ञानमात्रावमेयत्वनिरूपणं। ननु उपनिषदुपजीवकानुमानगम्यत्वे ब्रह्मण औपनिषदत्वं विहन्यतामिति चेन्न उपनिषद्भिरेव मानाभावकृततदसत्त्वशङ्कानिवृत्तेः। वस्तुतस्तु अनुमानात् कर्त्तृकत्व-सिद्धावपि नेश्वरसिद्धिः ततः सर्व्वज्ञत्वसर्व्वशक्तिमत्त्वादेरसिद्धत्वात् अत एव सुष्टूक्तं। ब्रह्मण उदासीनतया कार्य्यलिङ्गान्न तत्सिद्धिः, न हि कार्य्याप्रयोजकोऽपि धर्म्मः कार्य्यलिङ्गेन सिद्ध्यति। उपस्थितिमात्रेण तत्सिद्धौ भ्रमात् रामभादेरपि सिद्धि-प्रसङ्गादिति निष्कर्षः। तथा तत्त्वमस्यादिवेदान्तवाक्यं न अपरोक्षज्ञानजनकं वाक्यत्वात् ज्योतिष्टोमादिवाक्यवदित्यादिना आक्षेपप्रदर्शनपूर्व्वकं वेदान्तानाम-परोक्षज्ञानहेतुत्वनिरूपणं। ब्रह्मसाक्षात्कारो निदिध्यासनसहकृतेन मनसा जायते; यन्मनसा न मनुत इति श्रुतिस्तु मनसैवानुद्रष्टव्यमिति श्रुतिविरोधेन अपक्व-मनोविषया, अन्यथा शब्दस्य करणत्वे यतो वाचो निवर्त्तन्ते इति श्रुतिविरोधात् तस्मात् न वेदान्तादपरोक्षधीरिति कस्यचिदाक्षेपोपन्यासपूर्व्वकं तत्खण्डनं। अपरोक्षज्ञानस्वरूपादिविवेचनं। विध्यादिनिरूपणं। लिङाद्यर्थनिरूपणं। श्रव-णादीनां स्वरूपादिकथनं। ब्रह्मणो जगदुपादानकारणत्वसंस्थापनं। अविद्यादि-स्वरूपकथनं। कर्तृत्वादिविवेचनं। अद्वैतवादसंस्थापनं। अध्यारोपादिस्वरूप-कथनं। मिथ्यात्वस्वरूपनिरूपणं। जड़त्वादीनां लक्षणादिकथनं। आकाशादेः धर्म्मिग्राहकमानसिद्धविभुत्ववादखण्डनं। कालादेरभावे ब्रह्मणोऽपि अस्तित्वासिद्धि-रित्याक्षेपनिरसनमुखेन चास्तित्वादीनां लक्षणादिकथनं। ब्रह्मस्वरूपादिनिरूपणं। वेदस्य अपौरुषेयत्वकथनं। ब्रह्मणो निर्गुणत्वादिसंस्थापनञ्च।

No. 1972. अद्वैतदीपिका (चतुर्थपरिच्छेदः)।

Substance, country-made paper, 12 × 3 inches. Folia, 26. Lines, 7 on a page. Extent, 682 s'lokas. Character, Maithilí. Date, ? Place of deposit, Magrani, Post Madhubaní, Darbhángá, Paṇḍit Káṅái Jhá. Appearance, old. Prose. Correct.

Adraita-dípiká. The fourth book of the work described under No. 1970.

Beginning. यस्मिन्नसममस्तमोहमहिमस्वानन्दमन्दीकृत-
No. 1984. प्रायश्चित्तकौमुदी, वा प्रायश्चित्तविवेकटिप्पनी। Substance, country-made paper, 16 × 3 inches. Folia, 64 Lines, 6 on a page. Extent, 1,417 s'lokas. Character, Bengali. Date, ? Place of deposit, Magráṇí, Post Madhubaní, Darbhángá, Paṇḍit Kanái Jhá. Appearance, old. Prose. Correct.

Práyśchitta-kaumudí alias **Práyśchitta-viveka-ṭippaní.** A commentary on S'úlapáṇi's digest of the rules regarding expiations. By Rámakrishṇa Bhaṭṭácharya.

Beginning. हरिं प्रणम्य मेघाभं पङ्कहृन्दनिवर्त्तनं।
तनुते रामकृष्णेन प्रायश्चित्ताख्यकौमुदी॥
प्रेक्षावतां प्रवृत्तये ग्रन्थस्य प्रयोजनाभिधेये अभिधीय अभिधानञ्चाह नित्येत्यादि। यद्यपि मङ्गलाचरणमादौ ग्रन्थकर्त्तुरुचितं तथापि ज्योतिरागमादिना विघ्नव्यतिरेकनिश्चयेन—इत्यादि।

End. अत्र तु मासानीत्यत्र मासस्य विशेषणत्वादन्यत्रान्वयसम्भावनैव नास्ति किमेतया फक्किकया इति।

Colophon. इति महामहोपाध्यायश्रीरामकृष्णभट्टाचार्य्यविरचितेयं प्रायश्चित्तविवेकटिप्पनी समाप्ता।

विषयः। शूलपाणिकृतप्रायश्चित्तविवेकस्य व्याख्यानं।

No. 1985. आख्यातवादव्याख्यारहस्यं। Substance, country-made paper, 14 × 4 inches. Folia, 28. Lines, 8 on a page. Extent, 868 s'lokas. Character, Maithili, Date, ? Place of deposit, Magráṇi, Post Madhubaní. Darbhángá, Paṇḍit Kánái Jhá. Appearance, old. Prose. Correct.

A'khyátaváda-vyákhyá-rahasya. A gloss on the A'khyátaváda, of the author. By Raghudeva Bhaṭṭácharya.

Chhandogáhinkoddhára. A summary of the daily religious duties imperatively necessary for such householders belonging to the Chhandoga school as do not cherish the household fire. By S'añkara Miśra, Mahámahopádhyáya, son of Bhavanátha Miśra. Contents: morning duties; ablutions, wood fit for brushing the teeth, washing of the face, morning bath, rules of Gobhila on the subject; Sandhyá defined, ritual of Sandhyá, offering of water to the manes, reading of the Vedas, adoration of deities, sacrifices to the Viśvedevás, daily s'ráddhas, hospitality, offering of food to cattle, breakfast, prohibited food, duties after breakfast, siestá, society of wife.

Beginning. ऊर्द्धबद्धजटाजूटक्रोड़क्रीड़त्सुरापगं।
भजामि यामिनीकान्तकान्तभालस्थलं हरं॥
यावानकृते दोषश्छन्दोगानां निरग्नीनां।
तावन्मात्रमिहाह्निकमलसानामुच्यते स्फुटं॥
तत्र नरसिंहपुराणे,—उषःकाले समुत्थाय कृतशौचो द्विजोत्तमः।
कुर्य्यात् स्नानं ततो नित्यं दन्तधावनपूर्व्वकं॥ इत्यादि।

End' अत्राह्निके एतावत्यपि कृते न प्रत्यवेयात अन्यथा प्रत्यवेयादेवेति संक्षिप्याह्निकमुद्धृतं सामगानां॥

Colophon. इति महामहोपाध्यायश्रीभवनाथमिश्रात्मजमहामहोपाध्यायश्रीशङ्करमिश्रकृतौ छन्दोगाह्निकोद्धारः समाप्तः। शाके १७१६।

विषयः। छन्दोगानामाह्निकृत्यमतिविस्तरेणानुष्ठातुमशक्तानां यावति अकृते प्रत्यवाय स्यात, निरग्नीनां तावदेव संक्षेपेण निरूपितं। तत्र प्रातः कृत्यकथनं। सामान्यतः शौचविधिः। दन्तकाष्ठनिरूपणादिकं। आचमनविधिकथनं। प्रातःस्नानविधिकथनं। गोभिलीयस्नानप्रयोगः। सन्ध्यानिर्णयः। सन्ध्याप्रयोगः। तर्पणप्रयोगः। ब्रह्मयज्ञविधिकथनं। देवपूजाविधिकथनं। शाकल्यकल्पेन वलिवैश्वदेवविधिकथनं। नित्यश्राद्धविधिकथनं। आतिथ्यविधिकथनं। गोग्रासदानविधिकथनं। भोजनविधिकथनं। भोजने वर्ज्जनीयकथनं। भोजनानन्तरमाचमनीयविधिकथनं। शयनविधिकथनं। दारोपगमनविधिकथनञ्च।

No. 1990. द्विविधजलाशयोत्सर्गप्रमाणदर्शनं। Substance, country-made paper, 12 × 5 inches. Folia, 22. Lines, 7 on a page. Extent, 706 s'lokas. Character, Maithilí. Date, ? Place of deposit, Magráṇi, Post Madhubani, Darbháñgá, Paṇḍit Kánái Jhá. Appearance, new. Prose and verse. Generally correct.

Dvividha-jalásayotsarga-pramána-darsana. Two different rituals for the consecration of tanks, wells and other reservoirs of water, according to the rules of the Bahvricha Bráhmana and of the Yajur Veda respectively. By Buddhikara S'ukla.

Beginning. नत्वा ध्येया वेदवे द्वौ तत्त्वतो वक्रूरूपिणौ ।
स्वारोप्यरूपसम्भारौ मेशोमेशौ जगद्गुरू ॥
सम्यग्धनासम्भवचित्तसाध्यराच्चित्यपूर्त्तादिचिकीर्षु पुंसां ।
निर्व्वच्मि सद्वारुणकूपसेतुवापीसमुत्सर्गविधिं विधानैः ॥
श्रीबुद्धिकरशुक्लोऽहं मीमांसामारगौरवात् ।
विश्वनाथपदाम्भोजमधुपानमधुव्रतः ॥
अथाग्निसाच्चिकदुष्करिण्याद्युत्सर्गविधिः । इत्यादि ।

End. एवमग्निसाच्चिकजलाशयोत्सग आभ्युदयिकं तच स्त्रीणामपि पिचादीनां न पत्यादीनां प्रमाणाभावात्—इति ।

Colophon. इति महामहोपाध्यायशुक्लश्रीबुद्धिकरकृतौ द्विविधजलाशयोत्सर्गप्रमाणदर्शनं ।

विषयः । वह्वृचां यजुर्वेदिनाञ्च प्रत्येकं वापीकूपतड़ागादिप्रतिष्ठाविधिकथनं ।

No. 1991. मीमांसासूत्रदीधितिः, वा न्यायावलीदीधितिः । Substance, country-made paper, 12 × 4 inches. Folia, 340. Lines, 7 on a page Extent 9.208 s'lokas. Character, Nágara. Date, ? Place of deposit, Magranigrám, Post Madhubani, Darbhangá, Pandit Kánái Jhá. Appearance, old. Prose. Incorrect.

Mímáñsá-sútra-dídhiti alias Nyáyávali-dídhiti. A commentary on the Mímáñsá aphorisms, explaining the parables used in illustration of them. By Rághavánanda Sarasvatí. Hall's Contributions, p. 182.

Beginning. नत्वा मुरारेः पदकञ्जरेणून् महेशितुर्भानुगजाननस्य ।
देव्या गुरूणाञ्च यतिस्तनोमि न्यायावलीदीधितिमर्थकल्यां ॥
तत्र । धर्म्मो द्वादशलक्षणा व्युत्याद्यस्तत्रलक्षणैः ।
प्रमाणभेदशेषत्वप्रयुक्तिक्रमसंज्ञकाः ॥
अधिकारोऽतिदेशश्च सामान्येन विशेषतः ।
ऊहो बाधश्च तन्त्रञ्च प्रसङ्गश्चोदिताः क्रमात् ॥

देवस्त्रीगणगीतकीर्त्तिविजितक्षीराब्धिमुग्धद्युति-
र्नित्यानेकसुवर्णदानजनिताशेषार्थिहृन्दोत्सवः ।
तस्मादुद्भटवैरिकुम्भदलनप्रोद्दामपञ्चाननो
जज्ञे यज्ञपरायणः किल जगन्नारायणो भूपतिः ।
कुश इव सुतात् कौशल्याया जयन्त इवेन्द्रतो-
रतिपतिरिव श्रीमद्विष्णोः कुमार इवेश्वरतः ।
शुक इव मुनेर्व्यदव्यासाद्विधुश्च यथाम्बुधे-
र्बुध इव विधोरस्माज्जातस्त्रिविक्रमभूपतिः ॥
यं रणमुखे त्रिविक्रमनारायणदेवमालोक्य ।
अपि कनकगौरमरयो मन्यन्ते सपदि कालमिव ॥
सोऽयं दानदयाविवेकविनयश्रीसत्यलोकोत्तरो-
नित्यं यज्ञपरायणो विजयते श्रीनिर्भयो भूपतिः ।
यस्योद्दामकृपाणकालकलितप्रत्यर्थिपृथ्वीपति-
प्रेयस्याश्चिपयःपयोधिषु यशो हंसावली क्रीडति ॥
वाहश्रूहैर्द्विरदनिवहैरा चतुःसिन्धुसीम्नो-
मुक्तादामस्फुरितमहसो मेदिनीं मर्दयन्तः ।
के नामैनं धरणिरमणं क्ष्माभुजो नाश्रयन्ते
रत्नच्छन्नोच्छलितकिरण-श्रेणिकिर्म्मीरिताशाः ॥
सोऽयं मुरारिधीरं सहकारितया समासाद्य ।
श्रीसारदाप्रसादात् तनुते शुभकर्म्मनिर्णयं न्टपतिः ॥
विज्ञायाखिलशास्त्रतत्त्वममलं श्रीरामभद्राद्गुरो-
र्म्मिश्रात् केशवतः स्मृतीरथ तयोः सारं विचिन्त्य स्वयं ।
पादाम्भोजयुगं प्रणम्य शिवयोः संख्यावतां प्रीतये
व्यातेने शुभकर्म्मनिर्णयममुं श्रीमन्मुरारिः कृती ॥

तत्रादावाभ्युदयिकनिर्णयः । तदादाववश्यं सगणाधिपा मातरः पूज्याः ।—इत्यादि ।

End. तथा च उपायातायार्च्यमिति कौहलीया इति कौहलीशाः शाखाविशेषाश्रायिनः । तेषां मते इदानीमागतायार्हणं न तु कौशुमाय + + + यहणमिति ॥

Colophon. इति महामहोपाध्यायश्रीमुरारिमिश्रशर्म्मविरचितः शुभकर्म्मनिर्णयः समाप्तः इति ।

न्यायाम्भोजमरन्दतुन्दिलमनोभृङ्गो गिरां शेवधि-
र्म्मन्वादिस्मृतिमाकलय्य तदितः सारं समाकृष्य च ।

भाष्याणि प्रविचिन्त्य निश्चलहृदा श्रीगोभिलीये विधौ

व्यातेने शुभकर्म्मनिर्णयमसुं श्रीमन्मुरारिः कृती ॥ लसं ५८५ । कार्त्तिककृष्णपञ्चम्यां ।

विषयः । स्मृतिपुराणग्रन्थान्तरसंवादेन छन्दोगानां विवाहादिसमावर्त्तनान्तेषु दशविधेषु संस्कारेषु विधानकथनम् तदधिकृतगोभिलसूत्राणां समासेन व्याख्याकीर्त्तनञ्च ।

No 1988. खण्डनखण्डखाद्यटीका। Substance, palm-leaf. 11 × 2 inches Folia, 103. Lines, 5 on a page Extent, 1.672 s'lokas. Character, Maithili. Date, ? Place of deposit, Magráṇi, Post Madhubaní, Darbhángá, Paṇdit Kánái Jhá. Appearance, old. Prose. Correct.

Khaṇḍana-khaṇḍa-khádya-ṭíká A commentary on S'ri-harṣa's Khaṇḍana-khaṇḍa-khádya—a treatise on the non-existence of the Supreme soul. By S'aṅkara Miśra. (III, p. 70.)

Beginning. हरिशङ्करयोः सितासितं भुजगारातिभुजङ्गलाञ्छनं ।

वपुरस्तु मुदे विरुद्धयो-रपि संस + + भिन्नतां गतं ॥

विरुद्धधर्म्मिद्वयसन्निपातेऽप्यभेद एवेति विभावयन्नः ।

पुनातु भेदप्रतिभासशून्यं स्त्रीपुंसरूपं शिवयोः शरीरं ॥

भवनाथसूक्तिगुम्फनमिह खण्डनखण्डखाद्यटीकायां ।

श्रीशङ्करेण विदुषा विदुषामानन्दवर्द्धनं क्रियते ॥

प्रारिप्सितप्रतिबन्धकदुरितनिराकरणकारणेष्टदेवतानमस्काररूपं मङ्गलं कुर्व्वन्नेव प्रेक्षावत् प्रवृत्त्यङ्गप्रयोजनाभिधेयसम्बन्धप्रतिपादनपरः परमतनिराचिकीर्षया स्वमते ब्रह्माद्वैतस्थापनां वैतण्डिकाऽपि स्वप्रौढिप्रकटनाय सूचयन्नाह,—अविकल्पेति । एकः पुरुष इत्यद्वितीयं ब्रह्मेत्यर्थः । श्रुतिषु तथाश्रुतत्वात्। यद् यथा श्रुतिषु श्रुतं तत्तथा यथा ब्रह्मण आनन्दमयत्वं—इत्यादि ।

End. ननु सकलान्योन्याभाववृत्तिना केनचिद्धर्म्मेणावच्छिन्नस्योद्देश्यत्वं स्यादित्यत आह: चान्य इति । तस्मादवृत्तेरुपाधेरव्याप्यनिरूपणात् ।

Colophon. इतः खण्डितत्वात् परिशेषवाक्यं नास्ति ।

विषयः । श्रीहर्षकृतखण्डनखण्डखाद्यस्य अभावखण्डनप्रकरणं यावत् व्याख्यानं ॥

No 1989. छन्दोगाह्निकोद्धारः। Substance, country-made paper. 10 × 4 inches. Folia, 32. Lines, 6 on a page. Extent, 499 s'lokas. Character, Maithilí. Date, Sk. 1716. Place of deposit, Magráṇi, Post Madhubaní, Darbhangá, Paṇdit Kánái Jhá. Appearance, old Prose and verse. Correct.

मितिनिरूपणं। एकस्मिन् दिने जयाहनिमित्ताशौचादिप्रतिरुद्धश्राद्धयोः कर्त्तव्यत्वे विधिनिरूपणं। एवमेकस्मिन् दिने मृतयोः पित्रोः श्राद्धविधिकीर्त्तनञ्च। सौरचान्द्रमासविवेचनं। मलमासेऽपि नित्यनैमित्तिकश्राद्धकरणावश्यकतानिरूपणं। अत्र विविधमतकीर्त्तनञ्च। पाकस्य श्राद्धाङ्गतादि-निरूपणं। एकोद्दिष्टे प्रतिनिधिर्नास्तीतिनिरूपणं। शूद्रेण तु सर्व्वत्रामान्नेन श्राद्धकर्त्तव्यता। श्राद्धदिननिषिद्धानि। सर्व्वैरेव भ्रातृभिरेकोद्दिष्टं कार्य्यमितिकथनं। अमावास्यादिमृतस्यापि पितुर्मध्याह्ने एकोद्दिष्टं विधायापराह्णे पार्व्वणं कर्त्तव्यमितिनिरूपणं। दक्षिणावासदेव्यगानादिवि-धिकथनञ्च।

No. 2021. ज्योतिःसारसमुच्चयम्। Substance, country-made paper, 12 × 3 inches. Folia, 62. Lines, 7 on a page. Extent, 1,494 ślokas. Character, Maithili. Date, ? Place of Deposit, Naváni, Post Mádhepur, Darbhángá, Paṇḍit Lála Jhá. Appearance, fresh. Prose and verse. Correct.

Jyotihsára-samuchchaya. On auspicious and inauspicious conjunctions of stars and planets with reference to the performance of civil rights, such as marriages &c. By Viśveśvara Daivajṇa.

Beginning. ज्योतिर्निबन्धानालोक्य व्यवहारोपपत्तये।
तदुद्धारेण क्रियते ज्योतिःसारसमुच्चयः॥
यथा शिखा मयूराणां नागानां मणयो यथा।
तद्वद्वेदाङ्गशास्त्राणां ज्योतिषं मूर्द्धि वर्त्तते॥
विफलान्यन्यशास्त्राणि विवादस्तेषु केवलम्।
प्रमाणं ज्योतिषं शास्त्रं चन्द्रार्कौ यत्र साक्षिणौ॥
तत्र लग्नादिभावनिरूपणं। इत्यादि।

End. यानं पुरो निपतितं रुदती च कन्या गर्भेण चातिमहती पुरतः स्थिता स्त्री।
आगच्छति प्रविश गच्छसि वा किमर्थं शब्दाः स्थिराय गमनं प्रतिषेधयन्ति॥

Colophon. इति गणककुलनलिनदिनेशश्रीविश्वेश्वरदैवज्ञकृतौ ज्योतिःसारसमुच्चयः समाप्तः।

विषयः। लग्नादिभावनिरूपणं। ग्रहविवेचनं। चन्द्रतारादिशुद्धिः। दशाचारादिशुद्धिः। समयाशुद्धिविवेचनं। अतीचारादिप्रतिप्रसवः। कन्याया वर्षशुद्धिः। कन्यालक्षणादिकथनं। वरलक्षणादिकथनं। परिवेदनविचारः। विवाहसमयादिनिरूपणं। द्विरागमनं। जातकर्म। नामकरणान्नप्राशनचूडाकरणकर्णवेधविद्यारम्भोपनयनादिकथनं। धनुर्विद्या। ग्रहशान्तिः। गण्डजातकादिशान्तिः। जलाशयादिप्रतिष्ठा। बीजवपनं। नवान्नं। शल्यज्ञानविधिः। वास्तु-विधिः। यात्राचिन्ता। मङ्गलनिरूपणञ्च।

No. 2022. सुबोधिनी। Substance, country-made paper, 13 × 5 inches. Folia, 250. Lines 9 on a page. Extent, 4,562 ślokas. Character, Maithilí. Date, ? Place of deposit. Naváni, Post Mádhepur, Darbháṅgá, Paṇḍit Vañsamaṇí Jhá. Appearance, fresh. Prose and verse. Generally correct.

Subodhiní. A Smṛiti digest, containing dissertations on the ten Sañskáras, marriages of daughters, śráddhas of various kinds, and domestic duties. By Ratnapáṇí S'armá, son of Gaṅgoli Sanjíveśvara S'armá. The work was compiled by order of king Rudra Siñha of Mithilá.

Beginning. अन्वयेन जगतां हि कारकं तारकं विपदि विघ्नहारकम्।
सन्निधाय हृदि तन्यते कृते रत्नपाणिकृतिना सुबोधिनी॥
देशे देशे च दातुर्विलसति सुयशःसोमसोमातपत्रं
यस्याखण्डप्रतापो दहति रिपुकुलारण्यमेवानलोऽभी।
यत्पार्श्वे वेदपादैर्निवसति सुकृतं पार्व्वतीशाङ्घ्रिभक्त्या
वीरः श्रीरुद्रसिंहो जयति नृपमणिस्तीरभुक्त्यैकभूपः॥
कुर्व्वे तस्य निदेशतो नृपमणेः कल्याणमूर्त्तेरिमाम्
पारम्पर्य्यसमागतव्यवहृतिप्रज्ञामसमाज्ञादरीम्।
सन्त्वन्यत्र निरङ्कुशा हि कवयो नैक्यं ततस्तन किं
वैदेहस्थितपण्डितौघकरुणादृष्टिस्तदा चेत् परम्॥
गृह्णन्तु सन्तो विनयं मदीयं कुर्व्वन्तु + + मम लोल्लतायाः।
कृतार्थता सज्जनुषो यथा स्यात् पश्यन्तु मात्सर्य्यमपास्य चैताम्॥
अथाश्रमावश्यकतायां दक्षः।
अनाश्रमी न तिष्ठेत्तु दिनमेकमपि द्विजः। इत्यादि।

End. आश्विनकृष्णचतुर्दश्यां तिथौ अमुकगोत्रस्य पत्युरमुकदेवशर्म्मण एकोद्दिष्ट-श्राद्धमहं करिष्ये। इति सङ्कल्पं कुर्य्यात्। अद्यामुकगोत्र पते इदमासनं ते नम इत्येवमादिना-सनादिदानं। एवमेव शूद्रकर्त्तृकैकोद्दिष्टश्राद्धप्रयोगो ज्ञेयः।

Colophon. इति गाङ्गोलीश्रीसञ्जीवेश्वरसूनुश्रीरत्नपाणिसङ्गृहीता सुबोधिनी समाप्ता।

विषयः। आश्रमस्यावश्यकताकथनं। गार्हस्थ्याश्रमस्य श्रेष्ठत्वकथनं। कीदृशी कन्या विवाह्येतितन्निरूपणं। कन्यादानविवेचनं। परिवेत्रादिविवेचनं। कन्यादानाधिकार्य्यादिनिरूपणं। वागदत्तादिविवेचनं। गान्धर्व्वविवाहविधिकथनं। कन्यादानप्रयोगादिकथनं। स्त्रीशुद्धिनिरूपणं। एवं क्रमेण दशसंस्कारविधिकथनं। प्रयोगकथनञ्च। मुमूर्षुकृत्यनिरूपणं। तत्र वैतरणीदानादिप्रयोगकथनं। एवं परत्र सर्व्वत्र प्रयोगकथनमिति ज्ञेयं। दाहादिविधिकथनं। ततः स्नान-

Colophon. इति बुधबालकुलोद्भूतमहामहोपाध्यायश्रीगोविन्दकृताधिकरणमाला समाप्ता।

विषयः। अधिकरणस्वरूपादिकथनं। तत्र अग्निहोत्रस्य कर्म्मनामधेयताधिकरणं। ज्योतिष्टोमे सोमेन यजेतेत्ययं विधिर्नानुवाद इति निरूपणं। खलेवाली न्यायनिरूपणं। आमिक्षाधिकरणं। विच्छेदाधिकरणं। रात्रिसत्राधिकरणं। विश्वजिन्न्यायः। यूपाहवनीयन्यायः। दर्शपौर्णमासविकृत्यधिकरणं। अभ्युदितेष्ट्यधिकरणं। संयोगपृथक्त्वन्यायः। प्रजापतिव्रतविचारः। ऐच्छिकविकल्पस्याष्टदोषग्रस्तत्वकथनं। श्रुतिलिङ्गाधिकरणं। निषादाधिकरणं। अरुणान्यायः। तद्व्यपकर्षन्यायः। अर्थवादाधिकरणं। पर्णतान्यायः। स्रुतग्रास्त्राधिकरणं फलचमसन्यायः। अक्ताधिकरणं। प्रतिनिध्यधिकरणं। हविरुभयत्वाधिकरणं। पाशाधिकरणं। नियमपरिसंख्याधिकरणं। कपालाधिकरणं। वेदो वेतिन्यायः। मुख्यं वेतिन्यायः। दर्व्विहोमाधिकरणं। तन्त्रप्रसङ्गविवेचनं। गुणस्य कर्म्मभेदकत्वाधिकरणं। ग्रहाधिकरणं। सन्निपातन्यायः। आग्रयिन्यायः। पुरोडाशन्यायः। सर्व्वपृष्ठाधिकरणं। प्रांशुन्यायः। सूक्तवाकाधिकरणं। योगसिद्ध्यधिकरणं। सर्व्वशक्त्यधिकरणं। अपच्छेदाधिकरणं। आर्षेयाधिकरणं। कर्म्मण्यारम्भाधिकरणं। जातेष्ट्यधिकरणस्वरूपविवेचनञ्च।

No. 2082 **रावणवधः।** Substance, country-made yellow paper, 14 × 3 inches. Folia, 130. Lines on a page, 6. Extent, 2,900 ślokas. Character, Bengali. Date, Sk 1326. Place of deposit, Calcutta, Government of India. Verse. Correct.

Rávaṇa-badha. An epic poem, in 22 cantos, on the adventures of Ráma and his invasion of Ceylon. The work is so composed that the different cantos treat successively of the different topics of grammar of the Sanskrit language. The writing is in well-formed Bengali letters, differing in no respect from the Bengali writing by Paṇḍits of the last century. The leaves are all stained with water marks, and the colour of the yellow orpiment with which they are dyed is very much faded, bearing unmistakable testimony to the age of the MS. The colour of the ink is well preserved, except in the marginal notes written at different times by different persons. The name of the scribe is Purushottama Deva S'armá. The date of writing is S'aka 1326 = A. D. 1403. A facsimile of the last page showing the date is given in plate I.

The work is a standard text-book on grammar in Indian schools, and has already been printed several times, but the codex under notice is the oldest that has yet been discovered, and is worthy of notice

FACSIMILE OF THE LAST PAGE OF A MS. OF THE BHATTI-KAVYA, DATED SAKA 1386.

Lithographed at the Surveyor General's Office Calcutta August 189[illegible]

ping liṅgams made of salt; ditto ditto of crystal or pearl; vessel for offering *arghyas;* offering of essences; ditto of *arka* flowers; ditto of oleander and *droṇa* flowers; proper flowers for offerings; merits of offering Datura flowers along with bilva leaves; ditto of surrounding the seat of liṅgams with garlands; ditto of making flower pavilions for liṅgams; ditto of worship with golden flowers; ditto of offering particular kinds of flowers on particular months; ditto of burning incenses; ditto of lamps; oil lamps may be offered if clarified butter be not available; ditto ditto lamps arranged in the form of a tree; ditto of lamps during the month of Kártika; ditto of ripe plums; ditto of the juice of sugarcane and molasses; ditto of flesh-meat; ditto of boiled rice, &c.; ditto of gold; ditto of singing by females; ditto a cow with a calf; ditto of kine, elephants, villages, districts, &c.; ditto of hanging bells in temples dedicated to liṅgams; ditto of awnings; ditto of jewels; ditto of flags; ditto of golden vessels; ditto of horses, &c.; ditto of heaps of sessamum seed; merit of waving lamps before liṅgams; ditto of repeating the mantras of S'iva; ditto of circumambulation; ditto of prostration; ditto of bathing in streams before a temple; ditto of smearing ashes on one's own body; ditto of putting on sectarial marks; ditto of adoration by a hermit; what to abstain from on the part of devotees to S'iva; penance at night; rules regarding the fast on the 14th of the wane in Mágha; worship on the 8th of the wane;—Here the codex breaks off.

Beginning. सूर्य्याचन्द्रमसौ दृशौ तदुपरि ज्योतिर्म्मयं दर्शनं
विभ्राणो गगस्यशिव + मनघं विश्वैकवीजं विभुः ।
धत्ते यः शिरसा सुधाकरकलामेकाङ्कमुद्रामयीं
देयादभ्युदयं त्रिकालविदयं देवो भवानीपतिः ॥
गङ्गोत्तुङ्गतरङ्ग + + मलमत् कीर्त्तिच्छटाचालित
क्षौणिक्ष्मातलसर्व्वपर्व्वतवरो वीरव्रतालङ्कृतः ।
भूपालावलिमौलिमण्डलमणिप्रत्यर्चिताङ्घ्रिद्वया-
म्भोज श्रीभवसिंहभूपतिरभूत् सर्व्वार्थकल्पद्रुमः ॥
दृप्यद्दुर्व्वारवैरिद्विपकुलदलनाकण्ठकण्ठीरवश्री-
रासीमाशेषभूभृन्मणिमुकुटतटज्योतिरुद्योतिताङ्घ्रिः ।
तत्सूनुः पुण्यकीर्त्तिर्न्नयविनयदयादानदाक्षिण्यदक्षो
दक्षः सर्व्वार्थितानां मिथिलभुवि नृपो देवसिंहो बभूव ।

दत्तं येन द्विजेभ्यो द्विरदरथमहादानमन्यैरशक्यं
का वार्त्ता त्वन्यदाने कनकमयतुलापूरुषो येन दत्तः ।
यस्य क्रीडातडागस्तुलयति स + + शामने वारिराशिं
देवोऽसौ देवसिंहः क्षितिपतितिलकः कस्य न स्यात्प्रशस्यः ॥
क्षोणीभर्त्तुरमुष्य वैरिवनिता वैदग्ध्यदीक्षागुरो-
रुद्भूतः शिवसिंहदेवनृपतिर्व्वीरावतंसः सुतः ।
शौर्य्यावर्ज्जितगौडगज्जनमहीपालोपनम्रीकृता-
नेकोत्तुङ्गमतङ्गजाश्वकनकक्ष्माभिरामोदयः ।
संग्रामाङ्गणसीमभीममहशस्तस्यानुज + + +
दानस्वल्पितकल्पवृक्षमहिमाऽसौ पद्मसिंहो नृपः ॥
कैलासोदरमोदरीयति शरद्राकाशशाङ्कीयति
प्रालेयाचलशेखरीयति यशो यस्यारविन्दीयति ।
विद्याशङ्गिरसः सुतस्य विनयं रामस्य वृत्तं मुनेः
शौर्य्यं सूर्य्यसुतस्य धैर्य्यमवनेर्गाम्भीर्य्यमम्भोनिधेः ।
दानं दानवनन्दनस्य सकलं सारं समु + + ता
धाता यः शरदिन्दुसुन्दरयशाः क्षोणीपतिर्न्निर्म्मितः ॥
दुग्धाम्भोधेरिव श्रीर्गुणगणमहशे विश्वविख्यातवंशे
सम्भूता पद्मसिंहक्षितिपतिदयिता धर्म्मकर्म्मैकसीमा ।
पत्युः सिंहासनस्था पृथुमिथिलमहीमण्डलं पालयन्ती-
श्रीमद्विश्वासदेवी जगति विजयते चर्य्ययारुन्धतीव ॥
इन्द्रस्येव शची समुज्ज्वलगुणा गौरीव गौरीपतेः
कामस्येव रतिः स्वभावमधुरा सीतेव रामस्य या ।
विष्णोः श्रीरिव पद्मसिंहनृपतेरेषा परा प्रेयसी
विश्वख्यातनया द्विजेन्द्रतनया जागर्त्ति भूमण्डले ॥
दातारः कति नाभवन् कति न वा सन्तीह भूमण्डले
नैकोऽपि प्रथितः प्रदानयशसो विश्वासदेव्याः समः ।
यस्याः स्वर्णतुलाकृताखिलमहादानप्रदाना + +
स्वण + + मृगीदृशामपि तुलाकोटिध्वनिः श्रूयते ॥
लीलालोलावनाली + चनिचयदलद्वीचिविस्तारभार-
प्रव्यक्तोन्मत्तमुक्तातरलतरतरद्द्वन्द्वमन्दोहवाक्ष ।
पुष्यात् पुष्पौघमालाकुलकलितलसद्भृङ्गभङ्गीतसङ्गी

Beginning. प्रणम्य नीरदश्यामं + + स गुणमन्दिरं ।
आख्यातवादसद्व्याख्या रघुदेवेन तन्यते ॥
सकृदाख्यातवादस्य मम ग्रन्थविलोकनैः ।
लीलयाध्यापनं धीराः कुर्व्वन्तु निद्रिता अपि ॥
नैयायिकः परमतं निराकर्त्तुं प्रथमतः तन्निरूपयति आख्यातस्येति ।

End. प्रसङ्गादिति लक्षणादिना उपपादने तु लाघवेन तर्कस्यैव शरणीकरणीयत्वादिति भाव इति दिक् ।

Colophon. इति महामहोपाध्यायश्रीरघुदेवभट्टाचार्य्यविरचितमाख्यातवादव्याख्यारहस्यं परिपूर्णमिति ॥

विषयः । आख्यातवादस्य व्याख्यानं ।

No. 1986. शक्तिवादविवरणं । Substance, country-made paper, 12 × 3 inches. Folia, 62. Lines, 6 on a page. Extent, 1,372 s'lokas. Character, Nágara. Date, ? Place of deposit, Magráni, Post Madhubaní, Darbhángá, Pandit Kánái Jhá. Appearance, fresh. Prose. Correct.

S'aktiváda-vivarana. A commentary on the S'aktiváda of Gadádhara. By Krishna Bhatta, son of Ranganátha Suri, and brother of Náráyana.

Beginning. श्रीकृष्णचरणौ नत्वा शक्तिवादार्थदीपिकां ।
करोति सम्प्रदायेन कृष्णभट्टो मुदे सतां ॥
सङ्केतोऽभिधारूपवृत्तिग्राहक इति मीमांसकमतं। लक्षणा च शक्तिशेष इति वैयाकरणमतं। तदुभयं कटाक्षयन्नाह सङ्केत इति। अत्र तीरं गङ्गापदार्थसम्बन्धि न गङ्गापदार्थ—इति ज्ञानेऽपि गङ्गायां घोष इत्यादितः शाब्दबोधोदयात् सङ्केतमात्रेणोपपत्तिरतो न लक्षणातिरिक्तवृत्तिः स्वीकार्य्येत्यभिप्रायेणाह लक्षणा चेति । इत्यादि ।

End. पर्य्यायताज्ञानस्य न्यायादिमते द्वयोः पदयोः तद्धर्मावच्छिन्नशक्तिमत्त्वज्ञानादिरूपत्वात् तत्कालीनस्य विशिष्टशक्तिज्ञानस्य सर्व्वमते लोमसमुख्यविशेष्यकलोमप्रकारकफलजनकतया भवन्मते तदनुपपत्तेः । + + + + पर्य्यायताभ्रमस्य पशुपदं लोमत्वशक्तमित्याकारतया लोमसमुख्यविशेष्यकशाब्दबोधे बाधकाभावादिति ।

Colophon. इति श्रीरङ्गनाथसूरिसूनुनारायणानुजकृष्णभट्टविरचितं शक्तिवादविवरणं सम्पूर्णं ।

विषयः । गदाधरभट्टाचार्य्यकृतशक्तिवादस्य व्याख्यानं ।

No. 1987. शुभकर्म्मनिर्णयः। Substance, palm-leaf, 12 × 2½ inches. Folia, 100. Lines, 5 on a page. Extent, 1,082 s'lokas. Character, Maithilí. Date, L. S. 554. Place of deposit, Magráṇi, Post Madhubaní, Darbhángá, Paṇḍit Kánái Jhá; another copy with Chhoṭi Jhá. Appearance, old. Prose and verse. Incorrect.

S'ubhakarma-nirṇaya. A digest of the rules regarding the performance of domestic rites according to the ordinances of Gobhila. By Murári Mis'ra. The work was compiled under the auspices of Rájá Trivikramanáráyaṇa, son of Jagannáráyaṇa, grandson of Naranáráyaṇa, great-grandson of Víranáráyaṇa, great-great-grandson of Rúpanáráyaṇa, and great-great-great-grandson of Lakshmináráyaṇa.

Beginning. वन्दे नन्दतनूजं जगदालम्बं निरालम्बं।
सन्देहतिमिरमिहिरं निगमनिवेद्यमहः किमपि॥
दुष्टानामेकशास्ता हरिचरणपरः पौरवर्गस्य पाता
वैरिश्रेणीनिहन्ता द्युतिजितमदनः श्रीप्रभूरिप्रदाता।
विश्वव्यापिप्रतापस्त्रिजगति विदिते चारु + वङ्गदेशे
लक्ष्मीनारायणाख्यः समभवदवनीपालमालावतंसः॥
कुमार इव गौरीशात् पारिजात इवाम्बुधेः।
रूपनारायणो राजा लक्ष्मीनारायणादभूत्॥
वारं वारमुदारवैभववतामद्यापि भूमीभृतां
द्वारं द्वारमुपेत्य हन्त सहसा भिक्षामलब्ध्वा बुधाः।
एतस्मिन् समये स चेत्सकरुणः श्रीरूपनारायण—
स्तिष्ठेदित्यभिधाय लोलशिरसः पाणिं क्षिपन्त्यर्थिनः॥
श्रीवीरनारायणमेदिनीन्द्रः श्रीरूपनारायणभूमिपालात्।
जातस्ततः सर्व्वगुणैरुपेतो यथा जयन्तो विबुधाधिराजात्॥
उग्रासु प्रविशन्नपि प्रतिभटश्रेणीषु हृष्यन्मना
भिक्षुभ्यो मुकुरपंयन्नपि बहून्यम्लायमानाननः।
प्रागत्यन्तरुषा रिपून् परिभवन्नप्युन्नतान्तस्त्रपो-
धन्यो + जगतीतले भवतु कः श्रीवीरनारायणात्॥
शिरोरत्नं राज्ञां जननयनराकाहिमकरो-
निवासो धर्म्माणां रणविजयलक्ष्म्याः प्रियतमः।
अभूदस्माद्राज्ञो नयविनयविद्याबलमति-
श्रियां पारावारः स खलु नरनारायणनृपः॥

विध्यर्थवादः स्मृतिनामधेयं चतुर्व्विधं मानमुदीरयेऽत्र ।
पादैश्चतुर्भिस्त्रिचलक्षणस्थैः सूत्रान्वितैः सिद्ध्यति कर्म्मद्वन्द्वं ॥
अल्पाक्षरमसन्दिग्धं सारवद्विश्वतोमुखं ।
अस्तोभमनवद्यञ्च सूत्रं सूत्रविदो विदुः ॥ इति ।
तत्र मीमांसासूत्रमन्दर्भोऽथातो धर्म्मजिज्ञासेति । इत्यादि ।

End मेघपतिशब्दस्य देवतापरत्वात् यत्र गणदेवता तत्राविकारो यत्र देवतास्वरूपभेदस्तत्रावश्यमूहस्तस्य देवताभेदे ऊह इति स्थित ।

Colophon. इति श्रीराघवानन्दसरस्वतीविरचितमीमांसासूत्रादीधितौ नवमाध्यायस्य तृतीयः पादः ।

विषयः । न्यायप्रदर्शनपूर्व्वकं मीमांसासूत्रस्य नवमाध्यायतृतीयपादान्तं व्याख्यानं ।

No. 1992. स्मृतितत्त्वामृतं । Substance, palm-leaf, 11 × 2 inches. Folia, 112. Lines, 5 on a page. Extent, 2,428 s'lokas Character, Maithilí. Date, L. S. 505.=Sk. 1546. Place of deposit, Magráṇi, Post Madhubaní, Darbhángá, Paṇḍit Kánái Jhá; a second copy with Paṇḍit Chhoṭí Jhá of that place. Appearance, old. Prose and verse. Correct.

Smṛiti-tattvámṛita. A digest of the rules of the Smṛitis. The codex under notice contains the chapter on rites for the pacification of adverse divinities, and works of public utility, and is called *S'ántipaushṭikáñjalí.* By Vardhamána Mahámahopadhyáya, son of Bhaveśa by Gaurí.

Beginning श्रीबिल्वपञ्चककुलप्रभवस्य गौरी सा तस्य मत्कविभवे शतनुद्भवस्य ।
श्रीवर्द्धमानकृतिनः शितशान्तिपुष्टितत्त्वामृतं पिवत निर्वृतिमेतु चेतः ॥
व्यवहारोऽन्यथा लोके साम्प्रतं शास्त्रमन्यथा ।
तयोर्विरुद्धयोः शास्त्रं बलवत्त्वादिहादृतं ॥

इह योगक्षेमावेव सर्व्वेषामपेक्षितौ तत्र अङ्कितानिष्टनिवृत्तिः क्षेमः स इह शान्तिरित्युच्यते । तदर्थं कर्म्म शान्तिकं । अपूर्व्वाभीष्टलाभो लब्धपरिरक्षणञ्च योगः । तदर्थं कर्म्म पौष्टिकं । इत्यादि ।

End. फलावाप्तिपर्य्यन्तं ब्रह्मचारिणा भवितव्यं कर्म्मावसाने फलप्राप्तिः । इति पौष्टिकं कोशः ॥

गौरी-भवेशपुत्रेणोक्तं वर्द्धमानविदुषेन ।
स्मृतितत्त्वामृतनाम्नि निबन्धशान्तिकपौष्टिकं कर्म्म ।

Colophon. इति महामहोपाध्यायश्रीवर्द्धमानकृतौ स्मृतितत्त्वामृते शान्तिकपौष्टिकाञ्जलिः सम प्तः । शुभमस्तु । लसं ५०५ । शाके १५४६ ।

विषयः । शान्तिकपौष्टिककर्म्मनिर्णयः । तत्र शान्तिकपौष्टिककर्म्मस्वरूपकथन । होमादीनामुभयरूपत्वकथनं । यागलक्षणकथनं । होमलक्षणं । यज्ञलक्षणं । शान्तिकामेन ग्रहयज्ञः कार्य्य इति निरूपणं । तत्र ताम्रस्फटिकादिना सूर्य्यादिनवग्रहाणां प्रतिकृतिनिर्म्माणकथनं । ग्रहाणां मूर्त्तिवर्णनं । ग्रहाणां जन्म-स्थान-जाति-गोत्रादिकमज्ञात्वा होमानुष्ठाने दोषकथनं । तेषां जन्मादिकीर्त्तनञ्च । ग्रहाणामग्निभेदकथनं । मण्डलादिसंस्थानकथनं । ग्रहयज्ञकालादिनिरूपणं । दक्षिणायनादौ निषिद्धेऽपि मलिम्लुचादौ शान्तिकं कर्त्तव्यमेवेतिनिरूपणं । होमद्रव्येषु प्रतिद्रव्यं, विशेषपरिमाणकथनं । परिसमूहनादिषु प्रत्येकं मन्त्रकथनं । रूपनारायणधर्म्मधरकृतग्रहयज्ञपद्धतिदूषणं । ग्रहाणां पूजाविधिकथनं । होमविधिकथनं । दक्षिणानिरूपणं । शान्तिकपौष्टिककामेन अल्पवित्तेनापि कुपितग्रहस्य पूजा कर्त्तव्येतिकथनं । ग्रहाणां प्रत्येकं वक्रत्वादिफलकथनं । उत्पातनिरूपणमुखेन द्विविधाद्भुतनिरूपणं । तत्र नैमित्तिकाद्भुतानि । दिव्यान्तरिक्षाद्भुतादिनिरूपणं । अद्भुतानां फलपाककालकथनं । विविधाद्भुतनियमेन शान्तिव्यवस्थाकथनं । तत्र अभिचारशङ्कादौ अभयाशान्तिकथनं । राजयक्ष्मरोग-भूकम्पादौ वैष्णवीशान्तिकथनं । पशुमरकादौ रौद्रीशान्तिकथनं । वेदनाशनास्तिक्यादौ ब्राह्मीशान्तिकथनं । अभिशापप्रसववैकृत्यादौ प्राजापत्याशान्तिकथनं । उपस्कारादौ कौमारीशान्तिकथनं । वह्निवैकृतादौ आग्नेयीशान्तिकथनं । भृत्याभिमर्षणादौ गान्धर्व्वीशान्तिकथनं । अपमृत्युधननाशादौ कौवेरीशान्तिकथनं । वृक्षादीनां वैकृते पार्थिवीशान्तिकथनं । एवमन्यत्र प्रत्येकं शान्तिकथनं । सूर्य्यादिषु ग्रहेषु उत्पातकथनपूर्व्वकं प्रत्येकं शान्तिकथनं । वायव्यमण्डलफलकथनं । एवमाग्नेयवारुणादिफलकथनं । ग्रहयुद्धनिरूपणपूर्व्वकं तच्छान्तिकथनं । ग्रहणफलकथनं । नाडीलक्षणशान्तिकथनं । अभिषकदेश-जाति-नक्षत्रपीड़ानां शान्तिकथनं । नभउत्पातशान्तिकथनं । निर्घातशान्तिकथनं । दिग्दाहशान्तिकथनं । छायाद्भुतादिशान्तिकथनं । उल्कापातादौ शान्तिकथनं । वातातिवृष्ट्याद्यद्भुतशान्तिकथनं । आग्नेयमण्डलादिफलकथनं । जलाशयाद्भुतकथनपूर्व्वकं तच्छान्तिकथनं । प्रतिमाद्भुतादिशान्तिकथनं । वृक्षवल्लीविमगुल्माद्यद्भुतशान्तिकथनं । शकुनाद्यद्भुतशान्तिकथनं । स्वद्गादिवाद्याद्भुतशान्तिकथनं । वस्त्राद्भुतशान्तिः । शस्त्राद्भुतशान्तिः । मानुषाद्भुतशान्तिः । प्रसवाद्भुतशान्तिः । अद्भुतानां फलपाकसमयकथन । पौष्टिककर्म्मविधिकथनं । गायत्रीहोमादिविधानं । षडङ्गरुद्रविधानकीर्त्तनं । प्राजापत्यादिविधिकथनं । चान्द्रायणादिविधिकीर्त्तनञ्च ।

No. 1993 लिङ्गवृत्तिः। Substance, palm-leaf, 10 × 2 inches. Folia, 34. Lines, 5 on a page. Extent, 481 s'lokas. Character, Maithilí. Date, ? Place of deposit Magráni. Post Madhubaní, Darbhángá, Pandit Kánái Jhá. Appearance, old. Prose. Correct.

Linga-vritti. On the genders of words. By Vararuchi Ácharya.

Beginning. यावान् कश्चित् चान्तः शब्दो नपुंसको बोद्धव्यः। यावानिति परिमाणवाची शब्दः कश्चिदिति अनिर्दिष्टनामधेयं। त अन्ते यस्य स तान्तः। शब्दान्तेऽनेनाथा इति शब्दः, अभिलप्य इत्यर्थः। स च शब्दश्चतुर्व्विधः। जातिशब्दः, गुणशब्दः, क्रियाशब्दः, यदृच्छाशब्दश्चेति। इत्यादि।

End. भयं योनिरियं योनिः गुह्यस्थानं। वाग्विषयस्य महतः संक्षेपत एव लिङ्गविधिरुक्तः। यन्नोक्तमत्र सद्भिस्तल्लोकतएव बोद्धव्यं॥

Colophon. इत्याचार्य्यश्रीवररुचिकृता लिङ्गवृत्तिः समाप्ता।

विषयः। क्वचिदन्त्याक्षरनिर्द्देशेन क्वचिच्च पर्य्यायोल्लेखेन शब्दानां लिङ्गानुशासनकीर्त्तनं।

No. 1994. जातकसारः। Substance, palm-leaf, 11 × 2 inches. Folia, 23. Lines, 5 on a page Extent, 432 s lokas. Character, Maithilí. Date, ? Place of deposit, Magráni, Post Madhubaní, Darbhángá, Pandit Kánái Jhá. Appearance, old. Mostly in verse. Correct.

Játakasára. An epitome of horoscopy. By S'isu Mahámahopádhyáya.

Beginning. तामीश्वरीमखिलदेवकिरीटकोटि-रत्नांशुकेशरितपादसरोजलक्ष्मीं।
रक्षकवक्षरजटाचयचारुचन्द्रोद्योतावदातमुखतामरसां नमामि॥
तरणिरजनिनाथौ पार्थिवः सोमसूनुस्त्रिदिवपतिपुरोधा भार्गवो भानुसूनुः।
शिशिरकरविरोधी केतवश्चेति सर्व्वे विदधतु वकभाग्यं वो नभोगा नवैते॥
भौमभार्गवबुधेन्दुभास्कराः सौम्यशुक्रधरणीतनूद्भवाः।
जीवभानुसुतभानुजा गुरू-राशयधीशगणना यथाक्रमं॥ इत्यादि।

End. रजनिकिरणदुग्धाम्भोनिधौ वृद्धितेजाः प्रबन्दलनविद्याराशिपीयूषपूर्णः।
नयविनयकलात्मा दुष्कृतध्वान्तहन्ता विधुरिव विमलश्रीराजतिश्रीवटेशः॥
तस्यात्मजेन शिशुना सुखबोधहेतोरालोक्य जातकमवश्चि + + + चैवं।
सूत्रात्मकं हितमयं प्रथमप्रवेश बालस्य पालनमतोऽस्य वृथा विधेयं॥

Colophon. इति महापाध्यायश्रीशिशुविरचितो जातकसारः॥

विषयः। राशितदधीश-खेटादिनिरूपणं। जातकलग्नज्ञानोपायकीर्त्तनं। पितृपरोक्षे-जन्मकथनविधिः। अरिष्टकथनं। अरिष्टभङ्गकीर्त्तनं। परमयोगनिरूपणं। राजयोगकथनं। सुनफादियोगकथनं। केमद्रुमयोगकथनं। रविकृतवेश्यादियोगकथनं। नवांशकफलकथनं। द्वादशांशफलकथनं। ग्रहदृष्टफलकथनं। अधमाष्टकयोगनिरूपणं। स्त्रीजन्मचिन्तनं। तत्र वैध-व्यादिज्ञानोपायकथनं। जारजयोगनिरूपणं। परमोच्चग्रहकथनं। त्रिकोणस्थितग्रहफलकथनं। नीचग्रहादिफलकथनं। ग्रहत्रययोगकथनं। चतुर्ग्रहादिफलकथनं। तनुस्थानादिग्रहफल-कथनञ्च।

No. 1995. व्रतपद्धतिः। Substance, palm-leaf, 10 × 2 inches. Folia, 62. Lines, 5 on a page. Extent, 1,306 s'lokas. Character, Maithilí. Date, ? Place of deposit, Magráṇi, Post Madhubaní, Darbhángá, Paṇḍit Kánái Jhá two other copies, one with Paṇḍit Chhoṭi Jhá, another at Naduyárgram, Post Madhubaní, with Paṇḍit Kanṭu Jhá. Appearance, old. Prose and verse. Correct.

Vratapaddhati. On optional fasts and penances, called Vratas. By Rudradhara Mahámahopádhyáya.

Beginning. भातृश्रुत्किकृतोद्बोध श्रीरुद्रधरशर्म्मणा।
नानानिबन्धसिद्धान्तो लिख्यते व्रतपद्धतिः॥

तत्रादौ व्रतसामान्यधर्म्माः। तत्र देवलः।

अभुक्त्वा प्रातराहारं स्नात्वाचम्य समाहितः।
सूर्य्यादिदेवताभ्यश्च निवेद्य व्रतमाचरेत्। इत्यादि।

End. वस्तुवस्तु तथापि शुक्लादेरभिलाषं कर्त्तुमर्हति सतोऽपि छत्रादिलक्ष्य अग्रये जक-त्वादिति। एष श्रीभातृचरणोन्नीतः समयप्रदीपानुसारी पन्थाः॥

Colophon. इति महामहोपाध्यायश्रीरुद्रधरकृता व्रतपद्धतिः समाप्ता।

विषयः। सामान्यतो व्रतधर्म्मनिरूपणं। उपवासादिस्वरूपविवेचनं। स्त्रीणां सभर्त्तृकाणां पतिपार्थक्येन उपवासनिषेधकथनं। वैश्यशूद्रयोस्त्रिरात्रपञ्चरात्रोपवासनिषेधकथनं। गृहीत-व्रतापालने दोषकथनं। मासलक्षण-तद्विभागादिकथनं। दुग्धादितिथिव्यवस्थाकथनं। नक्त-व्यवस्थाकथनं। हविष्यद्रव्यनिरूपणं। आदित्यव्रतविधानं। तत्र रविवारे उपवासव्रतविधानं। उभयसप्तमीव्रतकथनं। आरोग्यसप्तमीव्रतविधानं। फलसप्तमीव्रतकथनं। देवीव्रतविधानकथनं। तत्र कुन्दचतुर्थीव्रतविधानं। शिवव्रतविधानं। तत्र अष्टम्यां नक्तभोजनव्रतविधानं। रौद्रव्रतवि-धानं। महाव्रतविधानकथनं। तत्र लिङ्गादिपूजाविधानकथनं। गोमयादिलिङ्गपूजाविधानं। एकादशीव्रतविधिकथनं। अशून्यशयनव्रतविधानं। यावज्जीवैकभक्तव्रतविधिकथनं। मांस-

परित्यागविधानादिकथनं । एकभक्तव्रतविधिकथनं । शाकमात्राहारव्रतविधानकथनं । तृण-मात्राहारव्रतविधिकथनं । एकरात्रद्विरात्रत्रिरात्राद्युपवासव्रतविधानं । एकान्तराद्युपवासव्रतविधानं । द्वादशमासकृत्यविधिनिरूपणं गृहशाग्निकरणविधिकथनं । प्रमादनष्टहिरण्यप्रायश्चित्तं । जन्मतिथिकृत्यनिरूपणं । सूतिकाषष्ठीपूजाविधानकथनं । वास्तुपूजाप्रकारादिकथनं । विद्या-रम्भविधिकथनं । पञ्चपर्व्वकृत्यनिरूपणं । तिथिवारनियतकृत्यादिविधानं । आवश्यकश्राद्धकाला-दिनिरूपणं । चन्द्रादिग्रहणकृत्यनिरूपणं । मलमासस्वरूपकथनपूर्व्वकं तत्र कृत्यनिरूपणं । एकोद्दिष्टश्राद्धकालनिरूपणञ्च ।

No. 1996. मिथ्यात्वनिर्व्वचनं । Substance, country-made paper, 16 × 3 inches. Folia 8. Lines, 8 on a page. Extent, 288 s'lokas. Character, Maithilí. Date, ? Place of deposit, Magráṇi, Post Madhubaní, Darbhángá, Paṇḍit Kánái Jhá. Appearance, fresh. Prose. Correct.

Mithyátva-nirvachana. A dissertation on unreality leading to the conclusion of the unity of the human and the divine souls, and the substantial unreality or mere phenomenality of the universe as distinct from that soul. By Gokulanátha Upádhyáya, Mahámahopádhyáya.

Beginning. रज्जुसर्पवदनाद्यविद्यया यत्र कल्पितमतात्त्विकं जगत् तत्परं किमपि वस्तु गोकुले नन्दवेश्मनि निलीय तिष्ठति ॥ वियदाद्युर्व्वीवारिवसुधादिरचेतनप्रपञ्चो मिथ्या जड़त्वात् दृश्यत्वात्परिच्छिन्नत्वात् तत्र यस्य वस्तुनो यत्र यत्र धर्म्मिणि यत्कालदेशावच्छेदेन — इत्यादि ।

End. वस्तुतः स्वजन्यत्वं स्वाधिकरणक्षणवृत्तिध्वंसप्रतियोगिवाक्यवृत्त्यानुपूर्व्वीकत्वं वाक्या-र्थज्ञानादेश्यतानिरूपितसाध्यत्वाख्यविषयता चेति संसर्गत्रयेण प्रयत्नवत्त्वं तात्पर्य्यमिति निष्कर्षः॥

Colophon. इति महामहोपाध्यायगोकुलनाथोपाध्यायविरचितं मिथ्यात्वनिर्व्वचनं पूर्ण-मिति ।

विषयः । मिथ्यात्वस्वरूपनिरूपणपूर्व्वकं प्रपञ्चस्य मिथ्यात्वसंस्थापनं । प्रसङ्गादुपासनादि-स्वरूपकथनमुखेन जीवब्रह्मैक्यादिकीर्त्तनञ्च ।

No. 1997. लीलावतीप्रकाशटिप्पनी । Substance, palm-leaf, 10 × 1 inches. Folia, 64. Lines, 4 on a page. Extent, 1,393 s'lokas. Character, Maithilí. Date, ? Place of deposit, Magráṇi, Post Madhubaní, Darbhángá, Paṇḍit Kánai Jhá. Appearance, old. Prose. Correct.

Líláváti-prakáṡa-ṭippaní. A gloss on Vardhamána's commentary on the Líláváti. By Raghunátha S'iromaṇi Bhaṭṭáchárya.

Beginning. ॐ नमः सर्व्वभूतानि विष्टभ्य परितिष्ठते ।

अखण्डानन्दबोधाय पूर्णाय परमात्मने ॥

षड़ेव पदार्था इत्यवधारणस्य साध्यादावभावात् आक्षेपानङ्गतेश्च इहेति अवधारणपरोऽव-धारणप्रयोजनकः विभागो विभजनं तदर्थः काद्याचित्कः । विभागात्मकमिति पाठस्तु सुगम एव विभागे विभागोद्देश्यत्वेन अभिमते न्यूनाधिकसंख्याव्यवच्छेदे—इत्यादि ।

End. अकारणेति । अन्वयव्यतिरेकाभ्यां क्वचिदकारणनाशस्यापि स्वकार्य्यनाशकत्वे न क्षतिरिति मन्तव्यं ।

Colophon. इति श्रीशिरोमणिभट्टाचार्य्यविरचिता लीलावतीप्रकाशटिप्पनी समाप्ता ।

विषयः । वर्द्धमानकृतप्रकाशाभिधानाया लीलावतीटीकाया व्याख्यानं ।

No 1998. पुष्पमाला । Substance, country-made paper, 11 × 4 inches. Folia, 4. Lines, 6 on a page. Extent, 60 s'lokas. Character, Maithilí. Date, ? Place of deposit, Magrání-grám, Post Madhubaní, Darbhángá, Paṇḍit Kánái Jhá. Appearance, new. Verse. Correct.

Pushpa-málá. On the different kinds of flowers and leaves appropriate for the worship of particular divinities and at particular rites and ceremonies. By Rudradhara.

Beginning. जातीकुन्दशमीकुशेशयकुशाशोकं वकं किंशुकं

पुन्नागं करवीरचम्पकजवाशेफालिकाकुब्जकं ।

वासन्तीशतपत्रिकाविचकिलं मन्दारमर्काङ्कयं

पीताम्लानकनागकेशरमिदं पुष्पं रवेः शस्यते ॥ इत्यादि ।

End. आहृत्य पत्रपुष्पं निपुणं कल्पतरुपारिजातादेः ।

पूजाविधौ सुराणां प्रशस्तदलपुष्पमालेयं ॥

रुद्रधरेण मनोरम गुणजालेन गुम्फिता यत्नात् ।

तनोतु तोषपोषं मनसि चिरं सर्व्वविबुधानां ॥

विषयः । सूर्य्यपूजने विहिताविहितपुष्पनिरूपणं । एवं शिव-विष्णु-दुर्गा-लक्ष्मी-विष्णु-मूर्त्तिभेदानां पूजने विहिताविहितपुष्पपत्रादिनिरूपणं । सर्व्वसुरपूजने वर्ज्जितपुष्पकथनं । श्राद्धादौ विहिताविहितपुष्पकथनञ्च ।

No. 1999. धर्म्माधर्म्मप्रबोधिनी। Substance, country-made paper, 14 × 3½ inches. Folia, 157. Lines, 8 on a page. Extent, 3,120 s'lokas. Character, Maithilí. Date, Sm. 1410. Place of deposit, Naváni, Post Mádhepurá, Darbháṅgá, Paṇḍit, Vañsamaṇi Jhá. Appearance, old. Prose and verse. Correct.

Dharmádharma-prabodhiní. A digest of the Smṛiti rules regarding duty. By Premanidhi, son of Indrapati Mahámahopádhyáya, of Mithilá. The work was completed at Mysore, in the Nizám Sháhi dominion, in Samvat 1410, = A. D. 1353. It is divided into 12 chapters, thus—I. Daily duties. II. Worship. III. S'ráddhas. IV. Impurities. V. Purification. VI. Marriage. VII. Religious benefactions. VIII. Duties during times of distress. IX. Optional fasts. X. Pilgrimage. XI. Expiations. XII. Fruits of former works. Duties common to all classes, &c.

Beginning. जयति जयति गौरीबालको विघ्नहर्त्ता
जयति जयति देवो भानुकोटिप्रकाशः।
जयति जयति ++ सैकदन्तः सुरूपो-
जयति शुभगजास्यः पातु नः सिद्धिदाता॥
प्रणम्य जगदाधारं गुरुञ्चैव विशेषतः।
क्रियते ब्राह्मणार्थाय धर्म्माधर्म्मप्रबोधिनी॥

अथ प्रातःकृत्यं। तत्र स्मृतिसमुच्चये,—दक्षः।
प्रातरुत्थाय कर्त्तव्यं गृहकृत्यं दिने दिने।
तत् सर्व्वं सम्प्रवक्ष्यामि द्विजानां विधिसिद्धये॥ इत्यादि।

End. मन्वादिस्मृतिमालोक्य याज्ञवल्क्यं तथैव च।
श्रीमत्प्रेमनिधिर्धीमान् अकरोद्धर्म्मबोधिनीम्॥
श्रीमद्राजनिजामसाहविषये माहिस्मती या पुरी
सा मे पूर्व्वजवासभूश्च सततं देवोऽपि यां वाञ्छति।
श्रीमन्मैथिलठक्कुरेन्द्रपतिजो यत्नेन दृष्ट्वा स्मृतिं
कार्य्याकार्य्यविचारणार्थमकरोद्देवोपकण्ठे वसन्॥

Colophon. इति महामहोपाध्यायठक्कुरश्रीमदिन्द्रपतिसूनुश्रीप्रेमनिधिविरचिते धर्म्मशास्त्रे धर्म्माधर्म्मप्रबोधिन्यां द्वादशोऽध्यायः। समाप्तश्चायं ग्रन्थः।
मार्गे मासि सिते पक्षे षष्ठ्यां वै भृगुवासरे।
यत्नेन पाल्यतां विप्रैः समाप्तेयं प्रबोधिनी॥ संवत् १४१०॥

विषयः। प्रथमेऽध्याये,—आचारनिरूपणं। तत्र प्रातःकृत्यविधिः। मूत्रपुरीषाद्युत्सर्गस्थानादिनिरूपणं। षड्विधमौनविधानं। शौचविधिः। परिधानीयवस्त्रनिषेधः। सन्ध्यास्नानजपहोम-देवपूजातिथ्यवैश्वदेवरूपषट्कर्म्मनिरूपणं। तत्र विविधस्नानविधानं। आचमनविधानं। दन्तधावनविधिः। तत्र मन्त्रादिकथनञ्च। चौरकर्म्मविधिः। तैलनिषेधः। क्वचित् तैलाभ्यङ्गविधिः। प्रातःस्नानविधिः। तिलकविधिः। कुशमाहात्म्यं। तदुत्पाटनविधिः। तर्पणविधिकथनञ्च।

द्वितीयेऽध्याये,—अभिवादनविधिः। देवपूजाविधिः। तत्र अर्घ्यपाद्यादिविधिः। पुष्पनिरूपणं। अनुलेपनविधिः। धूपदीपनैवेद्यासनादिविधिः। प्रतिमानिरूपणं। शिवलिङ्गमाहात्म्यं चण्डिकापूजाविधिः। विष्णुपूजाविधिः। घण्टावादनविधिः। शङ्खपूजाविधिः। होमविधिः। वैश्वदेवविधिः। आतिथ्यविधिकथनञ्च।

तृतीयेऽध्याये,—श्राद्धविधिः। तत्र श्राद्धपूर्व्वदिनकृत्यं। एकोद्दिष्टविधिः। श्राद्धकर्त्तृनियमाः। तीर्थश्राद्धविधिः। विघ्नपतितादिश्राद्धविधिः। वृषोत्सर्गविधिः। श्राद्धाधिकारिणः। द्वादशविधपुत्रविवेचनं। मलमासादिनिरूपणं। विषशस्त्रादिहतानां श्राद्धविधिः। अपरपक्षामावस्यादिश्राद्धविधिः। श्राद्धप्रशस्तद्रव्याणि।

चतुर्थेऽध्याये,—अशौचनिरूपणं। सद्यःशौचादिदशविधाशौचनिरूपणं। अशौचसङ्करनिरूपणं। बालाद्यशौचं। स्त्र्यशौचं। मृत्युविशेषाशौचं। सपिण्डाद्यशौचं। निर्हरणाद्यशौचं पिण्डदानविधिः। अशौचान्तदिनकृत्यं।

पञ्चमेऽध्याये,—द्रव्यशुद्धिनिरूपणं। तत्र जलशुद्धिलेपशुद्ध्यादिनिरूपणं। धातुशुद्धि। वस्त्रादिशुद्धिः। शस्यादिशुद्धिः। तृणकाष्ठादिशुद्धिः। स्वभावशुद्धिः। उच्छिष्टादिस्पर्शशुद्धिः। नानावस्तुस्पर्शशुद्धिः। अमेध्यस्पर्शशुद्धिः। आचमनानुकल्पः। कुक्कुरादिस्पर्शशुद्धिः।

षष्ठेऽध्याये,—विवाहविधिकथनं। कन्यादानाधिकारिणः। कन्यालक्षणादिकथनं। स्त्रीधर्म्मकथनं। पतिव्रतालक्षणादिकं। सहगमनविधिः। गर्भाधानकथनं। जन्मविवरणकथनप्रसङ्गेन संक्षेपेण शारीरस्थाननिरूपणं। पुत्रजन्मादिकृत्यं। उपनयनादिविधिः। ब्रह्मचारिनियमाः। अनध्यायाः। गार्हस्थ्यविधिः। वानप्रस्थविधिः। यतिधर्म्मनिरूपणं।

सप्तमेऽध्याये,—ब्राह्मणप्रशंसा। दानविधिः। कृष्णवस्त्रादिदानविधिः। महादेवप्रतिमाशालग्रामदानादिविधिः। गृहादिदानविधिः। अन्नजलभूमिदानादिविधिः। मासादिनियतदानविधिः। आमादिवृक्षरोपणफलकथनं। सत्प्रतिग्रहासत्प्रतिग्रहादिनिरूपणं। देशकालपात्रविवेचनं।

अष्टमेऽध्याये,—आपद्धर्म्मनिरूपणं। क्षीरादिविक्रये पातित्यादिनिरूपणं। चातुर्वर्ण्यसाधारणधर्म्मनिरूपणं। भक्ष्याभक्ष्यनिरूपणं। प्रतिपदादिषु कुष्माण्डादिभक्षणनिषेधः। भोजनविधिः। जातिविवेकः।

नवमेऽध्याये,—व्रतादौ तिथ्यादिनिरूपणं। एकादशीनिरूपणं। उपवासनियमाः। महावारुण्यादियोगः। रामनवमीविधिः। चैत्रादिद्वादशमासकृत्यनिरूपणं। सावित्रीव्रतं। दशहरा। चातुर्मास्यविधिः। जन्माष्टमीविधिः। नवरात्रपूजाविधिः। सङ्क्रान्तिपुण्यकालनिरूपणं। अर्द्धोदययोगः।

दशमेऽध्याये,—तीर्थमाहात्म्यकीर्त्तनं। तीर्थनामानि। निवासस्थाननिरूपणं। राजधर्म्मकीर्त्तनं। करादानादिविधिः। दुर्गादिनिरूपणं। ऋणदानादिविधिः। आधिनिरूपणं। साक्षिविधिः। लेख्यदिव्यादिप्रकरणं। सीमाविवादादिनिरूपणं। दायभागकथनं। द्यूतविधिः। दण्डपारुष्यविधिः। स्तेयविधिः। अभिगमादिदण्डविधिः।

एकादशेऽध्याये,—वधनिर्णयः। महापातकादिनिरूपणं। ब्रह्महत्यासुरापानादिप्रायश्चित्तं। अगम्यागमनप्रायश्चित्तं। क्षत्रियादिवधप्रायश्चित्तं। गोवधादिप्रायश्चित्तं। प्रायश्चित्तदिननिषिद्धानि। स्त्रीवधप्रायश्चित्तं। इतरप्राणिवधप्रायश्चित्तं। इतरद्रव्यस्तेयप्रायश्चित्तं व्रणादौ कृमियोग प्रायश्चित्तं। आत्मघातप्रवृत्तप्रायश्चित्तं। अपहृत्यहरणप्रायश्चित्तं। गवादिविक्रयप्रायश्चित्तं। निन्दितविवाहप्रायश्चित्तं व्रात्यप्रायश्चित्तं। चान्द्रायणकृच्छ्रादिव्रतलक्षणं।

द्वादशेऽध्याये,—कर्म्मविपाककथनं। सामान्यतः सर्व्ववर्णकर्त्तव्यानि। माङ्गल्यानि। अश्वत्यादिवृक्षरोपणविधिः। लवणसंयुक्तक्षीरादिभक्षणनिषेधः। दीपनिर्व्वाणदोषाः। शयनविधिः।

No 2000. पुरञ्जनचरितनाटकम्। Substance country-made paper, 10 × 2½ inches. Folia, 30. Lines, 6 on a page. Extent, 531 ślokas. Character, Maithilí. Date, Sk. 1701. Place of deposit, Sáradápura, Post Mádhepurá, Darbhángá, Paṇdit Harshanátha Jhá. Appearance, fresh. Prose and verse. Correct.

Puranjana-charita. A drama in five acts founded on the story of Puranjaná as given in the Bhágavata Puráṇa. By Krishṇadatta, of Mithilá. The play was first acted in the court of Purushottama Deva, of Orissá. The object of the work is to promote devotion to Krishṇa.

Beginning. नित्यानन्दचिदात्मकस्य कलया यस्याच्युतस्याखिलं
विश्वमिति तमप्यचेतनमिव द्राग्भ्राम्यति भ्राम्यति।
यो गृह्णात्यकरश्चलत्यचरणः पश्यत्यचक्षुः शृणो-
त्यश्रो वो मनसो गिरोऽप्यविषयो भक्तैर्वशोऽव्यात्स वः॥

अपि च। एकं वृक्षमधिष्ठितौ सहचरौ द्वौ सुपर्णौ भजे
एकं पिप्पलमत्यदन्निह ययोरेको गुणैर्बध्यते।

नाम्नन्नप्यनिद्रीप्तिमच्छति परो वुद्ध्या तमेव श्रितो-

ऽद्धोऽसावपि युक्तिमेति न परो मे.चाय धन्या मतः ॥

नान्द्यन्ते सूत्रधारः। अलमतिविस्तरेण । भक्तिभावनाविभाकरविभाविभावितशुद्धमानन-सारसनम्वासितरसारमणवरणषट्चरणस्य लक्षणविलक्षणविनयविवेकदयादानदाक्षिण्यादि-गुणगणस्य निरवधिपरोपकारजागरूकयशोभारघनसारप्रसारसुरभीकृतमेनारस्य परमरसणीया-कारस्य श्रीदिवाकरपुरुषोत्तमस्य सभायां — — — — — — — — सुखोपविष्टानां शि-ष्टानां देवविद्देशवास्तव्यानां शास्त्रिणां ब्राह्मणानां राजकार्य्यभारिणां व्यापारिणाञ्च मण्डली समुल्लसति। तदत्र नवीनं किमपि नाटकमभिनेतव्यमिति। नेपथ्याभिमुखमवलोक्य। आर्य्ये इतस्तावत्। प्रविश्य नटी। अज्ज नम्मि आणवेदु अज्जो को णिओओ अणुचिट्ठीअदुत्ति। सूत्रः। आर्य्ये साधुसमाजमाराधयितुमिच्छामि। नटी। कदरं उणप्पओअं समप्पिअ एदस्स आरोहणं करिस्सदि अज्जो। सूत्रः। यत् किल मैथिलकृष्णदत्तकविना पुरञ्जनचरितं नाम नाटकं निर्म्माय अस्य सुसमर्पित तदभिनयेनाराधनमस्य सम्भविष्यति। इत्यादि।

End. श्रीतनुच्छविसुव र्णरेखितसान्द्रकान्तलतड़िद्गुणाश्रयि।

कृष्णरूपनिकषे निवेशितं प्रेमहेमकुपवीच्यतां मम ॥

अविज्ञात एवसमु। इति निष्क्रान्ताः सर्व्वे।

Colophon. पुरञ्जनदुःखभञ्जनो नाम पञ्चमोऽङ्कः। समाप्तमिदं नाटकमिति।

शाके.ब्दे धरणीविदग्मुनिधरामख्यासमाने शुभे

माघे मासि दिवामणौ मकरगे विष्णोस्तिथौ सादरं।

श्रीमन्मैथिलकृष्णदत्तकृतिना सन्निर्म्मितं नाटकं

प्रालेखीत्तदिदं मुदा द्रुततरं श्रीहेमनाथद्विजः ॥ शुभमस्तु।

विषयः। (श्रीमद्भागवतीयपुरञ्जनोपाख्यानमवलम्ब्य गुम्फितमिदं नाटकम्)

तत्र प्रथमाङ्के,—पुरञ्जनसचिवयोरभिनयेन तयोर्नागपुरप्रवेशसूचनं। तत्र च नागराजनाग-रीभिः सादरं सुपट्टीकृयोस्तयोः स्वामिन्यै स्वात्मनिवेदनम्। समनन्तरञ्च समं तत्पुराधि-कारिण्या पुरञ्जन्या पुरञ्जनस्य परिणयः समजनि।

द्वितीयाङ्के,—मृगयानुरागिणो राज्ञोऽदर्शनेन ससुरासितायाश्च अपि सहजया पुरञ्जन्याः शिरोवेदना मूर्च्छा च। अत्रान्तरे समागतस्य तस्य विमर्शनमनुगमनञ्च तदनु मरोदनादिदेशं प्रस्थितायास्तस्याः।

तृतीयाङ्के,—सितपक्षचरयोरभिनयेन नगरमध्ये शत्रुप्रवेश-पुररोधन-पुरञ्जनापसरण-सूचनम्।

चतुर्थाङ्के,—अलक्षितलक्षणेन भगवता सह विलक्षणचरस्य संवादः। तत्र च नवलक्षणा-नाम्नी कामधेनुः प्रविश्यात्मनो गुञ्जरवृन्दावनादिदेशभ्रमणविवरणं निवेदयामास। अत्रान्तरे

चेटीमात्रमनाथायाः नाथविरहविधुरायाः पुरञ्जन्याः अग्निप्रवेशमाद्दसमवलोक्य नवलक्षणया तस्याः समाश्वासनञ्च ।

पञ्चमाङ्के,—नवलक्षणासाहाय्येन तस्या गोपाललोकगमनपूर्व्वकं भगवद्दर्शनेन कृतार्थता पुनः पुरञ्जनसमागमश्चेति ।

No. 2001. शूद्राचारचिन्तामणिः । Substance country-made paper. 11 × 2 inches. Folia, 102. Lines, 5 on a page. Extent, 1764 sl'okas. Character, Maithilí. Date, L. S. 425. Place of deposit, Sáradápur. Post Mádhepurá, Darbháñgá, Paṇḍit Vis'vanátha Jhá. Appearance, destroyed by worms. Prose and verse. Correct.

S'udráchára-chintámaṇi. On the religious duties of S'udras. By Váchaspati Misra, of the court of Mahárájá Harináráyaṇa, of Mithilá.

Beginning. तीक्ष्णलिपे नमस्कृत्य श्रीवाचस्पतिशर्म्मणा ।
धर्म्मशास्त्रं समालोक्य शूद्राचारो वितन्यते ॥
तत्र । उद्बोधमैत्रशौचानि तथाचमनकारणम् ।
हेतुद्विराचम ++ प्रातस्नानादिक ततः ॥
मध्यन्दिनस्नानविधिस्तर्पणस्य विधिस्ततः ।
देवार्चनं तत्प्रसङ्गाद्वैष्णवस्य च लक्षणम् ॥ इत्यादि ।

End. मिथ्याभिशंसिनो दोषा द्विः स+भूतवादिनः ।
मिथ्याभिशस्तदोषञ्च समाद + + + + + ॥

Colophon. इति महाराजाधिराजश्रीमद्धरिनारायणपरिषदा सकलपण्डितमण्डलीशिरोमणिना श्रीवाचस्पतिमिश्रेण विरचितः शूद्राचारचिन्तामणिः समाप्त इति ।
शुभमस्तु । लसं ४२५ । ज्यैष्ठवदि ।

विषयः । सदाचारनिरूपणादिकं । शूद्राणामुद्बोधविधिकथनं । मलमूत्रादित्यागविधिः । शौचविधिकथनं । आचमनविधिकथनं । आचमननिमित्तानि । द्विराचमननिमित्तानि । आचमनापवादकथनं । दन्तधावनविधिः । प्रातस्नानादिविधिः । प्रातःकालादिनिरूपणं । माधनादिविधिकथनं । पोष्यवर्गपालनावश्यकतानिरूपणमुखेन पोष्यवर्गनिरूपणं । योगक्षेमादिकथनं । नैमित्तिकादिषड्विधस्नानविधिः । तर्पणविधिः । जलस्थलयोस्तर्पणविधिः । देवपूजाविधिः । उपचारविधिः । पुष्पादिचयनविधिः । दुर्गापूजाविधानादिकथनं । शिवपूजाविधिः । सूर्य्यपूजाविधिः । पञ्चोपचारादिविधिः । धूपदीपनैवेद्यादिनिरूपणं । शूद्रेण वैश्वदेवानन्तर-

पूजापक्षे मिष्टान्नं देयं नान्यथेति निरूपणं। रसालादिविधिकथनं। विशेषेण दुर्गाशिवयोः पूजाविधिकथनं। शिवलिङ्गादिनिर्म्माणविधिः। विहिताविहितपुष्पाणि। विष्णुपूजाविधिः। शालग्रामशिलामाहात्म्यादिकीर्त्तनं। भगवद्गीतादिमाहात्म्यकथनं। विष्णोर्द्वात्रिंशदपराधाः विष्णवे दानानि। गवादिदानविधिः। सर्व्वत्र विशेषदानप्रयोगकथनं। हरिभक्तिमाहात्म्यकीर्त्तनं। पञ्चमहायज्ञविधानं। तत्र वैश्वदेवप्रयोगकीर्त्तनं। नित्यश्राद्धविधिः। तत्र प्रयोगकथनं। अतिथिपूजाविधिः। भोजनविधिः। भोज्याभोज्यनिरूपणं। पानयोग्यदुग्धादिनिरूपणं। पशुपक्षिमांसादिभक्षणविधिः। तत्र भक्ष्याभक्ष्यनिरूपणं। भक्ष्यमत्स्यनिरूपणं। मांसभक्षणवर्ज्जनयोविधिः। षड्विधघातकलक्षणादिकथनं। शयनविधिकथनं। दारोपगमनविधिः। गर्भाधानादिविधिकथनं। रजस्वलाधर्म्मनिरूपणं। सामान्यतः स्त्रीधर्म्मनिरूपणं। गार्हस्थ्यधर्म्मनिरूपणं। मिथ्याशंसनादिदोषकीर्त्तनञ्च।

No. 2002. दानपञ्जी। Substance, country-made paper, 11 × 3 inches. Folia, 49. Lines, 9 on a page. Extent, 1,708 s'lokas. Character, Maithilí. Date, ? Place of deposit, Sáradápura, Post Mádhepurá, Darbhángá, Paṇḍit Harshanátha Jhá. Appearance, new. Prose and verse. Correct.

Dánapaṉjí. A summary of religious benefactions. By Ratnákara Ṭhakkura.

Beginning. यदीयस्मरणादेव समीहितमवाप्यते।
सद्भिर्निर्व्विघ्नमधुना तन्नमामि परं महः॥
श्रीरत्नाकरधीरेण विस्तराद्दानसागरात्।
सर्व्वसारं समुद्धृत्य किञ्चिदाकृष्य लिख्यते

तत्र दानप्रशंसा। यानि मन्त्यत्र + + नि हरेः प्रोक्तानि शंसति।
तेषां श्रेष्ठतमं दानमिति मे नास्ति संशयः। इत्यादि।

End. दक्षिणां दद्यात्। ततः ॐ स्वस्तीति प्रतिवचनं। अन्यतो गव्यमानीय दक्षिणां दद्यात्।

Colophon. इति श्रीरत्नाकरठक्कुरविरचिता दानपञ्जी समाप्ता।

विषयः। दानस्वरूपनिरूपणं। देयद्रव्यगुणकथनं। दानविधिः। दानकालनिरूपणं। अलङ्कारधान्यादिदानविधिः। वर्षभोज्यदानविधिः। कपिलादिगोदानविधिः। उभयतोमुखीदानविधिः। वृषभधेनुदानविधिः। गुड़धेनु-तिलधेनु-जलधेनु-घृतधेनुप्रभृतिदानविधिः। वरमहिषीदानविधिः। अश्वदानविधिः। दोलादिदानविधिः। दासीदानादिविधिः। आसनादिदानविधिः। सिन्दूरतैलशर्कराजलधर्म्मघटादिदानविधिः। विविधफलशस्यदानविधिः।

सुवर्णरजतताम्रादिदानविधिः। पूर्णपात्रकृष्णाजिनादिदानविधिः। ग्रामनगरादिदानविधिः। शालग्रामशिवलिङ्गादिदानविधिः। घृतघटादिदानविधिः। कौशेयवस्त्रादिदानविधिकीर्त्तनञ्च। अत्र सर्व्वत्र दानप्रयोगकीर्त्तनमिति ज्ञेयम्।

No. 2003. योगरत्नाकरः। Substance, country-made paper, 12 × 4 inches. Folia, 20. Lines, 6 on a page. Extent, 384 s'lokas. Character, Maithilí. Date, ? Place of deposit, Sáradápura, Post Mádhepurá. Darbhángá, Pandit Harshanátha Jhá; another copy at S'ántipura, Pandit Kálidása Vidyávágis'a. Appearance, fresh. Verse. Generally correct.

Yoga-ratnákara. A guide to the performance of Yoga meditations, giving details about the various modes of sitting, regulating the breath, &c., &c. By Víreśvaránanda.

Beginning. यद्ब्रह्म वेदाः प्रवदन्ति सन्तश्चैतन्यमव्यात्मकमव्ययं तत्।
योगीन्द्रवृन्दैः परमात्मतेजो ध्यातं सदाव्यादनिशं परं नः॥
आनन्दोल्लासकन्दोपरिपरिविलसद्ब्रह्म पद्मान्तरस्थं
नित्यं चैतन्यरूपं वरद-भयहरं तत्त्वविद्यात्मयुक्तम्।
शान्तं पूर्णेन्दुकुन्दोज्ज्वलविमलवपुर्विश्वनाथ भजे ऽहं
विज्ञानध्वान्तहंसं सकलसुरगणैर्योगिभिर्वन्द्यमेकम्॥
वदाम्यहं योगमलङ्घ्यमच्युतं यतो ऽभवत् शाश्वतमव्ययं स्वयम्।
अभ्यासतो ब्रह्मनिरूपणात्मकं संसारसिन्धोस्तरणैककारणम्॥
सारं सङ्गृह्य तन्त्राणां वेदानां मतमव्ययम्।
योगिनां परहंसानां सिद्धानां विदुषां मताम्॥
श्रीमद्वीरेश्वरानन्दस्तनोति ज्ञानसिद्धये।
योगरत्नाकरे ग्रन्थ क्रमशो मे ऽवहेतवः॥ इत्यादि।

End. अभ्यासाद्भवतीह सिद्धिरतुला ध्यानाद्धि योगीश्वरः
सम्पाठात् कवितालिरेव विमला सम्पाठ्यते येन वै।
तस्यार्थो परिसिद्धयः करतले नित्यं भवेन्मुक्तिमान्
पापान्मोचविमानमेति नितरां निर्व्वाणमेवाच्युतम्॥
श्रीमद्धरिहरानन्दनाथशिष्येण धीमता।
श्रीमद्वीरेश्वरानन्दकृतिना ग्रन्थ ईरितः॥ ॐ नमस्तारिण्यै।

विषयः। प्रथमतो योगाभ्यासप्रकारनियमादिकथनम्। कुम्भकादिकरणविधिकीर्त्तनं।

प्राणायामस्वरूपकथनादिकं। आसनविधिकथनं। ध्यानप्रकारकथनं। ध्येयस्वरूपादिकीर्त्तनं। षट्चक्रनिरूपणादिकं। शिवतीर्थाद्याध्यात्मिकतीर्थनिरूपणं। अन्तर्यजनविधिकथनं। तत्र ध्यानादिविधिकथनं। उद्वर्त्तनविधिः। आन्तरसृष्टिनिरूपणं। शारीरतत्त्वकथनमुखेन जीवस्वरूपादिकथनं। मोक्षस्वरूपकीर्त्तनञ्च।

No. 2004 पाण्डवचरितम्। Substance, country-made paper, 12 × 1¼ inches. Folia, 127. Lines, 5 on a page. Extent, 2,530 s'lokas. Character, Maithilí. Date, ? Place of deposit, Sáradápura, Post Mádhepura, Darbhángá, Paṇḍit Vis'vanátha Jhá. Appearance, decayed. Verse. Correct.

Páṇḍava-charita. An epic poem on the career of the Páṇḍavas, founded on the details given in the Mahábhárata. By Lakshmídatta, son of Lakshmínáráyaṇa, who styles himself a Rájapaṇḍita, but does not say in whose court he flourished. The codex is incomplete, breaking off in the middle of the 21st canto.

Beginning. कन्दर्पदर्पाङ्कुरमात्तयोगं सिन्दूरपूरारुणमिन्दुगौरम्।
कुन्दावदातस्मितमट्टहासं वन्दामहे तद्द्वयमद्वयं वा॥
गोवत्सपुच्छग्रहणोत्सुकाय गोपाङ्गनापाङ्गतरङ्गिताय।
सानन्दनन्दाङ्गनरिङ्गणाय तस्मै परस्मै महसे नमोऽस्तु॥
सन्दर्भलम्भाय विदर्भवाचां व्यासं भजे चन्द्रमसं कवीनाम्।
यद्भारतीनिर्भरचन्द्रिकाभिर्मोहान्धकारा जगतो विधूताः॥
व्यासस्य यद्भारतभारतीषु व्यासं समासादभिधातुमीहे।
वाञ्छेहित + + + सन्तु सन्तः कर्म्माणि कुर्वन्ति न किं किशोराः॥
सोमान्वये सोम इवाम्बुराशौ राजाऽभवत्पाण्डुरिति प्रसिद्धः।
यद्बाहुमासाद्य सुखोपधानं सदा + + + कमला व्यरंसीत्॥ इत्यादि।

End. सङ्ग्रामाय यदा जुहाव मुरजिद्वाचा तपोनन्दनो
व्याख्यानैरथ वा + + पनिषदां संस्तूय दुर्य्योधनं।
तज्जातं कुरुगामितुः सुरपुरप्राप्तेः पुरो मङ्गलं
प्रायश्चित्तमनुत्तमं खलु सतां यत्किञ्चिदाभाषणम्॥

Colophon. इति श्रीश्रीमल्लक्ष्मीनारायणराजपण्डितकविडिण्डिमलक्ष्मीदत्तविरचिते पाण्डवचरिते महाकाव्ये पाण्डवविजयो नाम विंशतितमः सर्गः। (इतः परमेकविंशतितमसर्गस्य कियदंशो वर्त्तते)।

विषयः। १मे सर्गे,—पाण्डोर्मृगयावर्णनं। मृगरूपधारिणः किमिंदममुनेः तस्य शापप्राप्तिकथनं। पाण्डवानामुत्पत्तिकथनञ्च। २ये,—पाण्डवानामस्त्रशिक्षावर्णनादिकं। ३ये,—तेषामेकचक्रनिवासवर्णनं। ४र्थे,—द्रौपदीस्वयंवरवर्णनं। ५मे,—सुभद्राहरणवर्णनं। ६ष्ठे,—जलविहारवर्णनं। ७मे,—खाण्डवदाहवर्णनं। ८मे,—राजसूयवर्णनं। ९मे,—द्यूतक्रीड़ावर्णनं। १०मे,—अर्ज्जुनस्य तपस्यार्थं प्रयाणवर्णनमुखेन गिरिवनादिवर्णनं। किरातार्ज्जुनसमरसंरम्भादिवर्णनञ्च। ११शे,—अर्ज्जुनस्य सुरलोकगमनवर्णनं। तत्र स्वर्गवर्णनञ्च। १२शे,—अर्ज्जुनस्य उर्व्वश्या सह संवादवर्णनादिकं। १३शे,—युधिष्ठिरादीनां तीर्थयात्राप्रसङ्गेन वदरिकाश्रमगमनवर्णनं १४शे,—सौगन्धिकाहरणवर्णनं। १५शे,—पाण्डवानां द्वैतवनवासवर्णनं। गन्धर्व्वेर जक्रतकौरवकामिनीहरणादिवर्णनञ्च। १६शे,—पाण्डवानां विराटनगरवासवर्णनं। १७शे,—उत्तरगोग्रहसमरवर्णनं। १८शे,—कुरुपाण्डवयोः समरोद्योगवर्णनं। १९शे,—भीष्मवधवर्णनं। अभिमन्युवधवर्णनञ्च। २०शे,—जयद्रथवधवर्णनं। द्रोणकर्णादिवधवर्णनं। दुर्य्योधनस्य द्वैपायनह्रदप्रवेशवर्णनञ्च। (इतः केचन एकविंशतितमसर्गीयाः श्लोका वर्त्तन्ते। तत्र च दुर्य्योधनस्योरुभङ्गवर्णनं।)

No. 2005. भक्तितरङ्गिणी, सेतुसहिता। Substance, country-made paper, 10 × 4 inches. Folia, 460. Lines, 10 on a page. Extent, 12,048, s'lokas. Character, Nágara. Date, ? Place of deposit, Sáradápura, Post Mádhepura, Dárbhángá, Paṇḍit Vis'vanátha Jhá. Appearance, fresh. Prose and verse. Correct.

Bhakti-taranginí. A metrical dissertation on devotion to Kṛishṇa. By Vaidyanátha Páyaguṇḍa. The text extends to 200 s'lokas, and is divided into five cantos, metaphorically called waves, *tarangas*, in keeping with the name of the work, which means "the ocean of devotion." The author takes the Bhágavata Puráṇa for his text. The work was completed for the gratification of Govindarája, son of Rámaráya Maṇi, of the gotra of Bharadvája. Annexed to the work in a commentary entitled *Setu* or the bridge. Its author's name is not apparent.

Beginning. मूलस्य,—निखिलभुवनपालं कामिनीकेलिलोलं
यदुकुलमणिपालं दानवेन्द्रान्तकालम्।
सजलजलदनीलं नन्दबालं सुबालं
व्रजयुवतिरसालं नौमि गोपालबालम्॥
मोहितगोपीजालं दोलितमालं यशोविशालम्।
दर्शितचित्रालीलं नीरदनीलं नमामि गोपालम्॥

अस्ति श्रीमदमन्दमन्दरगिरिग्रावस्खलत्प्रस्खल-
त्तुङ्गोत्तुङ्गतरङ्गभङ्गिसुभगत्र्यात्मजारोधसि ।
इन्द्रप्रस्थमिहाचलेश्वसदनं सत्सम्पदाश्रामनं
स्वःसाम्राज्यविड़म्बिनिस्तुलगुणं भूमण्डलीमण्डनम् ॥
तत्रोदारपवित्रचित्रचरिते सद्विश्वविश्वम्भरा-
लम्बे विष्णुपदारविन्दमुकुलध्यानादवाप्तोदये ।
भारद्वाजकुलाम्बुधौ समभवच्छ्रीरामरायो मणिः
शान्तो दान्तियुतः सुनीतिनिपुणो रामोऽपरः सद्यशाः ॥
तस्मादाविरभूच्चतुर्थ इव यः सप्तार्चिषामष्टमो-
वर्णानामिव पञ्चमः स पुरुषार्थानां महानीतिमान् ।
साक्षाच्छ्रीपतिराश्रिताजनभूतिर्गोविन्दरायः सुधी-
+ +मेघ इवावदातहृदयो विष्णोः पदालम्बनः ॥
सत्या++तरो ललामसुयशःस्फीतः प्रणीताम्बरः
पद्मासद्मनि यस्य हृत्सरसिजे स्वास्ते मुदा सर्व्वदा ।
साक्षात् केशव एव सम्प्रति पुनस्त्रातुं जगन्मण्डलं
तस्मात् श्रीविबुधाधिपो विजयते श्रीकेशवाख्यः सुधीः ॥
भूरिस्फुरन्मदगदाधिगताधिकाधि-
चेतोऽगदीकरणमौषधमद्वितीयम् ।
आदिष्टवान् स खलु भागवताब्धिसारं
कर्त्तुं यथा भवति मां मम हृत्प्रसादः ॥
तस्यादेशवशात्तु केशवविभोर्विद्वद्विभूषामणे-
र्ग्रन्थं भक्तितरङ्गिणीति विदितं स्वच्छं ततोऽभ्युद्धरे ।
श्रीमद्भागवताख्यरत्ननिधितो रत्नं सतां शर्म्मदं
माहात्म्यस्मरणादिपद्मलहरीयुक्तं प्रयत्नादहम् ॥
आलोच्य निखिलं भक्त्या श्रीमद्भागवतं मुदा ।
इतस्ततानि तत्रत्यान्यत्र पद्यानि कौतुकात् ॥
लिखामि नत्वा नागेशं वैद्यनाथः स्वबुद्धये ।
पायगुण्डेति यः ख्यातः काश्यां सङ्क्रम्य भक्तितः ।
अत्र श्लोका मया दृष्टाः मङ्गल्यर्थं शतद्वयम् । इत्यादि ।
सेतोः,—अवनीतलवर्त्तिलोचनाम्बुतवर्त्ति सगुणैकमन्दिरम् ।
पमदाजनमीनवेधनं शिशुरूपं तमहं भजे हरिम् ॥

वैद्यनाथः पायगुण्डो विद्वत्कैरवेन्दुतः ।
व्याख्यां भक्तितरङ्गिण्याः सेत्वाख्यां विलिखाम्यहम् ॥
श्रीधरस्वामिमणिभिः कृता येषां मनोहरा ।
व्यत्यस्ता सर्व्वतः सा वै स्फुटीकृत्य प्रयत्नतः ॥
मौलक्रमानुरोधेन सविशेषात् क्वचिन्मया ।
स्वकृतानां सुपद्यानां नूतना च विलिख्यते ॥

तत्र तावत् प्रारिप्सितग्रन्थप्रतिबन्धकदुरितशमनाय कृतमिष्टदेवतानमस्काररूपं मङ्गलं शिष्य-शिक्षायै व्याख्यातृश्रोतृणामनुषङ्गतो मङ्गलाय च निबध्नाति निखिलेति ।

End. मूलस्य,—अतिप्रयत्नेन मया कृतोऽयं रसालयो ग्रन्थनिधिर्गुणाश्रः ।
समर्पितः श्रीपतिपादपङ्कजे भक्त्या स तेनाद्य हरिः प्रसीदताम् ॥

Colophon. इति श्रीमत्पायगुण्डोपाख्यवैद्यनाथविरचितायां भक्तितरङ्गिण्यां पञ्चमस्तरङ्गः सम्पूर्णः । समाप्तोऽयं ग्रन्थः ।

सेतोः—रसानां नवानां शृङ्गारादीनां प्रेम्णो भक्तिरसस्य च आलयः, ग्रन्थेषु निधिः, गुणाश्रः गुणाश्रयः । शुभमस्तु ।

विषयः । ग्रन्थोऽयं भगवन्माहात्म्यादिप्रतिपादकानां श्रीमद्भागवतीयपद्यानां सङ्ग्रहेण निर्म्मितः । तत्र च क्वचित् क्वचित्; सङ्गतिमेषां प्रतिपादयितुं स्वयमपि ग्रन्थकारो द्विशतसंख्यकान् श्लोकान् रचयामास । तत्र प्रथमे तरङ्गे श्रीमद्भागवतप्रामाण्यादिनिरूपणपूर्व्वकं प्रथमादिक्रमेण द्वादशस्कन्धवर्त्तिनां श्लोकानां विन्यासेन भगवन्माहात्म्यकीर्त्तनं। एवं द्वितीये तरङ्गे,—भगवद्ध्यान-प्रतिपादकानां श्लोकानां सङ्गतिर्दर्शिता । तृतीये तरङ्गे,—भगवदुपासनापरपद्यानां सन्दर्भ-सज्जीकरणं । चतुर्थे तरङ्गे,—भगवत्स्तुतिपराणां पद्यानां सङ्गतिप्रदर्शनं । पञ्चमे तरङ्गे,—भगव-द्भजनप्रयोजकानां तेषां गुम्फननैपुण्यप्रदर्शनेन भक्तिमाहात्म्यप्रपञ्चनं । ग्रन्थस्यास्यैव व्याख्यानं सेतुरिति ज्ञेयम् ।

No. 2006. तत्त्वदीपनम् । Substance, palm-leaf, 12 × 2 inches. Folia, 192. Lines, 6 on a page. Extent, 6,033 s'lokas. Character, Maithilí. Date, ? Place of deposit, Sáradápura, Post Mádhepura, Darbhángá. Pandit Vis'vanátha Jhá. Appearance, old. Prose. Correct.

Tattva-dípana. A gloss on the S'abdakhanda of Ganges'a's Tattvachintámani. By Vishnupati, son of Rámapati Mahámahopádhyáya.

Beginning. भागधेयं परं ब्रह्म देवकीवसुदेवयोः ।
गुप्तमर्थश्रुतेर्वन्दे भूयो गोपालबालकम् ॥

गुरो रामपतेः शास्त्रं ज्ञात्वा विष्णुपतिः पितुः ।
कुरुते शब्दखण्डस्य तत्त्वदीपनमीदृशम् ॥
अथशब्देति । अथेत्यानन्तर्य्याभिधानं मङ्गलसूचनाय । इत्यादि ।

End. न च व्यभिचारिलिङ्गपरामर्शजन्यत्वेनानुमितेर्भ्रान्तत्वं स्यादिति वाच्यं गुणजन्यत्वेन तस्या अभ्रान्तत्वात् । + + +

Colophon. इति महामहोपाध्यायश्रीरामपतिसूनुश्रीविष्णुपतिविरचितं शब्दखण्डस्य तत्त्वदीपनं परिपूर्णम् । ॐ शिवमिति ।

विषयः । गङ्गेशोपाध्यायकृततत्त्वचिन्तामणेः शब्दखण्डस्य व्याख्यानम् ।

No. 2007. किरणावलीप्रकाशप्रकाशिका । Substance, palm-leaf, 12 × 2 inches. Folia, 192. Lines, 6 on a page. Extent, 5,610 s'lokas. Character, Maithilí. Date, ? Place of deposit, Sáradápura, Post Mádhepura, Darbhángá, Paṇḍit Vis'vanátha Jhá. Appearance, old. Prose. Correct.

Kiraṇávalí-prakás'a-prakás'iká. A gloss on Vardhamána's commentary on Prasastapáda's Vais'eshika treatise entitled Kiraṇávalí. By Bhagiratha Ṭhakkura.

Beginning. कैशोरं कलयन्तं मायाकायं पुरातनं पुरुषम् ।
नन्दालिन्दनिकेतं निगमरहस्यं नमस्यामि ॥
यः कैशोरे विश्वविख्यातकर्म्मा धर्म्माचार्य्यः श्रीमहादेवशर्म्मा ।
तत्सोदर्य्यो वर्द्धमानस्य सूक्तौ भावं मेघः सम्यगाविष्करोति ॥

मूर्ध्नि पुरद्विष इति पूर्व्वेणान्वयि । तेनान्यदपि वीजं जलसम्बन्धेनाङ्कुरयति इति ध्वनिर्लभ्यते । इत्यादि ।

End. द्रव्यत्ववैशिष्ट्यासंसर्गमर्य्यादया भानेयाश्रितत्वावच्छिन्नसाध्यस्य द्रव्यत्वेऽप्रसिद्धेरित्यतः सर्व्वमवदातमिति ।

धीरा धरणिभवानी यमजनि चन्द्राद्भगीरथं तनयम् ।
तस्य कृतावेतस्यां सन्तः सन्तोषमाचरत ॥
आसीदनुपमः पृथ्व्यां महादेवः कुलाग्रणीः ।
अनुजस्तस्य कृतवान् इमां व्याख्यां भगीरथः ॥

Colophon. इति महामहोपाध्यायठक्कुरश्रीभगीरथविरचिता किरणावलीप्रकाशप्रकाशिका समाप्तेति ॥

विषयः । किरणावलीनामप्रशस्तपादकृतपदार्थधर्म्मसङ्ग्रहस्य या व्याख्या तस्या वर्द्धमानकृतं प्रकाशाभिधेयं यद्व्याख्यानं तस्य व्याख्या ।

No 2008. चण्डिकाचरितचन्द्रिका। Substance, country-made paper, 10 × 4 inches. Folia, 34. Lines, 10 on a page. Extent, 734 s'lokas. Character, Maithilí. Date, ? Place of deposit, Sáradápura, Post Mádhepura, Darbhángá, Paṇḍit Harshanátha Jhá. Appearance, fresh. Verse. Correct.

Chaṇḍiká-charita-chandriká. A poem on the exploits of the Deví as described in the Chaṇḍí section of the Márkaṇḍeya Puráṇa. By Kṛishṇadatta.

Beginning सिद्धिश्रीः साधकानां प्रसरति पुरतो यत्पदाराधकानां
निर्विघ्नं यत्प्रसादादुदयति सहसा सापि निःश्रेयसश्रीः।
त्रैगुण्यात्तत्त्रिमूर्त्तिर्निरुपधिकरुणासृष्टेमाधुर्य्यधुर्य्यात्
तुर्य्या सा कापि कुर्य्यात् झटिति मम मनःशुद्धिबुद्धिप्रसिद्धिम्॥
चन्द्रचूडां चिदानन्दचुञ्चुं चन्दनचर्च्चिताम्।
चञ्चन्तीं चञ्चलां चारु चिन्तये चण्डिकां चिरम्।
सद्गुणाम्बुनिधिवृद्धिकारिणी तापपापतिमिरापहारिणी।
सेव्यतामसृतसारगर्भिणी चण्डिकाचरितचन्द्रिकाऽचिरम्॥
मङ्गलमयि जनमङ्गलनामसहस्रे। प्रथयसि धामनि रुद्रतमिस्रे।
श्रीमति गतिरसि जगदम्ब जय जय देवि शिवे॥
ध्रुवम्। हरिमवबोधयसि च हरसि च विधिखेदम्।
जनयसि मधुकैटभमतिभेदम्॥ इत्यादि।

End. सिद्धिरस्तु सकले मम साध्ये सम्प्रसादविभवेन शिवायाः।
तत्पदाम्बुजयुगे रमणीये वृद्धिरस्तु सततं सुकृतश्रीः॥

Colophon. इति कृष्णदत्तकृतौ सिद्धिलचणायां चण्डीचरितचन्द्रिकायां सम्प्रसादवरप्रदाना नाम एकादशः सर्गः। समाप्तोऽयं ग्रन्थः।

विषयः। देवीमाहात्म्यमवलम्ब्य विरचितमिदं गीतिकाव्यमिति।

No, 2009. मिथिलेशाह्निकम्। Substance, country-made yellow paper, 11 × 4 inches. Folia, 212. Lines, 9 on a page. Extent, 5,459 s'lokas. Character, Maithilí. Date, ? Place of Deposit, Naváṇí, Post Mádhepura, Darbhángá, Paṇḍit Vaṅsamaṇi Jhá. Appearance, fresh. Prose and verse. Correct.

Mithiles'áhníka. A Smṛiti compilation embracing all the leading topics of domestic religious duties. By Ratnapáṇi S'armá, son of Gangoli Sanjíves'vara S'armá.

Beginning. स्रष्टौ कञ्जजतां ययौ त्रिजगतां गोविन्दतां रक्षणे
संहारे हरतामपारतनुतां विश्वात्मतायाश्च यः ।
नैर्गुण्येऽध्वतरूपतामिह परं तस्मै नमोऽमायिने
हेरम्बाय करावलम्बनविधावालम्बनायासकृत् ॥
वंशावलीचरित्रं मिथिलेशश्रीच्छत्रसिंहनृपतेः ।
कथितं रामचरित्रं शृणु विदितं तदाह्निकं सपदि ॥
प्रश्नोऽस्तु सामवेदित्वात् तथाचारोऽपि लिख्यते । इत्यादि ।

End. न्यायोपार्ज्जितवित्तेन कर्त्तव्यं ह्यात्मरक्षणम् ।
अन्यायेन तु यो जीवेत् स कर्म्मभ्यो बहिष्कृतः ॥
तिष्ठतु नाम प्रकीर्णकमतः परम्) ।

Colophon. इति श्रीगङ्गोलीसञ्जीवेश्वरशर्म्मात्मजश्रीरत्नपाणिशर्म्मसङ्गृहीते मिथिलेशाह्निके प्रकीर्णकं समाप्तम् ।

विषयः । वैदिकप्रातःकृत्यं । तान्त्रिकप्रातःकृत्यं । मूत्रपुरीषायुत्सर्गविधिः । शौचविधिः । आचमनविधिः । आचमनानुकल्पविधानं । दन्तधावनविधिः । प्रातःसन्ध्याविधिः । द्वितीययामार्द्धकृत्यं । एवं तृतीयचतुर्थयामार्द्धकृत्यनिरूपणं । स्नानविवेचनं । तत्र वैदिकतान्त्रिकादिमन्त्रकथनं । वेदाभ्यासादिकथनं । गुरुपूजाविधिः । पोष्यवर्गादिनिरूपणं । ब्राह्मणादिधर्म्मकथनं । नीतिकथनं । ब्राह्मणादिवर्णानां निषिद्धानि । आपत्कृत्यानि । चक्रमुद्रादिनिरूपणं । आतुरस्नानादिविधिः । अघमर्षणादिविधिः । द्विवस्त्रादिविधानं । स्नानानन्तरं शिरःकम्पने दोषकथनं । मन्त्रस्नानादिकथनं । तीर्थावाहनविधिः । तान्त्रिकादितिलकविधिः । वैदिकसन्ध्याविधिः । तत्कालविवेचनं । गायत्रीव्याख्या । दर्शनामतत्प्रभेदकीर्त्तनं । प्राणायामादिनिरूपणं । सामगानां वैदिकसन्ध्याप्रयोगः । तान्त्रिकसन्ध्याप्रयोगः । वैदिकतर्पणविधिः । यज्ञोपवीतविधिः । स्त्रीकर्तृकतर्पणे विशेषकथनं । काम्यतर्पणादिकथनं । पितृगाथाकीर्त्तनं । तर्पणवाक्यविवेचनं । जपयज्ञादिनिरूपणं । जपे निषिद्धानि । नवग्रहार्चनविधिः । ब्रह्मयज्ञविधिकथनं । गायत्रीहृदयगायत्रीकवचादिकथनं । तैलाभ्यङ्गादिव्यवस्था । देवप्रतिमानिरूपणं । शालग्रामशिलादिनिरूपणं । शिवनैवेद्यग्राह्यत्वनिरूपणं । देवगृहलेपनादिमाहात्म्यकथनं । देवतास्नाने घृतादिपलविवेचनं । अष्टमङ्गलनिरूपणं । सामान्यतः पूजनक्रमकीर्त्तनं । पुष्पविचारः । सूर्य्यादिदेवपूजाफलकीर्त्तनं । देवताविशेषे विहिताविहितपुष्पाणि । पुष्पस्नानविधिः । देवताविशेषे धूपनैवेद्यादिविवेचनं । स्नानकुम्भविवेचनं । नैवेद्यभक्षणविचारकथनं । दुर्गादिपूजाविधिः । शिवलिङ्गविधानकथनं । पञ्चमुखादिरुद्राक्षविधिः । लिङ्गपरिमाणादिकथनं । शिवनैवेद्यादिपवित्रता । वैष्णवस्य रुद्राक्षधारणफलं । समयविशेषे रुद्राक्षधारणनिषेधः । रुद्रादिप्रभेदतदभिषेकादिकथनं । शतरुद्रीयकथनं । विष्णुपूजाविधिः । अत्र षोडशो-

पचारादिनिरूपणं। सर्व्वदेवमन्त्रकथनं। अष्टाङ्गपञ्चाङ्गादिप्रणामविधिः। निर्म्माल्यधारणादि-
विधिः। विष्णोरपराधाः। पञ्चदानेनापराधक्षमाकथनं। नारायणपूजाविधिः। चरणोदका-
दिविधिः। सामान्यतः सर्व्वदेवतातान्त्रिकपूजाविधिकथनं। तत्र विविधन्यासमुद्रोपचारादि-
विधिकथनं। गुरुपूजनादिविधिः। करमालाविधिः। मणिमालानियमः। महाशङ्खमालादि-
विधिः। देवताभेदे मालाभेदकीर्त्तनं। मालासंस्कारादिकथनं। सङ्क्षेपहोमकथनं। जप-
पदार्थविवेचनं। जपाङ्गविचारः। लुप्तबीजमन्त्रादिकथनं। कवचादिपाठविधिः। निर्म्माल्य-
धारणविधिः। पञ्चद्रव्यशुद्धिविधानकीर्त्तनञ्च। वैश्वदेवादिविधिः। होमे विहिताविहितद्रव्याणि।
हविष्यद्रव्यविवेचनं। अग्न्यभावे अप्सु होमविधिकथनं। पायसबलिविधिः। नित्यश्राद्धविधि।
अतिथिपूजाविधिः। सनकादिदानविधिः। गोग्रासविधिः। वामदेव्यगानविधिः। भोजन-
विधितत्समयादिनिरूपणं। द्विरशनविधिः। भोजनपात्रविचारः। भोज्याभोज्यविवेचनं।
प्रासादादौ भोजननिषेधः। ताम्बूलविधिः। षष्ठयामार्द्धकृत्यनिरूपणं। सन्ध्याकथनं। शयन-
विधिः। शय्याविवेचनं। अन्यशय्यायां शयनादिनिषेधः। शयनसमये पठनीयकथनं। दारोप-
गमनविधिः। गर्भाधानादिकथनं। रजस्वलाशौचनिरूपणं। पुत्रानुत्पत्तौ उपायकथनं। तत्र
दिवसनक्षत्रादिनिरूपणं। द्रव्यगुणकथनं। ऋतुगुणकथनं। रसगुणकथनं। धान्यादिगुणः।
शाकादिगुणः। विविधफलगुणाः। जल-दुग्ध-दधि-तक्र-घृत-गुड़ादिगुणाः। लशुनादीना-
मभक्ष्यता। मत्स्यभोजनविधिः। वैधहिंसायां दोषाभावनिरूपणं। मांसभक्षणविधिः। वृथामांस-
भक्षणादौ दोषकथनं। मांसस्य पुरुषार्थचतुष्टयसाधनत्वकथनं। भक्ष्यमत्स्यपक्षिवराहादिनिरूपणं।
भोजनार्हान्ननिरूपणं। शूद्रान्नविवेचनं। प्रतिपदादिक्रमेण कुष्माण्डादिनिषेधः। नवखातनवो-
दकादिविवेचनं। द्रव्यशुद्धिनिरूपणं। अभ्युक्षणमात्रशुद्धिनिरूपणं। गुड़ादिशुद्धिकथनं। भोजन-
प्रकारकथनं। धर्म्मार्थविवाहफलं। बन्धुहीनस्य संस्कारकरणे फलं। शूद्रान्नादिभोजनदोषकी-
र्त्तनं। गार्हस्थ्यधर्म्मनिरूपणं, न्यायोपार्ज्जितधनप्रशंसा। अन्यायोपार्ज्जितधनस्य निन्दाकीर्त्तनञ्च।

No. 2010. तन्त्रकौमुदी। Substance, palm-leaf 10 × 2 inches. Folia, 112. Lines, 6 on a page. Extent, 2,485 s'lokas. Character, Maithilí. Date, Sk. 1551. Place of deposit, Sáradápura, Post Mádhepura, Darbhángá, Pandit Vis'vanátha Jhá. Appearance, old. Verse. Correct.

Tantra-kaumudí. A digest of Tántric religious duties. By Devanátha S'armá. The work is purely Vaishnavite, and refers only to those rites and duties which Vaishnavas recognise. None of the S'ákta rites has been noticed. At the end of the work the author gives a long list of the Tantras, Yámalas, and Pancharátras he had consulted.

Beginning. वाणीरद्रुमकुञ्जभाजियमुनाकूले तमालद्युति-
निर्मुक्ताङ्कुशरञ्चशाङ्कविकशद्बिम्बाननो माधवः ।
रासोल्लासविलासविभ्रमलसत्स्वेदार्द्रगण्डस्थलो-
गोपीभिर्मधुनिर्व्विशेषमनिशं पीतो हरिः पातु वः ॥
श्रीदेवनाथशर्म्मा तनुते खलु तन्त्रकौमुदीमेताम् ।
आगमलीनमतीनामतिहृद्यामखिलतन्त्रेषु ॥
सम्प्रदायविरोधेन सिद्धमप्युज्झितं मया ।
सम्प्रदायानुरोधेन निर्म्माणमपि कथ्यते ॥
अथागमेन प्रामाण्यं विसम्वादिनि सर्व्वतः ।
पञ्चरात्रप्रमाणत्वं रोधकस्यानुरोधतः ॥ इत्यादि ।

End. संहितां वैष्णवीं तद्वत् तत्त्वसागरसंहिताम् ।
संहितां कपिलप्रोक्तां श्रीमन्त्र+रसंहिताम् ॥
तन्त्रं श्रीभुवनेश्वर्य्या मन्त्रदेवप्रकाशितम् ।
कल्पं श्रीवनदुर्गायास्तन्त्रं सम्मोहनाह्वयम् ॥
हयशीर्षमयमतं सारसङ्ग्रहमङ्ग्रहम् ।
प्रपञ्चसारव्याख्यानं मन्त्रदर्पणमेव च ॥
विज्ञानभारतं तद्वत् श्रीरामार्चनचन्द्रिकाम् ।
मन्त्रनेत्रं चन्द्रिकाया व्याख्यानं यामलत्रयम् ॥
विज्ञानेश्वरसिद्धान्तसारश्रीतन्त्रकाण्यपि ।
विज्ञानललितं पञ्चरात्रं नारायणीमपि ॥
वसिष्ठसंहितां गार्ग्यसंहितां भैरवसंहिताम् ।
दिव्यं सारस्वतं चिच्चन्द्रिकां कामिकमप्यथ ॥
होमावरोत्तरग्रन्थं प्रतिष्ठासारसङ्ग्रहम् ।
संहितां वायवीं तद्वत् संहितां ब्रह्मणस्तथा ॥
कृशानोः संहिताञ्चैव मन्त्राश्व++निं तथा ॥
ईशानसंहितां तद्वत् सिद्धान्तं विश्वकर्म्मणः ॥
तन्त्रं श्रीदक्षिणामूर्त्तेः शतधेन्वादिकं तथा ।
व्याख्यानं शारदायाश्च वैशम्पायनसंहिताम् ॥
तथैव त्वरिताज्ञानं स्मृतिशास्त्राण्यशेषतः ।
ज्योतिःशास्त्राणि चालोच्य सकलाः परपद्धतीः ॥
सर्व्वेषां सारमुद्धृत्य देवनाथेन धीमता ।
विधानमिति सम्प्रोक्तं पुरश्चर्य्यादिकर्म्मणः ॥

Colophon. चन्द्रबाणशरभूमिभूषिते सम्मते शकवत्सरोपतेर्गते ।
रामनामविदितेन केनचिच्छिसमे लिपिरतिलरायुजा ॥

विषयः । तन्त्रशास्त्रप्रामाण्यव्यवस्थापनं । जन्मसम्पदादिविवेचनं । राश्यादिविवेचनं । सिद्धादिनिरूपणं । मन्त्राणां स्त्रीत्वादिकथनं । दीक्षाकालादिनिरूपणं । कलावतीदीक्षादिविधिकथनं । दीक्षितस्य नियमादिकथनं । दीक्षायां पूजादिविधिकथनं । पुरश्चर्यादिविधिकथनं । तत्र आसनादिनिरूपणं । मुद्राणां लक्षणादिकथनं । जपमालाविधानं । जपविधिः । विविधमन्त्रनिरूपणं । कौलयोगविधिकीर्त्तनं । दशमन्त्रसंस्कारकथनं । कौलानामाह्निककृत्यविधिकथनं । विशेषेण भूतशुद्धिप्रकारकीर्त्तनं । मातृकादिन्यासविधिकथनं । अन्तर्यजनविधिकथनं । विशेषेण वाह्यपूजाविधिकथनं । तत्र देवताविशेषे पुष्पादिविवेचनं । नैवेद्यादिविधानञ्च । होमविधिकथनं । चतुर्दशविधसंस्कारकथनं । मन्त्रसिद्धिविधिकथनं । वीरसाधनविधिकथनं । होमद्रव्यप्रमाणनिरूपणं । कुण्डविधानकीर्तनं । मानपरिभाषाकीर्तनं । षट्कर्मनिरूपणञ्च ।

No. 2011. मन्त्रप्रदीपः । Substance, country-made paper, 11 × 4, inches. Folia, 125. Lines, 10 on a page. Extent, 4,610 s'lokas Character, Maithilí. Date, ? Place of deposit, Naváni, Post Mádhepur, Darbhangá, Paṇḍit Lála Jhá. Appearance, fresh. Prose and verse. Correct.

Mantra-pradípa. A Tántric compilation comprising rules for initiation in Tantric rites ; mystic mantras, for different gods and goddesses ; and rituals for their worship. By Harapati A'gamácharya, son of Ruchipati Mahámahopádhya, and inhabitant of Váijáligráma. His family village was Khánál. The work was compiled under the orders of Mahárájádhirája Kaṅsanáráyaṇa Lakshminátha Deva, and is divided into 15 chapters. The gods named are partly S'ákta and partly Vaishṇavite. No. 717 (II, p. 156), bears the same name as this, but its subject and author are different.

Beginning. जगद्गुरुं नमस्कृत्य नित्यानन्दं महेश्वरम् ।
यस्य स्मरणमात्रेण नृणां सिद्धिर्भवेद्ध्रुवम् ॥
त्रिजगज्जननीमाद्यामच्युतविधिशङ्करैर्वन्द्याम् ।
शवसंस्थामहमीडे निखिलासुरघातिनीं चण्डीम् ॥
खौआलालयजातो वैजालीग्रामवासविख्यातः ।
रुचिपतिसूनुः श्रीमान् दीक्षावान् हरपतिर्जयति ॥
श्रीकंसनारायणभूमिपालः सानुग्रहो मे कुरुते निदेशम् ।

मन्त्रप्रदीपं कुरु मत्करं त्वं यद्दर्शने मे भवति प्रमोदः ॥
मूर्द्ध्ना समादाय तदेकदत्तामाज्ञां विविच्याखिलमन्त्रतन्त्रम् ।
यथायथास्थानविचि+मादौ सिद्धादिकं सिद्धिकरं नराणाम् ॥

— — — — — — — — तत्र मन्त्रकरणे विष्णुयामलरुद्रयामलादिसारमुद्धृत्य लिख्यते ।

तत्र विष्णुयामले,— दीक्षां विनोपदेशस्य दुष्टत्वात् प्रथमन्तु सा ।
पापक्षयं दिव्यभावं साधकस्य करोत्यतः ॥ इत्यादि ।

End. स्तुत्वा प्रणम्य शिरसा उदकेन समर्पयेत् ।
चरणाम्बुजमूले । इति नैवेद्यभक्षणदोषः ।

Colophon. इति समस्तप्रक्रियाविराजमानशिवभक्तिपरायणमहाराजाधिराजश्रीमत्-कंसनारायणश्रीमल्लक्ष्मीनाथदेवनिदेशप्रोत्साहिताज्ञया वैजौलीग्रामवासिविख्यातखौआलयामीण-महामहोपाध्यायश्रीरुचिपतिशर्म्मात्मजागमाचार्य्यश्रीहरपतिविरचिते मन्त्रप्रदीपे पञ्चदशः पटलः समाप्तः । मम पुस्तं हरेद्यस्तु चौरविद्याबलेन वा ।
पिता तस्य भवेत् कुष्ठी माता तस्य च शूकरी ॥ इति ।

विषयः । १, २ये पटले,—दीक्षाया आवश्यकत्वकथनं । सिद्धादिनिर्णयः । अकड-मादिचक्रविधिः । नाडीविधिः । राशिचक्रं । नक्षत्रचक्रं । ऋणधनजिज्ञासा । गणनिरूपणं । कुलाकुलादिविचारः । बालादिभेदः । मन्त्रसंस्कारः । दीक्षासमयदेशगुरुशिष्यादिनिरूपणं । सामान्यदीक्षाविधिः । ग्रहणादिकालीनदीक्षा । नवग्रहहोमविधिः । वागीश्वरी-भुवनेश्वरी-नित्या-दुर्गा-बाला-गणेश-चन्द्र-कार्त्तिक-क्षेत्रपाल-सूर्य्य-वह्नि-हरि-हरादीनां मन्त्रनिरूपणं ।

३—७मे पटले,—सर्व्वदेवताप्राणप्रतिष्ठाविधिः । प्रशस्ताप्रशस्तासननिरूपणं । भूतशुद्धिः । श्रीकण्ठादिन्यासाः । मालाद्रव्यकथनं । जपविधिः । मालासंस्कारप्रयोगादिकथनं । ग्रन्थन-विधिकथनञ्च मन्त्रस्थापनप्रकारः । आवाहनादिमुद्राकथनं । अर्घ्यपुष्पादिविधिः । दीपनिर्व्वाण दोषकथनं । त्रिशक्तिपूजाविधिः । प्रयोगकीर्त्तनञ्च । छिन्नमस्तापूजाविधिः । उग्रताराविधिः । प्रयोगकथनञ्च । उच्छिष्टचाण्डालिनीपूजादिकथनं । सुन्दरीपूजादिकथनं । त्रिपुरसुन्दरीविधिः । कालीपूजाविधिकथनञ्च ।

८—११शे पटले,—नवदुर्गापूजाविधिः । वाग्वादिनीपूजाविधिः । लक्ष्मीपूजाविधिः । वज्रप्रस्तारिणीपूजाविधिः । अश्वारूढ़ापूजाविधिः । अन्नपूर्णापूजाविधिः । महिषमर्द्दिनीपूजा-विधिः । पूतिनीपूजाविधिः । त्रिपुरभैरवीपूजाविधिः । बालापूजाविधिः । उच्छिष्टमातङ्गी-पूजाविधिः । त्वरितापूजाविधिः । त्रिकण्टकीपूजाविधिः । नित्यक्लीनापूजाविधिः । नित्या-पूजाविधिः । त्रिपुटापूजाविधिः । पद्मावतीपूजाविधिः । दुर्गापूजाविधिः । जयदुर्गापूजाविधिः। मातङ्गीपूजाविधिकथनञ्च ।

१२—१४शे पटले,—गणेशपूजाविधिः । महागणपतिपूजाविधिः । शक्तिगणपतिपूजा-

विधिः। पीताम्बरगणपतिपूजाविधिः। उच्छिष्टगणपतिपूजाविधिः। वटुकभैरवपूजाविधिः। चन्द्रपूजाविधिः। सूर्य्यपूजाविधिः। विष्णुपूजाविधिः। वासुदेवपूजाविधिः। लक्ष्मीवासुदेवपूजाविधिः। हयग्रीवपूजाविधिः। दधिवामनपूजाविधिः। रामचन्द्रपूजाविधिः। वाराहपूजाविधिः। धरणीपूजाविधिः। नरसिंहपूजाविधिः। श्रीकरपूजाविधिः। पुरुषोत्तमपूजाविधिः। गोपालपूजाविधिः। बालगोपालमदनगोपालादिपूजाविधिः। शिवपूजाविधिः। उमापतिपूजाविधिः। मृत्युञ्जयपूजाविधिः। दक्षिणामूर्त्तिपूजाविधिः। नीलकण्ठपूजाविधिः। अर्द्धनारीश्वरपूजाविधिः। पशुपतिपूजाविधिः। क्षेत्रपालपूजाविधिकथनञ्च।

१५श पटले,—वटुकनाथपूजाविधिः। चण्डेशपूजाविधिः। अजपापूजाविधिः। मार्त्तण्डभैरवपूजाविधिः। दक्षिणकालीपूजाविधिः। अरिमन्त्रग्रहणशान्तिकीर्त्तनञ्च। अत्र सर्व्वत्र पूजापद्धतिरस्तीति ज्ञेयम्। इति।

No. 2012. नीलाद्रिमहोदयः। Substance, palm-leaf, 15 × 5 inches. Folia, 196. Lines, 4 on a page. Extent, 4,018 s'lokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Dr. Rájendralála Mitra. Appearance, new. Verse. Correct.

Níládrimahodaya. The temple of Jagannátha at Puri, its origin, merits, the images existing there, their worship, feasts and festivals. The work follows closely, but not strictly, the *Purushottama-máhátmya* given in the Padma Puráṇa, but it professes to be an extract from the Súta Sañhitá. It has the alternative name of *Purushottama-máhátmya*.

Beginning. नारायणं नमस्कृत्य नरञ्चैव नरोत्तमं।
देवीं सरस्वतीञ्चैव ततो जयमुदीरयेत्॥
तं वेदशास्त्रपरिनिष्ठितशुद्धबुद्धिं चर्म्माम्बरं सुरमुनीन्द्रनुतं कवीन्द्रं।
कृष्णत्विषं कनकपिङ्गजटाकलापं व्यासं नमामि शिरसा तिलकं मुनीनां॥
एकदा नैमिषारण्ये पुण्ये सर्व्वसुखप्रदे।
नानातीर्थसमायुक्ते नानागुल्ममनोरमे॥
फलपुष्पाद्यवृक्षाणां निकरैः परिसङ्कुले।
नानानीलसमायुक्ते विविक्ते मृगरञ्जिते॥
तापसाश्रमसङ्कीर्णे ख्याते परमपावने।
तादृशेऽपि वने रम्ये शौनकाद्या मुनीश्वराः॥
तुष्णीम्भूय समस्तास्ते गोष्ठीं चक्रुर्मनोरमां।

समस्ततीर्थतत्त्वानां ज्ञानाय जगतीतले ।
क्षेत्राणां शिवदानाञ्च जिज्ञासार्थे त्वरान्विताः ॥
सभायां जायमानायां तत्क्षणे च मुनीश्वरः ॥
जटामण्डलधारी च कौपीनधृतसुन्दरः ॥
कृष्णाजिनोत्तरीयेण विराजितवपुर्मुनिः ।
सूतस्तदानीं सम्प्राप्तस्तत्र शिष्यगणैर्युतः ॥
तं दृष्ट्वा परमप्रीताः शौनकाद्यास्तपस्विनः ।
समुत्थाय नमश्चक्रुः सोऽपि तान् दण्डवद्भुवि ॥
तत्र प्रणामं कृतवान् उवाच स तदा मुनिः ।
तमासीनं ततो दृष्ट्वा ऋषयस्ते मुनीश्वराः ।
ऊचुः प्राञ्जलयः सर्व्वे सर्व्वलोकहिताय वै ॥

ऋषय ऊचुः । भगवन् सर्व्वधर्म्मज्ञ सर्व्वतीर्थातितत्त्ववित् ।
अतो ब्रूहि समस्तानां तीर्थानां शिवसम्भृतां ।
क्षेत्राणाञ्च फलं तावत् सूत नः कथयाधुना ॥
तेषां मध्ये वरः को वा क्षेत्राणाञ्च मुनीश्वराः ।
तीर्थानाञ्च तथा ब्रूहि यतस्त्वं व्यासशासितः ।
समारभेत तद्वक्तुं गुह्यं तैः पृष्टमुत्तमं ॥

सूत उवाच । शृणुध्वं मुनयः सर्व्वे संयतात्मान एव हि ।
तीर्थानां क्षेत्रराशीनां मध्ये श्रीपुरुषोत्तमः ।
गुह्यः सर्व्वतमोध्वंसी सर्व्वपुण्यफलप्रदः ॥

End. नैव तेषाञ्च देवानां सन्तुष्टिश्च कदाचन ।
न तेषां मङ्गलं भूमौ प्रवृत्तानाञ्च तत्र हि ॥

Colophon. इति सूतसंहितायां नीलाद्रिमहोदये श्रीपुरुषोत्तमक्षेत्रमाहात्म्ये चत्वारिंशत्तमोऽध्यायः ॥

विषयः । अत्र चत्वारिंशदध्यायाः सन्ति । तत्र १मे,—तीर्थानां मध्ये पुरुषोत्तमतीर्थस्य प्राधान्यकथनं । २ये,—कृतयुगे मालवाख्ये देशे अवन्तीनामपूर्य्यां इन्द्रद्युम्नो राजा बभूव इत्यादिवृत्तान्तं । ३ये,—एकाम्रक्षेत्रमाहात्म्यं । ४र्थे,—बलेन भद्रया च युक्तस्य दारुरूपस्य हरेराविर्भावकथनं । ५मे,—इन्द्रादयो देवा ब्रह्मलोकादागत्य दारुरूपस्य हरेः पूजादिकं चक्रुरित्यादिवृत्तान्तं । ६ष्ठे,—ब्रह्मकृतदारुमयहरिस्तोत्रं । ७ मे,—८ मे, च ब्रह्मणा इन्द्रद्युम्नाय विष्णोस्त्रिकालपूजाविधिकथनं । ९मे,—आचार्य्यलक्षणकथनं । १०मे,—११शे, च विष्णुपञ्चोपचारादिकथनं । १२शे,—वारतिथिनक्षत्रविशेषेषु पूजाविशेषकथनं । १३शे,—महा

स्नानविधिः। १४श्री.—स्नानोत्सववर्णनं। १५श्री,—स्नानोत्सवान्ते पूजाप्रकारकथनं। १६श्री,—आषाढ़स्य शुक्लद्वितीयायां पुरुषोत्तमस्य घोषयात्राकथनं। १७श्री,—शयनयात्राविधिः। १८श्री,—दक्षिणायनयात्राकथनं। १९श्री,—श्रावणमासामावस्यादिने पुरुषोत्तमस्य अरुणोदय-कालपूजाविधिकथनं। २०श्री,—प्रासादपूर्व्वस्यां दिशि नारायणरूपेणावस्थितस्य वटवृक्षस्य पूजाविधिकथनं। २१, २२, २३, २४श्री,—भाद्रकृष्णाष्टम्यां श्रीपुरुषोत्तमपूजादिकथनं। २५श्री,—हरेः पार्श्वपरिवर्त्तनं। २६श्री,—वामनजन्मोत्सववर्णनं। २७श्री,—शक्रध्वजोत्सववर्णनं। २८श्री,—पुरुषोत्तमस्य आश्विनमासपूजाविधिः। २९श्री,—कार्त्तिकमासपूजाविधिः। ३०श्री,—पुरुषोत्तमदर्शनविधिः। ३१श्री,—प्रावरणोत्सवविधिः। ३२श्री,—पौषमासपूजाविधिकथनं। ३३श्री,—उत्तरायणपूजाविधिकथनं। ३४श्री,—दोलयात्राकथनं। ३५श्री,—दमनकयात्राकथनं। ३६श्री,—वैशाखमासपूजाविधिकथनं। ३७श्री,—पुरुषोत्तमयात्रादिकं ये नराः कुर्व्वन्ति तेषां पुण्यादिकथनं। ३८श्री,—दारुब्रह्मघटनाविधिः। ३९श्री,—दारुब्रह्मप्रतिष्ठाविधिः। ४०श्री,—प्रतिष्ठान्ते पूजाविधिः॥

No. 2013. **अन्योक्तिशतकम्।** Substance, country-made paper, 14 × 3 inches. Folia, 12. Lines, 8 on a page. Extent, 330 s'lokas. Character, Maithilí. Date, ? Place of deposit, Lagmá, Post Vaherá, Darbhángá, Paṇḍit Raghunátha Jhá. Appearance, old. Verse. Correct.

Anyokti-śataka Miscellaneous verses in illustration of particular figures of rhetoric. By Mohana S'armá, son of Aniruddha Surí. The subjects of the verses are lions, elephants, sheep, ocean, moon, lotus, bee, kokila, crow, geese, desert, well, river, town, Deva, and S'eshanága.

Beginning. तरलाङ्गुलिदलशीलित-शुषिरामधराधरे धृतां मुरलीम्।
कलमालापयदतुलं गोपकुलं तन्महः कथये॥
अनिरुद्धसूरितनयो मोहनशर्म्मा विदेहदेशीयः।
अन्योक्तिशतकमेतत् कुरुते कमलापतिं नत्वा॥
तत्रादौ सिंहान्योक्तयः।
आतङ्केन मदोत्कटैः करटिभिस्त्यक्तैव भूभृत्तटी
क्रीड़द्भिः क्षपणैः करेणुकलभैः क्रान्तैः कियत्पौरुषं।
को वेद क्व वसन्ति हन्त शरभाः स्वर्द्धालवो येऽमुना
कः पारीन्द्रपराक्रमस्य विषयो यस्मिन्नसौ जृम्भताम॥ इत्यादि।

End. तुष्णीमुद्वह नागराज वसुधामाधाय धैर्य्ये मनः
स्वच्छन्दं विहरस्व मा पुनरहिष्वन्येष्वमूर्यां कृथाः॥

एतस्मिन् विषये म केवलमुपालभ्यः स्वतन्त्रो विधि-
र्यस्याकेव जगत्त्रयेऽपि विदुषे धैरेयमेतद्दशम् ॥
सिंहदन्तिघनवारिधिचन्द्राः पद्मभृङ्गपिककाकमरालाः ॥
मारवावटनदीतरुदेवा-वर्णिता इह हि नागगणेशः ॥

विषयः। अन्योक्त्यलङ्कारध्वनिना प्रास्ताविकाः श्लोका निर्म्मिताः। तत्र सिंह-गज-मेघ-समुद्र-चन्द्र-पद्म-भ्रमर कोकिल-काक-मराल-मरुकूप-नदी-वृक्ष-देव-शेषनागोन्नयः वर्णिताः।

No 2014. सरोजकलिका। Substance, country-made paper, 10 × 3 inches. Folia, 18. Lines, 7 on a page. Extent, 346 s'lokas. Character, Maithilí. Date, ? Place of deposit, Lagmá, Post Vaherá, Darghángá, Pandit Raghunátha Jhá. Appearance, old. Prose and verse. Correct.

Saroja-kaliká. Dissertations on various Smriti topics. By Bhásvat Kaviratna. Contents: On the necessity of S'ráddhas. Duties of performers of S'ráddhas. Persons fit to perform S'ráddhas. S'raddhas during the first year after death. S'ráddhas before marriages and other auspicious occasions. Enquiry about death. Collection of bones after cremation. Offering of Pindas. Mourning. Mourning of adopted sons. Merging of mourning. Mourning for infants &c. Enquiry about Sapindas. Purification by bathing. Purification of ground. Ditto of water. Ditto of dressed rice. Ditto from extreme pollution. Ditto of character. Cause of the extension of sin. Injury to life. Expiation for killing cattle. Ditto for great enemies. Ditto for eating food from washermen and others. Ditto for marrying in one's own Gotra. Ditto for incest. Rituals for consecrating cattle. Rules for offering water to the manes. Duties of the twice-born classes. Rules regarding borrowing. Chándráyana and other expiatory rites. Duties of faithful wives. The compilation is obviously a very old one, as its does not quote from, or refer to, any mediæval digest.

Beginning. भास्वता कविरत्नेन प्रयत्नेन स्फुटीकृता।
सरोजकलिका भाति श्रुतिस्त्रीकर्णभूषणा ॥
अथ श्राद्धधर्म्मव्यवस्था। हारीतः।
न तत्र वीरा जायन्ते नारोगा न शतायुषः।
न च श्रेयोऽधिगच्छन्ति यत्र श्राद्धं विवर्ज्जितं॥ इत्यादि।

End. विषायोरभि मा शुद्धा प्रविशेज्जातवेदसं ।
आर्त्तार्त्ते मुदिता हृष्टे प्रोषिते विमनास्तु या ॥

Colophon. इति सरोजकलिका समाप्ता । इति शुभं भूयात् ।

विषयः । श्राद्धावश्यकताकथनं । श्राद्धकर्त्तृधर्म्मनिरूपणं । श्राद्धाधिकारिणः । आद्यैको-द्दिष्ट-सपिण्डनादिविधिः । आभ्युदयिकश्राद्धनिर्णयः । मरणजिज्ञासा । अस्थिसञ्चयविधिः । पिण्डदानविधिः । अशौचनिरूपणं । कृत्रिमपुत्राद्यशौचं । सन्निपाताशौचं । बालाद्यशौचं । सपिण्डादिलक्षणं । स्नानशुद्धिनिरूपणं । भूमिशुद्धिनिरूपणं । उदकशुद्धिः । पक्वान्नशुद्धिः । अत्यन्तोपहतशुद्धिः । स्वभावशुद्धिः । पापक्षयहेतुनिरूपणं । हिंसानिरूपणं । गोवधादिप्रायश्चित्तकथनं । महापातकादिप्रायश्चित्तं । रजकाद्यन्नभक्षणादिप्रायश्चित्तं । सगोत्रादिपरिणयप्रायश्चित्तं । अगम्यागमनादिप्रायश्चित्तं । वृषोत्सर्गविधिः । तर्पणविधिः । द्विजातीनां विहिताविहितविधिः । ऋणदानादिविधिकथनं । चान्द्रायणव्रतादिकथनं । प्रमीतपतिपतिव्रताधर्म्मनिरूपणं । (स्मृतिसङ्ग्रहोऽयमतीव प्राचीनतम इति प्रतिभाति । यतो न कस्यापि निबन्धकारस्य नामोल्लिखितं दृश्यते) ।

No. 2015. दिव्यनिर्णयः । Substance, palm-leaf, 13 × 2 inches. Folia 35. Lines, 4 on a page. Extent, 493 s'lokas. Character, Maithilí. Date, ? Place of deposit, Lagmá, Post Vaherá, Darbháñgá, Paṇḍit Raghunátha Jhá. Appearance, old. Prose and verse. Correct.

Divya-nirṇaya. A digest of the rules regarding oaths and ordeals. By Dámodara Ṭhakkura. Compiled under the auspices of king Sañgrám Sháh.

Beginning. सङ्ग्रामसाहभूपालाल्लब्धमानेन सर्वदा ।
दामोदरेण क्रियते दिव्यानामत्र निर्णयः ।
तत्र याज्ञवल्क्यः ।
तुलाग्न्यापो विषं कोशो दिव्यानीह विशुद्धये ।
महाभियोगेष्वेतानि शीर्षकस्थेऽभियोक्तरि ॥ इत्यादि ।

End. तप्तमाषकदण्डे च क्रमाद्दण्डं प्रकल्पयेत् ॥

Colophon. इति महामहोपाध्यायठक्कुरश्रीदामोदरकृतो दिव्यनिर्णयः समाप्तः ॥

विषयः । धर्म्माधर्म्मपरीक्षार्थं तुलाग्निजलादिरूपदिव्यप्रयोगकथनं । तत्र पातकविशेषसन्देहे तप्तमाषादिविधिकथनं । ऋतुविशेषे जलादिपरीक्षाविधानकथनं । तत्र शिशिर-हेमन्त-वर्षासु अग्निपरीक्षा । शरद्ग्रीष्मयोः सलिलपरीक्षा । हेमन्तशिशिरयोर्विषपरीक्षा । मार्गशीर्ष-

चैत्र-वैशाखेषु साधारणपरीक्षाविधिः। कोष्ठपरीक्षायाः सार्व्वकालिकत्वकथनं। परीक्षायां निषिद्धकालकथनं। अथ स्त्रीबालवृद्धातुराणां तुल्यपरीक्षाविधानं। शूद्रस्य अग्निजलपरीक्षाविधिः। एवं क्षत्रियादिषु विशेषकथनं। पात्रविशेषे कविदविकल्पकथनञ्च। सोमनाहपादिवैलक्षण्येन दिव्यविधिनिरूपणं तत्र तुलादिपरीक्षासु प्रत्येकमितिकर्त्तव्यताकथनं। धर्म्माद्यदिव्यविधिकथनं। फलविधिकथनञ्च।

No. 2016. नाड़ीपरीक्षादिचिकित्साकथनं। Substance, country-made yellow paper, 12 × 4 inches. Folia, 31. Lines, 6 on a page. Extent, 552 s'lokas. Character, Maithilí. Date, ? Place of deposit, Naváni, Post Mádhepur, Darbhángá, Pandit Vañsamaṇi Jhá. Appearance, new. Prose. Generally correct.

Náḍíparíkshádi-chikitsá-kathana. Dissertations on the examination of the pulse, and on the treatment of various diseases. By Ratnapáṇi S'armá, son of Gañgolí Sanjíves'vara S'armá.

Beginning. वन्दे सदानन्दमरन्दसुन्दरं द्विपास्यपादाम्बुजयुग्ममुत्तमम्।
परागपतीकृतभक्तमानसं विघ्नमोहारि पुरारिलालितम्॥
अथायुर्व्वेदे नाड़ीपरीक्षादयः।
करस्याङ्गुष्ठमूले या धमनी जीवसाक्षिणी।
तच्चेष्टया सुखं दुःखं ज्ञेयं कायस्य पण्डितैः॥ इत्यादि।

End. नारायणं भजत रे जठरेण युक्ता नारायणं भजत रे पवनेन युक्ताः।
नारायणं भजत रे भवभीतिभीता नारायणात् परतरं किमपीह नास्ति॥
इति रोगप्रतीकारः पञ्चमो विलासः।

Colophon. इति श्रीगङ्गोलीसञ्जीवेश्वरशर्म्मसूनुश्रीरत्नपाणिशर्म्मसंगृहीतनाड़ीपरीक्षादिचिकित्साकथनं समाप्तम्।

विषयः। नाड़ीपरीक्षाविधिः। वातादिप्रभेदनिरूपणं। अमाघलक्षणं। वातज्वरस्वभावः। एवं पैत्तिकज्वरादिप्रकृतिकथनं चिकित्साकथन। तत्र ज्वराधिकारे,—द्राक्षादियोगः। दुरालभादियोगः। अर्कादियोगः। कट्फलादियोगः। गुड़पिप्पलीयोगः। नवाङ्गयोगः। नागरादियोगाः। पटोलपञ्चकं। अष्टाङ्गधूपकथनञ्च। ज्वरातीसारे,—धान्यपञ्चकादियोगः। वृहद्गङ्गाधरचूर्णं। गुड़बिल्वयोगः। श्वासाधिकारे, विभीतकावलेहः। आर्द्रपाकादियोगाः। आमवातप्रतीकारकथनं। कामलापाण्डुप्रतीकारः। व्रणप्रतीकारः। प्रमेहप्रतीकारः। तृष्णावान्तिप्रतीकारः। प्रदरप्रतीकारः। अर्शःप्रतीकारः। स्फुटचरणप्रतीकारः। गण्डमालाप्रतीकारः। कण्ठरोगप्रतीकारः। अम्लपित्तप्रतीकारः। वातगुल्मप्रतीकारः। अग्निमान्द्यप्रतीकारः। हृद्रोगप्रतीकारः। दन्तप्रतीकारः। रक्तपित्त-हिक्काश्मरीरक्तस्रावमूत्रकृच्छ्रादिप्रतीकारः। रसप्रकरणकीर्त्तनञ्च।

No 2017. आचारसङ्ग्रहः। Substance, country-made paper, 12 × 4 inches. Folia, 64. Lines, 10 on page. Extent, 2,480 ślokas. Character, Maithilí. Date, ? Place of deposit, Naváni, Post Mádhepur, Darbhángá, Paṇḍit Vañsamaṇi Jhá. Appearance, fresh. Prose and verse. Correct.

A'chára-sañgraha. A compilation of rules regarding the religious duties of householders. By Ratnapáni S'armá, son of Gañgolí Sanjiveśvara S'armá.

Beginning नत्वा यच्चरणौ सृजत्यविरतं विश्वं विधिः कञ्जजो-
भिर्दुर्योगचयेऽप्यविघ्नमखिलं पालयुतो वामनः।
चोभं वा + मथाधिपः पशुपतिः स्थाणुर्नयत्यस्तु मे
वाणीसिद्धिकरो विपद्व्रजहरो लम्बोदरः सुन्दरः॥
आकलय्य बहून् ग्रन्थान् मुनीनां वचनानि च।
आचारसङ्ग्रहो यत्नात् क्रियते रत्नपाणिना॥
तत्रादावुपोद्घातमाह। हारीतः।
अज्ञानतमसान्धानां भ्रमितानां कुदृष्टिभिः।
धर्म्मशास्त्रप्रदीपोऽयं धर्म्ममार्गोपदेशकः॥ इत्यादि।

End. गर्भे पुंसः शुक्रपातात् यदुक्तं मरणावधि।
तदेतस्य महाव्याधेर्मत्तो नान्योऽस्ति भेषजम्॥

Colophon. इति गङ्गोलीसञ्जीवशर्म्मसूनुश्रीरत्नपाणिशर्म्मकृत आचारसङ्ग्रहः समाप्तः।
बहवः सन्ति च ग्रन्था आचारप्रतिपादकाः।
एकत्र तत्त्वलाभाय मयाऽयं सङ्ग्रहः कृतः॥

विषयः। आचारस्वरूपकथनं। धर्म्मस्वरूपनिरूपणं। प्रातःकृत्यनिरूपणं। मूत्रपुरीषाद्युत्सर्गविधिः। शौचविधिः। आचमनविधिः। दन्तधावनविधिः। तत्र काष्ठनियमः। प्रातःस्नानविधिः। नैमित्तिकादिस्नानविधिः। सन्ध्योपासनविधिः। प्राणायामविधिः। हविष्यान्ननिरूपणं। तिलकादिविधिः। तर्पणविधिः। स्नानप्रयोगः। सामगवाजसनेयादीनां स्नानप्रयोगः। वाजसनेयिनां सन्ध्याप्रयोगः। सामगानां सन्ध्याप्रयोगः। वाजसनेयिनां तर्पणप्रयोगः। एवं सामगानां तर्पणादिप्रयोगकथनं। ब्रह्मयज्ञनिरूपणं। पूजाधारादिनिरूपणं। शिवदुर्गासूर्य्यनारायणादिपूजाविधानं। पुष्पादिविवेचनं। शिवलिङ्गशालग्रामादिमाहात्म्यं। गोमयादिलिङ्गपूजाविधिः। पितृयज्ञप्रकारकीर्त्तनं। वैश्वदेवप्रयोगः। नित्यश्राद्धप्रयोगः। गोग्रासदानविधिः। अतिथिपूजनविधिः। भोजनविधिः। मत्स्यमांसादिभक्षणविधिः। अत्र विविधमतविवेचनं। विविधपक्षिपशुप्रभृतिभोजनादौ दोषाभावकथनं। शयनविधिः। सुगन्धिद्रव्यव्यवहारविधिः। गर्भाधानादिविधिः। भ्रूणलक्षणादिकथनञ्च।

No. 2018. पार्व्वणचन्द्रिका । Substance, country-made yellow paper, 11 × 4 inches. Folia, 74. Lines, 8 on a page. Extent, 1,752 ślokas. Character, Maithilí. Date, ? Place of deposit, Naváni, Post Mádhepur, Darbhángá, Pandit Vañsamani Jhá. Appearance, fresh. Prose and verse. Correct.

Párvana-chandriká. On various kinds of S'ráddhas, their peculiarites, and times and modes of performing them. By Ratnapáni S'armá, son of Gañgolí Sanjíves'vara S'armá.

Beginning. श्रीलम्बोदरपादपद्मयुगलं स्वान्ते निशान्ते दधत्
कुर्व्वे पार्व्वणचन्द्रिकामहमिमां श्रीरत्नपाणिः कृती ।
सन्तोषाय सतां कृपां कलयतां लोकामयाकाथद्वा-
मागच्छन्नथ पूर्व्वतोऽधितरणिप्रख्यातग्रन्थोद्भूताम् ॥
अथ श्राद्धकालाः । तत्र याज्ञवल्क्यः ।
अमावास्याष्टका वृद्धिः कृष्णपक्षोऽयनद्वयम् ।
द्रव्यब्राह्मणसम्पत्तिर्विषुवत् सूर्य्यसङ्क्रमः ॥ इत्यादि ।

End. ततः पुरोहितं, ब्राह्मणमन्यं वा प्रतिपाद्य स्वाच्छन्द्यं गृहीत्वा पिण्डिकाकोणं विभाज्य श्राद्धीयद्रव्याणि ब्राह्मणाय प्रतिपादयेत् ॥
कन्दोगपार्व्वणविधिरयमलेखि श्रीरत्नपाणिशर्म्मणा नावि सुरसरिति ॥

Colophon. इति गङ्गोलीसञ्जीवेश्वरशर्म्मसूनुश्रीरत्नपाणिशर्म्मसङ्गृहीता पार्व्वणचन्द्रिका समाप्ता ।

विषयः । श्राद्धकालकथनं । श्राद्धावश्यकता । नवोदकश्राद्धादेर्नित्यत्वकथनं । मलमासेऽपि नवोदकश्राद्धस्य कर्त्तव्यतानिरूपणं । व्रीहिपाकश्राद्धं । हैमन्तिकनवान्नश्राद्धं । अत्र नानाग्रन्थकारमतकथनं । श्रीच्चादिपार्व्वणकथनं । अपरपक्षश्राद्धविधिः । मघात्रयोदशीविषये मतभेदविवेचनं । कार्त्तिकामावस्यायां विशेषकथनं । उल्कादानविधिः । दीपदानविधिः । लक्ष्म्यादिपूजाविधिः । पार्व्वणपदार्थविवेचनं । अमावस्याश्राद्धकालविवेचनं । अनुपनीतादिकृतश्राद्धनिरूपणं । अपाचकपार्व्वणविधिः । महालयादिश्राद्धकथनं । सामान्यतः श्राद्धकरणवेलानिरूपणं । अत्र मतभेदविवेचनं । काम्यश्राद्धविधानं । मन्वन्तरायुगाद्यादिनिरूपणं । तर्पणप्रशंसा । कृष्णत्रयोदशीश्राद्धनिषेधकीर्त्तनं । तीर्थश्राद्धविधिः । पितॄणां ध्यानविधिकथनं । श्राद्धक्रियाविवेचनम् । तत्र सङ्कल्पवाक्याचमनमार्ज्जनासनपरिवेषणपात्रवस्त्रादिनिरूपणं । परकीयगृहे श्राद्धकरणविधिः । श्राद्धनिषिद्धानि । अपुत्रस्य न पार्व्वणश्राद्धमिति निरूपणं । उपवीतविचारः । द्रव्यपरिभाषाकीर्त्तनं । श्राद्धदिनवर्ज्जनीयानि । पार्व्वणप्रयोगकथनं । श्राद्धीयद्रव्यप्रतिपत्तिकथनञ्च ।

———

No. 2019. क्षयमासादिविवेकः। Substance, country-made paper, 12 × 3½ inches. Folia, 32. Lines, 8 on a page. Extent, 604 ślokas. Character, Maithilí. Date, ? Place of deposit, Naváni, Post Mádhepur, Darbhángá, Paṇḍit Vañsamaṇi Jhá. Appearance, fresh. Prose and verse. Correct.

Kshayamásádi-viveka. On intercallary and elided months, the mode of reckoning the same, and duties appertaining to, and prohibited at, such times. By Ratnapáni S'armá, son of Gaṅgolí Sanjíves'vara S'armá. The work was compiled during the reign of Chhatra Siṅha, of Mithilá. The author, in his introduction, gives a long list of the digests he had consulted.

Beginning वन्दे मदानन्दमरन्दसुन्दरं द्विजान्यपादाम्बुजयुग्ममुत्तमम् ।
परागपूतीकृतभक्तमानसं विपत्तमोहारि पुरारिलालितम् ॥
स जयति बाहादुरोऽयं मिथिलेशः श्रीछत्रसिंहनामा ।
जितरिपुरथो महौजा दानन्यक्कृतकर्णकीर्त्तिः ॥
अवाप्य यस्य स्वरसं जीविकां विदेहदेशागतकृत्यनुज्ञया ।
द्विसंक्रमस्याम्य दिन+जः श्रमात् तनोमि सिद्धान्तविचारसञ्चयम् ॥
आलोचनीयः सुधिया धियाऽसावेकीकृतः सम्प्रति रत्नपाणेः ।
वाचस्पतीत्यादिकृतानुपूर्व्वी गुर्व्वीकृतात्मा सविशेष एषः ॥
कुर्व्वन्तु गाढान्तमनन्तपण्डिता निजं निजं खिद्यति वा न मे मनः ।
अनङ्कृशा ये तु दिवौकसां प्रियाः पुरे पुरे दीव्यन्ति वाग्भरैः ॥

अथ कृतकतिविधचिन्तामणिकृत्यमहार्णवादिग्रन्थापरवाचस्पतिवाचस्पतिमिश्रकृतद्वैतपरिशिष्टादितुष्टकेशवकेशवमिश्रकृतविश्वटीकापटुतरीकृतन्यायपरिकरापरकल्पिततिथितत्त्वचिन्तामणिमत्तमासमारिण्यादिग्रन्थसम्भवगौरवगुरुतरनिजकल्पितवर्द्धविधाचारगीयमानयशःसारश्रीमन्महेशचरितकल्पितमिथिलेशमहामहोपाध्यायमदुकुलसहेशकृतस्मृतिविवेकवर्द्धमानवर्द्धमानोपाध्यायतर्कपुण्डरीकप्रकाशमार्त्तण्डकृतव्यवहाराद्वैतनिर्णयातिभक्तिमुक्तितोपितश्रीनरहरिनरहर्य्युपाध्यायविविधग्रन्थकारवद्धीकृतनिजकल्पितमाममीमांसाप्रकृतविचारतर्कापरगोतमगोकुलनाथोपाध्याय प्रभृतिमहाजनदर्शितमादृशवत् सभीकृतमरहाय पथं कापथ गन्तुमुत्का बहवः क्षयमासपदाद्व्याख्यातत्परदेशीयपक्षं समक्षं कारं कारं महान्तो नितान्तं कियन्तो विवदन्ते हन्त+तेनेति विद्मो वयम् । इत्यादि ।

End. जानन्तोऽपि बाबदूका विवदन्ते बहवोऽन्यदेशीयाश्चेत् का नो हानिरिति स्वदेशीयाः केऽपि नैवं भूता भवन्त्वित्येव तात्पर्य्यमिति कृतमतिविस्तरेण ॥

Colophon. इति गङ्गोलीसञ्जीवेश्वरशर्म्मसूनुश्रीरत्नपाणिशर्म्मसङ्गृहीतक्षयमासादिविवेकः समाप्त इति ।

विषयः। क्षयमासपदार्थविवेचनं। तल्लक्षणकीर्त्तनञ्च अत्र विविधमतखण्डनं। मलमासस्वरूपविवेचनम्। क्षयजातमृतानां कृत्यादिनिरूपणं। क्षयमाससम्भावनाकालादिनिरूपणं। भानुलङ्घितमासनिरूपणं। मलमासकृत्यनिरूपणं। अत्र विविधनयनम्बारकीर्त्तनं। मत्स्यमांसादिभक्षणविधानकीर्त्तनं।

No. 2020. एकोद्दिष्टसारिणी । Substance, country-made yellow paper, 11 × 3 inches. Folia, 35. Lines, 8 on a page. Extent, 782 ślokas. Character, Maithilí. Date, ? Place of deposit, Naváni Post Mádhepur, Darbhángá, Paṇḍit Vaṅsamaṇí Jha. Appearance, fresh. Prose and verse. Correct.

Ekoddishṭa-sáriṇí. On the first annual śráddha and the rules and rituals appertaining thereto. By Ratnapáṇí S'armá, son of Gaṅgolí Sanjíveśvara S'armá.

Beginning. श्रीहेरम्बपदारविन्दयुगलध्यानात्मभानुप्रभा-
प्रद्योताश्रयमन्दिरो नतकरो धीरे कृपासागरे ।
वैदेहाधिपसम्मुदे हि विविधग्रन्थावलोक + +
मेकोद्दिष्टविचारणं प्रकुरुते श्रीरत्नपाणिः सुधीः ॥

अथ व्यासः। मासपक्षतिथिस्पृष्टे यो यत्र म्रियतेऽहनि।
प्रत्यब्दन्तु तथाभूतं क्षयाहं तस्य तद्विदुरिति ।

अतएव मासपक्षतिथ्याद्युल्लिखितं सङ्कल्पवाक्यमत्रायाति। न तु पार्व्वणे अस्य क्षयाहप्रकरणीयत्वात्। इत्यादि।

End. कृतैषा सारिणी यत्नादेकोद्दिष्टविधायिनी ।
श्रीरत्नपाणिकृतिना गच्छता नापि पूर्व्वतः ॥
विघ्नं हरन्तु हेरम्बचरणाम्बुजरेणवः ।

Colophon. इति गङ्गोलीसञ्जीवेश्वरशर्म्मसूनुश्रीरत्नपाणिशर्म्मसंगृहीता एकोद्दिष्टसारिणी समाप्ता ।

विषयः। क्षयाहनिरूपणं। तत्र श्राद्धाकरणे प्रत्यवायकथनं। अमावस्यादौ मृतस्य क्षयाहे एकोद्दिष्टमेव कर्त्तव्यं न तु पार्व्वणमितिनिर्णयः। श्राद्धदिने अशौचपाते विधानं। अत्राशौचविवेचनञ्च। एकभक्तादिनियमकीर्त्तनं। मृताहाज्ञानादौ विधिः। एकोद्दिष्टं पाकेनैव कर्त्तव्यमितिनिरूपणं। प्रातर्मुहूर्त्तकुतपरौहिणादिकालनिरूपणं। व्रणाद्यशौचपतितश्राद्धं मलमासेऽपि कर्त्तव्य-

क्रमकथनं । गृहप्रवेशविवेचनं । पर्णनरदाहविधिः । दशपिण्डदानविधिः । प्रेततर्पणविधिः । नीरक्षीरदानविधिः । आद्यश्राद्धविधिः । अस्थिसञ्चयविचारः । अत्र श्राद्धविधिः । अशौचान्ति-मदिनकृत्यविधिः । क्षौरविधिः । वृषोत्सर्गविधिः । श्राद्धादौ मांसादिदानविवेचनं । तत्र भक्ष्या-भक्ष्यमांसादिविवेचनञ्च । द्विजदम्पतीदानादिविधिः । कपिलादिदानविधिः । मासिकश्राद्ध-विवेचनं । षोड़शश्राद्धानि । सपिण्डीकरणविवेचनं । चतुर्थीश्राद्धविधिः । पार्व्वणश्राद्धविधिः । स्त्रीकर्त्तृकश्राद्धविधिकथनञ्च ।

No. 2023. मिथिलेशचरितम् । Substance, country-made yellow paper, 12 × 4 inches. Folia, 36. Lines 10—12 on a page. Extent, 1,264 ślokas. Character, Maithilí. Date, ? Place of deposit, Naváṇí. Post Mádhepur, Darbháṅgá, Paṇḍit Vañsamaṇí Jhá. Appearance, new. Verse. Incorrect.

Mithileśa-charita. Mithilá, its extent, character, history, sovereigns, and the manners, customs, and habits of its people. The history comprises the reigns of nine rájás beginning with Maheśvara Ṭhakkura, who obtained the rájáship of the district from an emperor of Delhi. By Ratnapáṇí S'armá, son of Gaṅgoli Sanjíveśvara S'armá. The author was a Dráviḍa Bráhmaṇ, and wrote the work under the instruction of Rámachandra Miśra, at Calcutta. Nos. 2009, 2016, to 2020, 2022, 2029 and 2032 are also due to him.

Beginning. वन्द्यं वेद्यं गणेशाणं प्रधानं जगतामजं ।
विघ्नहारं दयोदारं सारं तारं भजे महः ॥
द्रविड़देशी सुखवासी निगमविलासी रामचन्द्रमिश्रः ।
तत् प्रश्नोत्तरसारं लिखति विचारं रत्नपाणिः ॥
कलिकत्ताभिधनगरे स्थित एवैष प्रयासराशिरुदितः ।
वंशावली च रीतिर्नीतिरपीह मिथिलेशानां ॥
मिथिलादेशो यत्रेऽस्ति कीदृशः कोऽवधिस्ततः ।
आचारः कीदृशो धीर कीदृशा मनुजा अपि ॥
कोऽस्ति सम्प्रतिभूपस्तु कीदृशं तत्कुलं वद ।
एतमन्यच्च यत्क्र व्यं रत्नपाणे निगद्यतां ॥
रामचन्द्र शृणु त्वं हि यथाप्रश्नं तदुत्तरं ।
मिथिनाम्नाऽत्र भूपोऽभूत् पालितस्तेन यत् पुरा ॥
तन्नाम्ना चिह्नितस्तस्मान्मिथिलादेश उच्यते । इत्यादि ।

End. एवं विधानि वृत्तानि सर्व्वमोक्षप्रदानि च ।
कति चासन्नन्दपतेः सर्व्वत्र विदितानि वै ॥
कथितानि च तुभ्यं भो कानिचित् प्रश्नवाक्यतः ।
अतः परन्तु वक्तुं मे समयो नास्ति सम्प्रति ॥
कालान्तरे रामभिश्र श्रोतव्यं पुनरागमे ।
ततः कृतार्थो रामोऽसौ वदन्निति ययौ गृहं ॥
एतावदपि श्रुत्वा मे जन्मसाफल्यतामयौ ।
सुधापाने न कस्यापि तृप्तिर्भवति कुत्रचित् ॥

Colophon. इति गाङ्गोलीसञ्जीवेश्वरशर्म्मसूनुश्रीरत्नपाणिशर्म्मकलिते श्रीमिथिलेशचरिते + + + + + + + + प्रकरणम् ॥

विषयः । मिथिलामाहात्म्यकथनं । मैथिलानामाचारादिकथनं । अधुनातनमहाराजस्य पूर्व्वजानां प्रत्येकं जीवनीकथनं । तत्र प्रथमतः महेश्वरठक्कुरो दिल्लीश्वरात् यथा मिथिलाराज्यं लब्धवान् तद्वृत्तान्तकथनं । महेश्वरादारभ्य नवमपुरुषपर्य्यन्तं राज्ञां वृत्तान्तकीर्त्तनं ।

No. 2024. ग्रहलाघवं वा सिद्धान्तरहस्यम् । Substance, country-made paper, 11 × 5 inches. Folia, 34. Lines, 6 on a page. Extent, 465 ślokas. Character, Nágara. Date, Sm. 1850. Place of deposit, Calcutta, Government of India. Another copy at Kanhaulí, Post Madhuvaní, Darbhángá. Paṇḍit Lalita Jhá. Appearance, old. Verse. Correct.

Grahalághava *alias* **Siddhánta-rahasya.** Astronomical calculations, regarding all the leading subjects of the science as known to the Hindus. By Gaṇeśa Daivajna, son of Keśava Sámvatsara.

Beginning. ज्योतिःप्रबोधजननी परिशोध्य चित्तं
तत् सूक्तकर्म्मचरणैर्गहनार्थपूर्णा ।
स्वल्पाक्षरापि च तदंशकृतैरुपायै-
र्व्यक्तीकृता जयति केशववाक् श्रुतिश्च ॥
परिभग्नमहोर्व्वीशचापं दृढगुणहारलसन्मुखत्ववाङ्गम् ।
सुफलप्रदमानन्दप्रभं तत् स्मर रामं करणञ्च विष्णुरूपम् ॥
यद्यप्यकार्षुरवः करणानि धीरास्तेषु+ +धनुरपास्य न सिद्धिरस्मात् ।
ज्याचापकर्म्मरहितं सुलघुप्रकारं कर्त्तुं ग्रहप्रकरणं स्फुटमुद्यतोऽस्मि ॥
द्वाभ्रीन्द्रोनितशक ईशहृत् फलं स्याच्चक्राख्यं रविहृतशेषकश्च युक्तम् ।
चैत्रादैः पृथगगुतः सदृष्टचक्रादिगगुप्तादमरफलाधिमासयुक्तम् ॥ इत्यादि

End.

पूर्व्वं प्रौढतराः क्वचित् किमपि यच्चक्रुर्धनर्ज्यं विना
ते तेनैव महातिगर्व्वकुभृट्टुत्तुङ्गेऽधिरोहन्ति हि।
सिद्धान्तोक्तमिहाखिलं लघुकृतं हित्वा धनर्ज्यं मया
तद्गर्व्वा मयि सान्तु किं न तदहं तच्छास्त्रतो हृद्धीः॥
नन्दिग्राम इहापरान्तविषये शिष्यादिगीतस्तुति-
र्योऽभूत् कौशिकवंशजः सकलसच्छास्त्रार्थवित् केशवः।
सूनुस्तस्य तदङ्घ्रिपद्मभजनाल्लब्धावबोधांशकः
स्पष्टं हन्तविचित्रमल्पकरणं चैतद्गणेशोऽकरोत्॥

Colophon. इति श्रीसकलागमाचार्य्यवर्य्यश्रीकेशवसांवत्सरात्मजश्रीगणेशदैवज्ञविरचितं ग्रहलाघवाख्यं सिद्धान्तरहस्यं समाप्तम्। संवत् १८५०।

विषयः। अहर्गणानयनप्रकारकीर्त्तनं। सूर्य्याचन्द्रतुङ्गादीनां ध्रुवककथनं। सूर्य्यादीनां क्षेपककथनं। ध्रुवक्षेपकसंस्कारकथनं। मध्यमरविबुधशुक्रचन्द्रसाधनं। चन्द्रानयनं। चन्द्रतुङ्गपातानयनं। राहोरानयनं। भौमबुधकेन्द्रसाधनं। गुरुभृगुकेन्द्रसाधनं। शुक्रकेन्द्रानयनं। शनेरानयनं। रविचन्द्राद्यगतिकथनं। राहुभौमादीनां गतिकलानिरूपणं। दृग्गणितैक्यसंस्थापनं। भुजसाधनविधिः। चरसाधनं। चरानयनं। चन्द्रस्फुटीकरणं। चन्द्रमन्दफलसाधनं। चन्द्रगतिसाधनं। तिथिनक्षत्रयोगकरणसाधनं। भौमादीनां शीघ्रफलाङ्ककथनं। एषां मन्दफलसाधनञ्च। मन्दस्पष्टगतिसाधनं। कुजबुधशुक्राणां गतौ विशेषकथनं। भौमादीनां वक्रास्य शीघ्रकेन्द्रभागकथनं। कुजगुरुशनीनामुदयभागकथनं। बुधशुक्रयोरुदयास्तभागकथनं। वक्रमार्गादिदिनज्ञानकथनं। मेषादिराशीनां लङ्कोदयकथनं। लग्नसाधनं। गोलानयनप्रकारः। पलांशसाधनं। नतोन्नतसाधनं। अक्षकर्णसाधनं। इष्टच्छायासाधनार्थं हारकथनं। भाव्यसाधनं। कर्णाद्यानयनं। क्रान्तिसाधनं। क्रान्तिभागेभ्यो भुजभागानयनं। रवेरज्ञाने दिनमानादेव क्रान्तिसाधनं। दिनार्द्धे नतांशोन्नतांशसाधनं। नष्टकर्णसाधनं घटीज्ञानसाधनं। नलिकादिबन्धार्थं दिक्साधनकथनं। भुजकोटिकर्णनलिकासंस्थानकथनं। चन्द्रग्रहणनिरूपणं। खण्डग्रासादिनिरूपणं ग्रहणस्थितिसाधनं। स्पर्शमोक्षस्थितिसाधनं। जालग्रहदर्शनार्थं नलिकानिवेशविधिः। छायासाधनादिकं। मध्यग्रहणस्पर्शकालमोक्षसम्मीलनोन्मीलनकालसाधनं। ग्रस्तोदयादौ नतसाधनं। सूर्य्यग्रहणं। लम्बनसाधनं। वर्णज्ञानादिकथनं। ग्रहणद्वयसिद्धिः। इत्यादिसाधनं। तिथिसाधनं। कक्षानयनं। चन्द्रबिम्बभूभासाधनं। गुरुशुक्रादीनामुदयास्तसाधनं। मन्दस्पष्टग्रहसाधनं। नतांशसाधनं। दृक्कर्मसाधनं। नक्षत्रध्रुवककथनं। अक्षदृक्कर्मकथनं। खमध्यस्थनक्षत्राद् रात्रिज्ञानकथनं। नक्षत्राणां छायायन्त्रेण रात्रिज्ञानं। शृङ्गोन्नतिदिग्ज्ञानसाधनं। महापातज्ञानं। पातसमयादिज्ञानसाधनं। पिण्डसाधनं। नक्षत्रसाधनं। योगसाधनादिकं। सूर्य्यसाधनं। मासमाधनं। अहर्गणग्रहादिसाधनञ्च।

No. 2025. ग्रहलाघवटीका। Substance, country-made paper, 12 × 5 inches. Folia, 96. Lines, 13—14 on a page. Extent, 3,030 ślokas. Character, Nágara. Date, Sm. 1853. Place of deposit, Kanhauli, Post Madhubaní, Darbhángá, Paṇḍit Lalita Jhá. Another copy at Calcutta, Government of India. Appearance, old. Prose. Generally correct.

Grahalághava-ṭiká. A commentary on Gaṇeśa Daivajṇa's *Grahalághava* alias *Siddhánta-rahasya* (*ante*, No. 2024). By Mallári Daivajṇa, son of Divákara Daivajṇa.

Beginning. नाके न केऽप्यसुख्याः सुरवरनिवहाः सन्ति येऽनन्तसंख्या-
नाख्यामाख्यात्यमीषां कथमपि च मनःपूर्व्वकं वाङ्मदीया।
एकं द्विलैकदन्तं सकलसुरशिरःसंघसङ्घर्षिताङ्घ्रि
शीघ्रं भक्तेष्टसिद्धिप्रदमिह हि सुरं सादरं तं नमामि॥
मल्लारिं कुलनायकं रविमुखान् + + ; स नत्वा गुरोः
स्मृत्वा पादयुगं ह्यवाप्य च ततः किञ्चित्सुबोधांशकं।
मल्लारिर्ग्रहलाघवस्य कुरुते टीकां लसद्वासनां
यस्मादल्पमतिश्च कुण्ठितमतिः स्यात् पूर्व्वविचारतः॥
मध्यस्फुटास्तोदयवक्रपूर्व्वं कर्म्माखिलं यद्गणिते खगोत्थं।
जीवा धनुःसंश्रयकं विना ते न स्यादयं निश्चय एव गोले॥

— — — — — — — — — — — — — अथ श्रीमज्जलधितटनिकटस्थितनानो-पवनविराजितनन्दिग्रामाभिधनगरनिवासिसकलभूपतिसेवितचरणयुगलकमलगणिताटवीविघटनपटुतराखिलदैवविन्मातङ्गकुम्भपीठलूठनोत्कण्ठकण्ठीरवश्रीमदुमारमणचरणद्वयपङ्कजावाप्तमहामतिविभवदैववित् केशवदैवज्ञात्मजाः गणेशदैवज्ञवर्य्यचर्य्याः ग्रहलाघवाख्यं ग्रहप्रकरणं चिकीर्षवस्तत्रादौ निर्व्विघ्नेन ग्रन्थसमाप्तिप्रचयगमनाभ्यां शिष्टाचारपरिपालनाय च — — — — — — — वस्तुनिर्द्देशरूपमङ्गलसहितं ग्रन्थारम्भं वसन्ततिलकाछन्दसाह, ज्योतिरिति।

End. अकरोत् कृतवानित्यर्थः। इति पूर्व्वशाकांशाद्ग्रहानयनप्रकारः। ग्रन्थालङ्कारश्च कृतः॥

Colophon. इति श्रीमद्गणकचक्रचूडामणिदिवाकरदैवज्ञसुतमल्लारिदैवज्ञविरचितायां ग्रहलाघवटीकायां ग्रन्थसमाप्त्यलङ्कारव्याख्यानं समाप्तं।

देशे पार्थसमाह्वयेऽतिरुचिरे तीरे च गोदोत्तरे
गोलग्रामपुरे मुरारिचरणार्चासक्तविद्वद्युते।
आसीत्तत्र दिवाकरोऽतिचतुरो + दैवज्ञाग्रणी-
र्विश्वेशे सततं यदीयहृदयं यस्तस्य पुत्रोऽकरोत्॥

मन्नारिर्गणकाग्रणीर्गुरुपदद्वन्द्वाब्जभक्तौ रतो
लब्ध्वा बोधलवं ततो हि विवृतिं स्वार्थोपपत्तिं स्फुटां।
वर्य्यस्य ग्रहलाघवस्य गणकश्रीमद्गणेशाभिध-
प्रोक्तस्याथ कृपालवो हि सुधियः पश्यन्तु तुष्यन्त्विमां ॥
वाणोनाच्छकतः कुमारविहृतान्मूलं हि मासः मयुग-
वाणैर्भेष्वदशोनितादिनमिति(?) तस्यादलं(?) स्यात्तिथिः।
पक्षः स्वात्तिथिसम्मितोऽखिलयुतिः मप्ताब्धितिथ्युन्मिता
होताख्यौ गणको लिलेख च तदा टीकां परार्थान्विमां ॥
संवत् १८५२। भाद्रमासशुक्लपञ्चतिथि ६ शनिवासरे। शुभम्।

विषयः। गणेशदैवज्ञकृतसिद्धान्तरहस्यापराभिधानग्रहलाघवस्य व्याख्यानम्।

No. 2026. श्राद्धरत्नम्। Substance, country-made paper, 14×4 inches, Folia, 72. Lines, 8 on a page. Extent, 1,916 ślokas. Character, Maithilí. Date, ? Place of deposit, Vehaṭ, Post Mádhepura, Darbhángá, Paṇḍit Phaṇidhara Miśra. Appearance, fresh. Prose and verse. Generally correct.

Sráddha-ratna. A summary of the rules regarding śráddhas. By Lakshmípati, disciple of Indrapati.

Beginning. वदनविनिर्ज्जितचन्द्रं गञ्जितशक्रं नगोद्धरणात्।
गोपीवृन्दवियोगं बालमुकुन्दमहं कलये ॥
प्रणम्य भारतीकान्तं श्रीमदिन्द्रपतिं गुरुम्।
श्रीलक्ष्मीपतिधीरेण श्राद्धरत्नं विधीयते ॥

अथेदानीन्तना जनाः क्रिया + + यावदेवं कुर्व्वन्ति तावदेव छन्दोगानां वाजसनेयिनाञ्च प्रति + + स्रोक्तः श्रीदत्तोक्तश्च प्रयोगो लिख्यते। तत्र प्रथमं भूसंस्कारः। इत्यादि।

End. श्राद्धशेषमन्नमिष्टैः सह भुञ्जीत इति। वाजसनेयिनां पार्व्वणप्रकारोक्तो विशेषो ग्राह्य इति ॥

Colophon. इति समाप्तोऽयं ग्रन्थः।

विषयः। भूसंस्कारविधिः। स्नानक्रियाकथनं। श्राद्धवेला। पूरकपिण्डदानविधिः। पर्णनरदाहविधिः। उदकदानविधिः। पिण्डदानविधिः। अस्थिसञ्चयविधिः। अशौचान्तकृत्यं। एकादशाहकृत्यं। वृषोत्सर्गविधिः। रुद्राध्यायकथनं। कपिलादानविधिः। शय्यादिदानविधिः। एकादशाहप्रयोगकीर्त्तनं। सपिण्डनविधिः। अवीराकल्पकथनं। एकोद्दिष्टविधिः। स्त्रीकर्त्तृकश्राद्ध-

प्रयोगकथनं । शस्त्रादिहतानां श्राद्धविधिः । पार्व्वणविधिः । तत्प्रयोगकथनं । बलिवैश्वदेवविधिः । आमान्नश्राद्धविधिः । तीर्थश्राद्धविधिः । नित्यश्राद्धविधिः । सपात्रकविधिकथनञ्च ।

No. 2027. वृत्तिदीपिका । Substance, country-made paper, 12 × 4 inches. Folia, 28. Lines, 9 on a page. Extent, 1,039 ślokas. Character, Maithilí. Date, ? Place of deposit, Rághavapura, Post Vaherá, Darbhángá, Pandit Viśveśvara Jhá. Appearance, old. Prose. Correct

Vritti-dípiká. A dissertation on the philosophy of grammar. By Krishna Bhatta.

Beginning. सजलजलदकालं सर्व्वलोकैकपालं
व्रजयुवतिरसालं चन्दनाव्यक्तभालम् ।
विगतदुरितजालं विश्वराजीवजालं
विलसिततृणमालं नौमि गोपालबालम् ।
ध्यात्वा व्यासं गुरुं नत्वा माधवेन्द्रसरस्वतीम् ।
मौनिश्रीकृष्णभट्टेन तन्यते वृत्तिदीपिका ॥

इह सकलजनाभिलषितमोक्षमुख्योपायात्मतत्त्वज्ञानस्य तत्त्वमस्यादिमहावाक्यार्थबोधजन्यत्वात् शाब्दबोधे च वृत्तिग्रहणोपस्थितेर्हेतुत्वात्———इत्यादि ।

End. तथा च वर्णजातिस्फोटः पदजातिस्फोटः वाक्यजातिस्फोट इति तन्मते स्फोटत्रयम् ॥

Colophon. इति श्रीमन्मौनिकुलतिलकायमानगोवर्द्धनभट्टात्मजरघुनाथभट्टसुतश्रीकृष्णभट्टविरचिता वृत्तिदीपिका समाप्ता ।

विषयः । वृत्तिस्वरूपनिरूपणं । शक्तिस्वरूपनिरूपणं । वृत्तेः शाब्दबोधहेतुत्वनिरूपणं । शक्तिलक्षणाभेदेन तस्या द्वैविध्यनिरूपणं । शक्तिग्रहनिरूपणं । तत्र गवादिपदानां गोत्वे शक्तिरिति मीमांसकमतनिरूपणं । जातौ व्यक्तौ विशिष्टे च शक्तिरिति नैयायिकानां नयनिर्णयः । कार्य्यान्विते पदानां शक्तिरिति प्राभाकरमतकीर्त्तनं । रूढयौगिकादौ शक्तिविवेचनं । लक्षणास्वरूपनिरूपणं । गौनीशुद्धाभेदेन तस्या द्विविधत्वकथनं । लक्षितलक्षणादिनिरूपणं । व्यञ्जनावृत्तिलक्षणं । अत्र नैयायिकमतखण्डनपूर्व्वकं तस्याः स्थापना । धात्वर्थनिरूपणं । तत्र प्राभाकरवैयाकरणादिमतकीर्त्तनं । नैयायिकमतखण्डनं । तिङर्थनिरूपणं । अपूर्व्ववादकथनं । सनाद्यर्थनिरूपणं । समासशक्तिनिरूपणं । नञर्थनिरूपणं । वीप्सादिनिरूपणं । स्त्रीप्रत्ययार्थनिरूपणं । तद्धितार्थनिरूपणं । स्फोटनिरूपणञ्च ।

No. 2028. वृत्तदर्पणम्। Substance, country-made paper, 11 × 4 inches. Folia, 34. Lines, 7 on a page. Extent, 833 ślokas. Character, Maithilí. Date, ? Place of deposit, Rághavapura, Post Vaherá, Darbhángá, Pandit Viśveśvara Jhá. Appearance, fresh. Verse. Correct.

Vritta-darpana. A treatise on versification, giving details of all the different metres used in Sañskrit poetry. By Bhíshma Miśra.

Beginning. स जयति सततं पिङ्गलनामा नागरकविलरसविज्ञः।
लोकोत्तररसकवितां कलयितुमिव मङ्गलीतपरजिकः॥
गौरीस्तननखरेखा शिरसि प्रतिबिम्बितेव चन्द्रकला।
यस्य विभाति स देवः सन्तापं नाशयत्वखिलम्॥
सन्ति यद्यप्यनेकानि वृत्तशास्त्राणि भूतले।
तथाप्यतिशयो ह्यत्र अमानतिशयो महान्॥
यदि सद्वृत्तवृत्तानि ज्ञातुमाकाङ्क्षसि स्फुटम्।
श्रीभीष्ममिश्रचरितं पश्य तद्वृत्तदर्पणम्॥

अथ गणाः। मगणो यगणो रगणः सगणस्तगणो जगणो भगणो नगणः। इत्यादि।

End. दीर्घास्तदग्रे लघवश्च वर्णाः श्रेणी भवेद्वर्णकृता तदेयम्॥

Colophon. इति श्रीभीष्ममिश्रविरचिते वृत्तदर्पणे वर्णवृत्तनिदर्शनं नाम द्वितीयप्रकाशः। समाप्तश्चायं ग्रन्थः।

विषयः। (ग्रन्थेऽस्मिन् सोदाहरणच्छन्दोलक्षणकीर्त्तनं)। तत्र प्रथमप्रकाशे मादिगणनिरूपणं। गणदेवताकथनं। मित्रामित्रनिरूपणं। आर्य्यावृत्तं। गीतिः। उपगीतिः। गाथिनी। सिंहिनी। स्कन्धकं। दोहा। ललितं। रोला। चौपैया। घत्ता। वृत्तावृत्तं। नवपदं। पज्झटिका। अनिला। पादाकुलकं। षट्पदं। पद्मावती। कुण्डलिका। रोला। गगनाङ्गनं। द्विपदं। खञ्जकं। उणियाला। सोरट्ठा। मधुभारं। हाकलिका। वरवृत्तं। आभीरकं। दुर्म्मिलिका। रुचिरा। दीपकं। सिंहावलोकितं। प्लवङ्गमः। लीलावती। हरिगीतं। त्रिभङ्गी। हीरकं। जनहरणं। मदनहरा। मरहट्टावृत्तञ्च। एतानि सर्व्वाणि मात्रावृत्तानि।

द्वितीये प्रकाशे,—वर्णवृत्तकथनं। तत्र श्रीः। कामः। मधु। मही। चारु। ताली। प्रिया। शशी। मृगेन्द्रः। मन्दरः। कमलं। कीर्णा। धारि। नगाणिका। हारी। हंसः। यमकं। शेषा। तिलका। विजोहा। चतुरङ्गा। मन्थानं। शङ्खधारी। सुमालतिका। मदनकं। समानिका। मवासकं। करहञ्चि। शीर्षा। विद्युन्माला। मल्लिका। प्रमाणिका। तुरङ्गा। कमलं। माणवकक्रीडं। अनुष्टुप्। महालक्ष्मीः। सारङ्गिका। पाथित्ता। कमलकं। बिम्बं। तोमरः। रूपामाली। सङ्गतिका। चम्पकमाला। सारवती। सुखमा। अमृतलता। बन्धुः। सुमखी। दोधकं। शालिनी।

मदनकं। सैनिका। मालती। इन्द्रवज्रा। उपेन्द्रवज्रा। उपजाति। रथोद्धता। स्वागता। भुजङ्ग प्रयातं। लक्ष्मीधरः। तोटकं। सारङ्गं। मौक्तिकदाम। मोदकवृत्तं। मालिनी। तरलनयनी। सुन्दरी। प्रमिताक्षरा। विद्याधारः। मालावृत्तं। तारकं। स्कन्धवृत्तं। पुष्पिताग्रा। वसन्ततिलका। चक्रं। सारङ्गी। चामरः। मालिनी। भ्रमरावलिका। मनोहंसः। सरभः। निशिपालः। नाराचं। नीलवृत्तं। चञ्चला। ब्रह्म। पृथ्वी। मालाधरः। शिखरिणी। मन्दाक्रान्ता। हरिणी। मञ्जीरा। चर्चरी। क्रीडाचन्द्रः। शार्दूलविक्रीडितं। नवचन्द्रः। धवलं। शम्भुः। गीतिका। गण्डकी। स्रग्धरा। राजसुखकरः। राजभवः। रमनी। स्फीताहंसी। सुन्दरिका। दुर्म्मिलिका। किरीटं। चीरमुकुटं। मन्थानयोग्यं। देवशरणम्। शनूरवृत्तञ्च। प्रस्तारसूत्रकरणं। प्रस्तारप्रकारकीर्त्तनं। तत्र मात्राप्रस्तारः। वर्णप्रस्तारः। मात्रोद्दिष्टकथनं। वर्णोद्दिष्टकथनं। मात्रानष्टं। वर्णनष्टं। मात्रामेरुकथनं। वर्णमेरुकथनं। मात्रापताका। वर्णपताका। मात्रामर्कटी। वर्णमर्कटी। मात्राश्रेणीकथनञ्च।

No. 2029 व्रताचारः। Substance, country-made paper. 11 × 4 inches, Folia, 155. Lines, 9 on a page. Extent, 3,638 ślokas. Character, Maithilí. Date, ? Place of deposit, Rághavapura, Post Vaherá, Darbháṅgá, Paṇḍit Viśveśvara Jhá. Appearance, new. Prose and verse. Generally correct.

Vratáchára. Disquisition and rules regarding the optional fasts called Vratas. By Ratnapáṇi S'armá, son of Gáṅgolí Sañjíveśvara S'armá. Several works of this author have been noticed under Nos. 2016 to 2020, 2022, 2023, and 2032.

Beginning. सुरादीनामन्तःकरणसरमां मण्डनकरं
परं स्विष्टस्थानप्रलयबलधामक्षमनमः।
इखण्डं ब्रह्माण्डं विलसति यदन्तर्गतमहो
सदालम्बे लम्बोदर तव पदाम्भोजयुगलम्॥
कर्त्री कान्त्या कला मा कलिकलुषहरी + + कन्या कृतार्था
कालाङ्गी कालरात्रिः कलितकलरवा कामदा कञ्जनेत्रा
कल्पद्रुः कोमलाङ्गी कमलकुलकरीकन्दलाभाकुचाग्रा
काली काली कराली कलयतु कुशलं कालिका कालिका मे॥
खण्डवलान्वयजन्मा मिथिलेशो भूक्षवसिंहनामा।
हरिहरविलसितचरितो मित्रो महसा महोदारः॥
तदौरसो दानिषु कर्णजेता यो रुद्रसिंहोऽभवदुग्रचेताः।
धर्मावतारो धृतनीतिभारो वेदान्तसिद्धान्तगृहीतसारः॥
तत्पुत्रो नृपतिलकः श्रीमान् महेश्वरसिंह उदितकलः।

विलसति यस्य चरित्रं स्वल्पे वयसि यथा हरितः ॥
आज्ञां तस्य निधाय सज्जनवतः प्रोद्यद्व्रताचारकम्
श्रीदत्तप्रभृतिप्रयासबलितग्रन्थौघभूषेदितम् ।
विद्वद्वृन्दकृपाकलापशरणः श्रीरत्नपाणिः कृती
कुर्व्वेऽहं गुरुमङ्गलं बुधमुदे जीवेश्वरस्यात्मजः ॥
प्रामाण्यहेतोश्च मया व्यलेखि महाजनानां रचितानुपूर्व्वी ।
बहुस्थलेष्वत्र ततोऽभिमानं ग्रन्थो ममैवेति न सङ्कुहोऽयं ॥
मालसा ये च विद्वांसो धर्म्मशास्त्रावलोकने ।
पश्यन्तु ते महात्मानो व्रताचारममत्सराः ॥
उक्तस्यैवार्थस्य कथा मतभेदव्यवस्थिता ।
पौनरुक्त्यं ततो नेह दृढसंस्कारकारिका ॥

अथादौ व्रतसमयविचारः। ज्योतिर्निबन्धे—इत्यादि ।

End. तद्दिने तिलैरुद्वर्त्तनं तिलभक्षणञ्च कार्य्यमिति।

Colophon. इति गाङ्गोलीयश्रीजीवेश्वरशर्म्मसूनुश्रीरत्नपाणिशर्म्मसङ्गृहीतो व्रताचारः। समाप्तः ।

विषयः। व्रतकालनिरूपणं। तत्र समयशुद्धिविवेचनं। व्रतसामान्यधर्म्मकथनं। व्रताधिकारिकथनं। व्रतिनो नियमादिकथनं। अत्र विविधमतकथनं। सङ्कल्पवाक्यविवेचनं। व्रतभङ्गव्यवस्थाकथनं। प्रतिनिधिविधिः। नक्तव्रतनिरूपणं। हविष्यनिरूपणं। नक्तव्रतेतिकर्त्तव्यता। नित्योपवासादिनिरूपणं। देवपूजाविधिः। मासादिविवेचनं। तिथिद्वैधादिविवेचनं। पूर्व्वाङ्गादिविवेचनं। प्रतिपदादिषु सर्व्वासु तिथिषु व्रतकथनं। तत्र विशेषेण महालक्ष्मीव्रतकथनं। महाष्टमीव्रतं भीष्माष्टमीव्रतं। भीष्मतर्पणविवेचनं। अशोकाष्टमीव्रतं। जन्माष्टमीव्रतं। दुर्व्वाऽष्टमीव्रतकथनञ्च। श्रीरामनवमीव्रतं। एकादशीव्रतनिरूपणं। तत्र विविधमतकथनं। व्यवस्थाकथनञ्च। पारणविवेचनं। श्रवणद्वादश्यादिनिरूपणं। हरिवासरव्रतनिरूपणं। महावारुण्यादिनिरूपणं। गङ्गास्नानसमयादिनिरूपणं। महानिशानिरूपणं। रागस्नानादिनिरूपणं। गजच्छायाविवेचनं। पार्व्वणादिविधिः। अनन्तव्रतविधिः। रटन्तीचतुर्द्दशीविधिः। शिवरात्रिविधिः। कोजागरादिपूर्णिमाविधिः। करतोयास्नानविधिः। क्षयाहतिथ्यादिविवेचनं। एकोद्दिष्टादिश्राद्धलक्षणं। आमश्राद्धादिविधिः। अशौचेऽप्येकभक्तादिव्रतविधानं। व्रणाशौचकर्त्तव्यता। मलमासविवेचनादिकं। श्राद्धे पश्वालम्भनविधिकथनं सामान्यतः श्राद्धकालादिनिरूपणं। व्रीहिश्राद्धादिविधिः। नवान्नविधिः। अत्र विविधमतकथनं। प्रत्येकं चैत्रादिद्वादशमासकृत्यनिरूपणं विधानञ्च। अत्र दशहराविधिः। हरिशयनविधिः। चातुर्म्मास्यविधिः। नागपञ्चमीविधिः। उपाकर्म्मादिविधिकीर्त्तनञ्च। विविधदानविधिकथनं देवपूजादिविधिकीर्त्तनञ्च। अत्र मन्त्रैत्र प्रयोगकथनमितिज्ञेयम् ।

No. 2030. तत्त्वामृतसारोद्धारे व्यवहारकोषः । Substance, country-made paper, 12 × 3½ inches. Folia, 79. Lines, 11 on a page. Extent, 2,698 ślokas. Character, Maithilí. Date, ? Place of deposit, Rághavapura, Post Vaherá, Darbhángá, Paṇdit Viśveśvara Jhá. Appearance, new. Prose and verse. Generally correct.

Tattvámṛita-sároddhára. An elaborate Smṛiti digest. The text contains only that portion of the work which is devoted to Judicature and Civil and Criminal law. It is called *Vyavahárakosha.* By Vardhamána Mis'ra.

Beginning. सारोद्धारे यथोद्देशमाचारश्राद्धशुद्धयः ।

उदाहृता अथेदानीं व्यवहारोऽभिधीयते ॥

तत्र मनुः । ब्राह्मं प्राप्ते च संस्कारं क्षत्रियेण यथाविधि ।

सर्व्वस्यास्य यथान्यायं कर्त्तव्यं परिरक्षणं ।

ब्राह्मं ब्रह्मणेन कृतमभिषेकलक्षणं क्षत्रियेणेति भूपतिमात्रोपलक्षणं । इत्यादि ।

End. अस्माभिर्द्दण्डविवेके स्तेयप्रकरणे प्रपञ्चितमतो न वितन्यते ॥ इति व्यवहाराङ्गलौ विवादपदकोषः ।

Colophon. इति श्रीवर्द्धमानकृतौ तत्त्वामृतसारोद्धारे चतुर्थो व्यवहारकोषः ॥

इत्थं धर्म्मामृतादिभ्यश्चतुर्भ्यस्तत्त्वमुद्धृतम् ।

धात्रा चतुर्भ्यो वेदेभ्योऽनाद्यवेदो यथोद्धृतः ॥

+ + + + + कृतीनामेव भागैश्चतुर्भि-

स्तदपि पृथगमीभ्यो भामतेऽसौ निबन्धः ।

स्फुरति हि कुसुमानां केशवे योजितानां

सुघटितसमुदायद्योतितान्येव लक्ष्मीः ॥

दैनन्दिनमाचारं श्राद्धं शुद्धिं विवादपदं ।

प्रायः प्रत्यक्षमेतत् प्राज्ञो जिज्ञासते सर्व्वः ॥

तस्माच्चतुर्भिरेभिः कुसुमैरिव गुम्फितो गुणोपचितैः ।

मालेवैष निबन्धो रामपतेः कण्ठभूषणं भवतु ॥

बहुज्ञैः शोध्यतां सोऽयमल्पज्ञैरुपजीव्यताम् ।

दुर्ज्जनैर्दुष्यतां कामं सज्जनैरनुगृह्यताम् ॥

नासूयति गुणगन्धान् नोद्विजते दोषसम्बन्धात् ।

अविदितगुणदोषोऽपि परकृतिरित्येव दुर्ज्जनो ज्वलति ॥

इति वर्द्धमानकृतौ तत्त्वामृतसारोद्धारः समाप्तः ।

विषयः। राज्ञा प्रजाभ्यः करग्रहणविधिः। प्रजारक्षणविधिः। व्यवहारदर्शनविधिः। दूताय भृतिदानविधिः। प्राड्विवाकनिरूपणं। सभ्योपदेशकथनं। दण्डविधिकीर्त्तनं। अदण्ड्यदण्डने दोषनिरूपणं। दण्डभेदकथनं। क्वचित् क्षमाविधिनिरूपणं। दण्डव्यवस्थाकथनं। महापातकदण्डकथनं। दण्डापकर्षकथनं। दण्डसाम्यविधिः। दण्डपरिनिष्ठाकथनं। दण्डकारनियमकथनं। दण्डसमुच्चयनिर्णयः। एकत्र दण्डे दण्डान्तरसङ्कलनं। चतुष्पाद्व्यवहारनिर्णयः। अप्राप्तव्यवहारनिरूपणं। भाषालेखनविधिकथनं। पाण्डुलेखादिविधानं। उत्तरविधिनिरूपणं। उत्तराभासादिनिरूपणं। साक्षिनिरूपणं। क्रियानिरूपणं। शपथविधिः। द्वादशविधसाक्षिकीर्त्तनं। त्रिविधलेख्यनिरूपणं। पुनर्लौकिकलेख्यस्य सप्तविधत्वकथनं। भागपत्रादीनां लक्षणकथनं। त्रिविधानुमानप्रमाणनिरूपणं। आगमप्रमाणनिरूपणं। भोगनिरूपणं। प्रत्ययनिरूपणं। दण्डपारुष्यकारिनिरूपणं। ग्राह्यक्रियानिरूपणं। उत्तरभेदेन क्रियाव्यवस्थाकथनं। चतुर्व्विधनिर्णयनिरूपणं। व्यवहारलक्षणतद्भेदकथनं। निर्णयेषु बलाबलनिरूपणं। निर्णीतकृत्यनिरूपणं। तत्र मिथ्याभियोगादौ दण्डकथनञ्च। पुनर्न्यायविधिः। अष्टादशव्यवहारपदनिरूपणं। तत्र ऋणादानविधिः। भोगलाभनिरूपणं। वृद्ध्यादिनिरूपणं। ऋणशोधनप्रकारकथनं। निक्षेपविधिः। अस्वामिविक्रयविधिः। सम्भूयसमुत्थानविधिः। दत्तस्यानपाकर्म्मनिरूपणं। तत्र देयनिरूपणं। तस्य सप्तविधत्वकथनादिकं। अष्टविधदत्तस्वरूपकीर्त्तनं। अदत्तनिर्णयः। उत्कोचग्रहणादिदण्डकथनं। भृतिविधिकथनं। तत्र अधिकर्म्मादिनिरूपणं। दासानधिकारकथनं। दासमोचनविधिः। तत्प्रकारादिकथनञ्च। दासीनिरूपणादिकं। वेतनस्यानपाकर्म्मनिरूपणं। पण्यस्त्रीविधिः। स्वामिपालविवादनिरूपणं। सम्विद्व्यतिक्रमनिरूपणं। क्रयविक्रयानुशयः। सीमाविवादः। वाक्पारुष्यविधिः। दण्डपारुष्यविधिः। स्तेयविधिकथनं। तत्र द्विपदापहारदण्डकथनं। चतुष्पादापहारादौ दण्डः। धान्याद्यपहारे दण्डकथनञ्च। सामान्यापहारदण्डः। साहसदण्डकथनं। तत्र प्रेरकादिदण्डकथनञ्च। स्त्रीसङ्ग्रहणदण्डकथनं। तत्र गोपनादिकृते विशेषकथनं। कन्यादूषणदण्डकथनं। अस्वाभाविकदण्डकथनं। स्त्रीपुंधर्म्मनिरूपणं। दायभागनिरूपणं। तत्र संसृष्टिविभागः। अवलुप्तविभागः। विभक्तागतविभागः। विभक्तजविभागः। अपुत्रादिधनविभागः। वानप्रस्थादीनां धनाधिकारिनिरूपणं। स्त्रीधनाधिकारिणः। विभागनिर्णयः। विभक्तकृत्यनिरूपणञ्च। द्यूतसमाह्वयविधिः। तत्र दण्डादिनिरूपणञ्च।

No. 2031. धर्म्मकोषः। Substance, country-made paper, 9 × 3 inches. Folia, 50. Lines, 9 on a page. Extent, 1,212 ślokas. Character, Maithilí. Date, ? Place of deposit, Vehat, Post Mádhepura, Darbhángá, Pandit Phaṇidhara Miśra. Appearance, old. Prose and verse. Correct.

Dharma-kosha. A digest of the laws relating to civil actions, debts, interest, gifts, rules regarding servants, artizans, dancers &c., sale

and barter, wages, boundaries, and inheritance. By Trilochana Miśra, Mahámahopádhyáya.

Beginning. मीमांसादुग्धजीवी तु मिश्रः श्रीमान् त्रिलोचनः ।
विवादपदवाक्यानां व्यवस्थामकरोत् स्फुटाम् ॥
अथर्णादानं । तत्र नारदः ।
ऋणं देयमदेयं वा येन यत्र यथा च यत् ।
दानग्रहणधर्म्माश्च ऋणादानमिति स्मृतम् । इत्यादि ।

End. अतोऽन्यथा निर्व्वीजेषु इतरानियमात् । अन्यथा यत्र न तथा प्र+भिजायते तद्विभज्य ग्राह्यमित्यर्थः ।

Colophon. इति महामहोपाध्यायमिश्रत्रिलोचनव्यवस्थापितधर्म्मकोषपुस्तकं समाप्तम् ।

विषयः । ऋणादानादिविधिः । निक्षेपविधिः । तत्र सन्दिग्धलक्षणादिकथनं । वृद्धिनियमादिकथनं । पुत्रदेयादेयनिरूपणं । तत्र पितृऋणदाने समयादिकथनं । स्त्रीणां देयादेयनिरूपणं । आधिविधिकथनं । उद्ग्रहणविधिकथनं । निक्षेपप्रकारकथनं । अस्वामिविक्रयविधिः । सम्भूयसमुत्थानविधिकथनं । तत्र शिल्पिनर्त्तकानां विशेषकथनं । भृत्यविधिकथनं । वेतनस्यानपाक्रियानिर्णयः । स्वामिपालविधिः । संविद्व्यतिक्रमविधिः । विक्रीयासम्प्रदानविधिः । क्रीत्वानुशयविधिः । सीमाविवादनिरूपणं । शस्यरक्षादिविधिः । दण्डपारुष्यविधिः । दायभागविधिकथनं । तत्र स्त्रीधनादिविभागकथनं । वर्णसमवायविभागकथनं । अपुत्रधनाधिकारिनिरूपणं । संसृष्टधनविभागकथनञ्च ।

No. 2032. महादानवाक्यावली । Substance, country-made paper, 11 × 5 inches. Folia, 108. Lines, 7 on a page. Extent, 2,246 Ślokas. Character, Maithilí. Date, ? Place of deposit, Vehaṭ, Post Mádhepura, Darbháṅgá, Paṇḍit Phaṇidhara Miśra. Appearance, fresh. Prose and verse. Correct.

Mahádána-vákyávalí. A summary of the rules regarding various kinds of religious and quasi-religious gifts. By Ratnapáṇi S'armá, son of Gáṅgolí Sañjíves'vara S'armá.

Beginning. श्रीलक्ष्मीदरपत्पयोजयुगलं विघ्नौघविध्वंसनं
ध्यात्वा मानसमानसे भवभवस्थित्यन्तमन्तानकृत् ।
प्रोद्यत्पद्धतिदानपद्धतिरियं सङ्गृह्य लेलिख्यते
जीवेशात्मजरत्नपाणिकृतिना विद्वद्वराह्लादिका ॥
इतिहाससमुच्चये,—

तपः कृते प्रशंसन्ति त्रेतायां ज्ञानमेव च।

द्वापरे यज्ञमेवाहुर्द्दानमेकं कलौ युगे ॥ इत्यादि।

End. ऐहलौकिकमहायशोलाभतदुत्तरसुखवल्लोकप्राप्तिकाम इदमात्मेहतमधनं विष्णुदैवतमित्यादि दक्षिणान्तम्।

Colophon. इति गाङ्गोलीश्रीमज्जीवेश्वरसूनुश्रीरत्नपाणिशर्म्मसङ्गृहीता महादानवाक्यावली परिपूर्णा।

विषयः। दानप्रशंसा। दानस्वरूपकथनं। तत्कालनिरूपणं। धर्म्मलक्षणादिकीर्त्तनं। पुण्यदेशकथनं। द्रव्यदैवतनिरूपणं। अतः सर्व्वत्र दानेषु प्रयोगकथनं। तत्र नानापुराणोक्तस्वर्णदानविधिकथनं। हिरण्यकृष्णदानविधिः। पुराणाद्युक्तरजतदानविधिः। अलङ्करणदानविधिः। हैमरौप्यपात्रादिदानविधिः। ताम्रभाजनादिदानविधिः। सतैलमधुतैजसपात्रदानविधिः। जलपात्रादिदानविधिः। पुराणाद्युक्तजलदानविधिः। मणिहीरकादिरत्नदानविधिः। विविधगृहदानविधिः। नगरग्रामादिदानविधिः। पुराणाद्युक्तगोदानविधिः। तत्र वर्णविशेषेण फलविशेषकथनञ्च। महिषीदानविधिः। अश्वादिदानविधिः। छागहरिणादिदानविधिः। गुड़धेनुतिलधेन्वादिदानविधिः। लवणादिदानविधिः। कृष्णाजिनादिदानविधिः। पूर्णहेमपद्मघटदानविधिः। नानापुराणोक्तभूमिदानविधिः। उद्यानादिदानविधिः। विविधशस्यदानविधिः। विविधान्नदानविधिः। शक्तुदानविधिः। दधिगुड़-शर्कारादिदानविधिः। पानककर्पूरादिदानविधिः। चन्दनमृगनाभिकुङ्कुमादिदानविधिः। धूपदीपादिदानविधिः। सुगन्धिद्रव्यदानविधिः। विविधशाकफलादिदानविधिः। शय्यासनपीठादिदानविधिः। पादुकाच्छत्रादिदानविधिः। दास्यादिदानविधिः। शालग्रामशिलादिदानविधिः। सीसलौहादिधातुदानविधिः। पुस्तकदानविधिः। विविधवस्त्रदानविधिः। द्वादशमासकर्त्तव्यदानविधिकथनं। सर्व्वत्र संक्रान्तिषु दानविधिः। कम्बलादिदानविधिकीर्त्तनञ्च।

No. 2033. तिथिनिर्णयः। Substance, country-made yellow paper, 11 × 3 inches. Folia, 24. Lines, 6 on a page. Extent, 278 ślokas. Character, Maithilí. Date, ? Place of deposit, Vehaṭ, Post Mádhepura, Darbhángá, Paṇḍit Phaṇidhara Jhá. Appearance, new. Prose and verse. Generally correct.

Tithi-nirṇaya. On lunar days and the religious duties appertaining thereto—a brief calendar of feasts and fasts. By Sudarsana.

Beginning. नत्वा सीतापतिं रामं सच्चिदानन्दरूपकं।

बालानां बोधसिद्ध्यर्थं क्रियते तिथिनिर्णयः॥

अथ विशेषतिथीनां निर्णयो लिख्यते। चैत्रशुक्लप्रतिपदि वर्षारम्भः। सोदयव्यापिनी ग्राह्या। तत्र ब्रह्मपुराणवचनं। चैत्रे मासि जगद्ब्रह्मा ससर्ज प्रथमेऽहनि। इत्यादि।

End. कर्कः संक्रान्तिः प्रातःकाले अर्द्धरात्रे वा स्यात् तदा पुण्यकालः पूर्व्वदिने भवति इति संक्रान्तिनिर्णयः।

Colophon. इति सुदर्शनकृतौ तिथिनिर्णयः समाप्तः।

विषयः। वत्सरारम्भतिथिनिरूपणं। अत्र तैलाभ्यङ्गाकरणे दोषकीर्त्तनं। श्रीरामनवमीनिरूपणं। वारुणीनिरूपणं। अक्षयतृतीयानिरूपणं। नृसिंहचतुर्द्दशीकथनं। दशहराकथनं। हरिशयनकथनं। नागपञ्चमीकथनं। उपाकर्म्मकथनं। जन्माष्टमीनिर्णयः। हरितालिकानिरूपणं। अनन्तचतुर्द्दशीकथनं। आश्विनकृष्णपक्षे षोड़शश्राद्धविधिकथनं। नवरात्रविधिः। विजयदशमीनिर्णयः। दीपान्विताकथनं। भ्रातृद्वितीयाकथनं। अर्द्धोदययोगनिरूपणं। वरदाचतुर्थीकथनं। श्रीपञ्चमीकथनं। माघसप्तमीविधिः। भीष्माष्टमी। भीमद्वादशी। शिवरात्रिः। होलिकाविधिः। इति विशेषतिथिनिरूपणानन्तरं सामान्यतः प्रतिपदादिपञ्चदशतिथिनिरूपणं। संक्रान्तिपुण्यकालविवेचनञ्च। इति।

No. 2034 हयशीर्षपञ्चरात्रं। Substance, country-made yellow paper, 17 × 4 inches. Folia, 121. Lines, 6 on a page. Extent, 3,514 ślokas. Character, Bengali. Date, ? Place of deposit, Subhaṅkarapura, Post Vaherá, Darbháṅgá, Paṇḍit, S'rínátha Jhá. Another copy at Calcutta, Government of India. Appearance, new. Prose. Generally correct.

Hayaśírsha-pañcharátra. A Vaishṇavite work on building temples and on carving and consecration of images. It belongs to the class called *Pañcharátra,* and bears close resemblance to the Tantras. Like the original Tantras, this class of works does not acknowledge the names of their authors, but represent themselves to be reports of dialogues between gods and renowned personages. In the Hayaśírsha the sage Márkaṇḍa asks questions, and his brother sage Bhṛigu answers them. The work opens with the query, why did Vishṇu appear in the form of Hayas'írsha or equine-headed? The first 18 chapters are numbered, and then follow a great many others without any numbering. Contents: Origin of Brahmá from the navel of Vishṇu. Origin of the Vedas and their study by Brahmá. The perspiration resulting from the study produced the demons Madhu and Kaiṭabha, who robbed the Vedas. Hayas'írsha born to rescue the Vedas. Twenty-five original Tantras of former ages, and the *Hayaśírsha-pañcharátra* was first thereof. Other Pañcharátras, such as

Trailokyamohana, Vaibhava, Paushkara, Nárada, Práhláda, Gárgeya, Gálava, S'ríprasna, S'ásya &c. Characteristics of teachers. Ditto of spiritual guides. Heretic doctrines of Jaimini, Sugata, Chárváka, Nagna, Kapila, Akshapáda, and other sects. Placing of images in temples. Examination of earth for building. Different kinds of earth. Measures of length &c. Setting up of Gnomons for ascertaining of quarters. Division of areas. Rules for sacrifices before commencing a building. Removing of bones from the ground selected for building. Bricks. Stones. The Yajna of Pátála. Characters of temples for particular gods. Selection of stones for sculpture. Particular mountains yielding statuary stones. Auspicious conjunctions for beginning the carving of images. Rites to be performed on such occasions. Measures of images. Pacification of the regents of the quarters. Characteristics of images of Lakshmí, Garuḍa, Kes'ava, the ten incarnations, groups of Kesava and others, Vis'varúpa, the nine planets, the Mátris, Indra and other Lokapálas, the eleven Rudras, the Androgynous Ardhanárí, Gaurí, lingams. Rules regarding the consecration of images of various gods and goddesses. Ditto of books, houses, tanks, wells, public halls &c. Repairs of images. Rejoicings on such occasions. Marriage of S'rí and Vishṇu, and Gaurī and S'iva.

Beginning. मार्कण्डेय उवाच। कथं हयशिरा विष्णुः प्रादुर्भूतः पुरा विभुः।
किं निमित्तञ्च देवेशो दधार रुचिरं वपुः॥
हयशीर्षं जगत्स्वामी पुरा नारायणः प्रभुः।
श्रुतमासीच्च भवता यदुक्तं परमेष्ठिना॥
आद्यं यत् पञ्चरात्राणां तन्ममाचक्ष्व पूर्व्वतः।
भृगुरुवाच। शृणु वत्स प्रवक्ष्यामि पञ्चरात्रं पुरातनम्॥ इत्यादि।

End. कुम्भकारमृदा कृत्वा शक्राणीं पूर्व्ववद्यजेत्।
सूर्पेण प्रमदास्तद्वद्वलिं दद्युर्यथाविधि॥
सीमानकं यावकञ्च दद्यादिन्द्राणीतुष्टये॥

Colophon. इति (हयशीर्षपञ्चरात्रे) गौरीविवाहपटलं॥ समाप्तोऽयं ग्रन्थः।

विषयः। १प्रथमे पटले,—भृगुणा सह मार्कण्डेयस्य संवादकथनेन नारायणस्य नाभिपद्माद् ब्रह्मण उत्पत्तिकथनं। वेदानामाविर्भावकथनं। वेदाभ्यामरतस्य ब्रह्मणः स्वेदविन्दुतः मधुकैटभयोरुत्पत्तिकथनं। ताभ्यां वेदहरणकथनं। हयशीर्षस्याविर्भावकथनञ्च।

२—४पटले,—पूर्व्वपूर्व्वकल्पोक्तपञ्चविंशतितन्त्राणां नामकथनं। तत्र हयशीर्षपञ्चरात्रस्य प्राथम्यकथनं। एवं क्रमेण त्रैलोक्यमोहन-वैभव-पौष्कर-नारद-प्राह्लाद-गार्ग्य-गालव-श्रीप्रश्न-शास्यादिपञ्चरात्राणामुद्देशकीर्त्तनं। आचार्य्यलक्षणं। गुरुलक्षणादिकथनञ्च।

५—८पटले —जैमिनि-सुगत-चार्व्वाक-नग्न-कपिलाक्षपादानां हेतुवादिनां मतानुसारेण वर्त्तमानानां नराधमत्वादिकथनं। देवतास्थापनदिङ्नियमादिकथनं। भूमिपरीक्षाविधिकथनं। भूमेश्चातुर्व्विध्यनिरूपणं। तत्र सुपद्मा, भद्रिका पूर्णा, धूम्रा चेति। ब्राह्मणादिवर्णभेदेन मृत्तिकावर्णानां शुभाशुभनिरूपणं। मानपरिभाषाकीर्त्तनं। शङ्कुलक्षणादिकथनं। वास्तुनिरूपणप्रसङ्गेन क्षेत्रव्यवहारकथनं।

९—१४पटले,—भूतादिबलिदानविधिः। शल्योद्धारकथनं। इष्टकादिलक्षणं। तन्न्यासविधिकथनञ्च। शिलाधिवासविधिः। पातालयागविधिकथनं। प्रासादलक्षणं। तन्न्यासविधिकथनञ्च। पञ्चायतनादिप्रासादविशेषे वासुदेववामनादिमूर्त्तिस्थापनादिकथनं।

१५—२८पटले,—प्रतिमाघटनार्थं शिलादिलक्षणकथनं। प्रस्तरग्रहणार्थं पर्व्वतविशेषनिरूपणं। प्रतिमानिर्म्माणे तिथिनक्षत्रादिनिरूपणं। यागविधानञ्च। घटनाविधिकथनं। तत्र परिमाणादिकथनञ्च। दिक्शान्तिकथनं। प्रतिमालक्षणकथनञ्च।

(अतः परं पटलसंख्यानास्तीति ज्ञेयं। पिण्डिकालक्षणकथनं। लक्ष्मीलक्षणं। गरुड़लक्षणं। केशवादिप्रतिमालक्षणं। दशावतारप्रतिमालक्षणं। वासुदेव-सङ्कर्षण-प्रद्युम्नादिनवव्यूहप्रतिमालक्षणं। विश्वरूपादिप्रतिमालक्षणं। नवग्रहप्रतिमालक्षणं। मातॄणां प्रतिमालक्षणं। इन्द्रादिलोकपालप्रतिमालक्षणं। एकादशरुद्रप्रतिमालक्षणं। अर्द्धनारीश्वरलक्षणञ्च।

गौरीप्रतिमालक्षणं। शिवलिङ्गलक्षणं। सामान्यतः पिण्डिकालक्षणं। प्रतिष्ठाकालनिरूपणं। दिक्पालपूजाविधिः। कलसाधिवासविधिः। भगवत्प्रतिष्ठायां स्नपनादिविधिः। अधिवासनविधिः। रत्नन्यासविधिः। प्रतिष्ठाविधिकीर्त्तनञ्च।

अवभृतस्नानविधिः। बलिदानविधिः। द्वारप्रतिष्ठाविधिः। हनुप्रतिष्ठाविधिः। ध्वजारोपणविधिः। लक्ष्मीप्रतिष्ठाविधिः। गरुड़स्थापनविधिः। चक्रस्थापनविधिः। शेषप्रतिष्ठाविधिः। चतुर्म्मुखस्थापनविधिः। नृसिंहप्रतिष्ठाविधिः। वराहप्रतिष्ठाविधिः। पुरुषोत्तमप्रतिष्ठाविधिः। वामनप्रतिष्ठाविधिकथनञ्च।

वैकुण्ठप्रतिष्ठाविधिः। हयशीर्षप्रतिष्ठाविधिः। अनिरुद्धप्रतिष्ठाविधिः। जलशायिप्रतिष्ठाविधिः। मत्स्यादिदशावतारस्थापनविधिः। अनन्तप्रतिष्ठाविधिः। विश्वरूपप्रतिष्ठाविधिः। शिवलिङ्गप्रतिष्ठाविधिः। रुद्रमूर्त्तिप्रतिष्ठाविधिः। अर्द्धनारीश्वरप्रतिष्ठाविधिः। हरिहरप्रतिष्ठाविधिः मातॄणां प्रतिष्ठाविधिः। भैरवप्रतिष्ठाविधिकथनञ्च।

सूर्य्यप्रतिष्ठाविधिः गणेशप्रतिष्ठाविधिः। गौरीप्रतिष्ठाविधिः। नवग्रहप्रतिष्ठाविधिः। चलविष्णुमूर्त्तिप्रतिष्ठाविधिः। चलशिवलिङ्गप्रतिष्ठाविधिः। चित्रार्चादिप्रतिष्ठाविधिः। पुस्तकप्रतिष्ठादिविधिः। कूप-वापी-तड़ागादिप्रतिष्ठाविधिः। सभाप्रतिष्ठाविधिः। सामान्यतः सर्व्वदेवादिप्रतिष्ठाकथनं। जीर्णोद्धारविधिकथनं। महोत्सवविधिकथनं। यज्ञावभृतविधिकथनं। श्रीविवाहविधिकथनं। गौरीविवाहविधिकीर्त्तनञ्च।

No. 2035. कुवलयाश्वीयं नाम नाटकम्। Substance, country-made paper, 12 × 4 inches. Folia, 85. Lines, 7 on a page. Extent, 2,219 ślokas. Character, Maithilí. Date, ? Place of deposit, Sáradápura, Ujána, Post Mádhepura. Darbhángá, Paṇḍit Harshanátha Jhá. Appearance, fresh. Prose and verse. Correct.

Kuvalayáśvíya. A drama. By Krishṇadatta. It is founded on a story of a Vedic student named Kuvalayáśva falling in love with a maiden named Madálasá. The maiden is carried away to the nether regions, whence she is rescued by a king of Káśí and restored to her lover.

Beginning. भाखप्रज्वलनाचिकेतवमतीविस्रेषवैश्वानर-
ज्वालावर्त्तितसैारसैन्धवपयःफेनैकलेखेव या।
सा गैारी मिलने पुनः पुररिपोः प्रेमप्रदीपे रसं
दातुं शुक्तिरूपाहितेव कलिता चान्द्री कला पातु वः॥
अपि च। श्रुत्वा दत्तादलीकं प्रियकलुषमतिव्यस्तया सद्य एव
त्यक्ते सत्या स्वदेहे प्रभुरपि न वधूं स्वीचकारापरां यः।
तामेव प्राप्य भूयो नगजननमितामर्द्धनारीश्वरोऽभूत्
स प्रेमाद्वैतवादी कलयतु भवतामृद्धिमर्द्धेन्दुमौलिः॥

नान्द्यन्ते सूत्रधारः। अलमतिविस्तरेण। पुरोऽवलोक्य। कथमयमुदित एव मधुमसमयहित-समुदितमदनमालवकामिनीकापालफलककोमलकमनीयमण्डलः कनककुण्डलमाखण्डस्दिगङ्ग-नाया अखण्डलावण्यरत्नाकरः अखिलजगदानन्दकन्दलश्चन्द्रस्तमेनमभ्युदीयमानमद्दमभ्यर्थये। स-प्रश्रयमञ्जलिं बद्धा भगवन्।

कलयसि सकलाः कलाः सुधानां निधिरसि मौलिमलङ्करोषि शम्भोः।
शमयसि जगतामतीव तापं तव तुलनास्तु कुतस्त + हिमांशो॥
— — — — — — — — सूत्रः। — — — — —
कृष्णदत्त इति मैथिलः कविर्बालभावसुलभात् कुतूहलात्।
नाटकं यदभिनव्यमातनोत् कोऽत्र सम्प्रति गुणागुणग्रहः॥
मदनुग्रहादेव सर्व्वं साधुसम्पत्स्यते। — — — — पारि।
किन्नाम कीदृशं तत्?। सूत्र। कुवलयाश्वीयं नाम नाटकं॥ इत्यादि।

End. तथापीदमस्तु। काले काले तड़िलानस्ततरसमर्थीं दृष्टिमिष्टां विधत्तां
पृथ्वी सम्पन्नशस्या भवतु, विजयिनः पान्तु लोकं नरेन्द्राः।
सर्व्वः सर्व्वत्र नन्दत्वखिलगुणगुरौ विन्दतु प्रेमभक्तिं

तद्विश्वेशे दयार्द्रे प्रसरतु परितः सत्कवेः सूक्तिरत्नम् ॥

भरद्वाजः । एवमस्तु । इति निष्क्रान्ताः सर्व्वे ।

Colophon. कुवलयाश्वसाम्राज्याभिषेकमहोदयो नाम सप्तमोऽङ्कः ॥ समाप्तञ्चेदं कुवलयाश्वीयं नाम नाटकम् ।

विषयः । प्रथमाङ्के, काशीराजप्रतीहारयोरभिनयेन प्रजानां सौख्यवर्णनं । अवान्तरे भरद्वाजस्य ऋषेरादेशज्ञापनार्थं सोमशर्म्मणः प्रावेशिकी ध्रुवा । तदन्तेवासिना शिष्येण कुवलयनामानमश्वमनुकर्षतानुगम्यमानस्यापरेण च दत्तहस्तावलम्बस्य महर्षेर्गालवस्य प्रवेशेन पातालवासिनः पातालकेतोस्तपोवनोपरोधसूचनं । अथ सुमित्रा कुवलयाश्वेति छात्रनामधेयः काशीराजकुमार ऋतध्वजः सादरमश्वमिममारुह्य तमनुससार ।

द्वितीयाङ्के,—समिदाहरणाय निवृत्तस्य पुण्यशीलस्य प्राभातिकतपोवनरमणीयतां वर्णयतो वातायनेन सह संलापेन विश्वावसोर्गन्धर्व्वराजस्यापहृत्य कुमारीनाम्ना मदालसा समानीता पातालपुरं पातालकेतुनेति सूचनं । कङ्कालककरालकयोः प्रवेशेन कुमारप्रभाववर्णनं, मध्याह्नवर्णनञ्च । अथ कङ्कालकेन वन्यजनकौषिकोशल्लप्रदर्शनव्याजेन तपोवनप्रान्तदेशं समानीतोऽसौ कुमारः सान्ध्यसौन्दर्य्यदर्शनसुखमनुभवन्नेव सूकररूपेण समुपस्थितं पातालकेतुमुद्दिश्य निष्क्रान्त इति ।

तृतीयाङ्के,—मन्दारिका-इन्दारिकयोः संवादेन मदालसायाः कान्त्यादिवर्णनं । मदालसायाः प्रतिज्ञातकलङ्कितुं पातालमुद्दिश्य प्रज्वलितायाः कुण्डलायाः कुवलयाश्वेन सह संलापकथनं । कुमारसौन्दर्य्यामृतं निपीय पूर्व्वमनुरक्तायाः मदालसाया वैचित्र्यवर्णनं । अथ गन्धर्व्वकुलगुरोस्तुम्बुरोः प्रवेशेन तयोः परिणयवर्णनञ्च ।

चतुर्थाङ्के,—पुण्यशीलस्य प्रावेशिकी ध्रुवा । अवान्तरे सपरिजनस्य काशीराजस्य कुमारकृतपातालकेतुविजयादिवृत्तान्तश्रवणमहोत्सवः । कुमारस्य यौवराज्याभिषेकवर्णनञ्च ।

पञ्चमाङ्के,—देवब्राह्मणकार्पटिकयोरभिनयेन प्रियासहायस्य युवराजस्य वन्दनार्थं विश्वेश्वरस्य मन्दिरप्रवेशसूचनं । अथ मित्रतामुपागतयोर्नागकुमारयोः सपर्य्यां विधाय नितरां परितुष्टस्य तस्य प्रियायै चित्रनैपुण्यप्रदर्शनार्थं चित्रशालिकाप्रवेशः । अवान्तरे मदालसाया उत्स्वप्नायितं । समनन्तरञ्च कञ्चुकिप्रवेशेन मुनिगणरक्षणविषये विधातव्यं क्षोणीपर्य्यटनं कुमारेणेति सूचना ।

षष्ठाङ्के,—पातालकेतुसहोदरस्य सहचरसहायस्य धूमकेतोर्मुनिवेशेन प्रवेशः । कालिन्दीपरिसरे परिभ्रमता युवराजेन सह कपटतापसस्य संवादः । अथ तापसच्छद्मना प्रविष्टस्य धूमकेतोः प्रमुखात् युवराजप्राणत्यागवार्त्तामुपलभ्य जीवनत्यागोद्यतायाः मदालसायाः भरद्वाजवाक्येन चन्द्रबिम्बप्रवेशकथनं ।

सप्तमाङ्के.—नागकुमारयोरभिनयेन प्रियाविरहविधुरस्य कुवलयाश्वस्य परिदेवनादिकीर्त्तनं। वटुवेशधारिभ्यां ताभ्यां सह तस्य नागलोकगमनसूचना। अथ विमनायिताय तस्मै नागराजस्य मायामदालसाप्रदर्शनं। नागराजप्रभावात् तस्य प्रकृतमदालसासम्मेलनं। अथ काशीमुद्दिश्य चलितस्य कुवलयाश्वस्य प्रियायै विविधजनपदप्रदर्शनं। तस्य राज्याभिषेकमहोत्सववर्णनञ्च।

No. 2036. व्यवहाररत्नाकरः। Substance, country-made paper, 14 × 5 inches. Folia, 107. Lines, 8 on a page. Extent, 2,736 ślokas. Character, Maithilí Date, ? Place of deposit, Navani, Post Mádhepura, Darbhángá, Pandit Vañsamani Jhá. Appearance, fresh. Prose and verse. Correct.

Vyavahára-ratnákara. A digest of the laws and rules regarding Judicature. By Chandeśvara Ṭhakkura, son of Viśveśvara Ṭhakkura. The author calls himself a minister (*Mantri*) and describes his father as a minister of war, but does not name the king whom they served.

Beginning. श्रीकृष्णाङ्घ्रिः सर्व्वं साधयतु।

साक्षान्निर्णयते विवादविषयं न्यायात्तृतीयेक्षणाद्-
यो वादार्थपथप्रवर्त्तनकृती धर्म्मेन्दुमुत्तंसयन्।
स श्रीमान् व्यवहारसङ्ग्रहममुं चण्डेश्वरो मन्त्रिणा-
मर्घ्यः कीर्त्तिसुरापगास्पदपरं प्रस्तौति रत्नाकरम्॥
यन्न्यायामृतसेचनात् सुफलतां पुष्णाति कल्पद्रुमः
सद्यः पल्लवमातनोति नितरां श्रीपारिजातोऽपि सः।
गोपालस्य च कामधेनुरसमं काम्यार्थदुग्धं स्वयं
सन्दुग्धे ध्रुवमेष कस्य भवने सेव्यो न रत्नाकरः॥
प्रथमं तावदेवोक्तं व्यवहारनिरूपणम्।
प्राड्विवाकमताः सभ्योपदेशाश्च ततः क्रमात्॥ इत्यादि।

End. विक्रयेण वशिलमिति तदनुमतिरूक्तरेण अन्यत्र दानविधानात्। विसर्गश्चैवेति नारदवाक्याच्च॥

Colophon. इति सप्रक्रियमहासन्धिविग्रहिकठक्कुरवीरेश्वरात्मजश्रीचण्डेश्वरविरचिते व्यवहाररत्नाकरे निर्णयादितरङ्गः।

निर्णायव्यवहारमागमदृशा यः प्राड्विवाकः स्फुरन्-
++++विचारचारुधिषणो धर्म्मं नयत्युन्नतिम्।

तेनायं गुरुसन्धिविग्रहधुरां धौरेयसन्नीतिना
श्रीचण्डेश्वरमन्त्रिणा विरचितः प्राज्ञेषु रत्नाकरः ॥
समाप्तोऽयं व्यवहाररत्नाकरः ।

विषयः । व्यवहारस्वरूपनिरूपणं । देशाचारादिप्रामाण्यनिरूपणं । प्राड्विवाकादिलक्षण-कथनं । चतुर्विधसभानिरूपणं । सभ्योपदेशकीर्त्तनं । विचारविधिकथनं । भाषाविधिकथनं । तत्र चतुर्विधपूर्व्वपक्षनिरूपणादिकं । उत्तरविधिकथनं । तत्र कालादिव्यवस्थापनं । उत्तरे विशेषकथनञ्च । प्रतिनिधिविधिकथनं । प्रत्याकलितनिरूपणं । सन्धिविधिकथनं । क्रियादाननिरूपणं । क्रिया निरूपणं । तत्र साक्ष्यादिस्वरूपकथनं । साक्षिणः । साक्षिप्रत्युद्धारविधिः । साक्षिदूषणविधिः साक्षिप्रश्नविधिः । तत्र शपथविधिकीर्त्तनञ्च । साक्षिपरीक्षाविधिः । साक्षिदण्डनिरूपणं । तत्र सत्यापवादनिरूपणं । साक्षिबलाबलनिरूपणं । साक्षिनिगदकथनं । लिखितनिरूपणं । तत्र लौकिकलेख्यस्य सप्तविधत्वनिरूपणं । राजशासनलेख्यस्य त्रिविधत्वकथनञ्च । शासनस्वरूपादिकथनं । दुष्टलेख्यनिरूपणं । लेख्यदौर्बल्यनिर्णयः । भुक्तिनिरूपणं । तत्र अनुपभोगेन अमिद्धिकथनं । विच्छिन्नभोगनिर्णयः । युक्तिकथनं । दिव्यनिरूपणं । द्रव्यसंख्यादितो दिव्यविशेषकथनं । तत्र घटाग्निजलादिपरीक्षाविधिकथनञ्च । समयवर्णादितो दिव्यविशेषकथनं । दिव्यदेशविध्यादिनिरूपणञ्च । धर्म्मजयविधिकथनं । शपथविधिः । अष्टविधनिर्णयः । निर्णयबलाबलनिरूपणं । निर्णीतक्षत्यनिरूपणं । जयप्रतिपत्तिकथनं । पुनर्न्यायविधिकथनं । कृतनिवृत्तिविधिकथनं । कृताकृतत्वनिरूपणञ्च ।

No 2037. विभागसारः । Substance, country-made paper, 13 × 4 inches. Folia, 40. Lines, 6 on a page. Extent, 585 slokas. Character, Maithilí. Date, ? Place of deposit, Naváni. Post Mádhepura, Darbhángá, Pandit Vaṅsamaṇi Jhá. Appearance, fresh. Prose and verse. Generally correct.

Vibhágasára. A summary of the Law of inheritence. By Vidyápati Mahámahopádhyáya. Contents: Inheritance defined, its nature. Partition of paternal property. Rules regarding partition. Unfitness for partition. Nature of partible property. Indivisible property. Woman's property—its partition. Partition of secreted property. Partition with reference to castes. Partition of partitioned property. Twelve kinds of sons and their shares. Heirs of childless people. Partition of joint property. Mode of partition.

Beginning. गङ्गा सेऽसौ समापि प्रा++ कथनचे वेत्स्यतीति प्रसिद्धः
किन्नाम्ना मेऽस्ति भोगः स तु भवतु तथा भेदभाजः प्रजानाम् ।

भिन्नोऽहं कोऽत्र साक्षी विधिरिति विधिना सस्मितं वीक्ष्यमाणौ
पायास्तां निर्व्विवादौ सपदि हरिहरौ व्यङ्गसत्रोत्तरान्नः ॥
राज्ञो भवेशाद्हरिसिंह आसीत्तत्सूनुना दर्पनरायणेन ।
राज्ञा नियुक्तोऽत्र विभागसारं विचार्य्य विद्यापतिरातनोति ॥

अथ विभागः। विभागोऽर्थस्य पित्र्यस्य पूर्वैर्यत्र प्रकल्प्यते ।
दायभाग इति प्रोक्तं तद्विवादपदं बुधैः ॥

पूर्वैरित्युपलक्षणं। पूर्व्वस्वामिसम्बन्धादेव निमित्ताद् यत्र स्वत्वं स दायः। इत्यादि।

End. स्वभागान् यदि दद्युस्ते विक्रीणीयुरथापि वा ।
कुर्य्युर्यथेष्टं तत्सर्व्वमीशास्ते स्वधनस्य वै ॥

Colophon. इति महामहोपाध्यायश्रीविद्यापतिविरचितो विभागसारः ।

विषयः। दायलक्षणकथनं। विभागस्वरूपकीर्त्तनं। तत्र स्वतपित्कविभागकथनं। विभागव्यवस्थाकथनं। भागानर्हनिरूपणं। विभाज्यस्वरूपादिनिरूपणं। अविभाज्यनिर्णयः। स्त्रीधनादिनिरूपणं। स्त्रीधनविभागकथनं। गुप्तधनविभागकथनं। वर्णसमवाये विभागकथनं। विभक्तजविभागकथनं। द्वादशविधपुत्रलक्षणकथनपूर्वकं तत्र विभागविधिकीर्त्तनं। अपुत्रधनाधिकारिनिरूपणं। संसृष्टधनविभागः। विभागनिरूपणञ्च ।

No. 2038 वृत्तदर्पणः। Substance, country-made paper, 14 × 3 inches. Folia, 40. Lines, 8 on a page. Extent, 1,200 ślokas. Character, Maithilí. Date, ? Place of deposit, Naváni, Post Mádhepura, Darbhángá, Paṇḍit Vaṅsamaṇi Jhá. Appearance, new. Verse and prose. Generally correct.

Vritta-darpaṇa. On the laws of versification and the different metres used in Sanskrit poetry. By Kavíndra, son of Ramánánda.

Beginning. अगणितवाङ्मयवारिधिसुवृत्तमणिलाभनिरताः कवयः ।
जीवन्ति यत्प्रसादात् स पिङ्गलो मङ्गलं तनुताम् ॥
अर्कस्तर्कसरोरुहस्य कवितावासन्तिकाषट्पदः
स + भाकरकल्पनाशतगुरुग्रन्थाब्धिमन्थाचलः ।
गोपालः सुकृती कणादभणितिव्याख्याकरोऽजायत
व्याचक्रे किल कोविदोत्सवकरीं काव्येषु यः कौमुदीम् ॥
आसीन्नासीरगन्ता सकलसुकृ + नां + + + + नियन्ता
संसत्सन्तापहन्ता हरिचरणरतोभक्तिभावानमन्ता ।

तत्पुत्रः कीर्त्तिधाराधवलतरहरित्प्रान्तविश्रान्तनामा
रामानन्दो गुणीन्द्रः कविकुलकुमुदश्रेणिशुभ्रांशुबिम्बः ॥
तत्पुत्रस्तु कृपा + + गुणवतां श्रीजानकीनन्दन-
श्चक्रे यं किल लोकमात्रधरणीकान्तः कवीन्द्राभिधम् ।
सोऽहं सम्प्रति वृत्तदर्पणमहं निर्म्मातुमीहे तरां
सन्तः सन्तु सकौतुकाः शुकगिरः केषां न मे दोऽद्विरः ॥
रामानन्दतनुजन्मा कवीन्द्रपदभूषितः ।
कुतुकी जानकीनन्दः कुरुते वृत्तदर्पणम् ॥
सानुस्वारो विसर्गान्तो दीर्घः संयुक्तपूर्व्वगः । इत्यादि ।

End. अथ दोषाः । निर्म्मात्री निरनुप्रासः स्थानभङ्गं कलाहतिः ।
दौर्बल्यं ह + चित्यं नित्यदोषाः प्रकीर्त्तिताः ॥

Colophon. इति श्रीकवीन्द्रकृतौ वृत्तदर्पणः समाप्तः ।

विषयः । छन्दसां लक्षणोदाहरणकथनं । तत्र गणभेदः । गणदेवता । गणमित्रादिकथनञ्च । प्रस्तारकथनं । तत्र मात्रोद्दिष्टं । वर्णोद्दिष्टं । मात्रानष्टं । वर्णनष्टं । वर्णमेरुः । मात्रामेरुः । वर्णपताका । मात्रापताका । आर्य्यावृत्तं । गीतिः । (गाहा, उग्गाहा) । गाहुः । विग्गाहा । गाहिणी । परिगीतिः । सिंहिनी । अर्द्धविपुलादिकथनञ्च । वैतालीयप्रकरणं । दोहा । सौराष्ट्री । पादाकुलकं । चित्रा । पज्झटिका । अडिल्ला । मधुभारः । आभीरः । दीपकः । कलिका । गगनाङ्गणं । हाकलिः । चौपैया । पद्मावती । दण्डकलं । त्रिभङ्गी । लीलावती । जलहरणा । दिक्पाली । दुर्म्मिलिका । मदनहरा । मरहट्टा । हरिगीतिका । हीरकं । प्लवङ्गं । वामना । रोला । सिंहावलोकनं । चौपैया । द्विपदं । झुल्लना । घत्ता । घत्तानन्दं । आषाढं । मत्ता । रसमाला । अवलम्बकं । षटपदी । द्विपद । मुअलिया । रसिका । माला । खञ्जा । शिखा । गलितकं । उद्गलितकं । (अत्र सेतुकाव्यादुदाहरणमुद्धृतम्) मालागलितकं । गम्भानकं । नवपदं । चारुसेना इति मात्रावृत्तकथनपूर्व्वकमेकाक्षरादिषड्विंशत्यक्षरपर्य्यन्तं वर्णवृत्तानां लक्षणोदाहरणकथनं । अथ अर्द्धसमादिवृत्तकथनं । तत्र सुन्दरी । हंसवती । केतुमती । विपरीतपूर्व्वा । सुखदा हरिणप्लुता । शिखालीला । पुष्पिताग्रा । दोधकं । उद्गतादिविषमभेदकथनञ्च । अथ मदिरासुरभिद्रडकानङ्गशेखरादिसामान्यच्छन्दोनिरूपणं । अथ गद्यभेदनिरूपणं । तत्र मुक्तकलक्षणादिकथनं । उत्कलिकाप्रायं । चूर्णकं । कलिका । मादिका । मैत्रीवादः । अलङ्कारकलिकादिकथनं । हरिणप्लुतादिविविधगद्यभेदकथनं । अथ विरुदलक्षणादिकं । चण्डवृत्तानि । त्रिशकं । अन्य एकादशविधप्रभेदनिरूपणञ्च । छन्दोदोषकथनञ्च ।

No. 2039. पुण्यचन्द्रोदयपुराणम् । Substance, country-made paper, 9 × 5 inches. Folia, 134. Lines, 13 on a page. Extent, 3,484 ślokas. Character, Nágara. Date, Sm. 1850. Place of deposit, Calcutta, Government of India. Appearance, old. Verse. Incorrect.

Punya-chandrodaya Puráṇa. A Jain version of the Rámáyaṇa, prefaced by an account of some Jinas; alleged to have been related by Mahávíra, on the Vaibhára Hill, at the request of S'reṇika sometimes, but probably incorrectly, called Koṇika, a king of Magadha. The work is divided into 23 cantos. The first is devoted to an introduction. The second gives a brief account of S'reṇika, king of Magadha, and of his wife Chiliní who bore him 7 sons. The king goes to the Vaibhára Hill to pay his respects to Mahávíra, and requests the sage to relate to him the Puráṇa. The third is devoted to descriptions of Jambudvípa, Bháratavarsha, the town of Champá, and its king Harivarma. Then follows (4 to 8) an account of the king of Dhammilla and his adventures with Apsarases, his wars, his abdication of the pleasures of the world for the life of a hermit *(munivrata)* his austerities, and his translation to heaven. In the family of this king (9) Jina took his birth, and assumed the name of Munisuvratanátha. The story of his early life forms the subject of the next canto (10). His hermitage and teachings and conversions follow in the two next cantos and his nírváṇa in canto 13. Then comes the conversion of Yaśodhara, king of Mathurá, by Anantanátha, the 14th Jina, the installation of Hariveṇa as an emperor, and the attainment by him of his *summum bonum* (15). Birth and family of Ṛishabha Deva, the first Jina, his descendants the Bharatas and the Sagaras. (16). Account of S'ruta. Ditto Vasurája, his sojourn and recreations on the Nárada Hill. Fruits of cruelty and benevolence. (17—18). Dilípa's reign in Báráṇasí. Origin of the Raghus. Account of Ráma and Lakshmaṇa, the metropolis of Daśaratha. Naradeva of Nágapura, Sahasragríva, king of Meghakúṭa; expelled by his nephew S'ítakaṇṭha, who established dominion in Laṅká. His descendants. (19). Births of Rávaṇa, Báli, Sugríva &c. Sitá born as a daughter of Rávaṇa by Mandodarí, made over to Janaka. Marriage of Ráma with Sítá. Ráma appointed viceking, and deputed to govern Váráṇáśí; Nárada visits him there. (20—21). A vernal festival celebrated by Ráma, in course of which Sitá is abducted by Rávaṇa. Ráma's brothers and relatives come to him and devise means for the rescue of S'ítá. Hanumán assumes the form of a black bee

to go in search of Sítá. Mandodarí offers protection to Sítá. (22, 23). Interview of Hanumán with Rávaṇa. Vibhíshaṇa sides with Ráma, Lakshmaṇa kills Báli, mistaking him for an elephant. Ráma's march to Laṅká. His victory over Rávaṇa. The conquest by Ráma and Lakshmaṇa of different parts of the earth. Their return to Ayodhyá. Daśaratha instals Ráma as the king of the country. Rules regarding the worship of Jina on the 2nd of the waxing moon in Kártika. Ráma worships Jina. Sítá bears eight sons. In grief for the death of Lakshmaṇa Ráma abdicates in favour of his son Lava, becomes an ascetic, and dies.

The work is a most curious one, and is worthy of careful examination. It departs from the Rámáyaṇa account of Ráma in many essential particulars.

Beginning ऐनेन्द्रार्च्चितसत्पादपङ्कजं प्रणमाम्यहम् ।
आदीश्वरं जगन्नाथं सृष्टिधर्म्मकरं भुवि ॥
कनकच्छूरणच्छायं वृषभाङ्कं वृषोदरम् ।
वृषभं जगतां साक्षाद्धर्म्मेऽनन्तसिद्धये ॥
युग्मम् ।
अजितं जितकर्म्माणमनन्तनयं जिनम् ।
गजाङ्कं दर्पकन्दर्पदर्प-सर्पारिविक्रमम् ॥
अष्टापदसमच्छायं जातं श्रीवृषभान्तरे ।
पञ्चाशत्कोटिवार्द्धीनां भज के (?) भुवनेश्वरम् ॥
युग्मम् ।
अश्वाङ्कं शं भवं चा ये (?) तप्तजम्बूनदत्विषम् ।
सुरासुरैर्नमस्कारपरैः शतधार्च्चितम् ॥
त्रिंशल्लक्षादिकोटीनामम्बुधीनां तदन्तरे ।
प्रादुर्भूतं स्फुरत्कान्तिं स्फुरद्दशमिवापरम् ॥
युग्मम् ।
अभिनन्दननामानं नम्राणामभिनन्दनम् ।
शुद्धहाटकसङ्काशं सङ्काशं शुद्धहाटकम् ॥
दशलक्षप्रकोटीनामब्धीनामन्तरे भवम् ।
निपताम्याशु संसारभ्रमसन्ततिहानवे ॥
— — — — — — — ।
सिद्धान् साधूंस्तथा नत्वा पुण्यहेतोः करोम्यहम् ।
पुण्यचन्द्रोदयं नाम पुराणं मौनिसुव्रतम् ॥ इत्यादि ।

End. इन्द्वष्टचन्द्रमितेऽथ वर्षे (१६८१) श्रीकार्त्तिकाख्ये धवले च पक्षे
जीवे त्रयोदश्यपराह्णयामे कृष्णेन सौख्याय विनिर्म्मितोऽयम् ॥
लोहपत्तननिवाससहेभ्यो हर्ष एव वणिजामिव हर्षः ।
तत्सुतः कविविधिः कमनीयो भाति मङ्गलसहोदरकृष्णः ॥
श्रीकल्पवल्लीनगरे गरिष्ठे श्रीब्रह्मचारीश्वर एव कृष्णः ।
कण्ठावलम्ब्यूर्ज्जितपूरमल्लः प्रवर्द्धमानो हितमाततान ॥
पञ्चविंशतिसंयुक्तं सहस्रत्रयमुत्तमम् ।
श्लोकसंख्येति निर्द्दिष्टा कृष्णेन कविवेधसा ॥

Colophon. इति पुण्यचन्द्रोदये मुनिसुव्रतपुराणे श्रीपरमल्लाङ्के हर्षवीरिकादेहजब्रह्मचारिश्रीमङ्गलदासाग्रजब्रह्मचारीश्वरकृष्णदासविरचिते रामदेवशिवगमनं नाम त्रयोविंशतितमः सर्गः समाप्तः । संवत् । १८५० ।

विषयः । १म सर्गे,—दुर्ज्जननिन्दा-सज्जनस्तुतिकथनं ; कवेः सामर्थ्यासामर्थ्यनिरूपणं वक्तृलक्षणकथनं । श्रुतलक्षणं । एतच्छास्त्रमाहात्म्यकथनं ।

२ये सर्गे,—मगधविषयेषु राजगृहनगरे श्रेणिकाभिधानो नरपतिरासीत् । जैनधर्मधुरन्धरस्य तस्य चेलिनी नाम महिषी रूपविद्यासम्पन्नान् सप्त पुत्रान् सुषुवे । अथैकदा वैभारगिरिशिरसि समागतं महावीराभिधानं जिनेन्द्रं द्रष्टुकामोऽसौ राजा तत्र गत्वा प्रणम्य च पुराणमिदं विस्तरेण वक्तुं प्रार्थयामास ।

३ये सर्गे,—जम्बूद्वीपवर्णनं । भारतवर्षवर्णनं । चम्पानगरीवर्णनं । तन्नगराधिपस्य हरिवर्म्मणो वृत्तान्तकथनं ।

४र्थे,—सर्गे,—धर्म्मिल्लनगराधिपतेः भानोः वृत्तान्तकथनं । तस्य नागपुरगमनपूर्व्वकं नागकामिनीदर्शनादिविवरणकथनं । तत्र युद्धादिवर्णनं । कैलासगिरिगामनाथयोगीन्द्रस्य विवरणकथनं । तेन च विदेहाधिपतेः महासेनस्य वृत्तान्तकथनं । अथ रम्यकदेशाधिपतनयाय त्रिविक्रमाय तस्य कन्यासम्प्रदानादिविवरणकथनञ्च ।

५—६ सर्गे,—चम्पानगरीपुरन्दरस्य हरिवर्म्मणः नागकन्यया सह समागमवर्णनं । अथ हरिवर्म्मणोऽनन्तवीर्य्याभिधानजिनयोगीन्द्रात् उपदेशप्राप्तिकथनं । तत्र ब्रह्मचर्य्यादिचतुराश्रमधर्म्मवर्णनं । ततश्च तदुक्तधर्म्मदेशनश्रवणेन जातनिर्व्वेदोऽसौ राजा स्वसुते राज्यं समर्प्य मुनिव्रतं गृहीत्वा तपश्चचार इति विवरणकथनञ्च ।

७—८ सर्गे,—हरिवर्म्मणो ध्यानप्रकारवर्णनं । अथ स्वर्गगतस्य तस्य वैभववर्णनं । आर्य्यावर्त्ताधिवसतेः शोभाभारभृतो मागधस्य विवरणकथनं । हरिवंशस्य राज्ञो वृत्तान्तकथनं, तद्गृहे नभस्तलात् रत्नराशिपतनविवरणकथनञ्च ।

९—१० सर्गे,—जिनदेवस्य हरिवंशपुत्रत्वेन जन्मकथन । तस्य मुनिसुव्रतनाथेति नामक-

रणकथनं। तस्य अभिषेकसमये इन्द्रादिदेवकृतस्तोत्रवर्णनं। बाल्यलीलावर्णनं। राज्यप्राप्तिवर्णनं। तद्वाहनगजस्य पूर्व्वजन्मनि तालपुरे नरपतिलक्ष्मासीदिति विवरणकथनं। गार्हस्थ्यधर्म्मकथनं।

११—१२ सर्ग,—मुनिसुव्रतस्य दीक्षाग्रहणकथनं। केवलोत्पत्तिकथनं। अर्हदतिशयगुण-वर्णनञ्च। मथुराधिपतेः मल्लाख्यस्य भूपतेः विवरणकथनं। मल्लीनगराधिपतेर्वृत्तान्तकथनं। मल्लीपतिं प्रति मुनिसुव्रतस्य उपदेशकथनं। तत्र संक्षेपेण जैनधर्म्मतात्पर्य्यकथनं। अर्हदर्चनायाः मन्त्रादिकीर्त्तनं। चतुर्थाश्रमधर्म्मकीर्त्तनञ्च।

१३—१४ सर्ग,—मुनिसुव्रतस्य निर्व्वाणप्राप्तिविवरणकथनं। मथुरानाथस्य यशोधरस्य अनन्तनाथनामकचतुर्दशजिनाद्दीक्षादिप्राप्तिवर्णनं। हरिषेणस्य चक्रवर्त्तित्वप्राप्तिवर्णनं। सर्व्वार्थ-सिद्धिप्राप्तिकीर्त्तनञ्च।

१५—सर्ग,—कालपरिमाणसङ्ख्यादिकथनं। कुलकराणां विवरणकथनं। तद्वंशे ऋषभदेवस्य आदिजिनस्य जन्मकथनं। तत्पुत्रादीनां भरतादीनां वृत्तान्तकीर्त्तनं। क्रमेण सगरादीनां वंश-वर्णनं। सुलोधनन्दनतिकुमार्य्याः स्वयम्वरे सगरस्य गमनवृत्तान्तकथनं।

१६ सर्ग,—श्रुतनामकस्य मुनेरुपाख्यानं। वसुराजस्य उपाख्यानकथनं। नारदपर्व्वताभि-धानयोस्तपस्विनोः समित्पुष्पाहरणार्थं रमणीयवनप्रवेशपूर्व्वकं सप्तसङ्ख्याभिः स्त्रीभिः सह रममाणं मयूरमेकं पश्यतोः विवरणकथनं। सगरानुष्ठितपशुयागे केवलं पर्व्वतस्य मुनेरार्त्विज्य-ग्रहणविवरणकथनं। हिंसाया दोषावहत्वकथनं। अहिंसायाः परमधर्म्मत्वकथनं।

१७—१८ सर्ग,—वाराणस्यां दिलीपस्य राज्यकरणविवरणं। रघोरुत्पत्तिकथनपूर्व्वकं रघुवं-शवर्णनं। रामलक्ष्मणादीनामुत्पत्तिकथनं। पुनरेव अयोध्यायां दशरथस्य राजधानीस्थापनविव-रणकथनं। नागपुराधिपतेः नरदेवस्य विवरणकथनं। मेघकूटाधिपतेः सहस्रग्रीवस्य नृपतेः विवरणकथनं। तद्भ्रातुष्पुत्रेण सितकण्ठेन युद्धे पराजितस्य सहस्रग्रीवस्य निर्व्वासनवृत्तान्तकथनं। अथ सितकण्ठस्य लङ्कायां राजधानीकरणविवरणं। क्रमेण तत्पुत्रपौत्रादीनां शतकण्ठ-पञ्चाशत्कण्ठपुलस्त्यादीनां वृत्तान्तकथनं।

१९—सर्ग,—मेघश्रीगर्भजातस्य पुलस्त्यपुत्रस्य रावणेति नामकथनं। वालिसुग्रीवादीनां जन्मकथनं। वालिनः समीपात् सप्तकृत्वः रावणस्य पराजयप्राप्तिकथनं। कण्ठे हारधारणेन तस्य दशकण्ठत्वप्राप्तिकथनं। रावणकृतनन्दीश्वरव्रतानुष्ठानकथनं। अथ मन्दोदरी-मनोवेगा-मन्त्रघोषा-मञ्जुघोषाप्रभृतीनां रावणमहिषीणां विवरणं। मन्दोदरीगर्भे सीतायाः जन्मवृत्तान्तकथनं। भूमिखननकाले जनकेन मञ्जूषास्थितकन्याप्राप्तिविवरणं। रामस्य सीतापरिणयादिकथनं। अथ दशरथानुज्ञया यौवराज्याभिषिक्तस्य रामस्य सह सीतया लक्ष्मणेन च वाराणसीगमनपूर्व्वकं तद्राज्यशासनविवरणकथनं। रावणसभायां नारदस्य आगमनवृत्तान्तवर्णनञ्च।

२०—२१—सर्ग,—एकदा वसन्तकाले वाराणसीस्थचित्रकूटोद्याने स्त्रीभिः सार्द्धं रामलक्ष्म-णयोः वसन्तोत्सवकरणविवरणं। नारदवाक्येन शूर्पणखामारीचसहायस्य रावणस्य सीताहरण-

वृत्तान्तकथनं। सीताहरणवृत्तान्तं श्रुत्वा जनक-भरत-शत्रुघ्नानां रामसमीपागमनविवरणं। अत्रावसरे अञ्जनानन्दन-सुग्रीवयोः स्वयमेव रामान्तिकागमनकथनं। अञ्जनापुत्रस्य हनुमानिति नामकारणकथनं। हनुमतो सीतादर्शनार्थं भ्रमररूपेण लङ्काप्रवेशवर्णनं। मन्दोदरीकृतसीतासमाश्वासनं।

२२—२३—सर्गे,—रावणस्य हनुमता सह संवादकथनं। विभीषणस्य रामपक्षपातित्वकथनं। गजमेकं निमित्तीकृत्य लक्ष्मणेन सह युद्धस्थले वालिनो मृत्युपुरगमनकथनं। वानरबलेन सह लङ्कां प्रविष्टस्य रामस्य रावणबधादिवृत्तान्तकथनं। रामलक्ष्मणयोर्दिग्विजयवर्णनं। पुनरयोध्यायां गमनकथनं। दशरथकृतरामराज्याभिषेकवर्णनं। कार्त्तिकशुक्लद्वितीयायां जिनपूजाविधिकथनं। रामस्य जिनमन्दिरे पूजादिकरणकथनं। सीताया अष्टौ पुत्रा जाताः। तेषु लघुना सकाय यौवराज्यं दत्त्वा रामस्य लक्ष्मणवियोगविधुरस्य वृषभस्य जिनदेवस्य समीपं गत्वा केवलदीक्षाग्रहणकथनं। अन्यासु तिथिषु जिनपूजाविधिकथनं रामस्य शिवप्राप्तिकथनञ्च।

No. 2040. हरिवंशः। Substance, country-made paper. 9 × 3½ inches. Folia, 488. Lines, 9—10 on a page. Extent, 9,344 ślokas. Character, Nágara. Date, Sm. 1841. Place of deposit, Calcutta, Government of India. Appearance, fresh. Prose and verse. Generally correct.

Harivaṅśa Puráṇa. An imitation of the Hindu Harivaṅśa, giving accounts of several Jinas, abstracts of many Jain legends, details of Jain rites and ceremonies, and histories of ancient dynasties, including the Kurus, the Páṇḍus and the Yádavas, all cast in Jain moulds, and devoted to Jain worship. By Jinasena Áchárya.

Contents. I. II. Introduction. Birth of Jina as son of Samudra, chief of Kuṇḍapura, in the Videha country. He is named Vardhamána. On the 30th year of his life he retires from home, and for twelve years afterwards performs penance and austerities. Thereby he attains perfect knowledge. He remains silent for 66 days, and then retires to Rájagṛiha. There, seated on a throne, he sojourns with Indra and other gods and Kaundinya and other sages with their disciples. Chandaná, a princess, approaches him. Nágas, Kinnaras and others repair to his presence. At the request of one Gautama he expounds the Jaina religion in all its branches. He sets the water of religion in motion at Magadha. (*Dharma-tírtha-pravartana.*)

III. The religion spread over Káśí, Káñchí, Draviḍa, Maháráshtra, Gándhára and other countries. The gratification of beings or

hearing the religion expounded by the sage in the Mágádhi language. His glorious career at Panchaśaila *alias* Rájagriha. The religion of Jina as given to his audience. Beings are either perfected (*siddhas*) or imperfect (*asiddha*). The perfected are those who have destroyed all the obstructions to true knowledge. They are of three kinds. The imperfect are those who are attached to falsehood, and thence they suffer pleasure and pain. Beings are again divided into Bhavya and Abhavya. Fruits of evil disposition, delusion, longings. Advantages of forbearing from wine and flesh-meat. Evil works, their fruits. Advantages of overcoming the longings of the senses. Evils of lust. True knowledge and cause of the world's sufferings, causes thereof. Brief accounts of Sanatkumára, Mahendra &c., their fall from heaven. Salvation of one from good works done in his former existence. Gautama relates the Harivanśa to S'renika *alias* Jitaśatru.

IV.—VI. Aloka (ákása) defined; its inhabitants. Loka defined. Its condition and divisions, its atomosphere, extent thereof. The lowest Loka, the hills there. The middle Loka or the region of the earth, its islands and their extent and number. The highest Loka. The distances of the planets and stars from the earth. The Siddhas live there.

VII. Time defined. Abstract and comparative time. Its divisions into three kinds, past, present and future. Various modes of reckoning time. Measures of length and bulk. Kulakara dynasty reigning between the Ganges and the Sindhu rivers,—its 14 descendants.

VIII. Birth of Rishabha, in the above named dynasty. He was son of Nábhi by Maru Deví. Maru's dream of Rishabha entering her womb. She is served by goddesses during her pregnancy. The name of the place of birth was S'aketa. Gods come to behold the new-born babe. Wife of Purandara, through the instigation of her husband, carries away the babe to Sumeru, leaving another child in his place. Gods named the babe Rishabha, bore his ears, and put earrings therein. Paulamí then brought back the child, and restored him to his parents.

IX. Childhood of Rishabha. He marries Nandá and Sunandá, each of whom bore him a son and a daughter. Division of men into Kshatríya, Vaisya and S'údra to keep them duly employed. Rishabha's retirement from home. At Prayága he cuts off his top-knot. His companions assume garbs of bark and grass. He travels about without raiment for six months. He receives a jar of sugar-cane juice from

Somaprabha. Nine rules about gifts. He attains absolute knowledge while performing meditation under a Nyagrodha tree in the garden of the Vrishabhasena, king of Púrva-tálapura, and makes disciples.

X. He preaches his religion, comprising five duties, namely benevolence, truth, abstinence from theft, avoidance of concupiscence, and freedom from delusion. These duties and their subdivisions described in detail.

XI.—XIII. Bharata, son of Rishabha, conquers the universe and accepts in marriage daughters of Mlechchha kings. His brothers become hermits. Jaya, king of Hastinápura, a friend of Bharata, becomes a hermit. Names of Jina's 84 followers *(gaṇigaṇa)*. He goes with his followers to Kailáśa, where he is worshipped by gods and others. Bharata abdicates in favour of his son, and becomes a hermit. His descendants successively become Jaina hermits, and attain nirváṇa. Somajasah, son of Báhubala, and grandson of the Jina, becomes the founder of the Lunar race. Innumerable members of the Lunar race attain nirváṇa. His sixty thousand sons destroyed by a Nága king. Sagara becomes a Jaina, and attains salvation. His surviving son Sambhavanátha and his descendants represent the Ikshéku race.

XIV. Story of Sumukha, king of Kausámbí, and his love for a maiden of his court, by whom he got a son named Hari, whose son Madágiri and his descendants formed the Hari race, *(Harivaṃśa)*.

XV.—XVII. The wife of Sumitra, of the Hari race, sees a dream, and gives birth, on the 12th of the waxing moon in the month of Mágha when the moon was in the constellation S'ravaṇá, Jinendra in Kuśágárapura *alias* Rájagṛiha. Devas come to worship the child. They place him on Airávata, the elephant of Indra, anoint him, name him Munisuvrata, and then restore him to his mother. In his youth he one night saw beautiful clouds in the sky, and they were soon after dispersed by a high wind. This set him thinking. He becomes a hermit. His death. He is succeeded by his son Daksha, whose son by Ilá was Aila Daksha. Daksha being guilty of incest on his own daughter Manohari, Aila Daksha with his mother retired to the banks of the Narmadá, and established a town named Máhishmati. His son Kunema established the town of Kuṇḍina. His son Puloma established Indrapura. His descendants. The Vasu dynasty, its fall.

XVII.—XIX. A king of Mathurá had two sons Súra and Suvíra.

From Súra descended Andhaka-Vrishni, and from Aśura, Bhojaka-Vrishnis. Andhaka-Vrishni had ten sons, of whom Vasudeva was one, and two daughters of whom Kunti was the eldest. Descendants of Bhoja Vrishni. Suvasu of the Vasu dynasty, was the founder of the family of Jarásandha whose descendants became Kálayavanas. Religious discourse at Rájagriha. Virtuous works. Animals of various kinds. Accounts of the two Vrishni families. Vasudeva cuts off the head of a hunchback woman with his bare hands. Other stories about him.

XX.—XXI. Story of Padma and his covering the three regions with three steps. Stories of Chárudatta and Vasantasaená, daughter of Kaliṅgasena.

XXII.—XXIV. Story of Vasudeva's acceptance of the Jain asceticism at the suggestion of a dancing girl. His peregrinations, marriage with the daughter of Kapilaśruti, who bore him a son named Kapila.

XXV.—XXVIII. Vasudeva kills, in a quarrel with Kártaviryáryuna, Jamadagni, whose son Paraśuráma destroys the Kshatríya race seven times over. The wife of Kártaviryáryuna, on her husband's death, escapes, and takes shelter in a Jain hermitage, where she gives birth to a son, who destroys the Bráhmaṇa race twenty-one times over. Vasudeva carried away by a she-devil named Surpanakhá. His adventures. Account of some atheists.

XXIX.—XXXII. Origin of the temple of Kámadevagriha at S'rávasti. Story of Kámadeva. Vasudeva marries his daughter Ení, and then marries Rohiní at a Sayambara. Balaráma born of Rohiní.

XXXIII.—XXXIV. Vasudeva's journey to Rájagriha with his pupils. Account of Kañsa, who throws his father Ugrasena into prison, becomes king, and gives his sister Devakí to his tutor Vasudeva. The seventh son of Devakí kills Kañsa. Account of the other six sons of Devakí. Account of Arishṭanemi, a Jina. Accounts of various fasts and penances.

XXXV.—XXXVII. Devakí gives birth to two sons. Devas carry them away, leaving two still-born children in their place. Kañsa pounds the dead children on a stone. Other sons born and protected. Birth of the seventh son holding the discus, the conch-shell, the mace, and the lotus, on the 12th of the wane in Bhádra. The child transferred to the house of Nanda, whose new-born daughter is brought and kept in its place. Kañsa clips the nose of the female child, and destroys her. Kṛishṇa's

career at Vrindávana, destroying various demons (as described in the Bhagavata Purana). Kṛishṇa and Balaráma return to Mathurá, destroy various demons, and then Kaṅśa, instal Ugrasena as king, and marry Reváti and Satyabhámá, the two daughters of Suketa, king of Rajatádri. Jarásandha avenges the murder of his relative Kaṅśa, and overthrows the two brothers.

XXXVIII.—XL. Birth of Arishṭanemi, (details similar to what have been given about the birth of Ṛishabha and other Jinas). The flight of the Yadavas from Mathurá they are chased by Jarásandha as far as the Vindhyan chain.

XLI.—XLIV. Yádavas build Dvárká and settle there. Account of Nárada, his power of travelling in the sky. Kṛishṇa marries Rukmiṇí, Satyabhámá and others. Balaráma's marriage with Revatí, Sítá, Varudhavatí, Rájívanetrá and others.

XLV.—XLVI. Account of the Kauravas and the Páṇḍavas as in the Mahábhárata, diversified by many new incidents, and names of places and circumstantial details changed.

XLVII.—LII. Pradyumna's amours. Sámba's birth. Account of the descendants of Balaráma and Kṛishṇa in great detail. Jarásandha assails Kṛishṇa. A great war follows, in which Jarasandha is killed by Kṛishṇa. Account of Durgá and her redemption by Jain worship. Conversion of the Kauravas and Karna to Jainism.

LIII.—LIV. Wars of Kṛishṇa in the southern peninsula. Rape of Draupadí by Padmanátha, a king who lived beyond the ocean. Her rescue by her husband, aided by Balaráma and Kṛishṇa.

LV.—VI. Marriage of Aniruddha with Ushá. Kṛishṇa's picnic on the Raivata Hill. Ascetic feeling of Nemí. His adoration by Indra and other gods. His departure for Giriŕája for penance. His meditations. Various kinds of pain to which created beings are subject; their character, and the means of overcoming them. Meditation of Raudra. Meditation of Dharma. The waves of worldly inclinations. Pure meditation of two kinds, conscious and unconscious, their differences.

LVII. The different places fit for Jinas. Lectures of Jina to Varadatta and other Yádavas. Nine kinds of speech of the Jina Origin of creation. Eternity, soul, delusion, self, and true knowledge. The seven conditions of beings. Sentient, and non-sentient objects—their distinctions and classification. Relation of the body to the soul. Yogas of

various kinds. Works, their distinctions, number &c. Duties of householders. Do. of hermits. Mental functions—how well directed, and how perverted. Virtue and vice. Penance, its distinctions. Suppression of worldly pain and destruction of bondage. Emancipation. The Yádavas having heard these lectures retire to their homes.

LIX.—LXVI. The Víhára of Nemi. Nemi's peregrinations and preachings in different parts of India. The elders of Kṛishṇa become disciples of Nemi. Nemi describes to Satyabhámá, Rukmiṇí and others their former lives. He relates to Kṛishṇa the history of all Jinas both past and future, their birth, career and nirváṇa. The destruction of the Yádava race by the curse of Dvaipáyana. The Yádavas and Dvárká burnt down. Jarasuna, a Yádava, retires from Dvárká to the south. Balaráma and Kṛishṇa, overwhelmed by grief, retire to south Mathurá. There, while resting under a tree, Kṛishṇa is shot in the foot with an arrow. Account of Jarasunu *alias* Jarakumára. Balarama's grief. Paṇḍavas hear of the sad news. Funeral of Kṛishṇa. Baladeva becomes a hermit. The Paṇḍavas accept asceticism, their nirváṇa. The nirváṇa of Nemí.

Beginning. सिद्धं ध्रौव्यव्ययोत्पादलक्षणं द्रव्यसाधनं ।
जैनं द्रव्याद्यपेक्षातः साद्यनाद्यथ शासनं ॥
शुद्धज्ञानप्रकाशाय लोकालोकैकभानवे ।
नमः श्रीवर्द्धमानाय वर्द्धमानजिने शिने ।
नमः सर्व्वविदे सर्व्वव्यवस्थानां विधायिने ।
कृतादिधर्म्मतीर्थाय वृषभाय स्वयम्भुवे ॥
येन तीर्थमभिव्यक्तं द्वितीयमजितार्चितं ।
अजिताय नमस्तस्मै जिनेशाय जितद्विषे ॥
— — — — — — — — — ॥
इत्थं साधुमहायोऽहमनातङ्कमनुद्धतं ।
देहं काव्यमयं लोके करोमि स्थिरमात्मनः ॥
बद्धमूलं भुवि ख्यातं बहुशाखाविभूषितं ।
शुद्धपुण्यफलं पूतं कल्पवृक्षसमं परं ॥
अरिष्टनेमिनाथस्य चरितेनोद्गलीकृतं ।
पुराणं हरिवंशाख्यं ख्यापयामि मनोहरं ॥

द्युमणिद्योतनं द्योतं द्योतयन्ति यथार्णवः ।
मणिप्रदीपखद्योतविद्युतोऽपि यथातथं ॥
द्योतितस्य तथा तस्य पुराणस्य महात्मभिः ।
द्योतने वर्त्ततेऽत्यन्यो मादृशोऽप्यनुरूपतः ॥
विप्रकृष्टमपि ह्यर्थं सौक्ष्मं (?) मार्य्ययुतं मनः ।
सूरिसूर्य्यकृतालोकं लोकचक्षुरिवेक्षते ॥
पञ्चधा प्रविभक्तार्थं क्षेत्रादिप्रविभागतः ।
प्रमाणमागमाख्यं तत् प्रमाणपुरुषोदितं ॥
तथा हि मूलतन्त्रस्य कर्त्ता तीर्थंकरः स्मृतः (स्वयं) ।
ततोऽप्युत्तरतन्त्रस्य गौतमाख्यो गणाग्रणीः ॥
उत्तरोत्तरतन्त्रस्य कर्त्तारो बहवः क्रमात् ।
प्रमाणं तेऽपि नः सर्व्वे + सर्व्वोक्तानुवादिनः ॥ इत्यादि ।

End. जयत्वजय्या जिनधर्म्मसन्ततिः प्रजास्विह क्षेमनुभिक्षमस्तु तः ।
सुखाय भूयात् प्रतिवर्षवर्षिभिः सुजातमन्या वसुधा सुधारिणाम् ॥
शाकेष्वब्दशतेषु सप्तसु दिशं पञ्चोत्तरेषूत्तरां
पातीन्द्रायुधनाम्नि कृष्णनृपजे श्रीवल्लभे दक्षिणां ।
पूर्व्वां श्रीमदवन्तिभूभृति नृपे वत्सादिराजेऽपरां
सौर्य्याणामधिमण्डले जययुते वीरे वराहेऽवति ॥
कल्याणैः परिवर्द्धमानविपुलश्रीवर्द्धमाने पुरे
श्रीपार्श्वालयनन्नराजवसतौ पर्य्याप्तशेषः पुरा ।
पश्चाद्दोस्तटिकाप्रजाप्रजनितप्राज्यार्च्चनावर्च्चने
शान्तेः शान्तिगृहे जिनेश्वरचितो वंशो हरीणामयं ॥
व्युत्सृष्टापरसंघसन्ततिबृहत्पुन्नाटसंघान्वये
प्राप्तः श्रीजिनसेनसूरिकविना लाभाय बोधे पुनः ।
दृष्टोऽयं हरिवंशपुण्यचरितः श्रीपार्श्वतः सर्व्वतो-
व्याप्ताशामुखमण्डलः स्थिरतरः स्थेयात् पृथिव्यां चिरं ॥

Colophon. इत्यरिष्टनेमिपुराणसङ्ग्रहे हरिवंशे जिनसेनाचार्य्यस्य कृतौ गुरुपाठकमकवर्णनो नाम षट्षष्टितमः सर्गः ॥ ६६ ॥ इति श्रीहरिवंशपुराणं सम्पूर्णं । संवत् १८४१, पौषसुदि ।

विषयः । १—२ सर्गे,—शास्त्रागमकथनं । ध्रुवसेन-लोहाचार्य्यप्रभृतीनां पूर्व्वाचार्य्याणां नामकथनं । विदेहदेशीयान्तर्गतकुण्डपुराधिपतेः सिद्धार्थश्रीमद्राजस्य पुत्रतेन जिनस्य जन्मादि-

कथनं। अथ सद्देवस्य वासवस्य जिनाभिषेककरणविवरणं। जिनस्य वर्द्धमान इति नामकथनं। त्रिंशद्वर्षे वर्त्तमानस्य विगतस्पृहस्य तस्य वनगमनपुरःसरं द्वादशवर्षाणि यावत् तपस्यतो घातिसंघातविनाशानन्तरं केवलज्ञानप्राप्तिकथनं। अथ षट्षष्टिदिवसान् मौनावलम्बेन विहरतस्तस्य राजगृहगमनकीर्त्तनं। ततो रत्नसिंहासनोपविष्टस्य जिनेन्द्रस्य समन्तात् इन्द्रादीनां देवानां कौण्डिन्यादीनां पण्डितानां सशिष्याणां दिगम्बराणां संयमपूर्व्वकमवस्थितिकथनं। अथ चन्दनाभिधाना चेटकराजकुमार्य्यपि धौतैकाम्बरसम्वीता भगवतः पुरःसरी बभूव। अत्रान्तरे, साधूनां, व्यन्तरलोकस्थितदेवानां, नागकुमाराणां, किन्नरगन्धर्व्वादीनाञ्च तत्र समागमवर्णनं। अथ गौतमनामा कश्चिद् भगवन्तं तीर्थार्थप्रकाशनाय अनुरुरोध। भगवानपि जिनधर्म्मार्थमुदाजहार। तत्रोद्देशेन यथा, संस्थानव्याख्या, समवायव्याख्या, आचाराङ्गतत्त्वार्थः, सूत्रकृततत्त्वार्थः, प्रज्ञप्तिहृदयं, ज्ञातृधर्म्मकथा, श्रावकाध्ययनार्थः, अन्तकृद्दशगोचरः, अनुत्तरदशार्थः, प्रश्नव्याकरणं, विपाकसूत्रार्थः। दृष्टिवादार्थइत्यादि। ततः सर्व्वेषां जिनोध र्म्मग्रहणपुरःसरं स्वस्वस्थानगमनकथनं। मगधेषु जिनगृहावलीनिर्म्माणादिकीर्त्तनं। धर्म्मतीर्थप्रवर्त्तनञ्च।

३य सर्गे,—काशी-काञ्ची-द्रविड़-महाराष्ट्र-गान्धारादिषु सर्व्वेषु देशेषु जैनधर्म्मप्रचारकथनं। जिनमुखोद्गतां मागधीभाषां कर्णपुटेन पिबतां लोकानां शान्तिवर्णनं। पञ्चशैलपुरापरनामधेये राजगृहे स्थितस्य जिनस्य ऐश्वर्य्यादिवर्णनं। अथैकदा सुरनरतिर्य्यक्प्रभृतीनां धर्म्मशुश्रूषया परितो भगवन्तमुपविष्टानां पुरस्तात् जिनस्य धर्म्मशासनकीर्त्तनं। तत्र सिद्धासिद्धभेदेन जीवस्य द्विविधत्वकथनं। अथ ज्ञानावरणस्य पञ्चविधस्य त्यागेण, दर्शनावरणस्य नवभेदस्य भेदेन, अष्टाविंशतिविधस्य मोहनीयस्य हानात्, चतुर्व्विधस्य आयुषः शेषक्षोषणेन, चत्वारिंशतो नामधेयस्य गोत्रद्वयस्य च नाशेन, पञ्चविधस्य अन्तरायकर्म्मणः विध्वंसेन च जीवस्य सिद्धत्वं भवति। अपि च सिद्धानां सम्यक्त्व-परमानन्त-केवलज्ञान-केवलदर्शनादिरूपाष्टविधगुणकथनादिकं। अथ मोहस्य उदय-नाशोपशमरूपावस्थात्रितयेण असिद्धोऽपि त्रिविध इतिनिरूपणं। असिद्धस्य हि मिथ्यादृष्टि-सासादन-सम्यङ्मिथ्यादृष्टि-संयतासंयत-प्रमत्तसंयत-अप्रमत्तसंयत-उपशान्तकषाय-सम्यक्दृष्टि-क्षीणकषायादिरूपगुणस्थाननिरूपणं। तत्र तत्र सुखदुःखप्राप्तिकारणकथनञ्च। पुनः भव्याभव्यभेदेन जीवानां द्वैविध्यकथनं। कुदृष्टिमायालोभप्रभृतीनां फलकथनं। मधुमांसादिवर्ज्जनेन सुमानुष्यप्राप्तिस्तथा कुकर्म्मभिः कुमानुष्यप्रापणञ्चेतिनिरूपणं। इन्द्रियनिग्रहफलकथनं। कन्दर्पराञ्चितानां कन्दर्पनामकानां देवानां अभियोग्यत्वक्लिष्टत्वादिकथनं। सम्यग्दर्शनस्य दुर्लभत्वकथनपूर्व्वकं तदभाव एव संसारसागरनिमज्जनकारणमितिनिरूपणं। पूर्व्वोक्तसम्यक्त्व-परमानन्तादीनां कारणादिकथनं। संक्षेपेण सनत्कुमार-माहेन्द्र-शुक्र-महाशुक्रादिकल्पविवरणकीर्त्तनं। तत्र दिवश्च्युतानां गत्यादिकथनं। केषाञ्चित् पूर्व्वजन्माभ्यस्तशुभषोड़शकारणानां तीर्थकृतां जिनशासनानुष्ठानेन निर्व्वाणप्राप्तिकथनञ्च। अथ जितशत्रुनामकस्य श्रेणिकराजस्य पुरतो गौतमस्य हरिवंशविस्तारकीर्त्तनं।

४—६ सर्गे,—अलोकाकाशशब्दनिर्व्वचनं यथा,—"न लोक्यन्ते यतस्तस्मिन् जीवाजीवात्मकाः परे"। तत्र जीवपुद्गलयोरवस्थानाभावकथनं। एवं धर्म्माधर्म्मास्तिकादीनां तत्र गतिस्थानाद्यभावकथनञ्च। अथ अलोकाकाशमध्ये लोकस्य स्थितिकथनं। लोकशब्दनिर्व्वचनञ्च। लोकस्य वेत्रासन-मृदङ्गझल्लरीसदृशाकृतित्वकथनं। तत्र चतुर्द्दशरज्जुविभागादिकथनं। लोकस्य घनवातादित्रिविधवायुपरिवेष्टितत्वनिरूपणं। वायूनां परिमाणादिकथनं। त्रिलोकसारोक्तक्रमेण अधोलोकसंस्थानवर्णनं। तत्र नरकादिवृत्तान्तकथनञ्च। तिर्य्यक्लोकवर्णनमुखेन द्वीपसागरदेशादिनिरूपणं तेषां संस्थानपरिमाणादिकीर्त्तनञ्च। ऊर्द्ध्वलोकवर्णनं। तत्र नक्षत्रलोकस्य तदितरज्योतिष्काणाञ्च धरातलात् दूरत्वादिनिरूपणं। सिद्धानां जीवानां निवासादिकथनञ्च।

७मे सर्गे,—वर्णगन्धादिहीनो वर्त्तनालक्षणः काल इति कालस्वरूपकथनं। मुख्यगौणभेदेन तस्य द्वैविध्यनिरूपणं। अथ समयवृत्तीनां त्रैविध्यात् तथाविधस्य कालस्य त्रिविधत्वनिरूपणं। निश्वासोच्छ्वास-प्राणस्तोक-लवादीनां लक्षणकथनं। परमाणुलक्षणकथनं तथाहि,—आदिमध्यान्तहीनं विभागशून्यं अतीन्द्रियं मूर्त्तमपि अप्रदेशं परमाणुं जानीयादिति। स्वल्पाकाशस्य षड्भिरंशैर्जातत्वात् तस्य षडंशत्वकथनं। तथा वर्ण-गन्ध-रस-स्पर्शैः पूरणं गलनञ्च कुर्व्वन्तीति परमाणूनां पुद्गलाभिधानत्वकथनञ्च। ततः संज्ञा-त्रुटि-रेणु-वालाग्र-यूका-यव-अङ्गुल्यादिमानलक्षणकथनं। एवं कल्पपल्यसागरोपमादीनां लक्षणादिकथनं। यत्र क्रमेण वस्तूनां शक्तिरवसर्पति सा अवसर्पिणी, तदन्यथा तु उत्सर्पिणीत्यनयोः लक्षणकथनपूर्व्वकं तत्र प्रत्येकं षट्कालसमत्वनिरूपणं। तत्र अवसर्पिण्यामनुलोमेन षट्समत्वनिरूपणं, यथा,—सुखमा, सुखमा, सुखमा, दुःखमा, सुखमा, सुखमा, दुःखमा, दुःखमा, अतिदुःखमा चेति। एतद्विलोमेन च उत्सर्पिण्यामूहनीयं। अथ प्रथमेषु त्रिषु सुखमासुखमादिषु कालेषु भारतभूमेः कल्पवृक्षभूषितत्वं भोगभूमित्वादिकथनञ्च। ततोऽतीते सुखकारणे कालद्वये गङ्गासिन्धुनद्योर्मध्ये दक्षिणभारते कुलकराणामुत्पत्तिकथनं। तत्र प्रथमतः प्रतिश्रुतिनामधेयस्य कुलकरस्य राज्यशासनविवरणकथनं। ततस्तत्पुत्रस्य सन्मतिनामकस्य कुलकरस्य विवरणकथनं। एवं क्रमेण क्षेमङ्कर-क्षेमन्धर-सीमङ्कर-यशार्थ-विपुलवाहन-चक्षुष्मत्यशस्वि-अभिचन्द्र-मरुदेव-प्रसेनजिन्नामकानां चतुर्द्दशकुलकराणामुत्पत्त्यादिकथनं।

८ सर्गे,—ऋषभस्य जन्मादिकथनं। तत्र, पुरा किल दक्षिणभारते नाभिर्नाम नरपतिरासीत्। तस्य हि मरुदेवीति नाम्ना सुलक्षणा धर्म्मपत्नी बभूव। अथास्या गर्भे भगवान् ऋषभदेवो जनिष्यति तदधुना सेव्यतामेषा भवतीभिरितिपाकशासनशासनेन श्रीशचीप्रभृतिभिः सुरसुन्दरीभिः सादरं सेव्यमाना मरुदेवी 'भगवान् जिनदेवो वृषरूपेण तदुदरे मुखवर्त्मना प्रविवेशेति' शुभस्वप्नदर्शनेन नितरामानन्दिता प्राप्ते काले जिनदेवं प्रसुषुवे। अथ सुरासुरनरकिन्नरगन्धर्व्वादयः सर्व्वे तमाद्यं तीर्थंकरमवलोकयितुकामास्तत्र समाजग्मुः। यतो हि प्रागेव सुरासुरादिजगत्त्रयं साकमितं तत्र तत आरभ्य तत्पुरं साकेतमिति समाख्यां प्राप। अथ भर्त्तरादेशेन पर-

न्दरसुन्दरी देवमायया सूतिकागारं प्रविश्य शिशुमन्यं तत्र सुखसुप्तं निधाय च ततो जिनदेवं सुमेरुशिखरदेशं निन्ये। सुरपतिरपि सार्द्धं सुरासुरनिकरैः तत्र भगवतो जन्माभिषेकं विधाय वज्रसूचिना कर्णयोः रन्ध्रं सम्पाद्य च रत्नकुण्डलाभ्यामलञ्चकार। अथ भगवन्तं ऋषभेति नाम्ना-सम्बोधयन्तस्ते हिरण्यगर्भ-प्रजापति-स्वयम्भू-प्रभृतिभगवन्नामनिर्व्वचनमुखेन तं तुष्टुवुः। समनन्तरञ्च पौलोमी लोमाञ्चितशरीरा स्वाङ्कमारोप्य जिनदेवं पुनरेव अयोध्यानगरीमासाद्य च सद्य एव शिशुप्रदानेन तत्पितरौ नितरामानन्दसरसीषु निमज्जयाञ्चकार।

९ सर्ग,—अथ भगवान् शक्रेण कराङ्गुष्ठे निषक्तं पीयूषं पिबन् प्रतिदिनं बालचन्द्र इव उपचीयमानो समं समवयस्कैः बाल्यक्रीड़ारसमनुबभूव। अनन्तरञ्च उद्भिद्यमानयौवनकुसुमोऽसौ नन्दा-सुनन्दाभिधानस्य कन्यायुगलस्य पाणिपीड़नमकरोत्। अथ नन्दा, नन्दनं भरतनामकं सुतामपि ब्राह्मीनामिकां युग्ममसूत। असूत च सुनन्दापि महाबलं सुतं सुतामपि लोकसुन्दरीं। अथ नन्दायाम् अष्टनवतिसंख्यामिताः पुत्रा वृषभसेनादयः क्रमेणाजायन्त। ततो नाभेयस्य भगवतः प्रजानां दुरवस्थादर्शनेन जातकरुणस्य क्षतत्राणेन, वाणिज्येन, शिल्पादिसम्बन्धेन च क्रमेण क्षत्रिय-वैश्यशूद्ररूपत्रिविधवर्णविभागकरणकथनं। अथैकदा नृत्यन्तीं नीलाञ्जनाभिधा-नामिन्द्रनर्त्तकीं पश्यतो नाभेयस्य वैराग्योत्पत्त्यनन्तरं देवैः प्रबोधितस्य तस्य शक्रादिवाह्यशिविकया सिद्धार्थवनगमनकथनं। ततः प्रयागचैत्रगमनपूर्व्वकं केशोत्खातकरणकथनं। अथ ध्यानस्थं जिनदेवं परितः स्थितानां क्षत्रियाणां कृतममार्धितया भगवदभिप्रायमजानतामत एव नग्नानां दैववाणीश्रवणेन कुश-चीवरवल्कलधारणवृत्तान्तकथनं। अथ षण्मासान् यावद्-कृताहारस्य नग्नस्य जिनदेवस्य पृथ्वीभ्रमणवृत्तान्तकथनं। अनन्तरमेकदा राज्ञः सोमप्रभस्य गृहे समुपस्थिताय जिनाय तेन राज्ञा इक्षुरसपूर्णः कलसो दत्त इत्यनेन दानतीर्थकरोत्पत्तिकथनं। अथ प्रतिग्रहः, स्थानस्थापनं, पादप्रक्षालनं' पूजनं, प्रणतिः, मनःशुद्धिः, वाक्यशुद्धिः, काय-शुद्धिः, एषणाशुद्धिश्चेति दानविधेः नवविधत्वकथनं। अथ एकदा प्रलम्बजटाभारो जिनदेवः पूर्व्वतालपुराधिपतेः वृषभसेनस्य सकटास्याभिधानके महोद्याने न्यग्रोधवृक्षस्याधः ध्यानयोग-मास्थाय केवलज्ञानं लब्धवानिति वृत्तान्तकथनं। तत्र वृत्तान्तमिममुपश्रुत्य समागतानां भरतादीनां जिनस्य आर्हन्तैश्वर्य्यमवलोकयतां प्रव्रज्यादिग्रहणविवरणकथनञ्च।

१० सर्ग—जिनस्य धर्म्मदेशनाकीर्त्तनं। तत्र दया, सत्यं, अस्तेयं, ब्रह्मचर्य्यं, अमोहता, पञ्चैतानि सूक्ष्मतया यतिधर्म्म इति स्थूलतया च गृहस्थधर्म्म इति निरूपणं। उक्तविधधर्म्मानु-ष्ठानेन च मोक्षो भवति। एतल्लक्षणो धर्म्मश्च श्रुतज्ञानात् जायते श्रुतज्ञानञ्च द्वादशाङ्गमिति-निरूपणं। तत्र अङ्गानि यथा,—पर्य्याय-अक्षर-पद-संघात-प्रतिपत्ति-अनुयोग-प्राभृतप्राभृत-प्राभृत-वस्तु-पूर्व्वाणि इत्यनेन श्रुतज्ञानविकल्पनिरूपणं। अत्र वर्णपदाद्यवान्तरभेदप्रपञ्चनञ्च। अथ पर्य्यायाङ्गे,—दृष्टिवादप्रदर्शनं। तत्र क्रियादृष्टिवादः तथाहि,—नियति-स्वभाव-काल-दैव-पौरुषैः सृष्टैः स्व-परनित्यानित्यैः योगे प्रत्येकं जीवाजीवादैः नवपदार्थस्य भेदाः विंशतिः। यथा,—

राज्यभारं निधाय तपश्चरणार्थं वनवासी बभूव। अथ तत्पुत्राभ्यां पौलोम-चरमाख्याभ्यां देवातीरे इन्द्रपुरसंस्थापनकथनं। पौलोमपुत्रेण महीदत्तेन कुलपुरसंस्थापनकथनं। ततः क्रमेण मत्स्य-अयोधन-माल-सूर्य-देवदत्तानां वृत्तान्तकथनं। देवदत्तपुत्रस्य मिथिलानाथस्य विदेहाधिपत्वकथनं। ततो मिथिलानाथपुत्रादीनां हरिषेण-शङ्कु-अभिचन्द्रादीनां विवरणकथनं। अथ अभिचन्द्रस्य वसुनामा पुत्रो बभूव। तत्पुत्राणां बृहद्वसु-महावसुप्रभृतीनां दशवसूनां विवरणकथनं। चीरकदम्बनामकस्य वेदविदुषः वसु-नारद-पर्व्वताभिधानाः त्रयः शिष्या अभवन्। तेषु पर्व्वतोऽसौ-चीरकदम्बस्य पुत्र आसीत्। अथैकदा वसुराजसभायां नारदपर्व्वतयोः शास्त्रार्थः संवृत्तः, तत्र नारदेन कर्म्मकाण्डीयवेदभागस्य निन्दितत्वे समर्थिते पराजयं प्रापिते च पर्व्वते वसुराजस्य पर्व्वतपक्षपातित्वेन तत्क्षणमेवाधःपतनवृत्तान्तकीर्त्तनञ्च।

१८, १९ सर्ग,—अथ मथुराधिपस्य यदोरुत्पत्त्यादिकथनं। ततः सूरस्य सुवीरस्य च उत्पत्तिकथनं। अथ सूरात् अन्धकवृष्ण्यादीनामुद्भवकथनं। सुवीराच्च भोजकवृष्ण्यादीनामुत्पत्तिकथनं। अन्धकवृष्णेः समुद्रविजय-वसुदेवादिदशपुत्रकथनं। कुन्तीमद्राभिधानकन्याद्वयजन्मकथनञ्च। भोजकवृष्णेस्तु उग्रसेन-महासेनप्रभृतयः पुत्रा बभूवुरितिकथनं। अथ सुवसोर्वंशे जरासन्धस्य जन्मकथनं। तत्पुत्राणां कालयवनादीनां जन्मकथनादिकं। अथ सुप्रतिष्ठनामकेन मुनीश्वरेण राजगृहोपस्थितानां देवानां वृष्णीनाञ्च पुरतः नमिभाषितधर्म्मदेशनाकथनं। तथाहि,—अहिंसा, सत्यभाषणं, अस्तेयं, ब्रह्मचर्य्यं निर्म्मूर्च्छा चेति पञ्चधा साधूनां महाव्रतानि। कायिकादिभेदेन त्रिविधगुप्तिकथनं। सर्व्वानिष्टप्रत्याख्यानरूपसमितिकथनं। देशतो हिंसादिनिवृत्तिरूपाणुव्रतकथनं। दिग्देशानर्थदण्डेभ्यो निवृत्तिरूपगुणव्रतकथनं। अतिथिपूजादिरूपव्रतकथनं। मांस-मद्य-मधु-द्यूत-वेश्यादित्यागरूपनियमकथनं। व्रतादीन्येतानि गृहिणामभ्युदयसाधनानीतिनिरूपणञ्च। तथा अनन्तभेदा जीवाः कर्म्मवशात् कुयोन्यादिषु जायन्ते इति कथनं। अथ पृथिवीसलिलादिषु जीवविभागसंख्यादिनिरूपणं। एकेन्द्रियादिपञ्चेन्द्रियपर्य्यन्तं जीवानां शरीरायुःप्रमाणादिकथनं। अन्धकवृष्णेः पूर्व्वजन्मवृत्तान्तकथनं। वसुदेवादीनां पूर्व्वजन्मकथनं। ततः अन्धकवृष्णिः समुद्रविजयाय राज्याभिषेकं वसुदेवञ्च समर्प्य सुप्रतिष्ठस्य अन्तेवासी बभूव। तथा-भोजकवृष्णिरपि मथुरायामुग्रसेनमभिषिक्तं विधाय निर्ग्रन्थव्रतं जग्राहेति विवरणकथनं। अथैकदा वसुदेवः समुद्रविजयस्य आदेशेन रमणीयोद्याने वसन् ततोऽन्यत्र निवृत्तगमनाभिलाषोऽसौ तत्रागतां ममालम्बनहस्ताम् कुब्जामेकां खलीकृत्य जहार। अथ 'कुमारचेष्टितैरीदृशैरेव त्वं बन्धनागारमीदृशं प्राप्तोऽसीति' साधिक्षेपं कुब्जया अवधीरितोऽसौ बन्धनमात्मनो विज्ञाय नृपं प्रति वीतस्पृहतया नगरात् निष्क्रम्य श्मशाने मृतकमेकं निजालङ्करणैरलङ्कृत्य च चितामध्ये तं निक्षिपन्नेवमुवाच 'आर्य्यस्तातसमो राजा पौराः सुखं जीवन्तु अहमद्य हुताशनं प्रविशामीति'। अथासौ बहुनैवमग्निप्रवेशनं प्रदर्श्य ततो विजयखेटाख्यं पुरं प्रययौ। तत्र च स गन्धर्व्वविद्याप्रवीणस्य सुग्रीवेतिनामधेयस्य कस्यचित् क्षत्रियस्य कन्ययोः सोमा-विजयसेनाभिधानयोः पाणिग्रहणं कृत्वा

विजयसेनायामक्रूरनामानं पुत्रं जनयित्वा च ततो कस्याञ्चित् महाटव्यां प्रविवेश। अथासौ विद्याधरकुमारयुगलप्रयत्नेन ततः कुञ्जरावर्त्तनामधेयं विद्याधरनगरमगच्छत्। तत्र च स श्यामाभिधानां विद्याधरकुमारीमुपयम्य कदाचित् तया समालिङ्गितोऽसौ अङ्गारकनामकेन केनचित् विद्याधरशत्रुणा हृतोऽपि आकाशमार्गात् भूमौ निपतन्नेव स्वपलुब्धाभ्यां यक्षकुमारीभ्यां चम्पानगरीं निन्ये। तस्मिंश्च चारुदत्ताभिधानेन केनचित् सञ्जातसौहार्द्दोऽसौ गान्धर्व्वविद्यारहस्योद्घाटनेन गन्धर्व्वसेनानामधेयायाः राजकुमार्य्याः पाणिपीड़नमकरोत्।

२०, २१ सर्गे,—उज्जयिनीनाथस्य श्रीधर्म्मराजस्य वलिः, वृहस्पतिः, नमुचिः, प्रह्लादश्चेति चत्वारो मन्त्रिण आसन्। अथासौ राजा सार्द्धं सचिवसङ्घेन आकम्पनादीन् जैनमुनीन् द्रष्टुमना नगरवहिरुद्यानमाययौ। तत्र च तेषां संसर्गेण निर्व्विदमापन्नः पद्मनामकं स्वतनयं राजपदप्रतिष्ठितं विधाय विष्णुकुमारनामकात् जैनमुनेर्दीक्षां जग्राह। अनन्तरमेकदा राजसिंहासनस्थितस्य पद्मस्य चित्तानुवर्त्तनेन प्रमादमापन्नस्य च 'सप्ताहं यावत् त्वं राज्येश्वरो भवेति' वलये वरदानपूर्व्वकमेकान्तस्थितस्य तस्य पुरतो वलिविप्रकृतैराकम्पनाचार्य्यादिभिः संप्रार्थितो विष्णुकुमार आजगाम। आगत्य च स बलिविचेष्टितं तस्मै निवेदयन् तस्यैवादेशेन बलिं सभाजयितुं हस्तिनागपुरं प्रति प्रचचाल। तत्र हि स बहुशोऽभ्यर्थनया मुनीनामवस्थानाय बलेः सकाशात् पादत्रयमितां भूमिं लब्ध्वा 'पाप पश्य मे पादत्रयं' इति व्याहरन्नेव महाकायतया ज्योतिश्चक्रमास्पृशन् पादेनैकेन मेरुं द्वितीयेन च मानुषोत्तरप्रदेशमाक्रम्य तृतीयस्यावकाशालाभात् प्रभावेणात्यर्थं क्षुभित इव बभौ। अथ सुरासुरप्रभृतिभिः सादरं प्रसाद्यमानोऽसौ शनैरेव महाकायं संहृत्य प्रकृतिमापेदे। अपि च तदनुज्ञया देवाद्यो बलिं बद्धा विनिगृह्य च दुरात्मानं तं देशान्निर्व्वासयामासुः। इति प्रसङ्गेन विष्णुकुमारचरित्रवर्णनपुरःसरं विस्तरेण चारुदत्तचरित्रकथनं। तत्र गणिकाकलिङ्गसेनादुहितुः वसन्तसेनाया विवरणादिकथनञ्च।

२२—२४ सर्गे,—अथैकदा फाल्गुनोत्सवे गन्धर्व्वसेनया सह वसुदेवस्य पार्श्वजिनेन्द्रप्रतिमापूजनाय तन्मन्दिरप्रवेशकाले स्वत्यन्तीं कामपि नीलोत्पलदलश्यामां कन्यां पश्यतो मनोविकारदर्शनेन ईर्ष्याकलुषितहृदया गन्धर्व्वसेना त्वरितं द्वारान्तरेण तं जिनेन्द्रसन्निधिं नीत्वा तेन सह स्तोत्रावल्या भगवन्तं तुष्टाव। अथ स्वगृहमागत्य पादपतनेन प्रियां प्रसादयतो वसुदेवस्य निकटे काचित् वृद्धा धरी, विद्या आजगाम। सा च दत्ताशीर्व्वादा कृतासनपरिग्रहा सती तमेवमाह राजन् श्रूयते चैवमायुष्मता यत् पुरा किल वृषभेश्वरो निजतनये भरते विन्यस्तराज्यभारः प्रव्रज्यां जग्राह। तदा खलु उग्रभोजाद्याः बहवो राजक्षत्रियाः तपसि निरता आसन्। तेषु नमि विनमिनामानावुभौ भ्रातरौ जिनभक्तस्य पादयोः निरतावभूतां तेन हि अत्यर्थं प्रसादमभ्युगच्छन् जिनभक्तोऽसौ दित्यदित्यभिधानाभ्यां तयोः पत्नीभ्यां विद्याकोषं प्रददौ। तत्र मनुमानव-कौशिक-गैरिक-गान्धार-भूमितुण्ड-आदित्य-व्योमचर-मातङ्गप्रभृतयोविद्याचार्य्या इतिकथनं। किञ्च, गौरी-प्रज्ञप्ती-रोहिणी-अङ्गारिणी महागौरी-महाश्वेता-मायूरी कालमुखीप्रभृतीनां

विद्यानां नामकथनं। तथा,—दैत्य-पन्नग-मातङ्गादिभेदेन अष्टौ विद्याधराः कथिताः, तत्र विद्यानां नाम्ना तेषां नामव्यपदेश इति कथनं। तथाहि गौरीणां गौरिक,कौशिकानां कौशिक इत्यादिना स्वयमूह्यं। तत्र विनमिकुलतिलकस्य मातङ्गाभिधानस्य विद्याधरपतेः गोत्रजाहं हिरण्यवती नाम। पार्श्वजिनेन्द्रदेवस्य पूजावसरे या खल्वायुष्मता अवलोकितपूर्व्वा नीलयशा नाम नर्त्तकी, सा हि मदङ्कलालितेति तस्यां प्रीतिर्मे नितरामस्ति। अथेयं भवद्दर्शनादारभ्य शून्येव हृदयेन परित्यक्तपानाशना सततमेव पुरतः स्फुरन्तं त्वामेव पश्यन्ती मदनेनातिभूमिं नीता। तदधुना दर्शनदानेन भवतैव कृतार्थीकर्त्तव्यस्तादृशो जन इत्युक्त्वा हिरण्यवती ततो निश्चक्राम। अथैकदा निशायां वेतालकन्यया अपहारितोऽसौ वसुदेवो विद्याधरपुराधिष्ठितं श्रीमन्तं नाम गिरिवरं प्राप्य तत्र नीलयशसः पाणिग्रहणं विधाय च पौरजनप्रमुखात् तस्या जन्मादिविवरणं शुश्राव। अथ नीलकण्ठरूपधारिणा नीलकण्ठाख्येन विद्याधरेण नीलयशोऽपहरणवृत्तान्तकीर्त्तनं। दीनवेशेन वसुदेवस्य देशभ्रमणकथनं। अथ सोमश्रीतिनामिकया कयाचित् कन्यया सह वसुदेवस्य विवाहकथनप्रसङ्गेन सगरपुरोहितकृतसामुद्रिकशास्त्रागमविवरणकथनं, तत्र विस्तरेण नराणां शुभाशुभलक्षणनिरूपणं। अथ वसुदेवस्य तिलवस्तुपुरगमनपूर्व्वकं राक्षसवधानन्तरं पञ्चशत-कन्यापाणिग्रहणवृत्तान्तकथनं। ततस्तस्य वेदसामपुरगमनपुरःसरं कपिलश्रुतिनामकं राजानं निपात्य तत्कन्यायाः कपिलायाः पाणिग्रहणवर्णनं। तस्याञ्च तस्य कपिलाभिधानपुत्रजननकथनञ्च। अथ वसुदेवस्य शालगुहापुरी-जयपुर-भद्रिलपुर-इलावर्द्धनपुरगमनपूर्व्वकं तत्रत्याभिः राजकुमारीभिः सह विवाहवर्णनञ्च।

२५—२८, सर्ग,—अथ इलावर्द्धनपुरपुरन्दरे दधिमुखेन सह वसुदेवस्य संवादेन कौरवान्वयसम्भूतस्य कार्त्तवीर्य्यस्य कामधेनुनिमित्तं जमदग्निनिपातनं, तथा परशुरामेण कार्त्तवीर्य्यनाशनादिविवरणकथनं। अथ परशुरामः (सप्तकृत्वः) निःक्षत्रियां पृथिवीमकरोदितिकथनञ्च। अत्रावसरे कार्त्तवीर्य्यार्ज्जुनमहिषी अन्तर्व्वत्नी आसीत्। सा हि जामदग्न्यभयेन प्रपलाय्य कौशिकस्य मुनेराश्रमे सुभौमनामकं पुत्रमेकं सुषुवे। अथासौ सुभौमश्चक्रेण जामदग्न्यस्य शिरश्छित्वा एकविंशतिवारान् अब्राह्मणां पृथिवीं चकारेतिवृत्तान्तकथनञ्च। मदनवेगया सह वसुदेवस्य विवाहवर्णनं। तस्यां तस्य अनाधृष्टिनामकपुत्रोत्पादनकथनं। अथ मदनवेगारूपधारिण्याः शूर्पनख्याः वसुदेवहरणपूर्व्वकमन्तरीक्षगमनं, ततो भस्मावरुद्धस्य तस्य परित्राणलाभानन्तरं कन्यापुरगमनपूर्व्वकं वेगवत्यभिधानया विद्याधरकुमार्य्या सह विवाहवर्णनञ्च। प्रसङ्गात् नमिवंशजातस्य विद्युद्दंष्ट्रस्य वृत्तान्तकथनं। विदेहनगरवास्तव्यस्य संजयन्तमुनेश्चरितकीर्त्तनं। पुरा किल श्रावस्त्यामेणीपुत्राभिधानः क्षोणीपतिरभूत्। तस्य हि प्रियङ्गुसुन्दरीतिसमाख्याता सुलक्षणा कुमारी बभूव। अथ वसुदेवस्तस्याः पाणिग्रहणेच्छया तत्पुरीमभ्युपेत्य वाह्योद्याने अवस्थितिं चकार। तत्र हि तस्य केनचित् विप्रेण सह संवादेन मृगध्वजमहिषोपाख्यानकीर्त्तनप्रसङ्गात् अलकापुराधीशसचिवस्य हरिश्मश्रुनामधेयस्य नास्तिकैकान्तवादिनो विवरणकथनञ्च।

२९—३२, सर्ग,—यावस्त्यां कामदेवगृहाख्यया प्रसिद्धस्य जैनमन्दिरस्य नामकारणकथन-मुखेन कामदत्तनामकश्रेष्ठिस्थापितरतिकामप्रतिमावृत्तान्तकथनं। अथ कामदत्तान्वयजातस्य कामदेवनामकश्रेष्ठिनः सम्पूर्णपूर्णचन्द्रमुखी बन्धुमती नाम कन्यका आसीत्। वसुदेवोऽपि प्रत्यहं कामदेवगृहं प्रविश्य जिनेन्द्रमभ्यर्च्य सरतिं रतिवल्लभमपूपूजत्। अथ सन्तुष्टेन कामदेवेन तस्मै बन्धुमती समर्पितेतिवार्त्तां राज्ञ एणीपुत्रस्य पुत्री निशम्य वसुदेवसौन्दर्य्यामृतं निपीय च नितरामनुरक्तेयं तत्पित्रा वसुदेवाय प्रदत्तेतिविवरणकथनं। एणीपुत्रस्य जन्मादिवृत्तान्तकीर्त्तनञ्च। गन्धसमृद्धनगराधिपतेस्तनयया प्रभावत्या सार्द्धं वसुदेवस्य विवाहवर्णनं। अथ तस्य म्लेच्छराजसुताया जरायाः पाणिग्रहणपूर्व्वकं तस्यां जरत्कुमारनामकपुत्रोत्पादनकथनं। अथ अरिष्टपुरपुरन्दरस्य रुधिरस्य तनयाया रोहिण्याः स्वयम्वरसभां समुद्रविजयजरासन्धादयो बहवो राजानः समाजग्मुः। तत्र वसुदेवोऽपि प्रावृतच्छिन्नवेशस्तस्थौ। अथ रोहिणी तस्यैव कण्ठदेशे वरमाल्यं प्रददौ। अथ बहुभिः राजन्यवर्गैस्तथा समुद्रविजयेन च सह तस्य युद्धे जयलाभकथनं। ततो विजयो 'वसुदेवोऽयमिति' प्रत्यभिज्ञाय भ्रातृस्नेहात् तमालिलिङ्गेतिविवरणकथनं। अथ रोहिण्याः शरच्चन्द्रनिभपुत्र एकः समजायत, स च सुतरामभिरामतया राम इति संज्ञामाप। अथ वसुदेवस्य परिणीताभिः सर्व्वाभिः सार्द्धं साकेतपुरीप्रत्यागमनमहोत्सववर्णनञ्च।

३३—३४,सर्ग,—अथैकदा धनुर्व्वेदविशारदैः स्वशिष्यैः कंसादिभिः सह वसुदेवो जरासन्धदिदृक्षया राजगृहं जगाम। तत्र च यो हि सिंहपुरवासिनं सिंहरथं जीवग्राहं गृहीत्वा मां दर्शयिष्यति तस्मै ईप्सितेन सार्द्धं देशेन सुतां मे दास्यामीति, घोषणां श्रुत्वा वसुदेवः कंसेन वीरपताकामग्राहयत्। कंसोऽपि गुरुप्रसादादेव सिंहरथं बद्ध्वा जरासन्धस्य पुरतस्समुपदीचकार। अथ कंसस्य जन्मवृत्तान्तकथनं। तत्र कौशाम्बीवासिन्या मद्यकारिण्या कयाचित् यमुनाप्रवाहे मञ्जूषाबद्धोऽयं प्राप्तः सुतनिर्व्विशेषेण प्रतिपालितश्चेतिकथनं। अथ जरासन्धः मञ्जूषां तामानाय्य तत्रोट्टङ्कितलिपिपाठेन पद्मावत्युग्रसेनयोः पुत्रोऽसाविति स्वभागिनेयाय तस्मै कन्यां जीवद्यशसं प्रददौ। अथ कंसोऽपि मथुरामभ्युपेत्य स्वपितरमुग्रसेनं कारागारे निक्षिप्य च राजपदप्रतिष्ठितोऽसौ वसुदेवमानीय स्वसारं देवकीं गुरुदक्षिणात्वेन तस्मै प्रायच्छत्। अथैकदा जरासन्धकुमारी जीवद्यशाः कंसमेवं प्राह मया अतिमुक्तकमुनेः प्रमुखात् श्रुतं देवक्या गर्भे यो हि भविता स खलु पत्युः पितुश्च ते मृत्युरिति। अथ निशम्यैतत् कंसेन वसुदेवं प्रतार्य्य प्रसूतिसमये वासो देवक्या मद्गृहेऽस्त्विति वरः प्रार्थितः सोऽपि अविज्ञाततत्त्वात्तस्मै वरं प्रददौ। अथ देवकीवसुदेवाभ्यां कंसज्येष्ठस्य अतिमुक्तकमुनेराश्रमगमनपूर्व्वकं स्वावस्थानिवेदनं। तत्र उग्रसेनकंसादीनां जन्मादिविवरणकथनं। देवकीसमाश्वासनञ्च। तत्र देवक्याः सप्तमे गर्भे शङ्खपद्मगदासिधारी जन्मग्रहणं विधाय कंसादीन् निहत्य च विशेषां क्षितिं भोक्ष्यतीतिकथनं। देवक्याः अन्येषां षण्णां पुत्राणां रामस्य च पूर्व्वजन्मवृत्तान्तकीर्त्तनं। तत्र नृपदत्त-देवपाल-अनीकदत्त अनीकपाल-शत्रुघ्न-जितशत्रुनामकदेवकीपुत्राणामकालमरणाभावकथनं। अथ जिनेन्द्रस्य अरिष्टनेमिचरितकथनप्रस्तावेन

महोपवासविधिकथनं। तत्र सर्व्वतोभद्रनामकतपोविधिनिरूपणं। अत्र हि उपवासाः ७५ + पारणाश्च २५एवं दिनानि मिलित्वा १००शतसंख्यकानि भवन्तीति ज्ञेयं। अथ महासर्व्वतोभद्रतपोविधिकथनं। अत्र हि उपवासाः १९६, पारणाश्च ४९। एवं दिनानि मिलित्वा १४५ पञ्चचत्वारिंशदुत्तरशतैकसंख्यकानीति। अथ त्रिलोकसारतपोविधिकथनं। अत्र उपवासाः ३०, पारणाश्च ११, एवं दिनानि मिलित्वा ४१ एकचत्वारिंशत्संख्यकानीति। एवं क्रमेण वज्रमध्यतपोविधिकथनं। मृदङ्गमध्यतपोविधिकथनं। मुरजमध्यतपोविधिकथनं। एकावलीतपोविधिः। द्विकावलीतपोविधिः। मुक्तावलीतपोविधिकथनं। रत्नावलीतपोविधिः। कनकावलीतपोविधिः। सिंहनिष्क्रीडिततपोविधानं। मेरुपंक्तिविधिः। विमानपंक्तिविधिः। (शा) सातकुम्भविधिकथनं। सप्तसप्तमतपोविधिः। तथा,—अष्टाष्टम-नवनवम-दशदशमदिद्वात्रिंशद्द्वात्रिंशत्तपोविध्यन्तानां विधानकथनं। अथ एककल्याण-पञ्चकल्याण-पञ्चविंशतिकल्याणाभिधानानां तपसां भावनादिविधिकथनं। अथ भाद्रशुक्लसप्तम्यां परिनिर्व्वाणाख्यविधिकथनं। भाद्रकृष्णषष्ठ्यां सूर्य्यप्रभाख्यविधिः। तत्र त्रयोदश्यां चन्द्रप्रभनामकविधिकथनं। एवं कुमारसम्भव-सुकुमार-सर्व्वार्थसिद्धिप्रभृतीनां विधिकथनं। तथा,—जिनकथिते मोक्षमार्गे निःशङ्काद्यष्टगुणा श्रद्धा दर्शनविशुद्धिरित्याख्यायते एतदनुष्ठानेन च तीर्थकरस्यैव प्रकृतिर्भवतीतिकथनं। ज्ञानादिषु ज्ञानादिवत्सु च कषायविनिवृत्त्या महान् आदरो विनयसम्पन्नता स्यः। तथा शीलव्रतरक्षायाम् अनवद्या कायमनोवचनवृत्तिः, अनतिचाराभिधानः। तथा जन्म-जरा-मरणामय-मानस-शारीरदुःखसम्भारात् संसारात् भीरुत्व संवेग इति कथ्यते। इत्यनेन प्रकारेण ज्ञानयोग-त्याग-मार्गानुगावेश-समाधि-वैयावृत्य-वन्दनाप्रतिक्रमण-कायोत्सर्ग-मार्गप्रभावन-प्रवचनवत्सलतादिलक्षणकथनञ्च।

३५—३७,सर्ग,—अथ देवक्या युग्मपुत्रजनने देवानां तत्र मृतपुत्रयुग्मस्थापनपूर्व्वकं तत्पुत्रद्वयग्रहणानन्तरम् अलकागमनकथनं। कंसस्तु तन्मृतपुत्रद्वयं गृहीत्वा शिलातले ताडितवानितिकथनं। एवं वारत्रयेण देवक्याः षट्पुत्रजननं देवैश्च रक्षणं, कंसस्य तु मृतकस्य शिलातले मृतपुत्रताडनञ्चेति विवरणकथनं। अथ देवक्याः सुस्वप्नदर्शनपूर्व्वकं गर्भधारणकथनं। भाद्रशुक्लद्वादश्यां शङ्खचक्रादिलाञ्छितस्य अधोक्षजस्य देवकीपुत्रत्वेन जन्मग्रहणकथनं। अथ वसुदेवः स्वपित्रा धृतातपत्रं कृष्णमङ्के निधाय दीप्तशृङ्गेन वृषभरूपधारिणा नगरदेवेन प्रदर्शितमार्गोऽसौ भगवत्प्रभावेण क्षीणप्रवाहां यमुनामुत्तीर्य्य नन्दालयमभ्युपेत्य च तत्कन्याग्रहणपूर्व्वकं तत्स्थाने श्रीकृष्णं संस्थाप्य त्वरितमेव मथुरामाजगामेति वृत्तान्तकीर्त्तनं। अथ कंसस्य देवक्याः सूतिकागारं प्रविश्य 'कदाचिदमुष्याः पतिरस्मि भवे'दिति शङ्कया तां कन्यां समादाय नासिकाच्छेदनपूर्व्वकं ताडनवृत्तान्तकीर्त्तनं। अथ कृष्णस्य पूतनाशकटासुरवध-यमलार्ज्जुनमोचन-गोवर्द्धनधारणादिवृत्तान्तकथनं। अथैकदा देवक्या नन्दालयगमनपूर्व्वकं श्रीकृष्णदर्शनवृत्तान्तकथनं। अथ बलदेवकृष्णाभ्यां मथुरागमनपुरःसरं केशि-गज-चाणूरमुष्टिकनिपातनवृत्तान्तकथनं। अथ कंसवधानन्तरं उग्रसेनाय राज्यदानवृत्तान्तकथनं। रजताद्रिनाथस्य सुकेतोः कन्याभ्यां रेवतीसत्यभामाभ्यां सह

रामकृष्णयोर्विवाहकथनं। अथ जरासन्धस्य दुहितृपरिदेवितेन अत्यर्थं सन्तप्तहृदयस्य रामकृष्ण-निधनार्थं कालयवनाभिधाननिजपुत्रप्रेरणं तथा अतुलमालावर्त्तनामकपर्व्वते रामकृष्णाभ्यां तस्य निधनवृत्तान्तकथनञ्च। अथ जरासन्धप्रेरितस्य तद्भ्रातुरपराजितस्य ताभ्यां पराजयकीर्त्तनं।

३८—४०, सर्गे,—अत्रावसरे कुबेरपत्न्याः शिवाया सुस्वप्नदर्शनादिवृत्तान्तकथनं। तद्गर्भे अरिष्टनेमिनामकस्य जिनेन्द्रस्य जन्मवृत्तान्तकथनं। पूर्व्ववत् पुरन्दरादिवृन्दारकवृन्दैरभ्यर्थितया पुरन्दरसुन्दर्य्या शिवातनयग्रहणपूर्व्वकं तेभ्यः समर्पणविवरणकथनं। अथ तेषां सुमेरुशिखरनीतस्य शिशोरभिषेकनामकरणादिकरणविवरणकथनं। अथ शक्रेन महेन्द्रकृतजिनेन्द्रस्तोत्रकथनादिकञ्च। अथ जरासन्धः भ्रातुर्निधनवार्त्तां श्रुत्वा क्रोधेन ज्वलन्निव यदुकुलनिधनाय सार्द्धं चतुरङ्गबलैः मथुरामुद्दिश्य प्रययौ। वृत्तान्तमिममाकलय्य तच्चाजेयमिति मत्वा वृष्णिभोजयादवादयः सर्व्वे सार्द्धं प्रियजनैः वारुणीं दिशमुद्दिश्य गन्तुमारेभिरे। अथ जरासन्धोऽपि तेषामनुगामी बभूव। अथैकदा यादवादयः सर्व्वे विन्ध्यगिरिसुप्रान्तस्थितसामाद्य जरासन्धश्चानुवर्त्तन्तं निशम्य च युयुत्सया तं प्रत्यैच्छन्त। तदा खलु दैवनियोगेन भरतार्द्धनिवासिभिः दिव्यसामर्थ्यादेव बहुशश्चिता निर्म्मिताः। अत्रान्तरे समुपस्थितोऽसौ जरासन्धः ज्वालामालाभिर्द्दह्यमानमिव यादवबलं पश्यन् तत्रागतां वृद्धामेकामपृच्छत्। 'भद्रे विपुलः कस्यायं स्कन्धावारो दह्यत इति। सा च यादवशिचितैवमुवाच, देव श्रूयतां, राजगृहाधिपतेरमितप्रभावस्य जरासन्धस्य प्रभावेण सशल्यहृदयानां शान्त्यै सागरमाश्रितानामपि यादवानां तमासन्नवर्त्तिनं विज्ञाय सबलानां तेषां वह्निप्रविष्टानां चितराजिरियं पुरतो दृश्यत इति। अथ निशम्य जरतीवाक्यमेवं विस्मितोऽसौ सह सुहृज्जनैः प्रतिनिवृत्य च राजगृहमाजगाम। अथ यादवोऽपि उपकण्ठमुदन्वतः कृतनिवेशना यथा सुखमवतस्थिरे।

४१—४४, सर्गे,—द्वारकानिर्म्माणं। श्रीकृष्णस्य राजन्यवर्गकन्यापरिणयनकथनं। नेमिकुमारसंवर्द्धनविवरणं। नारदस्य द्वारवत्यामागमनकथनमुखेन तस्य जन्मविवरणकीर्त्तनं। तत्र दौर्य्यपुरनिवासिन उञ्छवृत्तेः सुमित्राभिधेयस्य तापसस्य पुत्रोऽयं देवानामनुग्रहेण अष्टमे वर्षे सरहस्यजिनागममधीत्य अधिगम्य च आकाशगामिनीं विद्यां साधुनिषेवया संयमासंयमं लेभे-इति वृत्तान्तकथनं। नारदस्योपदेशेन श्रीकृष्णस्य रुक्मिणीहरणविवरणकथनं। अथैकदा श्रीकृष्णेन रुक्मिणीमुखनिष्ठ्यूतं ताम्बूलसंशकलेन संगोप्य ईषत्कषायितायाः सत्यभामायाः शयनमन्दिरंगतेन तेन तद्गन्धवस्त्विति' बुद्ध्या अपहरन्ती सेयं परिहसिता आग्रहातिशयेन रूपिणीं देवतामिव रुक्मिणीं निरूप्य विकीर्य्य च कुसुमाञ्जलिं पादयोस्तस्याः स्वसौभाग्यमयाचतेति वृत्तान्तकथनं। अथ रुक्मिण्याः पुत्रजननानन्तरं धूमकेतुनामकेनासुरेणापहृतस्तनयोऽस्याः खदिराटव्यामश्मतलशिलायाः स्थापितोऽसौ मेघकूटधराधिपस्य कालसम्बराख्यस्य राज्ञो महिष्या कनकमालया समधिगतः पुत्रनिर्व्विशेषेण प्रतिपालितश्चेति वृत्तान्तकीर्त्तनं। अथ नारदस्योपदेशेन पुत्रवार्त्ताजिज्ञासया तमेव श्रीकृष्णः प्रेरयामास इति विवरणकथनं। ततो नारदस्य विदेहवासि-सीमन्धर-

जिनेन्द्रसमीपगमनपूर्व्वकं तन्मुखात् मधुकैटभावेव प्रद्युम्नशाम्बरूपेण जन्मान्तरं प्राप्ताविति विवरणं श्रुत्वा तदादेशेनैव मेघकूटगमनपुरःसरं प्रद्युम्नदर्शनादिवृत्तान्तकथनं। सत्यभामातनुजस्य भानोर्जन्मकथनं। अथ नारदस्योपदेशेन जम्बूपुराधिपस्य जाम्बवस्यात्मजां जाम्बवतीं नाम्ना हृत्वा तद्भ्रात्रा विष्वक्सेनेन सह श्रीकृष्णस्य द्वारकायां प्रत्यागमनकथनं। अथ कृष्णेन सिंहलेश्वरदुहितुः लक्ष्मणायाः पाणिग्रहणविवरणकथनं। अथ श्रीकृष्णस्य सौराष्ट्रगमनपूर्व्वकं नमुचिं निहत्य तद्भगिन्याः सुसीमायाः पाणिग्रहणकीर्त्तनं। एवं क्रमेण श्रीकृष्णस्य गौरी-पद्मावती-गान्धारीप्रभृतीनां पाणिग्रहणवृत्तान्तकीर्त्तनं। हलिनस्तु रेवती-बन्धुवती-सीता-राजीवनेत्राणां पाणिपीडनकथनं।

४५—४६, सर्ग,—युधिष्ठिरादीनां जन्मकथनमुखेन कुरूणां वंशावलीकथनं। तत्र नाभेयसमकालीनयोः हास्तिनपुराधिपयोः श्रेयःसोमप्रभयोः वृत्तान्तकथनं। तत्र सोमप्रभपौत्रस्य कुरोः कुरुवंशप्रवृत्तिकथनं। ततः क्रमेण तद्वंशीयानां कुरुचन्द्र-धृतिकर-धृतिमित्र-धृतिदृष्टि-भ्रमरघोष-हरिघोष-सूर्य्यघोष-पृथुविजय-जयराज-सनत्कुमार-सुकुमार-नारायण-नरहरि-शान्तिचन्द्र-सुदर्शन-सुचारु-चारु-पद्ममाल-वासुकि-वसु-वामदेव-इन्द्रवीर्य्य-विचित्रवीर्य्य-चित्ररथ-पारशरशान्तनु-धृतकर्म्मादीनां नामादिकथनं। अथ धृतपुत्रस्य धृतराजस्य अम्बाम्बालिकाम्बिकेतिसमाख्यास्तिस्रः प्रियाङ्गना आसन्निति कथनं। तासु धृतराष्ट्र-पाण्डु-विदुराणां जन्मकथनं। सुयोधनयुधिष्ठिराद्यत्यन्तादीनां जन्मादिकथनं। अथ निर्व्वासितानां गृहदाहमुक्तानां पाण्डवानां वेशपरिवर्त्तनपूर्व्वकं कौशिकपुरी श्लेष्मातकवसुन्धरापुरादिगमनविवरणकथनं। तत्र युधिष्ठिरस्य वसन्तसुन्दरीसमागमलाभवर्णनञ्च। अथ सभ्रातृकस्य तस्य त्रयङ्गपुरगमनपूर्व्वकं प्रभा-सुप्रभा-पद्मादीनां राजकुमारीणां पाणिग्रहणवृत्तान्तकथनं। हिडिम्बादिसंवादकथनं। ततः पार्थानां द्रुपदराज्यगमनपूर्व्वकं द्रौपदीलाभविवरणकीर्त्तनं। द्यूते पराजितानां पाण्डवानां वनवासादिवृत्तान्तकथनं। अथ तेषां रामगिरिगमनानन्तरं रामलक्ष्मणप्रतिष्ठितजैनालयादिदर्शनविवरणकथनं। ततो विराटनगरस्थितानां तेषां वेशपरिवर्त्तनादिवृत्तान्तकथनं। द्रौपदीलुब्धस्य कीचकस्य भीमात् परित्राणलाभानन्तर तपश्चर्य्यया निर्व्वाणकथनं। द्रौपदीकीचकयोः पूर्व्वजन्मवृत्तान्तकीर्त्तनञ्च।

४७—५२ः सर्ग,—प्रद्युम्नचरितकीर्त्तनं। तस्य विविधालङ्करण-कुसुमबाण-कुसुमशयनादिलाभविवरणकथनं। सम्बरनिग्रहकथनं। तद्गृहस्थितायाः दुर्य्योधनदुहितुः कनकलताया वृत्तान्तकथनं। प्रद्युम्नस्य कनकलतालाभपूर्व्वकं नारदोपदेशेन द्वारकामुद्दिश्य प्रचलतः रामकृष्णाभ्यां युद्धवर्णनं। ततः नारदप्रमुखात् लब्धपरिचयस्य तस्य द्वारकापुरीप्रवेशमहोत्सवादिवर्णनं। साम्बस्य जन्मादिविवरणकथनं। अक्रूरादीनां श्रीकृष्णपुत्राणां नामादिकथनं। तथा यदुकुलकुमाराणां प्राधान्येन प्रत्येकं नामकथनं। तेषाञ्च सार्द्धत्रिकोटिसंख्याकथनं। यशोदातनुजायाः कंसनिगृहीतायाः दुर्गायाः पूर्व्वजन्मादिविवरणकथनं। जिनसेवया तस्या निर्व्वाणप्राप्तिकीर्त्त

नञ्च। अथ कृष्णमभियोधयितुं मवन्तय जरासन्धस्य द्वारकागमनवृत्तान्तकथनं। यादवमागधयोः युद्धे समवेतानां तदुभयपक्षमाश्रितानां प्रत्येक नामादिकथनं। तत्र महासमरवर्णनं। कृष्णकृत-जरासन्धवधवर्णनञ्च। अथ जरासन्धस्य निधनानन्तरं द्रोणदुर्योधनदुःशासनादीनां निर्वेदमापन्नानां विदुरसमीपात् जैनदीक्षादिग्रहणकथनं। कर्णस्तु यत्र सुदर्शनोद्याने कर्णकुण्डलं विहाय दमवरसमीपात् जैनदीक्षां जग्राह, तत्स्थानं कर्णसुवर्णाख्यया सुविख्यातमितिकथनं।

५३—५४, सर्ग.—जरासन्धप्रभृतीनां यादवानामानन्दस्थानतानन्दपुरमित्याख्यं जैनमन्दिरसुन्दरं जातमितिकथनं। अथ श्रीकृष्णस्य दक्षिणदेशादिविजयवर्णनं। तेन च महदेवाय यदुवंशीयाय राजगृहपुरम्, उग्रसेनसुताय माथुरं, पाण्डवेभ्यः हास्तिनपुरं, रुक्मनाभाय कोशलपुरञ्च दत्तमितिकथनं। अथैकदा नारदस्योपदेशेन धातकीखण्डभारतान्तर्गतामरकङ्काभिधानपुराधिपस्य पद्मनाभस्य द्रौपदीहरणवृत्तान्तकथनं। अनन्तरं विदितवृत्तान्तानां पाण्डवानां सार्द्धं बलकेशवादिभिर्यदुबलैश्च देवरथसाहाय्येन लवणाम्बुधिमुत्तीर्य्य तत्पुरं समुपस्थितानां तेषां द्रौपदीपुनरुद्धारविवरणकथनं। अथ भूय एव तेनोपायेन सागरमुत्तीर्य्य वेलायां समागतानां मलयभूधरशोभादर्शनेन हृतचित्तानां तेषां तत्र मथुराभिधानपुरीनिर्म्माणपूर्व्वकमवस्थानादिविवरणकथनं।

५५—५६, सर्ग.—बाणदुहित्रा उषया सह प्रद्युम्नतनयस्य अनिरुद्धस्य विवाहादिवर्णनं। श्रीकृष्णस्य रुक्मिण्यादिभिः सह रैवतकविहारवर्णनं। नेमिजिनस्य वैराग्योत्पत्तिविवरणकथनं। इन्द्रादिभिः सुरनिकरैस्तस्य अभिषेकानुष्ठानवृत्तान्तकथनं। अथ बलकेशवादिभिर्निषिध्यमानोऽपि जिननेमिस्तपश्चरणाय गिरिराजं जगामेतिविवरणकथन। तत्र जिनस्य ध्यानानुष्ठानकथनप्रसङ्गेन ध्यानस्वरूपकथनं। तत्र अस्थिरस्य मनसो घनसंहननतया एकाग्रचिन्ताया अन्तर्निरोधो ध्यानमितिनिरूपणं। तच्च दुःखविघाताय अनुष्ठेयं। ध्यानञ्चार्त्तं रौद्रञ्चेति द्विविधं। तत्र वाह्यमान्तरञ्चेति तद्द्वैविध्यं। वाह्यञ्च आक्रन्दनादिकं। आन्तरन्तु चतुर्भेदं यथा, अनादेयस्य विषयस्य अनुत्पत्तिचिन्तनं, उत्पन्नस्य च तस्य वियोगचेष्टा, तथा मनोज्ञवस्तुविप्रयोगस्यानुत्पत्तिचिन्तनं, उत्पन्नस्य च तद्वियोगस्य अन्तचिन्ता चेति। तत्र अनुपादेयदुःखस्य साधनं चेतनादिकमिति ज्ञेयं। तच्च वाह्यविषशस्त्रादिकम्। आध्यात्मिकं वातादिप्रकोपजं शारीरं दन्तशूलादिनिबन्धनं। मानसञ्च शोकदौर्मनस्यादिकमिति चतुर्व्विधं। सर्व्वस्यास्य अमनोज्ञस्य उत्पत्तिर्माभूदितिचिन्ताप्रबन्ध आर्त्तध्यानमिति ज्ञेयं। एतत्तु मलाविलमिति समाख्यातं। संकल्पाध्यवसानरूपं द्वितीयन्तु उत्पन्नस्यामनोज्ञस्यास्य कथमभावः स्यादिति। अथ मनोज्ञस्य पुत्रकलत्रधनधान्यादेः सुखसाधनत्वं वाह्यमिति ज्ञेयं। आध्यात्मिकञ्च तत्पित्तादिसाम्येन आरोग्यादिकं। मानसं खलु सौमनस्यादिरूपमिति। अथ ऐहिकामुत्रकस्य मनोज्ञस्य वस्तुनो विप्रयोगो माभूदितिसंकल्पस्तृतीयमार्त्तध्यानं विज्ञातव्यं। अथ पूर्व्वोत्पन्नस्य मनोज्ञविप्रयोगस्य अभावे अध्यवसान चतुर्थमार्त्तध्यानमिति। अथ रौद्रस्य ध्यानस्य हिंसा-संरक्षण-स्तेय-मृषानन्दभेदेन चातुर्व्विध्यकथनं। तत्र

हिंसादिषु यथाक्रमनभिरुचिः हिंसानन्दादय इति ज्ञेयं। अथ सुमुनयः परिहृत्य आर्त-रौद्रे द्वे पापध्याने भावशुद्धिसाधनेन योगमभ्यस्य धर्मध्यानं कुर्य्युरिति। धर्म्मश्च बाह्याध्यात्मिकभावानां याथात्म्येन अध्यवसाय इति तथा धर्म्मादनपेतं ध्यानं धर्म्मध्यानमिति च ज्ञेयं। तच्च बाह्याध्यात्मिकभेदेन द्विविधं। तत्र सूत्रार्थमार्गणशीलगुणादिष्वनुरागिता बाह्यं। आध्यात्मिकमपि अपायविचयादिभेदेन दशविधं। तत्र संसारहेतूनां प्रवृत्तीनां कथं वर्ज्जनं स्यादिति चिन्ताप्रबन्धसम्बन्धः अपायविचयं नाम प्रथमं। पुण्यानां प्रवृत्तीनामात्मसात्करणार्थं संकल्पसन्ततिरुपायविचयं नाम द्वितीयं। जीवानामनादिनिधनत्वस्योपयोग-स्वलक्षणत्वादिचिन्तनं जीवविचयं नाम तृतीयं। तथा स्याद्वादप्रक्रियावलम्बनेन तर्कानुसारिणः पुंसः सन्मार्गाश्रयणं हेतुविचयमिति क्रमेण अजीवविचय-विपाकविचय-विरागविचय-भवविचय-संस्थानविचय-आज्ञाविचयानां स्वरूपकथनं। अथ शुक्लध्यानञ्च शुक्लं, परमशुक्लञ्चेति द्विविधं। तत्र प्रथमं तावत् यत्र खल्वर्थादिषु वितर्कस्य पृथक्त्वेन वीचारोऽस्ति तल्लक्षणं। वीचारश्च अर्थव्यञ्जनयोगानां क्रमेण संक्रमः। तत्रार्थो ध्येयो व्यञ्जनं शब्दो योगश्च वागादिलक्षण इति निरूपणं। तदनेन ध्यानेन अविक्षिप्तमानसो मुनिः मोहस्योपशमं कुर्व्वन् द्रव्याणुमेकमेवावलम्ब्य द्रव्याद् द्रव्यान्तरं याति। द्वितीयन्तु यत्र वीचारहीनेषु अर्थादिषु एकत्वेन वितर्कोऽस्ति तल्लक्षणं तदनेन परमशुक्लध्यानेन योगी ज्ञानदर्शनसम्यक्त्ववीर्य्यचारित्रपूर्व्वकैः भावैः स्वकर्म्मक्षयेण अनन्तसुखावहं मोक्षं प्राप्नोतीतिनिरूपणं। अथ नेमिजिनः षट्पञ्चाशदहोरात्रकालं यावत् तपस्यां कृत्वा शुक्लध्यानाग्निना घातिकर्म्ममहावनं दग्ध्वा च जैनकैवल्यं प्रापेति विवरणकीर्त्तनं।

५७ सर्ग,—जिनानां समवस्थानभूमिवर्णनं। तत्र भूमिनिरूपणं। उद्यान-सरोवरगृहादिनिरूपणञ्च। अथ वरदत्ताभिधानेन गणिना पृष्टस्य जिनदेवस्य तस्मै उपदेशप्रदानविवरणं। तत्र भगवतो वाणी एका दिनवास्पदा बभूव। तथा हि,—एकात्मस्वरूपकथनात् तद्वाणी एकरूपा। एवं द्विधर्म्मकथनात् द्विरूपा। रत्नत्रयप्रकाशनात् त्रिरूपा। चतुःकषायनाशनात् चतूरूपा। पञ्चास्तिकायप्ररूपकत्वात् पञ्चरूपा। षड्द्रव्यप्रकाशकत्वात् षड्रूपा। सप्तभङ्गीप्ररूपणात् सप्तरूपा कर्म्माष्टनाशनात् अष्टरूपा। नवनयप्ररूपणात् नवरूपा चेति। अथ जगतो भावाभावरूपत्वकथनं। निर्व्विकल्पभावत्वकथनं। अहेतुत्वकथनं। नन्वनादेः क्षित्यादिकार्य्यपरम्परायाः कर्तृत्वेन सहेतुकत्वसिद्धिः तथाहि क्षित्यादिकं सकर्तृकं कार्य्यत्वाद्घटवदिति तदप्यसमीचीनं कार्य्यत्वस्यैव असिद्धेरिति। अनादित्वकथनं। अपरिणामित्वकथनञ्च। आत्मपरलोकधर्म्माधर्म्मादीनामस्तित्वकथनं। आत्मनश्च कर्तृत्वभोक्तृत्वादिकीर्त्तनञ्च। तथा आत्मनः अस्तिनास्तीतिषट्प्रकारप्रदर्शनं। अथ आत्मनः अविद्यया संसारबन्धः, विद्यया च तस्माद्विमुक्तिरितिकथनं। किञ्च सम्यग्दर्शनज्ञानचारित्रत्रितयस्यैव सिद्धेत्वादनेन मोक्षहेतुत्वनिरूपणञ्च। जीव-अजीव-आस्रव-बन्ध-सम्वर-निर्ज्जर-मोक्षरूपसप्ततत्त्वकथनं। अथ ज्ञानेच्छाद्वेषप्रयत्नसुखदुःखादीनामात्मलिङ्गत्वकथनं। अथ पृथिव्यादिभूतानां संस्थानविशेषोऽयं जीवः तथा पिष्टकिण्वादिभ्यो मदशक्तिवत् चैतन्यमुत्पद्यते—

इति चेन्न शरीरस्य चैतन्यव्यभिचारित्वादित्यनेन चार्व्वाकमतखण्डनं। नापि संवित् मात्रमात्मा-तथा हि—क्षणिकात्मनि संवित्तौ प्रत्यभिज्ञानव्यवहारविलोपः स्यादिति क्षणिकविज्ञानवाद-खण्डनं। तथाप्यमात्मा नाणुमात्रको नापि अङ्गुष्ठादिपरिमाणकः, तथात्वे सकलैः प्रदेशैः सह चक्षुरादिवत् न स्वार्थं प्रतिपद्येत। अथासौ विभुरपि भवितुं नार्हति; यतस्तस्य तथात्वे ज्ञानस्यार्थे दूरनिकटादिव्यवहाराय जलाञ्जलिर्दीयतां। अत एव देहमात्रपरिमाणोऽयमात्मेति सुक्तं। किञ्च सप्तसु पदार्थेषु संक्षेपतो जीवाजीवाख्ये द्वे तत्त्वे तत्र बोधात्मको जीवः, अबोधा त्मकस्त्वजीवः। तत्र अजीवस्य आकाशधर्म्माधर्म्मपुद्गलकालास्तिकायभेदेन पञ्चविधत्वं। अस्ति-कायत्व,—पञ्चसु तत्त्वेषु कालत्रयसम्बन्धितया अस्तिव्यपदेशः, शरीरवदनेकप्रदेशत्वेन कायव्यप-देश इति। अथ जीवा द्विविधाः संसारिणो मुक्ताश्च। संसारिणोऽपि द्विविधाः समनस्का अमन-स्काश्च। तत्र शिक्षाक्रियालापग्रहणरूपसञ्ज्ञा येषामस्ति ते सञ्ज्ञिनः समनस्काः, एतद्विधुरास्त्व-मनस्काः। तत्र नयादिभिरुपायैः प्रतिपत्तव्योऽयं जीवः। अथ अनेकात्मनि द्रव्ये नियतैकात्म्य-सङ्ग्रहो नय इत्युच्यते। अयं हि द्रव्यार्थिकपर्य्यायार्थिकभेदेन द्विविधः। तयोश्च नैगम-सङ्ग्रह-व्यवहार-ऋजुसूत्र-शब्द-समभिरूढ़ावम्भूता षड्विधत्वनिरूपणं अथ पूरयन्ति गलन्तीति पुद्गलास्ते च द्विविधाः अणवः स्कन्धाश्च। अथ कायवाङ्मनसां कर्म्मयोग आस्रव इति कथ्यते, तथा हि—यथा, जलावगाहद्वारं नद्याः स्रवणकारणत्वादास्रव इति निगद्यते तथा योगप्रणालिकया कर्म्म आस्रवतीति स योग आस्रवः। स च सकषाय-अकषायभेदेन द्विधा। तत्र कषन्ति हिनस्ति च आत्मानं कुगतिप्रापणादिति कषायः। अथ सकषायत्वात् जीवः कर्म्मभावयोग्यपुद्गलानादत्ते—इत्यतः कर्म्मबन्धयोग्यानां सम्बन्धं यत्करोति ततः सम्बन्ध इति निगद्यते। अथ पुनरपि शुभाशुभभेदा-दास्रवो द्विविधः, तत्र अहिंसादिः शुभकाययोगः सत्यभाषणादिः शुभरागयोग इत्यादिकं। अथ आस्रवयति पुरुषं विषयेष्विन्द्रियप्रवृत्तिरप्यास्रव इति चोच्यते। तत्र च साम्परायिकी-कायिकी-आध्यात्मिकी-प्रत्ययिकी-नैसर्गिकीभेदेन पञ्चविधक्रियानुप्रवेशकथनं। अथ ताः क्रिया अपि-प्रत्येकं पञ्चविधा इति मिलित्वा पञ्चविंशतिप्रकारक्रियालक्षणकीर्त्तनं। इति सामान्येन कर्म्मास्र-वाणां भेदप्रदर्शनपूर्व्वकं प्रत्येकं विशेषकार्य्यनिरूपणं। अथ पूर्व्वोक्ताहिंसासुन्दतास्तेय-ब्रह्मचर्य्याप-रिग्रहरूपस्य सह व्रतसंज्ञाकथनं। अथ संसारकारणादात्मगोपनं गुप्तिः। सा च त्रिधा कायवाङ्-मनो नग्रहभेदात्। गुप्त्याद्युपायरक्रतसाधनेन मिथ्यादर्शनविरतिप्रमादकषायाणां बन्धहेतूनां निवृत्तिकामो व्रती इत्युच्यते। अथासौ सागार-अनागारभेदेन द्विविधः। अथ अहिंसाद्यनुव्रतस्य प्रत्येकं लक्षणकथनपूर्व्वकं गृहस्थस्य उत्कर्षेयतानियमकथनं। अथ सम्यग्ज्ञानदर्शनचारित्राणां रत्नत्रयाणां प्राप्यप्रापकथनं। तत्र जीवादीनां यथावस्थ मोहसंशयादिराहित्येन अवगमं सम्यग्ज्ञानं। एतज्ज्ञानं पञ्चविधं मति-श्रुत-अवधि-मनःपर्य्याय-केवलभेदात्। संसरणकर्म्मोच्छि-त्तावुद्यतस्य श्रद्दधानस्य ज्ञानवतः पापगमनकारणनिवृत्तिः सम्यक्चारित्रं। तत्र अहिंसादिभेदेन पञ्चधा। येन रूपेण जीवाद्यर्थो व्यवस्थितस्तेन रूपेण अर्हज्जिनप्रतिप इति ये श्रद्धानं सम्यग्दर्शन-

the root of sacred trees. Regions of Indra and others. The census of their inhabitants.

Description of Vyántara lokas. The number of Jaina temples therein. Various kinds of kings who dwell therein—such as Kinnara, Kimpurasha, Mahoraga &c. Trees fit for Chaityas; these are Aśoka, Champaka, Nágakeśara, Tumbura, Vaṭa, Asvattha, Tulasí and Kadamba. Jambudvipa stands to the east of the Vyantara region.

Description of Jyotir loka. In this chapter are given accounts of the celestial luminaries, and casually of the 16 continents or great islands, Jambudvipa, Ghátaki-khaṇḍa-dvipa, &c. Sixteen other continents. Characters of the different oceans connected with the continents. Stars and planets, their distance from each other. Planets reckoned at 88, their names. The paths, motions, dimensions &c. of the sun and the moon. Night and day, their causes and those of their decrease and increase. Intercallary months. Equinoxes, and other details regarding the motions of the earth.

Description of Vimána loka, or the region of the Devas. Devas and Jaina worship there.

Sacred places in the Nara loka. This includes notices of a great number of sacred places on earth and their presiding divinities.

Characteristics of emperors and their belongings. Descriptions of various distinguished Jaina emperors of India.

Description of the salt ocean and its belongings, including various sacred places therein.

The Sanskrit contents given below will be found fuller and more detailed.

Beginning बलगोविंदसिहामणि-किरणकलावरुणचरणणहकिरणं ।
विमलयरणेमिचंदं तिहुवणचंदं णम सामि ॥ १ ॥
भवणाब्वेनं तरजेदिस विमाणणरतिरिय लोयजिणभवणे ।
सब्बामरिन्द णरवइ संपूजियवन्दि एवं दे ॥ २ ॥
सर्व्वागासमनन्तं तस्सय वहुमज्झदेसभागयि ।
लोगोसंखपदेसो जगसेढिघणप्पमाणोउ ॥ ३ ॥

टीकायाः । त्रिभुवनचन्द्रजिनेन्द्र भक्त्यानत्य त्रिलोकसारस्य ।
वृत्तिरयं किञ्चिज्ज्ञ-प्रबोधनाय प्रकाश्यते विधिना ॥
जीयादकलङ्कादिः सूरिर्गुणभूरिरतुलदृषधारी ।
अनवरतविनतजिनमतविरोधिवादिव्रतो जगति ॥

यस्मादखिलबुधानां विस्मयकृद्भूत्प्रवृत्तिरिह यस्य ।
तच्छासनमपनुदतादनघं घनकुमतितिमिरनिवहमदः ॥

श्रीमदप्रतिहताप्रतिमनिःप्रतिपक्षनिःकरणभगवन्नेमिचन्द्रसैद्धान्तदेवस्सनुरनुयोगचतुष्टयधिपारगश्चामुण्डरायप्रतिबोधनव्याजेनाशेषविनेयजनप्रतिबोधनार्थं त्रिलोकसारनामानं ग्रन्थमारचयन् तदादौ निर्विघ्नतः शास्त्रपरिसमाप्त्यादिकं फलकुलमवलोक्य विशिष्टेष्टदेवतामभिष्टौति । 'बलगोविंद' इति । अपार्थो कथ्यते । णमंसामि नमस्यामि नमस्करोमि । कं, विमलयरणेमितचंदं विमलतरनेमिचन्द्रं । इत्यादि ।

End. इति णेमिचंदमुणिणा अप्पसुदेणभयणं दिवच्छेण ।
रइयो तिलोयसारो खमं तु तं वहुसुदाइरिया ॥ १००९ ॥

टीकायाः । गुरुणेमिचंदसम्मद-कदिमयगाहा तहिं तहिं रइदा ।
माधवचंदतिविज्जे णिणमणुसरणिज्जमजभोहिं ॥

स्वकीयगुरुनेमिचन्द्रसिद्धान्तचक्रिणां सम्मताः । अथ वा ग्रन्थकर्तृणां नेमिचन्द्रसिद्धान्तिदेवानामभिप्रायानुसारिण्यः कतिपयगाथाः । माधवचन्द्रत्रैविद्येनापि तत्र तत्र रचिताः । इदमप्यार्यैराचार्यवर्यैरनुसरणीयं । साम्प्रतमलङ्कारकर्त्ताप्यन्तमङ्गलं कुर्वन्नभीष्टाशंसनं करोति ।

अरहन्तसिद्धआइरिय उवज्झयासाहुपञ्चपरमेठी ।
इयपञ्चनमोकारो भवे भवे म सुहं दिंतु ॥

Colophon. इति श्रीनेमिचन्द्रसिद्धान्तिदेवानामभिप्रायानुसारिणा माधवचन्द्रत्रैविद्येन-रचिता त्रैलोक्यसारटीका समाप्ता ।

विषयः । ग्रन्थस्य भवनव्यन्तर-ज्योतिः-विमान-नरतिर्यक्लोक-जिनभवनरूपपञ्चाधिकारकथनं । लोकस्य अस्तित्वादिकथनं । तत्र शून्यवादनिराकरणं । ईश्वरकर्तृकत्वनिराकरणं । स्वभावनिर्वृतत्वकथनं । परमाणवारब्धतानिराकरणं । मायावादनिराकरणं । क्षणिकमतनिरासः लोकस्य (भवनस्य) मुरजसन्निभत्वकथनं । तत्र चतुर्दशरज्जुमयकल्पनं । जगत्श्रेण्याः सप्तमो भागो रज्जुरिति लक्षणकथनं । हस्ताङ्गुलादीनां मानानां प्रतिपत्तिकथनं । मानप्रक्रियाकथनं । तत्र लौकिकलोकोत्तरभेदेन द्विविधमानकथनं । तत्र मानोन्मानारसानगणिमानप्रतिमान तत्प्रतिमानभेदेन लौकिकमानस्य षड्विधत्वकथनं । द्रव्यक्षेत्रकालभावभेदेन लोकोत्तरमानस्य चतुर्विधत्वकथनं । तत्र द्रव्यादीनां क्रमेण जघन्योत्कृष्टत्वकथनं । संख्याप्रमाणोपमाप्रमाण-भेदेन द्रव्यस्य द्वैविध्यकथनं । संख्येयमसंख्येयमनन्तमिति संख्यापि त्रिविधा । तत्र असंख्येयमनन्तञ्च प्रत्येकं त्रिविध परीतं युक्तं द्विकवारमिति । अथ संख्येयज्ञाननिमित्तं, अनवस्था, शलाका, प्रतिशलाका, महाशलाकेति चत्वारि कुण्डानि कल्पयितव्यानि । तत्र चतुर्णां कुण्डानां व्यासादिपरिमाणकथनं क्षेत्रफलज्ञानोपायकथनं । तत्र क्षेत्रसंस्थानादिकीर्त्तनञ्च । कुण्डानां खातशिखादिफलानयनादिप्रकारकथनं । क्रमेणानेन सप्रभेदासंख्येयानन्तयोः स्वरूपकथनं । एषां विषयस्थाननिरूपणं । तत्र

सर्व्वधारानिरूपणं। समधाराकथनं। विषमधाराकथनं। एतयोः स्थानानयनादिप्रकारकथनं। एवं परत्र ज्ञेयं। तथा कृतिधाराकथनं। अकृतिधाराकथनं। घनधाराकथनं। वर्गमातृकाधाराकथनं। घनमातृकाधारा। द्विरूपवर्गधाराकथनं। क्रमेणानेन चतुर्द्दशविधधारानिरूपणं। संख्याप्रमाणप्रपञ्चनञ्च इतमितिज्ञेयं। अधुना पूर्व्वोक्तस्य उपमाप्रमाणस्य अष्टविधत्वनिरूपणं। यथा,—पल्यं, सागरः, सूच्यङ्गुलं, प्रतराङ्गुलं घनाङ्गुलं, जगत्श्रेणिः, जगत्प्रतरः, घनलोकश्चेति। तत्र व्यवहारोद्धाराद्धापल्यानीतिपल्यत्रयेण क्रमेण संख्याद्वीपसमुद्राः कर्म्मस्थित्यादयश्च वर्णिताः। पल्यज्ञानोपायकथनं। अत्र क्षेत्रसंस्थानादिकथनं। एवं सागरोपमसूच्यङ्गुलोपमादीनां स्वरूपनिरूपणं। पूर्व्वोक्तचतुर्द्दशरज्जुपर्य्यन्तं लोकस्य आयामकथनं। रज्जुफलादिनिरूपणं। अधोलोकेक्षेत्रफलानयनाय तस्य अष्टधाप्रभेदकथनं। यथा,—सामान्यं, ऊर्द्धायतं, तिर्य्यगायतं, यवमुरजं यवमध्यं, मन्दरं, दूष्यं, गिरिकटकञ्च। क्रमेणैषां क्षेत्रफलादिनिरूपणं। लोकशिखरे वायुवाहुल्यकथनं। वायुक्षेत्रफलादिकथनं। वृक्षे सार इव लोकमध्ये त्रसनालीस्वरूपकथनं। त्रसनाल्यधःस्थभूमिभेदकथनं। तत्र मुरजदले सप्तमह्यः, यथा,—रत्नशर्करा, वालुकाः, पङ्कं, धूमः, तमः, महातमः, प्रभा चेति। तत्र पृथिव्यादीनां भेदादिनिरूपणं। शीतोष्णादिविभागकथनञ्च। दिग्विभागकथनं। नरकादिसंख्यादिनिरूपणं। विस्तरेण नरकवर्णनं। वैतरणीनदीवर्णनं। नरकान्निःसृतस्य जीवस्य उत्पत्तिनियमकथनं तत्र प्रथमं तिर्य्यग्योनौ उत्पत्तिकथनं। नरकं गच्छतां जीवानां पृथिवीं प्रति नियमकथनं। अथ पूर्व्वोक्तभवनेषु सप्तकोटिद्वासप्ततिलक्षसंख्यकानि जिनभवनानि सन्तीतिकथनं। भवनवासिनां कुलभेदकथनं। तत्र असुरादिगणकथनं। भूतानन्दादिगणकथनं। हरिषेणादिगणकथनं। क्रमेणासुरादीनां चिह्नकथनं। यथा,—चूड़ामणि-फणि-गरुड़-गज-मकरस्वस्तिक-वज्र-सिंह-कलस-अश्वाश्च। अश्वत्थ-सप्तच्छद-शाल्मली जम्बू-वेतस-कदम्ब प्रियङ्गु-शिरीष-पलाश-राजद्रुमरूपचैत्यतरुकथनं। चैत्यतरूणां मूलदेशे प्रतिमास्थापनार्थं स्तम्भादिनिर्म्माणप्रकारकथनं। इन्द्रादीनां भवनसंख्यादिकथनं। अनीकभेदकथनं। तत्र नृत्यानीकादिसंख्याकथनं। तत्र भवनेषु असुरादिदेवीनां संख्याकथनं। तथाहि,—महादेव्यः ५, परिवारदेव्यः ५,२९९९५, वल्लभिकाः, ३६०००, चर्म्मिलियाः ५६०००, विकुर्व्वाणादेव्यः पृथगेव ४०० ००। तथा अनीकवाहनादिसंख्यादिकथनञ्च।

एवं भवनलोकनिरूपणानन्तरं व्यन्तरलोकनिरूपणं। तत्र,—जिनगेहसंख्यादिकथनञ्च। व्यन्तराणां कुलभेदनिरूपणं। अथ किन्नर-किंपुरुष-महोरग-गन्धर्व्व-यक्ष-राक्षस-भूत-पिशाचरूपाष्टविधव्यन्तरदेवताकथनं। तेषां वर्णादिनिरूपणञ्च। चैत्यतरुभेदकथनं। यथा,—अशोक-चम्पक-नागकेशर-तुम्बुरु-वट-अश्वत्थ-कण्ठकतरु-तुलसी-कदम्बवृक्षाश्च। अथ वृक्षमूलेषु जिनप्रतिमास्थापनार्थं स्तम्भादिनिर्म्माणविधिकथनं। किन्नरादीनां (प्रिया) वल्लभिकानिरूपणं। तेषां सेनामहत्तरनिरूपणञ्च। व्यन्तरलोकस्य पूर्व्वस्यां दिशि जम्बूद्वीपतुल्यानि पञ्चपञ्चनगराणि सन्तीति कथनपूर्व्वकं तदुपरि महाप्रासादस्वरूपकथनं। तन्नगरवाह्यवनवर्णनादिकं। भवनादिवर्णनञ्च।

अथ ज्योतिर्लोकस्वरूपनिरूपणं। तत्र जिनगेहसंख्यादिकथनं। चन्द्र-आदित्य-ग्रह-नक्षत्र-प्रकीर्णकताराभेदात् पञ्चविधज्योतिष्कभेदकथनं। एतत्कथनमुखेन षोड़शद्वीपनिरूपणं यथा,—जम्बूद्वीपः, धातकीखण्डद्वीपः, पुष्करवरः, वारुणिवरः, क्षीरवरः, घृतवरः, क्षौद्रवरः, नन्दीश्वरवरः, अरुणवरः, अरुणाभासवरः, कुण्डलवरः, शङ्खवरः, रुचकवरः, भुजगवरः, कुशगवरः, क्रौञ्चवरश्चेति।

अन्यविधषोड़शद्वीपकथनं यथा,—मनःशिलाद्वीपः, हरितालद्वीपः, सिन्दूरवरः, श्यामवरः, अञ्जनकवरः, हिङ्गुलिकवरः, रूप्यवरः, सुवर्णवरः, वज्रवरः, वैडूर्य्यवरः, नागवरः, भूतवरः, यक्षवरः, देववरः, अहीन्द्रवरः, स्वयम्भूरमणश्चेति। तत्र लवणाम्बुधिः, कालोदकाम्बुधिश्चेतिकथनपूर्व्वकं पूर्व्वोक्तद्वीपनामभिः प्रत्येकं समुद्रनामकथनञ्च। जम्बुद्वीपादीनां प्रत्येकं विस्तारसंस्थानादिकथनं। समुद्रेषु प्रत्येकं रसविशेषकथनं। तत्र लवणसमुद्रे, कालोदकसमुद्रे, स्वयम्भूरमणसमुद्रे च जलचराः सन्ति नान्यत्रेतिकथनं। मनुष्यक्षेत्रेतरविभागस्य कर्म्मभोगभूमिविभागस्य च पर्य्यन्तपर्व्वतद्वयनिरूपणं। ताराणां स्थितिस्थानादिनिरूपणं। चन्द्रादीनां स्थितिस्थानादिनिरूपणं। ज्योतिर्विमानस्वरूपकथनं। ग्रहादीनां व्यासादिनिरूपणं। तेषां किरणप्रमाणनिरूपणं। चन्द्रादीनां विमानवाहकानां रूपादिकथनं। केषाञ्चिन्नक्षत्राणां दिग्विभागकथनं। चलाचलनक्षत्रनिरूपणं। ग्रहाणामवस्थानक्रमकथनं। विस्ताद्यानयनप्रकारकथनं। पूर्व्वोक्तरज्जुक्षेत्रप्रमाणादिकथनं। अक्षमन्दस्थिप्रक्रियाकथनं। ज्योतिर्बिम्बसंख्याद्यानयनादिप्रकारकथनं। चन्द्रस्य परिवारकथनं। अष्टाशीतिग्रहाणां नामानि यथा,—काल-विकाल-लोहित-कनक-कनकसंस्थान-अन्तरद-दुन्दुभि-रत्ननिभ-रूपनिर्भासप्रभृतयः। सूर्य्याचन्द्रयोरन्तरज्ञाने पायकथनं। तयोः वीथीनिरूपणादिकं। चन्द्रादीनां परिध्यानयनप्रक्रियाकथनं। दिनरात्रिहेतुकथनं। तयोः ह्रासवृद्धिकारणकथनं। अयनाद्यानयनप्रकारकथनं। सूर्य्याचन्द्रयोः गमनप्रकारकथनं। अस्तोदयानयनप्रकारकथनं। चापानयनप्रक्रियाकथनं। समुद्रचारक्षेत्रनिरूपणञ्च। वेदिकाक्षेत्रफलादिकथनं। द्वीपचारकथनं। चन्द्रादिपथयामप्रमाणादिकथनं। सूर्य्यतापस्य क्षेत्रविभागप्रक्रियाकथनं। चन्द्रादित्यग्रहाणां परिधिभ्रमणकालानयनप्रकारकथनं। चन्द्रादित्ययोर्नक्षत्रभुक्तिकालानयनप्रकारकथनं। राहोः नक्षत्रभुक्तिनिरूपणं। मलमासप्रकारप्रतिपादनं। दक्षिणोत्तरायणप्रारम्भे नक्षत्रायणप्रकारकथनं। विषुवे ग्रहनक्षत्रादीनामानयनप्रकारकथनं। ताराणामाकारविशेषकथनं। कृत्तिकादीनां परिवारताराकथनं। तत्संख्या तु एकादशोत्तरशताधिकसहस्र (१११) मितिकथनञ्च।

अथ विमानलोकनिरूपणं। तत्र च त्रयोविंशतिसहितचतुरशीतिलक्षसप्तनवतिसहस्रसंख्यामितजिनभवनकथनं। द्वादशकल्पानां नामकथनं। तत्र नामानि यथा,—सौधर्म्म ऐशान-सनत्कुमार-माहेन्द्रप्रभृतीनि। कल्पातीतविमानसंख्याकथनं। इन्द्रकसंख्याकथनं। अर्चिरर्चिर्मालिनी-वैरा-वैरोचनाख्यानि चत्वारि विमानानि दिग्गतानि, सोमरूपाङ्कस्फटिकाख्यानि चत्वारि

विदिग्गतानि, इत्यादिना विमानानां नामविभागादिकथनं। विमानानां स्थाननिरूपणं। प्रत्येकमिन्द्रकसंख्याकथनञ्च। तत्र नामानि यथा,—ऋतु-विमल-चन्द्र-वल्गु-वीर-अरुण नन्दन-नलिन-काञ्चन-रोहितप्रभृतीनि। इन्द्रकाणां विस्तारादिकथनं। विमानानां वर्णकथनं। अथ सौधर्म्मादिद्वादशकल्पेषु देवानां मौलिचिह्नानि यथा,—वराह-मृग-महिष-मत्स्य-कूर्म्म-दर्दुर-तुरग-कुञ्जरप्रभृतीनि। इन्द्रकस्थितनगरवर्णनादिकं। तत्र सेनामुख्यनिरूपणं। परिषत्संख्यानिरूपणं। नगरान्तरालस्थदेवतादिकथनं। तत्र सुरपुरात् वहिः पूर्व्वादिषु दिक्षु अशोकसप्तच्छद-चम्पकादिवनषण्डकथनञ्च। तद्वनमध्यस्थचैत्यवृक्षस्वरूपादिकथनं। लोकपालानां नगरनिरूपणं। सौधर्म्मादिस्वर्गस्थितानां पद्मगन्धा-अलम्बुषाप्रभृतीनां गणिकानां नामादिकथनं। अथ देवीनां तत्परिवारदेवीनाञ्च गृहादिनिरूपणं। देवीनां नामानि यथा,—शची-पद्मा-शिवा-श्यामा-कालिन्दी सुलसाप्रभृतीनि। तत्र शच्याद्यष्टमहादेवीनां विक्रियावल्लभिकादिदेवीसंख्यादिकथनं। इन्द्रस्य प्रासादादिस्वरूपकथनं। विशेषेण सुधर्म्माख्यसभावर्णनं। तत्र वरजिनगेहे सुराणां तीर्थकरभूषणपूजादिकथनं। वैमानिकदेवानां जननमरणान्तरकथनं। अथ लौकान्तिकानामवस्थाननिरूपणमुखेन ब्रह्मलोकस्यान्ते अष्टकुला लौकान्तिकाः सुरा निवसन्तीतिनिरूपणं। सामान्यतो देवानां शरीरोत्सेधोच्छ्वासाहारकालादिनिरूपणं। मिथ्यादृष्टिसम्यग्दृष्टोः फलकथनं। एकदण्डित्रिदण्डिप्रभृतीनां परिव्राजकानां गत्यादिनिरूपणं। देवानामुत्पत्तिस्वरूपकथनादिकं। तेषां जिनपूजारूपमत्थायनिरूपणं। अथ अष्टमभूमिस्थितसिद्धक्षेत्रस्वरूपकथनञ्च।

अथ नरलोके द्विहीनचतुःशतजिनगृहकथनं। तिर्य्यक्लोके च द्वापञ्चाशत्संख्यकजिनभवनकीर्त्तनं। मन्दर-कुलपर्व्वत-मानुषोत्तरप्रभृत्यष्टस्थानेषु जिनगृहस्थानकथनं। जम्बूद्वीपे वाणाकार-मन्दरपर्व्वतस्वरूपादिकथनं। तत्र हैमवत-हरि-विदेहरम्यक-हैरण्यवत-ऐरावतरूपवर्षकथनं। तथा हिमवान्, महाहिमवान्, निषधः, नीलः, रुक्मी, शिखरी चेति षट्कुलपर्व्वता इति निरूपणञ्च। पर्व्वतानां प्रत्येकं वर्णकथनं। हिमवदादिषु स्थितानां ह्रदानां नामानि यथा,—पद्मः, महापद्मः, तिगिञ्छः, केसरि, महापुण्डरीकः, पुण्डरीकश्चेति। तत्र जातकमलानां विशेषरूपकथनं। तथाहि,—गन्धामोदितदिक्चक्रं वैदूर्य्यनालं, एकादशोत्तरसहस्रदलं, पृथ्वीसाररूपं कमलमिति। तस्य मृणालस्य त्रिक्रोशपरिमाणादिकथनं। तत्कमलकर्णिकारमध्ये श्रीदेवतायाः रत्नमयगृहकथनं। तन्निवासिनीनां देवीनां नामानि यथा,—श्रीः, ह्रीः, धृतिः, कीर्त्तिः, बुद्धिः, लक्ष्मीश्चेति। अथ परिवारकमलस्थितश्रीदेवतापरिवारसंख्यादिकथनं। उक्तसरोवर-जातनदीनां नामानि यथा,—गङ्गा, सिन्धुः, रोहिता, तापी, तोदा, नारी नरकान्ता, सुवर्ण-कुला, रूप्यकुला, रक्ता, रक्तोदा चेति। तत्र गङ्गायाः गमनमार्ग-निरूपणादिकं गोमुखीतिनाम-कारणकथनं। एवं सिन्धु-रोहितादीनां नदीनां गमनमार्गनिरूपणमुखेन वासनाकथनं। भारता-दिवर्षाणां विष्कम्भादिनिरूपणं। भद्रशालादिवनपरिमाणकथनं। भूयासाद्यानयनादिप्रकार-कथनं। मेरुनिरूपणं। नन्दनादिषु गिरिषु स्थितानां भवनानां नामादिकथनं। तत्र सोम-यम-

वरुण-कुवेराणां भवनाधिपत्वकथनञ्च। सोमादीनामायुरादिनिरूपणं। नन्दन-मन्दर-निषध-हिमवत्-रजत-रुचक-सागर-वज्राख्यगिरिकूटानां नामधेयकथनं। नन्दनगिरिस्थवापीस्वरूपादिकथनं। तन्मध्यप्रासादस्वरूपकथनं। मेरुशिखरस्थितानां शिलातलानां नाम-स्थानादिकीर्त्तनं। तत्र जिनस्य भद्रासनादिनिरूपणं। अथ उत्तरकुरुप्रदेशे नीलगिरेः समीपे सीतानद्याः पूर्व्वतटे मन्दराचलस्य ऐशान्यां दिशि शतयोजनव्यासा जम्बूवृक्षस्थली तिष्ठतीतिनिरूपणं। तत्र स्थल्यां जम्बुजवेदिका द्वादश तिष्ठन्तीतिकथनं। परिवारवृक्षादिकथनं। विशेषेण जम्बूवृक्षवर्णनं। अथ सीतोदापरतीरे निषधगिरिसमीपे देवकुरुक्षेत्रे मनोहररूप्यस्थले शाल्मलिवृक्षस्तिष्ठतीति-तद्वर्णनं। भोगभूमिकर्म्मभूम्योर्विभागकथनं यथा,—देवकुरूत्तरक्षेत्रे द्वे उत्तमभोगभूमी, हरिरम्यकक्षेत्रे द्वे मध्यमभोगभूमी, हैमवत-हैरण्यवतक्षेत्रे द्वे जघन्यभोगभूमी स्यातामिति शिष्टानि सर्व्वाणि कर्म्मभूमयश्चेति निरूपणं। अथ यमकगिरिस्वरूपकथनं। मेरोः चतुर्द्दिक्षु स्थितानां ह्रदानां परिमाणादिकथनं। चित्रगिरिकुलपर्व्वतादिवर्णनं। अष्टदिग्गजपर्व्वतवर्णनं। गजदन्तपर्व्वतानां नामादिकथनं। विदेहदेशविभागादिकथनं तत्र वक्षारपर्व्वतारण्यादिनिरूपणं। ग्राम-नगर-खेट-खर्व्वट-मण्डप-पत्तन-द्रोण-सम्वाह-दुर्गादिसंख्याकथनं। तत्रत्यसमागरस्थितद्वीपादिवर्णनञ्च। विदेहदेशे ऋतूनां यथाकालोदयेन निरीतिभावत्वकथनं।

अथ राजाधिराजादीनां लक्षणकथनं। तत्र सेनापतिगणकरति-वणिक्पति-अमात्य-पुरोहिताद्यष्टादशश्रेणीनामधिपो राजा, पञ्चशतराजस्वामी अधिराजः, सहस्रराजस्वामी महाराज इत्यभिधीयते—इत्यादिनिरूपणं। तीर्थकरलक्षणं। वत्सा-सुवत्सा-रम्या-सुरम्या-पद्मासुपद्मा शङ्ख-नलिन्यादिविदेहस्थदेशानां नामकथनं। तत्रस्थानां नद्यादीनां निर्गमस्थानादिनिरूपणं। अथ विदेहस्य प्रथमविजयार्द्धे पञ्चपञ्चाशन्नगराणि सन्तीति तेषां नामकथनं। ततो विजयार्द्धकृतषट्खण्डस्थम्लेच्छखण्डमध्यस्थितवृषभगिरिस्वरूपकथनं। तत्रत्यनगरादिवर्णनञ्च। अथ नाभिगिरीनामवस्थितस्थानादिनिरूपणं। हिमालयादीनां कूटगिरिसंस्थानादिकथनं। अथ भरतैरावत-प्रभृतिहरिरम्यकक्षेत्रपर्य्यन्तं सर्व्वासां नदीनां संख्या लक्षत्रयं द्विनवतिसहस्राणि द्वादश च (३९२०१२) ज्ञातव्यमितिनिरूपणं मेर्व्वादीनां व्यासानयनप्रकारकथनं कुरुक्षेत्रादिक्षेत्राणां विष्कम्भाद्यानयनप्रकारकथनं।

अथ भरतेषु ऐरावतेषु च वर्षेषु अपसर्प्पिणी, उत्सर्प्पिणी चेतिकालद्वयं वर्त्तते। ताभ्याञ्च तत्रस्थजीवानां यथासंख्यं हानिवृद्धीभवत इति कथनं। तत्र कालद्वयस्य प्रत्येकं षड्भेदनिरूपणं। यथा,—सुषमसुषमः, सुषमः, सुषमदुःषमः, दुःषमः, दुःषमसुषमः, अतिदुःषमश्चेति। क्रमेण षट्कालानां स्थितिकालनिरूपणं। जीवानामायुःप्रमाणनिरूपणञ्च। एवं षट्सु कालेषु क्रमेण नराणामुत्सेध वर्ण-आहार क्रमादिनिरूपणं। अथ भोगभूमेः स्वरूपकथनं। तत्र जातानामुत्पत्त्यादिविधानकथनं। कर्म्मभूमिप्रवेशक्रमकथनं। तत्र जातानां कुलकराभिधानानां मनूनां नामानि यथा,—क्षेमङ्कर-क्षेमन्धर-सीमङ्कर-सीमन्धर-विमलवाहनप्रभृतीनि। मनूनामन्योन्यमन्तरकालनिरूपणं।

तत्र प्रथमं पञ्चमनवः, अपराधिनो हाकारेण दण्डयन्ति अपरे पञ्च हामाकारेणेत्यादिना मनूनां शासन-शिक्षाप्रणालीनिरूपणं। एवं तेषां वर्णकथनं कृत्यनिरूपणञ्च। अथ लौकिकशास्त्रं लोकव्यवहारो दयामूलो धर्मश्च आदिब्रह्मणा निर्मित इति कथनं। चतुर्थे काले (दुःषमे) चतुर्विंशतितीर्थङ्कराणामुत्पत्त्यादिकथनपूर्व्वकं पार्श्वजिनवर्द्धमानजिनयोरुत्सेधादिवर्णनं। जिनानामन्तरकालनिरूपणं। जिनधर्म्मोच्छित्तिकालनिरूपणं यथा,—पुष्पदन्तादारभ्य शान्तिनाथावसानेषु सप्तसु अन्तरेषु वक्तृश्रोतृचरित्रूनामभावात् सद्धर्म्मो नास्तीतिवासनाकथनं। अथ द्वादशचक्रिणां (जिनानां) नामानि यथा,—भरतः, सगरः, मघवान् सनत्कुमारः, शान्तिजिनः, कुन्थुजिनः, अरजिनः, सुभौमः, महापद्मः, हरिषेणः, जयः, ब्रह्मदत्तश्चेति। एषां स्थितिकालादिनिरूपणं। काल-महाकाल-मानवक-पिङ्गल-नैसर्प्य पद्म-शङ्ख पाण्डु-नानारत्नाख्यरूपनवनिधिनिरूपणादिकं। सेनापति-गृहपति-स्थपतिप्रभृतिचतुर्द्दशरत्नकथनं। त्रिपृष्ठ-स्वयम्भू-पुरुषोत्तम-नारायण-कृष्णादीनामर्द्धचक्रिणां नामादिकथनं। एषां स्थितिकालनिरूपणं। तत्र कृष्णस्तु नेमीश्वरजिनस्य समये उत्पन्न इति कथनं। अर्द्धचक्रिणां प्राप्तगतिकथनं। तत्र कृष्णस्तृतीयां भूमिं प्रापेतिकथनञ्च। भीम-महाभीम-रुद्र-महारुद्र-प्रभृतिनवनारदकथनं। नारदानां कलहप्रियत्ववासुदेवसमकालत्वादिकथनञ्च, भीमावलि-सुप्रतिष्ठ-जितन्धरप्रभृत्येकादशरुद्रनामकथनपूर्व्वकं तेषां स्थितिकालादिनिरूपणं। अथ-पद्मप्रभ-वासुपूज्येन्द्रप्रभ-पुष्पदन्तादीनां तीर्थङ्कराणां वर्णकथनं, वंशकीर्त्तनञ्च। विक्रमाङ्क-कल्किनोः कालनिरूपणं। एवं विंशतिकल्किनामतिक्रमचरमकल्किस्वरूपकथनादिकं। तत्र धर्म्मादीनां विनाशकारणकथनं। प्रलयकाले सम्वर्त्तकानिलादीनामाविर्भावादिवर्णनञ्च।

अथ लवणार्णववर्णनं। तन्मध्यस्थितविजयपुरवर्णनञ्च। लवणार्णवान्तर्गतानां पातालानां वर्णनं। तत्र पूर्व्वस्यां दिशि स्थितानां वड़वामुख-कदम्बक-पाताल-यूपकेसराभिधानानां तेषां परिमाणादिकथनं एवमन्यत्र स्थितानां ज्ञेयं। पातालान्त-स्थितयोः जलानिलयोः वर्णनं। पूर्णिमादौ लवणसमुद्रे जलोच्छ्रायपरिमाणकथनं। द्वीपवर्णनादिकं। कालोदकसमुद्रवर्णनादिकं। धातकीखण्डपुष्करद्वीपादिवर्णनं। मानुषोत्तरसमुद्रवर्णनं। दिक्कूटादिवर्णन। तत्र पूर्व्वदिक्कूटे विजया, वैजयन्ती, जयन्ती, अपराजिता, नन्दानन्दवती, नन्दोत्तरा, नन्दसेनेति दिक्कुमारीकथनं। एवमन्यस्यां दिशि ज्ञेयं। द्वीपसमुद्रादीनामधीश्वरनिरूपणं। एवं वारुण-क्षीर-घृत-क्षौद्र-नन्दीश्वर-अरुणादिद्वीपसमुद्रेषु ज्ञातव्यं। विशेषेण नन्दीश्वरद्वीपवर्णनं। तत्रत्यजिनालयादिवर्णनञ्च। अथ त्रिलोकस्थितानामकृत्रिमाणां चैत्यालयानां सामान्येन व्यासादिनिरूपणं। तत्र जिनप्रतिमास्वरूपादिवर्णनञ्च।

No. 2042. आप्तमीमांसितं, आप्तमीमांसालङ्कृतिनामकवृत्तिसहितम् । Substance, country-made paper, 8 × 4 inches. Folia, 219. Lines, 9, 12 on a page. Extent, 8,048 ślokas. Character, Nágara. Date, Sm. 1525. Place of deposit, Calcutta, Government of India. Appearance, fresh. Prose and verse. Correct.

A'ptamímáñsita, together with a commentary entitled *A'ptamímáñsá-laṅkṛiti.* A treatise on Jain philosophy, explaining the different dogmas, refuting heterodox theories, and giving a philosophical exposition of Jain duties. By Samantabhadra Yati. The commentary is by Vidyánanda.

Beginning. वृत्तिग्रन्थस्य । श्रीवर्द्धमानमभिवन्द्य समन्तभद्रमुद्भूतबोधमहिमानमनिन्द्यवाचं।
शास्त्रावतारखितस्तुतिगोचराप्त-मीमांसितं कृतिरलं क्रियते मयास्य ॥१॥
श्रेयः श्रीवर्द्धमानस्य परमजिनेश्वरसमुदयस्य समन्तभद्रस्य तदमलवाचस्य संस्तवनमाप्तमीमांसितस्यालङ्करणे तदाश्रयत्वात् तदन्यतमासम्भवे तद्घटनात् । इत्यादि ।

मूलग्रन्थस्य । देवागमनभोयानचामरादिविभूतयः ।
मायाविष्वपि दृश्यन्ते नातस्त्वमसि नो महान् ॥
अध्यात्मं वहिरप्येष विग्रहादिमहोदयः ।
दिव्यः सत्यो दिवौकःस्वप्यस्ति रागादिमत्सु सः ॥ इत्यादि ।

End. मूलस्य । जयति जगति क्लेशावेशप्रपञ्चहिमांशुमान्
विहतविषमैकान्तध्वान्तप्रमाणनयांशुमान् ।
यतिपतिरजो यस्याधृष्यान्मताम्बुनिधेर्लवान्
स्वमतमतयस्तीर्थ्या नानापरे समुपासते ॥

वृत्तिग्रन्थस्य । येनाशेषकुनीतिवृत्तिसरितः प्रेक्षावतां शोषिता-
यद्वाचोऽप्यकलङ्कनीतिरुचिरास्तत्त्वार्थसार्थद्युतः ।
स श्रीस्वामिसमन्तभद्रयतिभृद्भूयाद्विभुर्भानुमान
विद्यानन्दफलप्रदोऽनघधियां स्याद्वादमार्गाग्रणीः ॥

Colophon. इत्याप्तमीमांसालङ्कृतौ दशमः परिच्छेदः ।
श्रीमदकलङ्कशशधरकुलविद्यानन्दसम्भवा भूयात् ।
गुरुमीमांसालङ्कृतिरष्टसहस्री सतामृद्ध्यै ॥
श्रीयुतामलसंघमण्डलमणिः श्रीकुन्दकुन्दान्वये
श्रीदेशीगणगच्छपुस्तकभिधा (?) श्रीदेवसवाग्रणीः ।
श्लोकस्यापरार्द्धं नास्ति ।

संवत् १५२५। वर्षे पौषसुदि ९। शुक्रवासरे। शुभं भवतु लेखकपाठकयोः।

पुस्तके यादृशं दृष्टं तादृशं लिखितं मया।
यदि शुद्धमशुद्धं वा मम दोषो न दीयते॥
वृषभादीन् जिनान् वर्द्धमानान्तान् प्रणिपत्य वै।
अष्टमहसस्त्रीयां प्रशस्तिं विदधे क्रमात्॥
टवङ्काख्ये पुरे श्रीमज्जिनमन्दिरसुन्दरे।
शकेन्द्रेऽल्लावदीनाङ्के मही पाति स्वतेजसा॥
श्रीविक्रमभेनसाचाज्याच्छते पञ्चदशाहते।
वर्षाणां पञ्चविंशत्या नवम्यां कृष्णपौषके॥

विषयः। १ प्रथमपरिच्छेदे,—भगवतः स्तवनीयत्वकथनं। तथाहि भगवान् महानिति भवति तीर्थकरत्वात् विग्रहादिमहोदयत्वाच्च। यो महान् न भवति स तीर्थकरो न भवति, यथा-अस्मदादिः, तस्मात् तीर्थकरस्वामी महान् भवतीतिनिरूपणं। अत्र प्रमाणसंप्लवादिसम्वादक-थनं। सुगतकपिलादीनामाप्तत्वखण्डनपुरःसरं तीर्थकरस्य भगवत आप्तत्वव्यवस्थापनं।

अथ न कश्चित् पुरुषः सर्व्वज्ञः स्तुत्यः श्रेयोऽर्थिनां, श्रुतेरेव श्रेयःसाधनोपदेशसिद्धेरिति मीमांसकमतोपन्यासपूर्व्वकं तत्खण्डनं। अथ स्वर्गकामोऽश्वमेधेन यजेतेत्यादौ भावनैव वाक्यार्थ इति भाट्टाः। नियोग एव वाक्यार्थ इति प्राभाकराः। विधिरेव वाक्यार्थ इति वेदान्तिका इत्येषां मतोपपादनपुरःसरं परस्परं विप्रतिपत्तिप्रदर्शनं। अथ सौगतमतेन अन्यापोह एव शब्दार्थ इति निरूपणमुखेन तन्मतेन ब्रह्मवादखण्डनं। तथाहि वस्तुस्वभावाभिधायकत्वाभावेन नियोगनिराकरणेऽपि विधेर्वाक्यार्थत्वघटनात् न भावना वाक्यार्थः सिद्धो भट्टस्येति न मनसि विधेयं। विधेरपि प्रमाणप्रमेयतदुभयरूपाद्यष्टविधविकल्पसङ्कुलतया बाध्यमानत्वात्। तथाहि प्रमाणं विधिरिति-कल्पनायां प्रमेयं किमपरं स्यात्, तत् स्वरूपमेवेति चेन्न सर्व्वथा निरंशस्य सन्मात्रदेहस्य विधेः प्रमाणप्रमेयरूपद्वयविरोधात्। कथमिदानीं उपनिषद्वाक्यं प्रतिभासमात्रादन्यत् कथं वा तत् परिकल्पिताद्वाक्यात् लिङ्गाद्वा परमार्थपथावतारिणः परब्रह्मणः प्रतिपत्तिः, तथात्वे परिकल्पिता-द्धूमादेः पारमार्थिकपाचकादिप्रतिपत्तिः प्रसज्येत। अतएव कथमिदानीमन्यापोहः शब्दार्थ इति प्रतिषिध्यते। वस्तुस्वरूपाभिधायिनोऽपि शब्दस्य अन्यापोहानभिधायित्वे अन्यपरिहारेण क्वचित् प्रवृत्तिनिबन्धनतापायाद्विधिरपि शब्दार्थो माभूदिति समुदितार्थः। अथ विधेःप्रवर्त्तक-त्वनिरूपणं। तथाहि विधिः प्रवर्त्तकविधिः प्रवर्त्तकस्वभावो वा स्यादप्रवर्त्तकस्वभावो वा। आद्यश्चेत् वेदान्तिकानामिव सौगतादीनामपि प्रवर्त्तकः स्यात्। ननु तेषां विपर्य्ययात् न प्रवर्त्तक इति चेन्न, तत एव वेदान्तिकानामपि अप्रवर्त्तक इति वक्तुं शक्यते तदुभयोः समानाक्षेपसमाधानत्वात्। यदि पुनरप्रवर्त्तकस्वभाव एव विधिस्तदा कथं वाक्यार्थः स्यान्नियोगवत्। यथा,-विधिः वाक्यार्थो न अप्रवर्त्तकत्वात् नियोगवदित्यनया च दिशा विधेः फलरहितत्वादिकमूहनीयं। तदनेन प्रकारेण

आक्षेपप्रदर्शनादिपूर्व्वकं भावनैव वाक्यार्थ इति निष्कर्षकथनं। तथाहि न परोदितो विधिर्वाक्यार्थः सिद्ध्यति, नियोगस्यैव वाक्यार्थत्वोपपत्तेः। अथ नियोग एव वाक्यार्थोऽस्त्वित्यपि न युक्तं धात्वर्थवन्नियोगस्य वाक्यार्थतया प्रतीत्यभावात् नियोगविध्यादिस्वरूपप्रतिपादके सर्व्वत्र वाक्ये भावनाया एव वाक्यार्थत्वप्रतीतेः सैव वाक्यार्थः। सा च द्विविधा शब्दभावना अर्थभावना च। एतत् स्वरूपादिविवेचनं। प्रवर्त्तकज्ञानविवेचनं। तत्र द्रव्यवादी सांख्यो भेदं संकल्पितं मन्यते, तथा पर्य्यायवादी बौद्धः अभेदं संकल्पितत्वेन मनुते। एवमुभयोस्तथात्वे वस्तुनः सर्व्वथापि अर्थक्रियाकारित्वं न घटते इति विवेचनं। तत्र च पुरुषाद्वैतवत् संवेदनाद्वैतस्य च निराकरणं। तथा सामान्यविशेषयोः वस्तुस्वरूपयोः सर्व्वथा ऐक्यमिति बौद्धमतनिराकरणं। अथ दृश्यानुपलब्धिरभावं साधयति। अदृश्यानुपलब्धिश्च संशयं साधयतीतिमतनिराकरणं। विज्ञानवादखण्डनं। इत्यन्तेन प्रकारेण बौद्ध-भट्ट-प्रभाकर-सांख्य-वैदान्तिकनयनिराकरणपूर्व्वकं सुगतादयः परस्परविरुद्धक्षणिकनित्याद्यनेकान्तसमयाभिधानिनः सर्व्वे न सर्व्वदर्शिन इति तथा श्रुतयोऽपि परस्परविरुद्धकार्य्यस्वरूपाद्यर्थाभिधायिन्यः सर्व्वा न प्रमाणभूता इति निरूपणं। किञ्च, कस्या अपि श्रुतेः प्रामाण्यं नास्तीतिनिर्णयः। प्रामाण्यवादः तत्र चार्व्वाकमतखण्डनपुरःसरं अनुमानादिप्रामाण्यसंस्थापनं। तत्त्वोपप्लववादिमतनिरसनं। अतत्त्वोपप्लववादिमीमांसकविशेषमतनिरसनं। प्राचीननैयायिकमतदूषणं। प्रामाण्यं स्वतोग्राह्यमितिमतखण्डनं। बौद्धमतखण्डनं। सांख्यमताक्षेपकीर्त्तनं। वैदान्तिकमतदूषणं। अभ्यासदशायां स्वतःप्रामाण्यमनभ्यासदशायान्तु परत एव गृह्यतः इत्यनेकेषां मतकथनं। अनेकान्तवादकथनं। अथ सुनिश्चितासम्भवद्बाधकप्रमाणत्वमिति स्याद्वादिनः स्वमतनिष्कर्षकीर्त्तनञ्च। तथा अनेकप्रमाणवादिनामपि कपिलकणभक्षाक्षपादपातञ्जलवैदान्तिकनैयायिकसौगतादीनामनिच्छतामपि प्रमाणान्तरतया मताक्षेपपुरःसरमूह्स्य प्रमाणान्तरत्वसंस्थापनं। अथ यदसत् तन्न सुनिश्चितासम्भवद्बाधकप्रमाणं। यथा मरीचिकायां सलिलं सम्भवद्बाधकप्रमाणं। यथा च मेरुमूर्द्धनि मोदकं सन्दिग्धासम्भवद्बाधकं। सुनिश्चितासम्भवद्बाधकप्रमाणश्च सर्व्वज्ञ इत्यनेन प्रकारेण प्रकृते सर्व्वज्ञे सिद्धसाधनतानिरूपणं। चेतनस्य आत्मनोऽज्ञानावरणादिकर्म्म एव मदिरादिवत् मोहोदयकारणमितिनिरूपणं। अथ दोषो हि तावदज्ञानं ज्ञानावरणस्योदये जीवस्य स्यादितिनिरूपणं। विज्ञानवादखण्डनं। पृथिव्यादौ चेतनादिगुणस्य अभावोऽनुपलम्भान्यथानुपपत्तेरिति पृथ्व्यादिमयशरीरादात्मनः पृथक्त्वादिनिरूपणं। यस्मान्मणेः शलाकादेः व्यावृत्तिः क्षयः सतोऽत्यन्तविनाशानुपपत्तेः। तादृगात्मनोऽपि कर्म्मणां निवृत्तौ परिशुद्धिः। प्रध्वंसाभावो हि क्षयो हानिरिहाभिप्रेता सा च व्यावृत्तिरेव मणेरिति मलापनयनेऽपि नात्मनो हानिरेवेति निरूपणं। अभावखण्डनं। आत्मनि अज्ञानरूपमलस्य आगन्तुकत्वनिरूपणं। अत्र बौद्धादिमतनिरसनं। तथा संसारकारणं मिथ्यादर्शनादिकं, तन्निवर्त्तकञ्च सम्यग्दर्शनादिकमिति निर्णयः। आत्मनः ज्ञानादिगुणस्वभावत्वकथनेन दोषस्वभावत्वासिद्धेः दोषस्य कादाचित्कत्वादिकथनं। क्षणिकत्ववादनिराकरणं। अथ अर्हद्भगवान् निर्दोषो युक्तिशास्त्राविरोधिवचनत्वात्, तथा

Vaidika-liñartha-vivechana. A disquisition on the use of the potential mood in the Vedas. The codex is incomplete, and the author's name cannot be made out.

Beginning. यत्कृपालेशमात्रेण पुरुषार्थचतुष्टयं ।
प्राप्यते तमहं वन्दे गोविन्दं भक्तवत्सलं ॥ १ ॥
अनन्तगुणसम्पन्नमनन्तभजनप्रियं ।
अनन्तरूपिणं वन्दे गुरुमानन्दरूपिणं ॥ २ ॥

इह खलु परमकारुणिकेन भगवता जैमिनिऋषिणा अथातो धर्म्मजिज्ञासेत्यादिना द्वादशसु अध्यायेषु धर्म्मो विचारितः । तत्र वेदेन प्रयोगमुद्दिश्य विधीयमानोऽर्थो धर्म्मः । यथा यागादिः ।

End. भावार्थाधिकरणवामनावासितानां भवत्ये

Colophon. इतः परं खण्डितं ।

विषयः । यजेतेत्यत्र प्रत्ययगतलिङ्त्वांशेन पुरुषप्रवृत्त्यनुकूलव्यापाररूपायाः शाब्दीभावनायाः प्रतीयमानत्वमित्यादिविवेचनं ॥

No. 2046. शारीरकमीमांसाभाष्यविवरणं, वा प्रकटार्थः । Substance, country-made paper, $10\frac{3}{4} \times 4$ inches. Folia, 149. Lines, 15 on a page. Extent, 10,500 ślokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Correct.

S'áríraka-mímáñsá-bháshya-vivarana alias **Prakaṭártha**. A gloss on S'añkara's commentary on the Vedánta-sútra. Anonymous.

Beginning. सत्यं ज्ञानमनन्तं यत् कूटस्थं सुखविग्रहं ।
नित्यमुक्तं परं ब्रह्म भवामि तदहं सदा ॥
ज्ञात्वापि यस्य बहुकालमचिन्तनेन
व्याख्यातुमक्षमतया परितापिचेताः ।
तस्योपतापहरणाय मयेह भाष्ये
प्रारभ्यते विवरणं प्रकटार्थमेतं ॥

End. शुद्धं ब्रह्मास्म्यहं नित्यमक्षरं परमं पदं ।
तिष्ठामि क्व क्व गच्छामि जगदापूरितं मया ॥

Colophon. इति श्रीमच्छारीरकमीमांसाभाष्यविवरणे प्रकटार्थे श्रीमच्चतुर्थाध्यायस्य चतुर्थः पादः ॥ समाप्तश्चायं ग्रन्थ इति ॥

विषयः । शारीरकमीमांसाभाष्यव्याख्यानं ॥

No. 2047. शिवार्कोदयः । Substance, country-made paper, 11 × 5 inches. Folia, 333. Lines, 11 on a page. Extent, 9,880 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Verse. Incorrect.

S'ivárkodaya. A metrical gloss on the metrical scholia of Bhaṭṭa Kumárila Svámí, on S'añkara's commentary on the Mímáṇsá Sútra of Jaimini. By Gágá Bhaṭṭa *alias* Viśveśvara Bhaṭṭa, son of Dinakara, grandson of Rámakṛishṇa, and great-grandson of Náráyaṇa Bhaṭṭasurí.

Beginning. आद्येऽध्याये धर्ममानं प्रसाध्यं मानाधीना मेयसिद्धिर्यतो हि ।
आद्ये पादे मानताचोदनानामुक्ता वाक्यार्थवादादिभागे ॥ १ ॥

Colophon. इति श्रीमन्नारायणभट्टसूरिसूनुश्रीमद्रामकृष्णात्मजभट्टदिनकरसुतगागाभट्टकृतः शिवार्कोदयः समाप्तः ॥

विषयः । श्लोकैर्भट्टकुमारिलप्रणीतमीमांसासूत्रवार्त्तिकावशिष्टांशस्य पद्यैर्निर्वचनं ॥
पुस्तकमिदं खण्डितं ।

No. 2048. मीमांसाकुसुमाञ्जलिः । Substance, country-made paper, 12 × 5 inches. Folia, 439. Lines, 8—9—10 on a page. Extent, 11,264 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Mímáñsá-kusumáṇjali. A scholia on the Mímáñsá Sútra of Jaimini. By Gágá Bhaṭṭa *alias* Viśveśvara Bhaṭṭa, son of Dinakara Bhaṭṭa. The codex is very defective.

Beginning. निर्व्विघ्नमस्तु । वन्दे नन्दकुमारस्यातिमनोहारिरूपस्य ।
कृतराधापरिचरणौ चरणौ करुणानिधेः सुखधेः ॥ १ ॥
सारं यत् श्रुतिशिरसां दुष्प्रापं यन्मनोवचसां ।
तत् कौशल्यवचसां शिवापावमहो वन्दे ॥ २ ॥
उमामहेश्वरसदृशौ लक्ष्मीनारायणाविव ।
प्रभादिवाकरसमौ पितरौ समुपास्महे ॥ ३॥

मीमांसाकुसुमानामञ्जलिरेषोऽञ्जल्याद्दतः ।
श्रीरामपादलग्नो वासेन दिशः कृतार्थयतु ॥ ४ ॥
विश्वेश्वरापराख्यस्य गागाभट्टमनीषिणः ।
कृतिः करोतु कृतिनां हृदये वासमादरात् ॥ ५ ॥

आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानां तस्मादनित्यमुच्यते । पूर्व्वपादे विधिनिषेधयोर्वेदत्वेन सामान्येन विशेषरूपेण च प्रामाण्ये सिद्धे अधुनोपस्थितेषु भाषान्तरेषु प्रामाण्यं प्रतिपाद्यते ॥

Colophon. इति मीमांसकभट्टदिनकरसूनुगागाभट्टापरनामकविश्वेश्वरभट्टविरचिते मीमांसाकुसुमाञ्जलौ दशमाध्यायस्याष्टमः पादः ॥

विषयः । मीमांसासूत्रव्याख्यानं । पुस्तकमिदं प्रथमे मध्ये चरमे च खण्डितं ॥

No. 2049. **महारामायणं वा वाशिष्ठरामायणं, वाशिष्ठतात्पर्य्यप्रकाशनामटीकासहितं, उत्तरार्द्धं ।** Substance, country-made paper, $15\frac{1}{4} \times 9$ inches. Folia, 1,509. Lines, 16 on a page. Extent, 75,000 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Incorrect.

Mahárámáyaṇa alias **Vaśishṭha-rámáyaṇa**. A version of the history of Ráma, distinct from that of Válmíki. Usually attributed to the sage Vaśishṭha, but probably of a much later date, and founded on the work of Válmíki. The work is divided into two parts, of which the first treats of the history of Ráma, and the second expounds, in a dialogue between Ráma and Vaśishṭha, the principles of the Yoga doctrine as the most approved means of final emancipation. In this respect it appears like an imitation of the Bhagavadgítá. The leaning of the former is more in favour of the Yoga, and that of the latter in favour of the Vedánta; but in neither case is the following faithful.

Beginning. अजमजयमनाद्यनन्तमन्तर्निसुखबोधसदद्वितीयं पूर्णं ।
शिवमखिलहृदि स्फुरत्स्वमायाविकल्पितविश्वविलाससमानताः स्म ॥ १ ॥
स्मृतिफलितसमस्ताभीष्टमुद्यद्दिनेशप्रतिभटनिजशोभाशान्तविघ्नान्धकारं ।
कमपि शिवभवान्योरङ्कसौभाग्यमन्तःसुरमणिमवलम्ब्य चारुलम्बोदराख्यं ॥ २ ॥
मुग्धस्मितार्द्रितमनोज्ञमुखेन्दुविम्बं स्निग्धास्तप्रतिमचारुकृपाकटाक्षं ।
अयेसरैरनुसृतं मुनिभिर्मुनीनां न्यग्रोधमूलवसतिं गुरुमाश्रयामः ॥ ३ ॥

त्रिभुवनावनकल्पकृतोदयः सदभयामलबोधसुखोदयः ।
सुजनहृद्गिरिगह्वरकेशरी शरणमस्तु सदा नरकेशरी ॥ ४ ॥

दक्षे वराहवल्लयावभयञ्च वामे या पुस्तकञ्च दधती विधिनेत्रपेया ।
सा शारदाब्जनयना शरदिन्दुशोभा भासा स्वया हरतु मे हृदयान्धकारं ॥ ५ ॥

ये नेत्राणि हरस्य यैर्जगदिदं प्रद्योतितं चेष्टते
येऽत्रैवापतते श्रुतिस्मृतिनुतो धर्मः स शर्मोदयः ।
ये कालं कलयन्ति ये च परमस्वज्योतिरात्मोपमा-
स्ते सूर्येन्द्वनला भवन्तु हृदि मे बोधाब्जिनीभानवः ॥ ६ ॥

वक्त्रेन्दुभिर्दिक्षु तमोहरद्भिर्वेदार्थसारामृतमुद्गिरन्तं ।
वाणीभुजास्त्रिष्टमभीष्टसिद्ध्यै तं ब्रह्मविद्यादिगुरुं प्रपद्ये ॥ ७ ॥

यद्वाक्यामृतपायिनां प्रतिपदं सत्यं सुधा नीरसा
यद्वाक्यार्थविचारणादभिमतः स्वर्गोऽपि कारागृहं ।
यद्वाणीविशदात्मपूर्णमनसां तुच्छं जगत् तूलवत्
तस्मै श्रीगुरवे वशिष्ठमुनये नित्यं नमस्कुर्महे ॥ ८ ॥

यस्यार्षप्रथिता जगत्त्रयहिता सा वेदमाता परा
यश्चक्रे तपसा वशे सुरगणानन्यान् सिसृक्षुर्जगत् ।
तं बोधाम्बुनिधिं तपस्विमुकुटालङ्कारचिन्तामणिं
विश्वामित्रमुनिं शरण्यमनघं भूयो नमस्याम्यहं ॥ ९ ॥

श्रुत्या ब्रह्मेव रामः प्रकटितमहिमा येन तस्मै वशिष्ठः
यः सीतां ब्रह्मविद्यामिव सदसि पुनः सत्यशुद्धां किलादात् ।
यद्वाणी मोहमूलं शमयति जगदानन्दमन्दोहदोग्ध्री
तस्मै वाल्मीकये श्रीगुरुतमगुरवे भूरिभावैर्नताः स्म ॥ १० ॥

पूर्णानन्दस्वभावस्वजनहितकृते माययोपात्तकायः
कारुण्यादुद्दिधीर्षुर्जनमनवरतं मोहपङ्के निमग्नं ।
आविश्रान्तर्वशिष्ठं बहिरपि कलयन् शिष्यभावं वितेने
यः संवादेन शास्त्रामृतजलधिममुं रामचन्द्रं प्रपद्ये ॥ ११ ॥

विद्याभिः सह विश्रुता श्रितवती येषां मुखं भारती
सत्त्वोत्कर्षसमाधिभिः स्थिरमहो तद्ब्रह्म येषां हृदि ।
पादाम्भोरुहमाश्रिताश्च सततं तीर्थैः समं सम्पदः
श्रीसर्वज्ञसरस्वतीतिविदितान् श्रीमद्गुरूंस्तान् भजे ॥ १२ ॥

श्रीः संश्रितेव चरणौ हृदयञ्च रामचन्द्रो मुखं गुणभरेण सरस्वती च ।

येषामतस्तदभिधाङ्कितनामधेयान् श्रीमद्गुरून् गुरुतरान् प्रणतोऽस्मि नित्यं ॥ १३ ॥

तापध्वस्तिव्याप्तकारुण्यकटाक्षव्याख्यावाणीनिर्दृतसर्व्वाङ्गिशरण्यान् ।
श्रीमद्रामानन्दमुनीनद्भुतचर्य्यानार्य्यान्नित्यं देशिकचर्य्यान् प्रणतोऽस्मि ॥ १४ ॥

विश्वेशोऽपि हरिः शरण्यचरणो यान् मानयन् सौहृदा-
त्तान्नित्यमनुव्रजामि रजसा पूये यचेताब्रवीत् ।
यत्पूजां विदधे श्रुतिर्मतिमतां सर्व्वेष्टसिद्धैर सदा
जीवन्मुक्तसुखात्मपूर्णमनसस्तान् ब्रह्मनिष्ठान् भजे ॥ १५ ॥

कृतिभिरसुकराः क्व नु प्रबन्धाः क्व च ते वालिशबुद्धिरेष जन्तुः ।
तदपि विरचनेऽत्र सद्गुरूणां सदयनिरीक्षणमेव मेऽवलम्बः ॥ १६ ॥

अशेषविद्याम्बुधिपारगानामपास्तरागादिमनोमलानां ।
कृपानिधीनां कृतिनां समास्मिन् सतां पदाब्जस्मरणं सहायः ॥ १७ ॥

यत्कृपालेशमात्रेण तीर्य्येऽस्मिन् भवसागरं ।
श्रीमद्राघवेन्द्राख्यान् श्रीगुरूंस्तान् सदा भजे ॥ १८ ॥

आनन्दबोधयतिना श्रीमद्गुरुवचोऽमृतैः ।
वाशिष्ठार्थप्रकाशोऽयं यथामति वितन्यते ॥ १९ ॥

प्रशंसन्तु स्वैरं मतिभिरथ निन्दन्तु सुधियः
प्रवृत्तिर्मे यस्मान्न भवति जनाराधनकृते ।
अनेन व्याजेनामृतरसवशिष्ठोक्तिभरिते
विहर्तुं वाञ्छामि प्रतिदिवसमानन्दजलधौ ॥ २० ॥

यथामति बुभुत्सुभ्यः साहाय्यं सङ्कटेष्विव ।
दुरूहश्लोकभावेषु दर्शयिष्ये परिश्रमं ॥ २१ ॥

स्थितमेकरसे युक्त्या नानारसविजृम्भणं ।
वाशिष्ठं रोचयत्येतत् सुभोज्यं लवणं यथा ॥ २२ ॥

अप्यल्पमतिदुर्बोधं स्फुटं व्याख्यास्यते पदं ।
द्विवित्र्याख्यातपूर्व्वन्तु दुरूहमपि मोक्ष्यते ॥ २३ ॥

अनन्यपूर्व्वव्याख्यातं ग्रन्थं मे व्याचिकीर्षतः ।
सन्तः श्रमज्ञाः कृपया क्षमध्वं स्खलितं क्वचित् ॥ २४ ॥

अथ जगदिदमनादिमहामोहनिशासुप्तमनवरतदुःखप्रभ्रमपरम्पराकल्पिते जन्मजरामयमरणहर्षामर्षशोकाद्यनर्थसंकटसहस्रसंकुले ग्रहातिग्रहव्याघ्रभीषणे तापत्रितयदावानलज्वालामालाकुले षड्डूर्मिजालेऽतिषड्वर्गव्याधबध्यमानप्राणिनिकाये संसारमहारण्ये मुह्यमानं विवेकान्धं प्रबोधोपायदौर्लभ्याद्विषीदन्तं समुदीक्ष्य शास्त्रभानूदयेन तत्प्रबोधनाय भगवतः पद्मजन्मनः शासनात्

स्तनस्य प्रवर्त्तमानः परमकारुणिको भगवान् वाल्मीकिः प्रारिप्सितस्य महतः शास्त्रस्य निर्व्विघ्न-परिसमाप्तिप्रचयगमनादिसिद्धये वक्ष्यमाणश्रुतिस्मृतिसदाचारप्रापितं सर्व्वविघ्नमूलोच्छेदक्षमं सच्चिदानन्दाद्वयप्रत्यगात्मपरब्रह्मप्रणतिलक्षणं मङ्गलमाचरन् अर्थाच्छास्त्रस्य विषयप्रयोजने तटस्थ-स्वरूपलक्षणाभ्यां संक्षिप्य दिदर्शयिषुः प्रथमं यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत् प्रयन्त्यभिसंविशन्ति तद्विजिज्ञासस्व तद्ब्रह्मेतिश्रुत्युक्ततटस्थलक्षणसिद्धमद्वयस्वभावं तत्पदार्थं नमस्यति यत इति ॥

मू० । यतः सर्व्वाणि भूतानि प्रतिभान्ति स्थितानि च ।
तत्रैवोपशमं यान्ति तस्मै सत्यात्मने नमः ॥

End. यत् सर्व्वं खल्विदं ब्रह्म तज्जलानि तिच(?)स्फुटं ।
श्रुत्या ह्युदीर्य्यते साम्नि तस्मै ब्रह्मात्मने नमः ॥ २५ ॥

Colophon. इति श्रीमद्वाराामायणे निर्व्वाणप्रकरणे उत्तरार्द्धे बालकाण्डे मोक्षोपाये देव-दूतोक्ते शतसाहस्र्यां संहितायां वाशिष्ठे ब्रह्मदर्शने षोड़शोत्तरद्विशततमः सर्गः २१६ । सम्पूर्णञ्चेदं निर्व्वाणप्रकरणमुत्तरार्द्धमिति शिवं ।

टी० । वाक्यपुष्पाञ्जलिः सोऽयं मया भक्त्या समर्पितः ।
धियः प्रेरकयोः श्रीमच्छिवयोः श्रीपदाब्जयोः ॥ ४ ॥

इति श्रीवाशिष्ठतात्पर्य्यप्रकाशे निर्व्वाणप्रकरणे उत्तरार्द्धे षोड़शोत्तरद्विशततमः सर्गः २१६ इति श्रीमत्परमहंसपरिव्राजकाचार्य्यश्रीसर्व्वज्ञसरस्वतीपादशिष्यश्रीरामचन्द्रसरस्वतीपूज्यपादशि-ष्यश्रीगङ्गाधरेन्द्रसरस्वत्याख्यभिक्षोः शिष्येण आनन्दबोधेन्द्रभिक्षुणा विरचितः श्रीवाशिष्ठतात्पर्य्य-प्रकाशः सम्पूर्ण इति ॥

विषयः । वाशिष्ठोत्तरार्द्धव्याख्यानं। वाशिष्ठोत्तरार्द्धे तु रामवशिष्ठसंवादेन निर्व्वाणमोक्ष-निरूपणं ।

No. 2050. ईश्वरगीताभाष्यम् । Substance, country-made paper, $11\frac{1}{2}$ × $3\frac{1}{4}$ inches. Folia, 105. Lines, 9 on a page. Extent, 3,120 slokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Correct.

I'śvaragítá-bháshya. A commentary on an episode of the Kúrma-purána. By Vijnána Bhikshu. In this episode Súta expounds to the sages assembled in the Naimisha forest the principles of the Vedánta doctrine. It is obviously an imitation of the Bhagavadgítá, but it differs from its archetype in dwelling exclusively on Vedántism, instead of mixing it with the Sáñkhya and the Yoga doctrines. The text has already been noticed, see vol. I, p. 257.

Beginning. यो मायया त्रिगुणया विरचय्य विश्वमंशैः प्रविश्य बहुशोऽभवदेक आत्मा।
यस्माच्च भिन्नमपि सर्व्वमभिन्नमद्धा मा मेऽपसर्पतु हरो हृदयेश्वरोऽसौ॥
सर्व्ववेदान्तसारार्थसंग्राहिण्या अतिस्फुटं।
भाष्यमीश्वरगीतायाश्चक्रे विज्ञानभिक्षुकः॥
एतेन भगवद्गीताव्याख्यापेक्षापि यास्यति।
शब्दादिभेदमात्रेण गीतयोरर्थसाम्यतः॥
श्रीनारायणेन कूर्म्मरूपिणा शक्रादिभ्योऽखिलपुरुषार्थसाधनं ज्ञानं कर्म्म च कूर्म्मपुराणे सम्यगुपदिष्टं तदेतत् सूतमुखादुपश्रुण्वन्तः शौनकादयो ज्ञानसारं विस्तरतः श्रोतुकामाः पुनः सूतं पप्रच्छुरित्याह पुराणकर्त्ता व्यासदेवः। ऋषय ऊचुरिति यदूचुस्तदाह भवतेति।

End. चातुर्वर्ण्यस्यैवात्राधिकारोऽस्ति ब्राह्मणैस्तु विशेषत इदं त्रयं कर्त्तव्यं शूद्रस्य तु पाठेऽधिकारो नास्तीति विशेषः।

Colophon. इति कूर्म्मपुराणे ईश्वरगीतासूपनिषत्सु विज्ञानभिक्षुकृतभाष्ये दशमोऽध्यायः। ईश्वरगीताभाष्यं समाप्तं॥

विषयः। वेदान्तसारार्थसंग्राहिण्याः कूर्म्मपुराणान्तर्गतेश्वरगीताया व्याख्यानं॥

No. 2051. प्रश्नोपनिषदालोकः। Substance, country-made paper, 11⅓ × 3½ inches. Folia, 17. Lines, 10 on a page. Extent, 544 ślokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Correct.

Praśnopanishadáloka. A gloss on the Praśnopanishad, one of the Upanishads of the Atharva Veda. By Vijnána Bhikshu. The text along with the commentary of S'añkara A'chárya and the gloss of A'nandagiri has been printed twice, and the text has been translated into English by Rájá Rámamohan Ráya, Dr. Roer, Bábu Rájnarain Bose and others.

Beginning. अथ प्रश्नोपनिषद्व्याख्यायते॥ ॐ केशी च भारद्वाज इत्यादि। प्रणवोच्चारणं सर्व्वविघ्नापगमार्थं। सुकेशी नामतः भरद्वाजस्यापत्यं भारद्वाजः तथा शिवेरपत्यं शैव्यः सत्यकामो नामतः तथा सौर्य्यायणी नामतः गर्गस्यापत्यं गार्ग्यः तथा कौशल्यो नामतः अश्वलस्यापत्यं आश्वलायनः तथा भृगोरपत्यं भार्गवः वैदर्भिर्नामतः तथा कबन्धी नामतः कत्यस्यापत्यं कात्यायनः त इह प्रसिद्धा एते षट्संख्या मुनयो ब्रह्मपरा वेदतत्परा ब्रह्मनिष्ठाः कार्य्यब्रह्मोपासकाः परं ब्रह्मान्वेषमाणाः ज्ञातुमुद्युक्ता बभूवुरित्यर्थः।

End. ब्रह्मविद्यासम्प्रदायकर्तृन् नमस्कुर्व्वेति नम इति द्विर्व्वचनं समाप्त्यर्थं ॥ षष्ठः प्रश्नः ॥

Colophon. इति विज्ञानभिक्षुकृते वेदान्तालोके प्रश्नोपनिषदालोकः समाप्तः ॥

विषयः । प्रश्नोपनिषद्व्याख्यानं ।

No. 2052. शास्त्रदीपिका । Substance, country-made paper, 10 × 4½ inches. Folia, 388. Lines, 9 on a page. Extent, 9,871 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Sástra-dípiká. A commentary on the Mímáñsá aphorisms of Jaimini. By Párthasárathi Miśra. The codex is very corrupt and defective.

Beginning. पुरुषाणां प्रथमश्रुतोऽनर्थक इति विरोधापत्तेः । तदुक्तं ।

End. तदेवं लुप्तार्थं यदपि च निषिद्धं विकृतिषु
तथा प्रत्याम्नातं त्रिविधमिह बाध्यं यदुव्यवसितं।
अतस्त्वन्यस्याभ्युच्चयविधिरिति यत्नैव (?) मु
प्रयोगे यत्नाथाः (?) लत उपरिचिन्त्यां प्रकुरुते ॥

Colophon. इति श्रीपार्थसारथिमिश्रविरचितायां शास्त्रदीपिकायां दशमस्याध्यायस्याष्टमः पादः समाप्तः ॥

विषयः। मीमांसासूत्रव्याख्यानं। पुस्तकमिदं प्रथमे मध्ये शेषे च खण्डितं॥

No. 2053. स्कान्दपुराणीय-अम्बिकाखण्डः । Substance, foolscap paper, 13 × 8¼ inches. Folia, 232. Lines, 16—17 on a page. Extent, 11,740 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Verse. Incorrect.

Ambiká-khanḍa of the **Skanda Puráṇa.** A part of the first or Máheśvara khanḍa of the seven divisions of the Skanda Puráṇa. The codex assigns it 216 chapters, and their contents are as follow :—1, Birth of Kártikeya ; 2, Abstract of the work ; 3, Origin of the Naimisha forest ; 4, Prájápatyábhisheka ; 5, Birth of Rudra ; 6, Lopping off of the heads of Brahmá ; 7, Restoration of the heads ; 8, Devas' visit to Rudra ; 9, Birth of Suvarṇáksha ; 10, Curse on Daksha ; 11, Penance of Umá ; 12, Alligators (?) ; 13, Marriage of Umá ; 14, Praise of marriage with S'iva ; 15, Benediction on Vasishtha ; 16, Birth of S'akti, son of Vasishṭha ; 17,

Curse on Kalmásapáda; 18, Rákshasa sacrifice; 19, Dispute between Vaśishṭha and Viśvámitra; 20—24, Story of Nandi; 25, Marriage of S'iva; 26, Umá's request; 27, Gift of cattle, gold &c. to S'iva; 28, Worship of S'iva; 29, Kuvera's benediction on Panchachúḍa; 30, Praise of Benares; 31, Do. of Dadhicha; 32, Destruction of Daksha's sacrifice; 33, Birth of Vṛisha; 34, Benediction on Upamanyu; 35, Do. on Sukeśa; 36—48, Description of various hells; 49, Philosophy expounded by Yama *(Yamagítá)*; 50, Mutation of creation; 51, Praise of Sukeśa; 52, means of escaping from hell; 53, Penance of Durgá; 54—56, Brahmá's benedictiom on Durgá; 57, Story of the seven fowlers; 58, Kingdom of Brahmadatta; 59—68, Story of Kauśika; 69, Hara and Párvati's tour to Mandára; 70—71, Story of Narasiñha; 72, Birth of Skanda; 73, Do. of Andhaka; 75—76, Story of Hiraṇyáksha; 77, Sacrifice of the Asuras; 78 to 106, Wars of the Devas and Asuras; 107—108, Story of Varáha; 109, Departure of Mahádeva to Sumeru; 110, Fruits of gifts; 111, Penances; 112, Duties of women; 113—115, The churning of nectar; 116—121, Legend of the Dwarf incarnation; 122, Destruction of Sriñhikeya; 123, Story of Hariśchandra; 124, Story of Paraśuráma; 125, Worship of Vasudhá; 126—128, Story of the descent of the Ganges; 129—148, Wars of Devas and Asuras; 149—151, Story of Párvatí's accepting an Aśoka tree for a son; 152, S'iva expounds Dharma; 153, Story of S'iva's throat becoming blue; 154, On the propriety of rubbing ashes and dust on the body; 155, On S iva's dwelling on burning grounds; 156, An offering of aromatic waters to S iva; 157—159, Sacred edifices; 160, Feasts of Bhairava; 161, Birth of Vináyaka; 162, Birth of Skanda; 163, Devas repair to behold Skanda; 164, Mátrís deputed by Indra to assassinate Skanda; 165, Battle between Skanda and Indra; 166—169, Skanda appointed generalissimo of the army of the Devas; 170—173, Destruction of Tárakásura; 174, Indra's address to Skanda; 175, Destruction of Mahisásura; 176, Thrones of Maheśvara; 177, Hymns in praise of do.; 178, Story of the messengers of Yama and Sañku; 179, Account of Kálanjara; 180—181, Story of reviving Yama; 182, Temples for gods; 183, Story of Bhadreśvara; 184, Fruit of reciting the name of Mahádeva in a Deodar forest; 185, Temples of gods; 186, Benediction on Maya; 187—195, Legend of Tripura; 196—197, Description and revival of Krauncha; 198—200, The wars of Pralháda; 201—206, Story of Himavat and the clipping of his wings; 207—216, Story of Prahláda's wars with Náráyaṇa and its consequences.

Beginning. हस्त्याननः सकलचन्द्रनिभैकदन्तः सर्व्वात्मजो गणपतिर्भुजगोपवीती ।
विघ्नानि नाशयतु लेख्यविधौ ममासौ देवी च सा कमलिनी वरदास्तु लक्ष्मीः॥
नमः परमदेवाय त्रैगुण्यविजितात्मने ।
सर्व्वतो योगरूपाय संसारभावहेतवे ॥
स्थितिसर्व्वेषु सर्गाणां कर्त्रे हर्त्रे पुरारिणे ।
षड्विंशाय पुराणाय महादेवाय धीमते ॥
प्रजापतेर्म्महासत्रे गङ्गाकालिन्दिसङ्गमे ।
प्रयागे परमे पुण्ये ब्रह्मणो लोकवर्त्मनि ॥
मुनयः संशितात्मानस्तपसा क्षीणकल्मषाः ।
तीर्थसंप्लावनार्थाय पौर्णमास्यां कृताह्निकाः ॥
पौराणिकमपश्यन्त सूतं सत्यपरायणं ।
स्नातमस्मिन् महातीर्थे प्रणामार्थमुपागतं ॥
दृष्ट्वा ते सूतमायातं ऋषयो हृष्टमानसाः ।
आसनं सर्व्वेश तद्योग्यं समकल्पयत् ॥
स प्रणम्य ततः सर्व्वान् सूतस्तान् मुनिपुङ्गवान् ।
प्रदत्तमासनं भेजे सर्व्वधर्म्मागमान्वितः ॥
तमासीनमपृच्छन्त मुनयस्ते समाहिताः ।
ब्रह्मसत्रे पुरासीना नैमिषारण्यवासिनः ॥
कथितं भरताख्यानं पुराणञ्च पुरा त्वया ।
तेन नः प्रतिभाषितं साक्षात् सत्यवतीसुतः ॥
सर्व्वागमपरार्थज्ञः सत्यधर्म्मपरायणः ।
द्विजपूजारतो नित्यं तेन पृच्छा त्वमर्हसि ॥
भारताख्यानसदृशं पुराणाद् यद्विशिष्यते ।
तत्त्वां पृच्छामि वै जन्म कार्त्तिकेयस्य धीमतः ॥

End. ते गृहीतायुधाः सर्व्वे बलवन्तो महासुराः ।
मुखैश्चन्द्रप्रतिमानगो——————बभूव भूरितितरां सुदुर्गमा ॥

Colophon. इति स्कन्दपुराणे एकाशीतिसाहस्र्यां संहितायामम्बिकाखण्डे प्रह्लाद-नारायणीये इन्द्रागमनं समाप्तं । समाप्तोयमम्बिकाखण्डाख्यो ग्रन्थः ।

विषयः । अत्र १ मे अध्याये, कार्त्तिकेयोद्भवप्रश्नः । २ ये, अनुक्रमणिका । ३ ये, नैमिषोत्पत्तिकथनं । ४ र्थे, ब्रह्मणः प्राजापत्याभिषेकः । ५ मे, रुद्रोत्पत्तिः । ६ ष्ठे, ब्रह्मणः शिरश्छेदनवृत्तान्तं । ७ मे, कपालसंस्थापनं । ८ मे, देवैः रुद्रदर्शनविवरणं । ९ मे, सुवर्णाक्षोत्पत्तिवर्णनं । १० मे, दक्ष-

शापवर्णनं। ११ शे, उमातपस्यावर्णनं। १२ शे, ग्राहाद्‌बालमोचणं। १३ शे, उमापरिणयनं। १४ शे. उमाविवाहस्तवः। १५ शे, वशिष्ठवरप्रदानं। १६ शे, शक्तिनामकवशिष्ठपुत्रोत्पत्तिः। १७ शे, कल्माषपादशापविवरणं। १८शे, राक्षसत्वनिरूपणं। १९ शे, वशिष्ठे विश्वामित्रेण वैरनिवर्त्तनं। २०शे. नन्दितपःप्रवेशः। २१ शे, नन्दिना महादेवस्तुतिः। २२शे. जयेश्वरचेत्रकथनं। २३शे, नन्दीश्वराभिषेकार्थं महादेवेन इन्द्रादिदेवताह्वानं। २४शे, नन्दीश्वराभिषेकस्तुतिकथनं। २५ शे, नन्दीश्वरविवाहकथनं। २६ शे, मात्रा मेनया कथितां पतिनिन्दां श्रुत्वा दुःखिता पार्व्वती शिवसमीपमागत्य सर्व्वमाविश्चकार इत्यादिविवरणं। २७शे, शिवाय गो-हिरण्यादिदानफलं। २८ शे, शिवपूजाविधिः। २९ शे. कुवेरपत्नचूड़ावरप्रदानं। ३० शे, वाराणसीमाहात्म्यं। ३१शे, दधीचमाहात्म्यं। ३२ शे, दक्षयज्ञविनाशवर्णनं। ३३ शे, वृषोत्पत्तिवर्णनं। ३४शे. उपमन्युवरप्रदानं। ३५शे, सुकेशवरप्रदानं। ३६शे, पितृप्रश्नः। ३७शे, नरकसङ्ख्याकीर्त्तनं, नरकभीतिवर्णनञ्च। ३८शे, शाल्मलीनामनरकवर्णनं। ३९शे, कालसूत्रकनरकवर्णनं। ४०, कुम्भीपाकनरकवर्णनं। ४१, असिपत्रवनाख्यनरकवर्णनं। ४२, वैतरणीनरकवर्णनं। ४३, अमोघनरकवर्णनं। ४४, पद्माख्यनरकवर्णनं। ४५, महापद्माख्यनरकवर्णनं, रौरवनरकवर्णनञ्च। ४६, महारौरवनरकवर्णनं। ४७, तमोनामनरकवर्णनं। ४८, तमस्तमोनामनरकवर्णनं। ४९, यमगीताकथनं। ५०, संसारपरिवर्त्तनकथनं। ५१, सुकेशमाहात्म्यं। ५२, नरकाभावोपायवर्णनं। ५३, दुर्गातपोवर्णनं। ५४, ब्रह्मप्रयाणवृत्तान्तं। ५५, ब्रह्मागमनवृत्तान्तं। ५६, दुर्गावरप्रदानं। ५७, सप्तव्याधोपाख्यानं। ५८, ब्रह्मदत्तस्य राज्ञो वृत्तान्तं। ५९. कौशिकीसम्भववर्णनं। ६०, कौशिक्या विन्ध्यगिरिगमनवृत्तान्तं। ६१, दैत्योद्योगवर्णनं। ६२, सुन्ददैत्यवधवर्णनं। ६३, असुरविजयवर्णनं। ६४, असुरोद्यमवर्णनं। ६५, ६६, देव्या कौशिक्या सह असुराणां युद्धवृत्तान्तं ६७, कौशिक्यभिषेचनं। ६८, कौशिकीदेहसम्भवा या देव्यस्ता देशेषु नगरेषु च देवा न्यवेशयन् इत्यादिवृत्तान्तं। ६९, पार्व्वत्या सह हरस्य मन्दरगमनवृत्तान्तं। ७०, ७१. नारसिंहेन हिरण्यकशिपुवधवृत्तान्तं। ७२, स्कन्दोत्पत्तिवर्णनं। ७३, अन्धकोत्पत्तिविवरणं। ७४, अन्धकवरप्रदानं। ७५, हिरण्याक्षस्य स्वपुरप्रवेशवृत्तान्त। ७६, हिरण्याक्षस्य सभाप्रवेशवृत्तान्तं। ७७, असुरयागवर्णनं। ७८—१०६, अष्टसप्तत्यध्यायावधि षड़त्तरशताध्यायपर्य्यन्तं देवासुरयुद्धवर्णनं। १०७, वराहोत्सववर्णनं। १०८, वराहप्रयाणवृत्तान्तं। १०९, महादेवस्य सुमेरुगमनवृत्तान्तं। ११०, दानफलनिरूपणं। १११ एकभक्तादिव्रतफलकथनं। ११२, स्त्रीणां धर्म्मनिरूपणं। ११३, अमृताह्वपवर्णनं। ११४, अमृतमन्थने नीलकण्ठोपाख्यानं। ११५, विष्णुना अमृतेऽपहृते असुरैः सह देवानां युद्धं। ११६, ११७. वामनप्रादुर्भावः। ११८, शुक्रवामनसंवादः। ११९-१२०-१२१, वामनप्रादुर्भावे तीर्थयात्रावर्णनं। १२२, सैंहिकेयवधवर्णनं। १२३, हरिश्चन्द्रनिर्देशः। १२४, महादेवात्परशुरामवरप्राप्तिवर्णनं। १२५, वसुधाप्रतिष्ठावर्णनं। १२६, १२७, १२८, गङ्गावतरणवृत्तान्तं। १२९—१४८ ऊनत्रिंशदधिकशताध्यायावधि अष्टचत्वारिंशदधिकशताध्यायपर्य्यन्तं अन्धकाद्यसुरपराजयवृत्तान्तं। १४९,१५०,

१५१, पार्व्वत्या पुत्त्रत्वेनाशोकतरोः परिग्रहणवृत्तान्तं। १५२, शूलिनो धर्म्मपद्धतिकथनं। १५३, महादेवकण्ठस्य विषान्नीलत्वकथनं। १५४, भस्मरजसः कथं विलेपनत्वं इति पार्व्वतीप्रश्ने शिवोत्तरं। १५५, जगत्प्रभोस्तव कथं श्मशानवासित्वं इति पार्व्वतीप्रश्ने शिवोत्तरं। १५६, सुगन्धजलादिना शिवस्नापनफलकथनं। १५७,१५८, १५९, पुण्यायतनफलं। १६०, भैरवोत्सवकथनं। १६१, विनायकोत्पत्तिः। १६२, स्कन्दोत्पत्तिः। १६३, स्कन्ददर्शनार्थं देवादीनामागमनवृत्तान्तं। १६४, स्कन्दविनाशार्थं इन्द्रेण मातृगणप्रेरणं। १६५, स्कन्देन सह इन्द्रस्य युद्धवृत्तान्तं। १६६,१६७, स्कन्दस्य देवसेनापतित्वविवरणं। १६८, स्कन्दाभिषेकवर्णनं। १६९, स्कन्दाभिषेकव्यासेधः। १७०, १७१, १७२, १७३, तारकासुरबधविवरणं। १७४, स्कन्दं प्रतिइन्द्रवाक्यं। १७५, महिषासुरबधविवरणं। १७६, महेश्वरनामानि। १७७, महेश्वरस्तुतिः। १७८, क्षीणायुषं श्वेतमानेतुमागतानां यमदूतानां शङ्कुकर्णेन प्रत्याख्यानं। १७९, कालञ्जरायतनवृत्तान्तं। १८०, १८१, यमसञ्जीवनवृत्तान्तं। १८२, देवायतनोद्देशः। १८३, भद्रेश्वराख्यानं। १८४, देवदारुवने महादेवस्थानमाहात्म्यवर्णनं। १८५, आयतनवर्णनं। १८६, मयवरदानं। १८७, त्रिपुरवर्णनं। १८८,—१९५, अष्टाशीत्यधिकशताध्यायात् पञ्चनवत्यधिकशताध्यायपर्य्यन्तं त्रिपुरबधवृत्तान्तं। १९६, क्रौञ्चवधवर्णनं। १९७, क्रौञ्चसञ्जीवनं। १९८, १९९, प्रह्लादयुद्धं। २००, प्रह्लादविजयः। २०१, हिमवत्सम्भाषणं। २०२, गिरिवाक्यं। २०३, २०४, गिरिपक्षच्छेदवृत्तान्तं। २०५, मेघोत्पत्तिः। २०६, पक्षच्छेदनवृत्तान्तश्रवणफलं। २०७, २०८, नारायणेन सह प्रह्लादयुद्धोद्योगः। २०९, अनुह्रादबधवृत्तान्तं। २१०, नारायणेन चक्रसृष्टिवर्णनं। २११, प्रह्लादामरसङ्गमः। २१२, परमदैवतवचनं। २१३, दानवैः सह देवानां युद्धवृत्तान्तं। २१४, प्रह्लादतपश्चरणं। २१५, असुरप्रयाणोत्पातविवरणं। २१६, प्रह्लादनारायणयुद्धे इन्द्रागमनवृत्तान्तं॥

No. 2054. यतीन्द्रमतदीपिका। Substance, country-made paper, 13 × 5½ inches. Folia, 25. Lines, 11 on a page. Extent, 937 ślokas. Character, Nágara. Date, Sm. 1894, Sk. 1759. Place of deposit, Calcutta, Governmen of India; also another copy at Berhampur, Bábu Rámadása Sena. Appearance, old. Prose. Incorrect.

Yatindramata-dípiká. A summary of the dualistic form of the Vedánta doctrine. By S'ríniváṣadása, son of Govinda A'chárya. The work is divided into 10 chapters, and treats of (1) Perception; (2) Inference; (3) Testimony; (4) Nature; (5) Time; (6) Eternal attributes; (7) Intellect; (8) Created beings; (9) God; and (10) Immateriality.

Beginning. श्रीवेङ्कटेशं करिशैलनाथं श्रीदेवराजं घटिकाद्रिसिंहम्।
कृष्णेन साकं यतिराजमीडे स्वप्ने च दृष्टान् मम देशिकेन्द्रान्। १।
यतीश्वरं प्रणम्याहं वेदान्तार्य्यं महागुरुं।
करोमि बालबोधार्थं यतीन्द्रमतदीपिकां॥ २॥

श्रीमन्नारायण एव चिदचिद्विशिष्टाद्वैतं तत्त्वं भक्तिप्रपत्तिभ्यां प्रपन्नः स एव उपायः। अप्राकृतदेशविशिष्टः स एव प्राप्य इति वेदान्तवाक्यैः प्रतिपादयतां व्यास-बोधायन-गुहदेव-भारुचि-ब्रह्मानन्दि-द्रविड़ाचार्य्य-श्रीपराङ्कुशनाथ-यामुन-मुनियतीश्वरप्रभृतीनां मतानुसारेण बालबोधार्थं वेदान्तानुसारिणी यतिपतिमतदीपिकाख्या शारीरकपरिभाषा मा र्य्यकृपावलम्बिनामया यथामति संग्रहेण प्रकाश्यते।

End. वस्तुतस्तु वेदान्तानां चिदचिद्विशिष्टाद्वैतमेकमेव ब्रह्मेति तात्पर्य्यं अत एव चिदचिद्विशिष्टं ब्रह्मैकमेवेति मत्वा भगवान् बादरायणः अथातो ब्रह्मजिज्ञासेत्युपक्रम्य तमेव प्रकारं निरूपितवान् अतः चिदचिद्विशिष्टो ब्रह्मशब्दवाच्यो विष्ण्वाख्यः परवासुदेवो नारायण एवैकं तत्त्वमिति विशिष्टाद्वैतवादिनां दर्शनमिति सिद्धं॥

इति विविधविचित्रं मानमेयं प्रकाशं घनगुरुवरदासेनोक्तमादाय शास्त्र।
यतिपतिमतदीपं वेदवेदान्तसारं स भवति मतिमान् यः सत्कटाक्षैकलक्ष्यः॥

Colophon. इति श्रीवाधूलकुलतिलकश्रीमन्महार्य्यस्य प्रथमदासेन श्रीमद्वेङ्कटगिरिनाथपदकमलसेवापरायणस्वामिचिफङ्कापुष्करिणीगोरि वन्दार्य्यसूनुना श्रीनिवासदासेन विरचितायां यतीन्द्रमतदीपिकायामद्रव्यपरिच्छेदो नाम दशमोऽवतारः॥

विषयः। श्रीमन्नारायण एव चिदचिद्विशिष्टाद्वैतं तत्त्वं इति प्रतिपादयतां व्यास-बोधायन-गुहदेव-भारुचि-ब्रह्मानन्दि-द्रविड़ाचार्य्य-श्रीपराङ्कुशनाथ-यामुन-मुनियतीश्वरप्रभृतीनां मतानुसारेण बालबोधार्थं संक्षेपतो दशभिः परिच्छेदैर्वेदान्तमततात्पर्य्यकथन। तत्र १—मे परिच्छेदे, प्रत्यक्षनिरूपणं। २-ये, अनुमाननिरूपणं। ३-ये, शब्दनिरूपणं। ४-र्थे प्रकृतिनिरूपणं। ५ मे, कालनिरूणं। ६ ठे नित्यविभूतिनिरूपणं। ७-मे, बुद्धिनिरूपणं। ८-मे, जीवनिरूपणं। ९-मे-ईश्वरनिरूपणं। १०-मे, अद्रव्यनिरूपणं॥

No. 2055. दीपप्रकाशः। Substance, country-made paper, 9 × 4¼ inches. Folia, 42. Lines, 8—10 on a page. Extent, 1,036 slokas. Character, Náarga. Date, Sm., 1785. Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Dípa-prákáśa. On dedication of lighted lamps to the goddess Rájarájeśvarí according to Tántric rules. By Premanidhi S'armá.

Beginning. अगाधापत्त्यब्धेस्तरणकरणे सुन्दरतरी
हरीभूतोऽरातिव्रजस्तृगमहामानमथने ।
करी मर्त्यामर्त्याद्यसुलभतरीभूतधिषणा-
दरीदत्प्रेम्णामिह जयति दीपात्मकहरिः ॥ १ ॥

End. यस्योद्योतमती सती गुणवती माता पितोमापति-
र्नामप्रेमनिधीति पन्यकुलभूः कुर्माचलो जन्मभूः ।
स्तूपाख्यं कृतवीर्यजात्मजपदं भूष्टमल्लैवमभू-
द्दत्यानन्दवनेऽमुना निवसता दीपप्रकाशः कृतः ॥

Colophon. इति श्रीप्रेमनिधिशर्मनिर्मितो दीपप्रकाशः सम्पूर्णतामगमत् ॥
विषयः । तन्त्रोक्तनियमेन श्रीराजराजेश्वरोद्देश्यकदीपदानविधिकीर्त्तनं ॥

No. 2056. शब्दप्रकाशः वा दीपप्रकाशटिप्पनम् । Substance, country-made paper, 9 × 3½ inches. Folia, 120. Lines, 10 on a page. Extent, 3,210 ślokas. Character, Nāgara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

S'abdaprakáśa alias **Dípaprakáśa-ṭippana.** A commentary on the work noticed under the last preceding No. by the author himself.

Beginning. प्रणम्येष्टदेवं शिवादेरपीष्टप्रदं राजराजेश्वराख्यं रमेशं ।
स्वदीपप्रकाशस्थितक्लिष्टशब्दप्रकाशं तनोम्यद्य बालानुरोधात् ॥ १ ॥

अथ नानातन्त्रग्रन्थालोचनतद्व्यवस्थादिकरणक्लेशपारद्वारेण श्रीराजराजेश्वरोपासकजनश्रेणी-धूरीणोपकारादिद्वारा श्रीस्वेष्टदेवोपासनाप्रसादमाकाङ्क्षमाणो दीपप्रकाशनामानं साङ्गदीप-प्रकाशकतयान्वर्थं शिखरिणीस्रग्धराशार्दूलविक्रीडितच्छन्दोनिबद्धश्लोकसमुदायात्मकं ग्रन्थं चिकीर्षुस्तत्समाप्तिप्रतिबन्धकप्रत्यूहव्यूहविध्वंसनार्थं स्वेष्टदेवस्य दीपप्रियतया तदात्मकतया स्मरण-स्याधिकतरं प्रमादकृत्त्वमभिप्रेत्य दीपप्रकाशनिर्माणे दीपात्मकतयैव स्मरणस्योचिततमत्वं मत्वा च तथा स्मरणनमस्काराद्यात्मकं मङ्गलं कृत्वा शिष्यशिक्षायै निबध्नाति । अगाधेत्यादि ।

End. अस्ति हि उत्तरस्यां दिशि मुक्तिचेत्रमविधे ता + मेतिप्रसिद्धपर्व्वतदेशानामधिपतिः श्रीमल्लैवमदेवस्तदीयकृपाप्राप्तभूमिवृत्तिभ्यामन्नवस्त्रादिसौख्यपूर्व्वकं काश्यां निवसतोऽस्मि वर्णनार्थः । तथा च जन्मस्थानं भिन्नं वृत्तिस्थानं भिन्नं निवासस्थानञ्च भिन्न यन्यकर्त्तरुक्तं दीप-

प्रकाशः दीपस्य पूर्व्वोपदिष्टस्य प्रकाशः प्रकटनं दीपप्रकाशनामा ग्रन्थस्य कृतोऽनुष्ठितो बुद्धिपूर्व्वको न लक्षणाज्जात इत्यर्थः।

इत्थं शब्दप्रकाशस्मरणकरुणया राजराजेश्वरस्य
स्वीयाभीष्टार्थदातुर्नगजलधिरसक्ष्माशके माघमासे।
कृष्णाष्टम्यां प्रपूर्णः परपरुचिरार्थस्य नाभावबोधो
मूलं मूलस्य यन्नादरणमिह परं त्वस्ति संक्षेपमात्रं ॥ १ ॥
अस्माभिः सकलः प्रयोग उदितो रत्नाकरे स्पष्टतो
मूलं भक्तितरङ्गिनीत्यभिहिते ग्रन्थेऽखिलं दर्शितं।
तत्संक्षेपरुचिप्रतोषफलके दीपप्रकाशे स्थिता
क्लिष्टा शब्दततिः प्रकाशिततरार्था साम्प्रतं निर्मिता ॥ २ ॥
शास्त्राश्चर्य्यं नृणां सप्राद्यानुष्ठितादितो ग्रन्थात्।
दीपप्रकाशकर्त्तुर्नानासाध्यं किमप्यस्ति ॥ ३ ॥
दीपप्रकाशे हि मनोऽस्ति यस्य शब्दप्रकाशेऽपि मनोऽस्तु तस्य।
शब्दप्रकाशेन विना न नृणां दीपप्रकाशे भविता प्रवेशः ॥ ४ ॥
यस्योद्योतमती सती गुणवती माता पितामापति-
र्नाम प्रेमनिधीति पन्यकुलभूः कुर्म्माचलो जन्मभूः।
स्वपास्यं कृतवीर्य्यजात्मजपदं भूष्टन्मलैवम्मभू-
हत्यानन्दवनेऽमुना निवसता शब्दप्रकाशः कृतः ॥ ५ ॥

Colophon. इति श्रीमत्प्रेमनिधिशर्म्मनिर्म्मितदीपप्रकाशटिप्पनभूतशब्दप्रकाशग्रन्थः सम्पूर्णः ॥

विषयः। स्वकृतदीपप्रकाशस्थितक्लिष्टशब्दार्थानां प्रकटीकरणं।

No. 2057. योगशास्त्रं। Substance, country-made paper, 11¾ × 4½ inches. Folia, 5. Lines, 9 on a page. Extent, 126 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India; also another copy at Murshidábád, Jápharaganj, Gopáladása Mahanta. Appearance, old. Prose. Incorrect.

Yoga-śástra. A brief exposition of the Yoga aphorisms of Patanjali. The codex is defective, and the name of the author of the work cannot be made out.

Beginning. (आद्यपत्रं नास्ति)। धिगमोत्तरापायाभावश्च व्यचिन्त्यासुन (?) संशय-प्रमादालस्याविरति-भ्रान्तिदर्शनालब्धभूमिकत्वानवस्थितत्वानि ।

End. कैवल्यं स्वरूपप्रतिष्ठा वा चितिशक्तेरिति ।

Colophon. इति योगशास्त्रे कैवल्यपादश्चतुर्थः ॥ समाप्तः ।

विषयः । पातञ्जलयोगसूत्रतात्पर्य्यविषयीभूतार्थस्य संक्षेपेण कथनं ॥

No. 2058. योगमणिप्रभा वा पातञ्जलयोगसूत्रवृत्तिः । Substance, country-made paper, 11¾ × 4¼ inches. Folia, 60. Lines, 9 on a page. Extent, 1,134 ślokas. Character, Nagara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Yogamaṇi-prabhá. A commentary on the Yoga aphorisms of Patanjali. By Rámánanda Sarasvatí, pupil of Govidánanda. It follows the Pátanjala-bháshya.

Beginning. वन्दे क्लेशाद्यसंस्पृष्टं पुराणपुरुषं हरिं ।
प्रकृत्या सीतया युक्तं योगेशं योगदायिनं ॥
पतञ्जलिं सूत्रकृतं प्रणम्य व्यासं मुनिं भाष्यकृतश्च भक्त्या ।
भाष्यानुगां योगमणिप्रभाख्यां वृत्तिं विधास्यामि यथा मतिश्च ॥
इह खलु भगवान् पतञ्जलिः प्रेक्षावत्प्रवृत्त्यङ्गशास्त्रप्रतिपाद्यं दर्शयति ॥
अथ योगानुशासनम् ॥

End. वक्ताहं प्रमादनिरतः क्व वात्सल्यं गुरोरिदं ।
नूनं महात्मनां दीने सतश्चित्तं कृपान्वितं ॥

Colophon. इति श्रीमत्परमहंसपरिव्राजकाचार्य्यगोविन्दानन्दभगवत्पूज्यपादशिष्य-श्रीरामानन्दसरस्वतीकृतौ पातञ्जलसूत्रवृत्तौ योगमणिप्रभाख्यायां कैवल्यपादश्चतुर्थः समाप्तः ॥

विषयः । पातञ्जलयोगसूत्रस्य भाष्यानुगतव्याख्यानं ॥

No. 2059. पथ्यापथ्यविबोधकः । Substance, country-made paper, 9 × 4¼ inches. Folia, 118. Lines, 8—10 on a page. Extent, 3,729 ślokas. Character, Nágara. Date, Sm. 1767. Place of deposit, Calcutta, Government of India. Appearance, old. Verse. Incorrect.

Pathyápathya-vibodhaka. On diet and regimen. By Keya-deva Paṇḍit, a Vadya by caste.

Beginning. नत्वैकं विश्वरूपं त्रिभुवनशरणं स्वर्गमोक्षैकहेतुं
शम्भुं वाग्देवताञ्च व्यवहरति यया विश्वमेतन्नितान्तं ।
यस्य ध्यानप्रसादात् प्रभवति पुरुषः सर्व्वकार्य्यस्य सिद्धिं
कर्त्तुं तं देववन्द्यं स्फुरदुरगवरस्फारहारं गणेशं ॥ १ ॥
भारद्वाजपवित्रगोत्रतिलकः श्रीपद्मनाभोऽभव-
द्वेदव्याकृतिनाटकागमकथालङ्कारपारङ्गमः ।
तत्पुत्रो गुणभूषितः समभवत् श्रीशार्ङ्गनामा भिषक्
येन प्राणिगणो गदैरपहृतोऽसौ सर्व्वविद्यालयः ॥ २ ॥
तत्पुत्रः केयदेवोऽस्ति वैद्यशास्त्रविशारदः ।
मणिरत्नाकरो येन कृतोऽन्यो नाम सागरः ॥
नामरत्नाकरोक्तानां द्रव्याणाञ्च रसादिषु ।
Colophon. इति महाभारतार्थप्रकाशिन्यां विरोधभञ्जन्यां शान्तिपर्व्वे। शकाब्दाः १५७८।

विषयः। महाभारतीयशान्तिपर्व्वान्तर्गतदानधर्म्मपर्व्वाध्यायस्य व्याख्यानं।

No. 2087. महाभारतार्थप्रकाशिनी, वा विरोधभञ्जनी, आश्वमेधादिपञ्चकम्।
Substance, country-made paper. 16 × 3 inches. Folia, 50. Lines, 8 on a page. Extent, 784 slokas. Character, Bengali. Date, Sk. 1578. Place of deposit, Variyá, Post Siñdá, Zilá Rájasáhi, Pandit Madhusúdana S'iromani. Appearance, decayed. Prose. Correct.

Mahábháratártha-prakás'iní *alias* **Virodhabhanjaní**. Another part of the work last described. It refers to the last five sections of the Mahábhárata.

Beginning. नारायणं नमस्कृत्य किरीटिज्ञानदीपकं।
पर्व्वाश्वमेधिकव्याख्या रामकृष्णेन तन्यते ॥

अथ भगवान् श्रीकृष्णद्वैपायनो भगवत्कारुण्येनैव सर्व्वं सिद्ध्यतीति प्रतिपादयितुं शान्तपर्व्वजिज्ञासापगमेऽवसरसङ्गत्या आश्वमेधिकं पर्व्व समारभते वैशम्पायन उवाचेत्यादि। महाबाहुः रूपी गङ्गा गङ्गातः। विध्यते अनेन व्याधः शल्यः। इत्यादि।

End. यद्वा पुष्करतीर्थजलैः तत्स्नानजन्यफलमनेनैव इति भावः। स्वर्गारोहणकं पर्व्व समाप्तं। अन्यान् आश्चर्य्यपर्व्वे भविष्यति।

Colohpon. इति विरोधभञ्जन्यां महाभारतप्रकाशिन्याम् आश्वमेधादि पञ्चपर्व्व। शकाब्दाः १५७८।

विषयः। महाभारतीयाश्वमेधिकाश्रमवासिक-मौषल-महाप्रास्थानिक-स्वर्गारोहणपर्व्वव्याख्यानं।

No. 2088. महाभारतार्थप्रकाशिनी वा विरोधभञ्जनी, (आदिपर्व्व)। Substance, country-made paper, 20 × 3 inches. Folia, 32. Lines, 9 on a page. Extent, 2.179 slokas. Character, Bengali. Date, ? Place of deposit, Variyá, Post Siñdá, Zilá Rájasháhi, Pandit Madhusúdana S'iromaṇí. Appearance, decayed. Prose. Correct.

Mahábháratártha-prakásiní. The part called A'di Parva.

Beginning. श्रीकृष्णाय नमस्कृत्य महाभारतबोधिनी।
विरोधभञ्जनी टीका रामकृष्णेन तन्यते॥

अथ वेदार्थस्यातिदुरूहतया कलियुगव्युत्पन्नानामबोध्यतया विहितनिषिद्धज्ञानाभावेन प्रवृत्तिनिवृत्त्यभावप्रसङ्गेन तेषां प्रत्यवायः स्यादिति परमकारुणिको भगवान् युधिष्ठिरादिवदाचरनीयं न दुर्य्योधनादिवदिति शिक्षार्थं राजसूयादावसमर्थानामनधिकृतानाञ्च तत्फलप्राप्त्यर्थं श्रीकृष्णः सर्व्वोपकारकः सर्व्वश्रेष्ठ इति स एव सर्व्वश्रेयोऽर्थिनोपास्य इति ज्ञानार्थञ्च महाभारतार्थग्रन्थमारभते नारायणं नमस्कृत्येति पदं प्रणामार्थकं प्रणामविषयार्थकञ्च। इत्यादि

End. परिक्रम्य अग्निं प्रदक्षिणीकृत्य।

Colophon. इति महाभारतार्थप्रकाशिन्यां विरोधभञ्जन्यामादिपर्व्व समाप्तं।

विषयः। महाभारतीयादिपर्व्वव्याख्यानम्।

No. 2089. महाभारतार्थप्रकाशिनी, वा विरोधभञ्जनी, (सभापर्व्व।) Substance, country-made paper, 16 × 3 inches. Folia, 30 Lines, 7 on a page. Extent, 1,015 slokas. Character, Bengali. Date, ? Place of deposit, Variyá, Post Siñdá, Zilá Rájasháhi, Pandit Madhusúdana S'iromaṇí. Appearance, decayed. Prose. Correct.

Mahábháratártha-prakásiní. The part called Sabhá Parva.

Beginning. प्रणिपत्य हरिं भक्त्या सर्व्वलोकैकपालकं।
तन्यते रामकृष्णेन सभापर्व्वप्रकाशिनी॥

अथ सभापर्व्वव्याख्या । अथ भगवत्प्रसादादेव परमैश्वर्य्य । शत्रुर्धनाद्यर्थो न कर्त्तव्य इति च द्यूतेन न देवितव्यमिति च बोधयितुं पाण्डवचरितलक्षणैककार्य्यत्वमङ्गत्या भगवान् श्रीकृष्ण-द्वैपायनः सभापर्व्वाख्यं ग्रन्थमाह वैशम्पायन उवाचेति ।

End. पुत्रपरीक्षया पुत्रप्रियेच्छया । इति सभापर्व्वणि वनप्रवेशः ।

Colophon. इति विरोधभञ्जन्यां महाभारतप्रकाशिन्यां सभापर्व्व समाप्तम् ।

विषयः । महाभारतीयसभापर्व्वव्याख्यानं ।

No. 2090. महाभारतार्थप्रकाशिनी, वा विरोधभञ्जनी, (आरण्यकपर्व्व ।) Substance, country-made paper, 16 × 3, inches. Folia. 70. Lines 7 on a page. Extent, 2,777 ślokas. Character Bengali. Date, ? Place of deposit, Variyá, Post Siñḍá, Zilá Rájash́áhi, Paṇḍit Madhusúdana S'iromaṇí. Appearance, decayed. Prose. Correct.

Mahábháratártha-prakáśiní. The part called Vana or Áraṇyaka Parva.

Beginning. प्रणिपत्य हरिं भक्त्या नीलेन्दीवरसुन्दरं ।
क्रियते रामकृष्णेन व्याख्यारण्यकपर्व्वणः ॥

अथ धार्म्मिकानामपि काले एव सुखं भवति नाकाले इति दर्शयितुं शक्तो मुख्यकल्पेनैव प्रतिज्ञा अवश्यं पालनीयेति बोधयितुं प्रतिज्ञातार्थसिद्धिरूपोपोद्घातसङ्गत्या भगवान् श्रीकृष्णद्वैपायनस्तृतीयमारण्यकं पर्व्वारभते जनमेजय उवाचेत्यादि । निकृत्या द्यूतजिताः । इत्यादि ।

End. अतिदूरे तद्दिने न गम्यमिति निमित्ततः । पृथक् नाना । इत्यारण्यके आरणेयं । समाप्तश्चेदमारण्यकं पर्व्व । एतदनन्तरं को ग्रन्थ इत्यत आह अस्यानन्तरमित्यादि यस्यायमाद्यः श्लोक इति तु सम्प्रदायानुरोधात् पठ्यते इति ।

Colophon. इति महाभारतप्रकाशिन्यां विरोधभञ्जन्यामारण्यकं पर्व्व समाप्तं ।

विषयः । महाभारतीयवनपर्व्वव्याख्यानं ।

No. 2091. महाभारतार्थप्रकाशिनी, वा विरोधभञ्जनी, (विराटपर्व्व ।) Substance, country-made paper, 16 × 3 inches. Folia, 12. Lines, 8 on a page. Extent, 379 ślokas. Character, Bengali. Date, ? Place of deposit, Variyá, Post Siñḍá, Zilá Rájasháhi, Paṇḍit Madhusúdana S'iromaṇí. Appearance, decayed. Prose. Correct.

Mahábháratártha-prakáśiní. The part called Viráṭa Parva.

Beginning. भगवन्तं नमस्कृत्य भक्तकामप्रदं हरिं ।

विराटपर्व्वव्याख्यानं रामकृष्णेन तन्यते ॥

अथ धर्म्मादेव विपच्चितस्त्राणमिति परमविपत्तावपि धर्म्मो न त्याज्य इति च बोधयितुं युधिष्ठिरप्रतिज्ञापालनरूपैककार्य्यत्वमङ्कृत्या श्रीकृष्णद्वैपायनस्तृतीयपर्व्वारभते जनमेजय उवाचेत्यादि । पूर्व्वेस्य पितुः पितामहाः । पितामहात् पूर्व्वं इति केचित् । इत्यादि ।

End. वैवाहिकाः पाणिग्रहनिकाः । सर्व्वं सत्त्वं जीवितञ्च । कृते कारिते ॥ विराटपर्व्वण्यभिमन्युविवाहः । समाप्तञ्चेदं विराटपर्व्व । अस्यानन्तरमुद्योगपर्व्व भविष्यति ॥

Colophon. इति महाभारतार्थप्रकाशिन्यां विरोधभञ्जन्यां विराटपर्व्व ।

विषयः । महाभारतीयविराटपर्व्वव्याख्यानं ।

No. 2092. महाभारतार्थप्रकाशिनी, वा विरोधभञ्जनी, (उद्योगपर्व्व ।)

Substance, country-made paper, 16 × 3 inches. Folia, 60. Lines, 8 on a page. Extent, 1,950 ślokas. Character, Bengali. Date, Sk. 1578. Place of deposit, Variyá, Post, Siñdá, Zilá Rájasháhi, Paṇḍit Madhusúdana S'iromaṇí Appearance, decayed. Prose. Correct.

Mahábháratártha-prakáśiní. The part called Udyoga Parva.

Beginning. भगवन्तं नमस्कृत्य सच्चिदानन्दविग्रहं ।

उद्योगपर्व्वव्याख्यानं रामकृष्णेन तन्यते ॥

अथ भगवच्चरणारविन्दविमुखस्य न कदाचिदर्थसिद्धिरिति दर्शयितुं पाण्डवचरितप्रतिपादनलक्षणैककार्य्यत्वमङ्कृत्या भगवान् श्रीकृष्णद्वैपायनः पञ्चममुद्योगपर्व्व समारभते कृत्वा विवाहमित्यादिना । कृत्वा कारयित्वा आर्षेण निजर्लोपः । सपक्षाः सहायाः । इत्यादि ।

End. आ अभिव्याप्तानि मुखानि येषां ते प्रभिन्नकरटमुखाः । सेनानिर्य्याणमुद्योगपर्व्व च समाप्तं ।

Colophon. इति महाभारतार्थप्रकाशिन्यां विरोधभञ्जन्यामुद्योगपर्व्व । शकाब्दाः१५७८।

विषयः । महाभारतीयोद्योगपर्व्वव्याख्यानं ।

No. 2093. महाभारतार्थप्रकाशिनी, वा विरोधभञ्जनी, (भीष्मपर्व्व ।)

Substance, country-made paper, 16 × 3 inches. Folia, 50. Lines, 8 on a page. Extent, 862 ślokas. Character, Bengali. Date, ? Place of deposit, Variyá, Post Siñdá. Zilá Rájasháhi, Paṇḍit Madhusúdana S'iromaṇí. Appearance, decayed. Prose. Correct.

Mahábháratártha-prakáśiní. The part called Bhíshma Parva.

Beginning. नारायणं नमस्कृत्य भक्ताभीष्टफलप्रदं।
तन्यते रामकृष्णेन व्याख्यानं भीष्मपर्व्वणः॥

अथ भगवान् श्रीकृष्णद्वैपायनो भगवद्भक्तस्य सर्व्वत्र जय एवेति बोधयितुं अश्वोपाख्यानजिज्ञासापगमेऽवसरसङ्गत्या षष्ठपर्व्व वक्तुं तदनुकूलजिज्ञासार्थं जनमेजयप्रश्नमवतारयति कथं युध्यन्तेत्यादि। कुरुक्षेत्रे धर्मक्षेत्रे। इत्यादि।

End. भयानकानामुत्पातानामभि आभिमुख्येन सेचनं पृथिव्याकाशव्यापनं। उत्पातदर्शननिर्देशः ततो जम्बूखण्डनिर्माणं। तदेव भूमिपर्व्व। तदनन्तरग्रन्थस्तु गीतोपयुक्तत्वेन गीतैव तत्रापाठः पुस्तके लिखनं तु। या त्वष्टादशाध्यायगीता सा उपाख्यानरूपा। ततः समाप्तिपर्य्यन्तमेव भीष्मवधः व्यासेनार्क्कखनाकथापाठ इति।

Colophon. इति महाभारतप्रकाशिन्यां विरोधभञ्जन्यां भीष्मपर्व्व।

विषयः। महाभारतीयभीष्मपर्व्वव्याख्यानं।

No. 2094. महाभारतार्थप्रकाशिनी, वा विरोधभञ्जनी, (द्रोणपर्व्व।)

Substance, country-made paper, 16 × 3 inches. Folia, 40. Lines, 8 on a page. Extent, 1,422 ślokas. Character, Bengali. Date, ? Place of deposit, Variyá, Post Siñdá, Zilá Rájasháhi, Paṇḍit Madhusúdana S'iromaṇi. Appearance, decayed. Prose. Correct.

Mahábháratártha-prakáśiní. The part called Droṇa Parva.

Beginning. चक्रपाणिं नमस्कृत्य सर्व्वदा भक्तपालकं।
तन्यते रामकृष्णेन व्याख्या सप्तमपर्व्वणः॥

अथ श्रेयोऽर्थिना भक्तपरिपालकः श्रीकृष्ण एवोपास्य इति बोधयितुं द्रुढकथनलक्षणैककार्य्यतासङ्गत्या भगवान् श्रीकृष्णद्वैपायनः सप्तमं पर्व्वारभमाणः सङ्गतिप्रविष्टजिज्ञासार्थं जनमेजयप्रश्नमवतारयति जनमेजय उवाचेत्यादिना पितरि पितामहप्रपञ्चे च हते हततुल्ये सति। इत्यादि।

End. वेदेऽधीते सति यत्फलं तत् अस्मिन्नप्यधीते। घोरैः कर्म्मभिः कृतैर्महापातकैः यज्ञाद्यावाप्तस्यन्य विष्णोः प्राप्तिर्मोक्षः। वर्णा इति वङ्गलमविरचितमद्देशगतत्वात्। प्रईकत्ववत्। वैश्यशूद्रसङ्करजा इति।

Colophon. इति द्रोणपर्व्व समाप्तं।

विषयः। महाभारतीयद्रोणपर्व्वव्याख्यानं।

No. 2095. महाभारतार्थप्रकाशिनी, वा विरोधभञ्जनी (कर्णपर्व्व।)
Substance, country-made paper. 16 × 3 inches. Folia. 3. Lines. 80 on a page. Extent, 1,110 ślokas. Character, Bengali. Date, ? Place of deposit, Variyá, Post Siñḍá, Zila Rájasháhi, Paṇḍit Madhusúdana S'iromaṇi. Appearance, decayed. Prose. Correct.

Mahábháratártha-prakáśiní. The part called Karṇa Parva.

Beginning. कृष्णं तस्य नियन्तारं नमस्कृत्य हरिं प्रभुं।

तन्यते रामकृष्णेन व्याख्यानं कर्णपर्व्वणः॥

अथ भगवान् श्रीकृष्णद्वैपायनः श्रीकृष्णानुग्रहादेव विपन्निवृत्तिः सम्पत्तिश्चेति स एवोपास्य इति बोधयितुमग्रमं कर्णपर्व्व समारभते ततो द्रोणे हते राजन्नित्यादिना। ततो नारायणन्नमो-च्चानन्तर। इत्यादि

End. स पाठकः श्रोता च। महामुनेर्व्यासस्य इदं महाद्भुतेत्यादि समाप्तिपर्य्यन्तं वैश-म्पायनवाक्यं। इति कर्णपर्व्व समाप्तं।

Colophon. इति महाभारतप्रकाशिन्यां विरोधभञ्जन्यां कर्णपर्व्व।

विषयः। महाभारतीयकर्णपर्व्वव्याख्यानं।

No. 2096. महाभारतार्थप्रकाशिनी, वा विरोधभञ्जनी (शल्यादित्रिकम्।)
Substance, country-made paper, 16 × 3 inches. Folia, 42. Lines, 7 on a page. Extent, 1,291 ślokas. Character, Bengali. Date, ? Place of deposit, Variyá, Post Siñḍá, Zilá Rájasháhi, Paṇḍit Madhusúdana S'iromaṇi. Appearance, decayed. Prose. Correct.

Mahábháratártha-prakáśiní. The S'alya and the two subsequent Parvas.

Beginning. श्रीकृष्णचरणाम्भोजे निवेश्य स्वात्मषट्पदं।

तन्यते रामकृष्णेन व्याख्यानं शल्यपर्व्वणः॥

अथ भगवच्चरणारविन्दचेतस एव सर्व्वेष्टसिद्धिरिति दर्शयितुं श्रीकृष्णद्वैपायनः युद्धप्रतिपा-दनलक्षणैककार्य्यतासङ्गत्या नवमं शल्यपर्व्व समारभमाणः सङ्गतिप्रविवक्षिजिज्ञासावतारणाय प्रश्नमव-तारयति जनमेजय उवाचेत्यादि। पाण्डवैर्वध्यमाणं क्षिप्यमाणं। इत्यादि।

End. सपरिच्छदाः सभृत्यजनाः। इति स्त्रीपर्व्व समाप्तं। अस्यानु शान्तिपर्व्व भविष्यति।

Colophon. इति महाभारतार्थप्रकाशिन्यां विरोधभञ्जन्यां शल्यादित्रिकं समाप्तं।

विषयः। महाभारतीयशल्य-सौप्तिक-स्त्रीपर्व्वव्याख्यानं गदापर्व्वापि यस्तु शल्यपर्व्वान्तर्भूततया व्याख्यात इति चिन्तनीयं।

इह खलु संसारानलसन्तप्तनिखिलजनापवर्गाय आत्मा वा अरे श्रोतव्यो मन्तव्यो निदिध्यासितव्यश्चेति—इत्यादि ।

End. तस्मान्निर्व्विशेषब्रह्मसाक्षी + स्वैकरूपत्वात् तत्तथ्यो मोक्षो निरतिशयानन्दात्मक एवेति सिद्धं ॥

Colophon. इति श्रीरघुनाथसार्व्वभौमभट्टाचार्य्यकृतौ सिद्धान्तार्णवः परिपूर्णः ।

विषयः । शाङ्करमतमवलम्ब्य विरचितमिदं वेदान्तप्रकरणम । तत आत्मा वा अरे इत्यत्र विधिविवेचनम् । ब्रह्मणः स्वप्रकाशत्वनिरूपणं । निरीश्वरसांख्यबौद्धादिमताक्षेपकीर्त्तनं । विवर्त्तवादव्यवस्थापनं । परिनामवादखण्डनं । परमाणुवादाक्षेपकथनं । द्वैतबोधिकानां श्रुतीनां समन्वयनिरूपणं । जीवस्य ब्रह्मप्रतिविम्बत्वकथनं । जगतः प्रातिभासिकत्वकथनं । प्रवाहरूपेण जगतः नित्यत्वकथनं । मायाविद्ययोः स्वरूपकथनं । चतुर्व्यूहनिरूपणं । तत्त्वमस्यादिश्रुत्यर्थकथनं । वेदस्य नित्यत्वकथनं । ब्रह्मणो वेदैकवेद्यत्वकथनं । ब्रह्म नानुमानादिप्रमाणगम्यमितिनिरूपणं । जीवस्य उत्क्रान्त्यादिकथनं । तत्त्वज्ञानोपायकथनं । मोक्षोपायकीर्त्तनञ्च ।

No. 2100. वेदान्तसिद्धान्तकौमुदी । Substance, country-made paper, 17 × 4½ inches. Folia, 67. Lines, 7 on a page. Extent, 1,617 ślokas. Character, Bengali. Date, ? Place of deposit, Ulá, Post Ráṇágháta, Zilá Nuddea, Paṇḍit Dinanátha Bhaṭṭácbárya. Appearance, decayed. Prose. Incorrect.

Vedánta-siddhánta-kaumudí. On the Bakhti doctrine founded on the non-duality of the soul. By Haridása.

CONTENTS: Refutation of the theory regarding Brahma being undiscrete. Refutation of the theory regarding the human soul being a reflection of the divine soul. Human soul proved to be a part or fragment of Brahma. The son of Nanda proved to be the being indicated by the word Brahma. Knowledge, &c. his natural attributes. On the authority of the Vedas. The Bhágavata Puráṇa proved to be as authoritative as the Vedas. The S'ástras all logically lead to Brahma. Superiority of faith over knowledge. Fruit of faith. Means of salvation. Nature of salvation.

Beginning. सान्द्रीभूतपरानन्दं सानन्दं नन्दनन्दनं ।
नत्वा वेदान्तसिद्धान्तकौमुदीयं विरच्यते ॥

अथ खल्वात्मा वारे द्रष्टव्यः श्रोतव्यो मन्तव्य इत्यात्मदर्शनमुद्दिश्यानुकूलतर्कमननोपकृतवेदान्तश्रवणविधानाद् विचारं विना स्वरूपानन्दात्मकमोक्षावरकशोकशब्दाभिधेयाज्ञानोपमर्दकापरोक्षज्ञानोत्पत्त्यनुपपत्तेश्च ब्रह्मज्ञानाय ज्ञानेच्छासाध्यो वेदान्तविचारः कर्त्तव्य इति । इत्यादि ।

End. आविद्के सर्व्वानर्थनिवृत्त्या ब्रह्मैव सन् ब्रह्माप्येति विमुक्तश्च विमुच्यते——— श्रुतिबोधितनित्यसिद्धभूम्बब्रह्मात्मकस्वरूपानन्दाविर्भाव इति सिद्धं।

Colophon. इति श्रीहरिदासकृता वेदान्तसिद्धान्तकौमुदी समाप्ता।

विषयः। शुद्धाद्वैतवादमवलम्ब्य विरचितोऽयं ग्रन्थः। तत्र ब्रह्मणो निर्व्विशेषत्वमतकीर्त्तनं। जीवस्य ब्रह्मप्रतिबिम्बवादखण्डनं। ब्रह्मणोऽंशो जीव इति निरूपणं। नन्दनन्दन एव ब्रह्मशब्दवाच्य इति निर्णयः। तस्य स्वाभाविकज्ञानादिशक्तिमत्त्वकथनं। श्रीमद्भागवतस्य वेदतुल्यत्वनिर्णयः। ब्रह्मणः शास्त्रैकगम्यत्वनिरूपणं। ज्ञानापेक्षया भक्तेरभ्यर्हितत्वकथनं। भगवतो भक्त्येकलभ्यत्वनिर्णयः। मोक्षोपायकथनं। मोक्षस्वरूपविवेचनञ्च॥

No 2101. माधुर्य्यकादम्बिनी। Substance, country-made paper, 11 × 5½ inches. Folia, 19. Lines, 11 on a page. Extent, 643 ślokas. Character, Nágara. Date, Sm. 1860. Place of deposit, S'ántipur, Pandit Kálidása Vidyávágísa. Appearance, fresh. Prose and verse. Correct.

Mádhurya-kádambiní. On faith as the only means of salvation. Faith and devotion to be directed to Krishna who is the embodiment of the divine soul. With this object the work opens with a disquisition on the nature of soul, and its twofold division, the human and divine, and then explains how the divine soul may, for the well-being of creation, assume a corporeal form. The author then describes various forms of faith, and their peculiarities.

Beginning. हृद्वप्रे नवभक्तिशस्यविततेः सञ्जीवनी स्वागमा-
रम्भे कामतपर्त्तुदाहदमनी विद्यापगोल्लासिनी।
दूरान्मे मरुशाखिनोऽपि सरसीभावाय भूयात् प्रभु-
श्रीचैतन्यकृपानिरङ्कुशमहामाधुर्य्यकादम्बिनी॥
भक्तिः पूर्व्वैः श्रिता तान्तु रसं पश्येद्युदात्तधीः।
तन्नोमि सततं रूपनाम प्रियतमं हरेः॥

रस खलु परमानन्दमयादपि पुरुषाद्ब्रह्म पुच्छं प्रतिष्ठेति ———इत्यादि।

End. माधुर्य्यवारिधेः कृष्णचैतन्यादुद्धृतै रसैः।
इयं धिनोतु माधुर्य्यमयी कादम्बिनी जगत्॥

Colophon. इति श्रीमाधुर्य्यकादम्बिन्यां पूर्णमनोरथो नामाष्टम्यमृतवृष्टिः। सम्पूर्णेयं माधुर्य्यकादम्बिनी सतां प्रीतये स्तादिति। संवत् १८६०।

विषयः। श्रीनन्दनन्दन एव शुद्धसत्त्वमयनिजनामरूपलीलार्च्चनादिशरीरतया स्वप्रकाशतया च परब्रह्मशब्दवाच्यः। तन्नैव भगवद्भक्तेरपि तद्रूपतया भगवत इव स्वप्रकाशता, निरपेक्षत्वञ्चेति निरूपणं। मोक्षादपि भक्तेः परमोत्कर्षप्रतिपादनमुखेन तस्या ज्ञानैकमात्रत्ववादनिराकरणं। तदेवं भगवत इव तत्स्वरूपभूताया भक्तेः सर्व्वेश्वरत्वं सर्व्ववशीकारित्वं सर्व्वमङ्गलत्वं सर्व्वोत्कर्षदरसस्वातन्त्र्यञ्चेति व्यवस्थापनं। भक्तिस्वरूपविवेचनं। तदधिकारिणः। तदङ्गानि। अथ भक्तिप्रभावेणानर्थनिवृत्तिकथनमुखेन दुष्कृतोत्थाः सुकृतोत्थाः अपराधोत्थाः भक्त्युत्थाश्चेति अनर्थानां चतुर्व्विधत्वकथनपूर्व्वकं तेषां स्वरूपकथनं। अथ चैतन्यं द्विविधं स्वतन्त्रमस्वतन्त्रञ्च। तत्र प्रथमं सर्व्वव्यापकमीश्वराख्यं, द्वितीयं देहमात्रव्यापि जीवाख्यानं तथा ईश्वरचैतन्यं द्विविधं गुणस्पर्शरहितं लीलया स्वीकृततत्स्पर्शञ्च। प्रकारेणानेन बहुविधत्वप्रपञ्चनं। अथ अनिष्ठितानिष्ठितभेदेन भजनक्रिया द्विविधा। तत्र प्रथमा षड्विधा। द्वितीया तु साक्षाद्भक्तिवर्त्तिनी तदनुकूलवस्तुवर्त्तिनीति द्विविधा। अत्रापि प्रथमा कायिकी वाचिकी मानसी चेति त्रिप्रकारा। अथ अविद्यादिदूषितस्य जीवान्तःकरणस्य श्रवणकीर्त्तनादिनान्यतो वैलक्षण्येन तद्दोषप्रशमे भक्तौ रुचिरुद्भवतीति सा च द्विविधा वस्तुवैशिष्ट्यापेक्षिणी तदनपेक्षिणी च। अथ सैव भजनविषया रुचिः परमप्रौढतमा सती यदा भजनीयं भगवन्तं विषयीकरोति तदेयम सक्तिरित्याख्यायते। अतएव भक्तिकल्पवल्ल्याः स्तवकीभावमासादयन्ती भावप्रेमाणौ पुष्पफले अचिरादेव भाविनी द्योतयति। यथासावासक्तिरेवान्तःकरणमुकुरं तथा मार्ज्जयति यथा तत्र सहसा प्रतिबिम्बितो भगवान् अवलोक्यमान इव प्रतिभाति। अथ सैवासक्तिः परमपरिणामं प्राप्नुवती रतिपरपर्य्यायो भाव इत्याख्यां लभते। य एव भावः सच्चिदानन्द इति शक्तित्रयस्य कन्दलीभावं भजते। सोऽयं भावो रागभक्त्युत्थो वैधभक्त्युत्थश्चेति द्विविधत्वमधिगच्छन्नेव विविधानां भक्तानां विविधचित्तवासनामनादिषु हृदयेषु स्फुरन् घनरस इव रसायनेषु विविधास्वादत्वं भजते। ते च भक्ताः शान्तदाससखिपितृप्रेयसीभाववन्तः पञ्चविधाः। तत्र शान्तेषु शान्तिरिति दासेषु प्रीतिरिति सखिषु सख्यमिति पितृभाववत्सु वात्सल्यमिति प्रेयसीभाववत्सु प्रियतेति नामभेदानपि प्राप्यात्मशक्त्यैवाविर्भावितविभावादिभिरद्भुतैश्वर्य्यैः स्थायीति नाम्ना वैशिष्ट्यं गच्छन् शान्तदास्यादिपञ्चपदेभ्यो रसो भवतीति निरूपणं। अथ भावविशेषेण अनुभावविशेषप्रकटनप्रकारश्चेति।

No. 2102. **दानचन्द्रिका।** Substance, country-made paper, 14 × 4 inches. Folia, 66. Lines, 8 on a page. Extent, 1,982 ślokas. Character, Bengali. Date, ? Place of deposit, Ulá, Post Ránághát, Zilá Nadiyá, Paṇḍit Dínanátha Bhaṭṭácharya. Appearance, fresh. Prose and verse. Incorrect.

Dána-chandriká. A treatise on religious gifts, the merits of giving away particular articles, persons fit to grant and to receive gifts,

and the rituals meet for consecrating the same. By Jayaráma. The work is an abstract of the Dánakhaṇḍa of Hemádrí.

Beginning. नतिं कृत्वा गणेशाय विघ्नविध्वंसकारिणे ।
क्रियते जयरामेण रम्येयं दानचन्द्रिका ॥
दानं देयञ्च दाता च सम्प्रदानं फलं तथा ।
फलदाता विधाता च य एकस्तं नमाम्यहं ॥

तत्रादौ दानप्रशंसा ।

End. अनेन विधिना कुर्व्वन् सर्व्वं भवति चाक्षयमिति ।

Colophon. इति श्रीजयरामविरचिता दानचन्द्रिका समाप्ता ।

विषयः । दानप्रशंसाकीर्त्तनं । देवगुणकीर्त्तनं । दानविधिः । दानकालनिरूपणं । धर्म्मलक्षणं । द्रव्यदैवतनिर्णयः । प्रतिग्रहविधिः । सर्व्वेषु दानेषु सामान्यतः प्रयोगकीर्त्तनं । हिरण्यदानविधिः । हैमरौप्यभोजनादिपात्रदानविधिः । अलङ्करणदानविधिः । धान्यादिदानविधिः । सघृतभोज्यदानादिविधिः । कपिलादिदानविधिः । गजाश्वादिदानविधिः । हरदोलादिदानविधिः । छत्रासनादिदानविधिः । गन्धशय्यादीपदानादिविधिः । क्षाविकवस्त्रादिदानविधिः । गृहोद्यानादिदानविधिः । धर्म्मघटादिदानविधिः । संक्रान्तिनिमित्तकदानविधिः । नाक्षत्रिकादिदानविधिकीर्त्तनञ्च ।

No. 2103. मेघदूतटीका । Substance, country-made paper, 13 × 6 inches. Folia, 38. Lines, 12—13 on a page. Extent, 1,443 ślokas. Character, Nágara. Date, ? Place of deposit, Ulá, Post Raṇágháṭ, Zilá Nadiyá, Paṇḍit Dínanátha Bhaṭṭácharya. Appearance, fresh. Prose. Incorrect.

Meghadúta-ṭíká. A commentary on Kálidása's Meghadúta. Anonymous.

Beginning. इह यद्यपि गिरिनगरसागरसरित्सरोवरकमलवसन्तोत्सवमलयानिलजलक्रीडाद्यष्यावचयचन्द्रसूर्य्योदयासमयसर्गबन्धादीनां महाकाव्यलक्षणानां अभावस्तथापि महाकविश्रीकालिदासविरचितत्वादिदं महाकाव्यमुच्यते + + + + + + + सहृदयसुसंवेद्यः कश्चित्विशेषमत्र निर्द्दिश्य उच्यते + + + प्रसङ्गेन तत्रायमादिश्लोकः । कश्चित् कान्तेति । कश्चिदनिर्द्दिष्टनामा यक्षः रामगिर्य्याश्रमेषु वसतिं चक्रे निवासं कृतवान् । रामो दशरथात्मजः तेन आश्रितो गिरिः । पूर्व्वं सीतासमन्वितो रामस्तत्र स्थितवानिति इत्यादि ।

अविरतानि निरन्तराणि सुखानि यत्र ॥ १२४ ॥
इत्थम्भूतं सुरचितपदं मेघदूतस्य नाम्ना
कामक्रीडाविरचितजने विप्रयुक्ते विनोदं ।

+ + + + क्षिति निपुणता हृद्गिभावं कवीनां
नत्वार्य्याणां चरणयुगलं कालिदासस्सकार ।

Colophon. इति श्रीकविराजमुकुटालङ्कारेण श्रीकालिदासेन (कृतं मेघदूताभिधानं काव्यं) तस्य टीका समाप्ता ।

विषयः । कालिदासकृतमेघदूतस्य व्याख्यानम् ।

No. 2104. नैषधीयप्रकाशः (पूर्वनैषधीयः) । Substance, country-made paper, 11 × 4 inches. Folia, 250. Lines, 9 on a page. Extent, 9,843 ślokas. Character, Bengali. Date, ? Place of deposit, Ulá, Post Ráṇághát, Zilá Nadíyá, Paṇḍit Dínanátha Bhaṭṭáchárya Appearance, decayed. Prose. Correct.

Naishadhíya-prakáśa. A commentary on the Naishadha Kávya, of S'ri Harsha. By Náráyaṇa Vedarakara, son of Narasiñha and Madálasá. The codex contains only the first half of the work.

Beginning. वैदेही यस्य वामे जयति जयजनिर्दक्षिणे लक्ष्मणोऽपि
श्रीमानग्रे हनूमानतुलबलचयो हस्तविन्यस्ततत्त्वः ।
कोदण्डं काण्डमेकं दधदहितकुलध्वंसकारी समन्ता-
दव्यादव्याजभव्याकृतिसलिलनिधिर्जानकीजानिरस्मान् ॥
दशकन्धरकरिसिंहः सीताचेतःसरोजरोलम्बः ।
रघुकुलकैरवचन्द्रः पायादायासतो रामः ॥
भद्राय भूयाद्भवतां श्रीरामो भक्तिभावितः ।
स्मृतेरुज्जृम्भते यस्य पदवी सुरदुर्लभा ॥
नत्वा श्रीनरसिंहपण्डितपितुः पादारविन्दद्वयं
मातुश्चापि मदालसेत्यभिधया विख्यातकीर्त्तेः चिरौ ।
श्रीरामेश्वरसीतयोः सुमनसोर्गुर्व्वोरगर्व्वो यथा-
बुद्धि श्रीनिषधेन्द्रकाव्यविवृतिं निर्म्माति नारायणः ॥
प्रणम्य शङ्करं सोमं अनन्तं श्रीपतिं स्वयं ।
कुर्व्वे नाम्ना नैषधीयप्रकाशं सुहृदां मुदे ॥

चिकीर्षितस्य निर्व्विघ्नसमाप्त्यर्थं शिष्टाचारपरिप्राप्तमाशीर्नमस्क्रियावस्तुनिर्द्देशो वापि तन्मुखमिति मङ्गलाचरणं कर्त्तव्यमिति ग्रन्थकृच्छ्रीहर्षनामा कविः गूढ़मवीजरघुनाथाभीष्टदेवतानमस्काररूपमङ्गलमाचरति । अन्ये तु विशिष्टवस्तुनिर्द्देशलक्षणं मङ्गलमित्याहुः । अत्र पुण्यश्लोकनलरूपविशिष्टवस्तुनिर्द्देशेन निर्व्विघ्नग्रन्थसमाप्तिरित्यभिप्रायेणाह निपीयेति ।

End. केनाप्यद्भुतया रीत्या निर्म्मिते । इत्तं पूर्व्ववत् ।

Colophon. इति श्रीवेद्रकरोपनामकश्रीमन्नरसिंहपण्डितात्मजनारायणकृते नैषधीयप्रकाशे अष्टमः सर्गः समाप्तः ।

विषयः । श्रीहर्षकृतनैषधचरितमहाकाव्यस्याष्टमसर्गान्तं व्याख्यानम् ।

No. 2105. स्मार्त्तसमुच्चयः । Substance, country-made paper, 15 × 4 inches. Folia, 225. Lines, 10 on a page. Extent, 17,840 ślokas. Character, Bengali. Date, ? Place of deposit, Ulá, Post Ráṇágháṭ, Zilá Nadíyá, Paṇḍit Dínanátha Bhaṭṭáchárya. Appearance, decayed. Correct.

Smárta-samuchchaya. A Smṛiti digest. By Nanda Paṇḍita, son of S'rídeva Mahámahopádhyáya. CONTENTS: Religious duty. Proper times for religious ceremonies. Lunations. Conjunction of one month with another. Intercallary months. Prohibited degrees in marriage. Marriage. Sañskáras. Daily rituals. Funerals. Mourning. Purifications. Expiations. Inheritance. Judicature.

Beginning. श्रीनारायणपादपङ्कजनतिप्राप्तप्रबोधोदयो-
वेदानङ्गयुतान् सभारतखिलान् साहित्यकाव्यान्वितान् ।
मीमांसेश्वरसांख्यबौद्धमखिलं चार्व्वाकजैनाभिधं
ग्रन्थं यो व्यद्गणोत्स पण्डितकविः श्रीदेवशर्म्माभवत् ॥
तस्य श्रीशितिकण्ठभक्तिनिरतो नन्दाभिधोऽभूत्सुतो
दृष्ट्वा देवपदारविन्दशरणा यस्य प्रसिद्धा प्रसूः ।
सोऽयं पण्डितमण्डलीसुखकरं धर्म्मक्रियाज्ञापकं
रम्यं स्मार्त्तसमुच्चयं व्यरचयच्छिष्यौघसम्प्रार्थितं ॥

तत्र प्रथमतो धर्म्मस्वरूपं विविच्यते । तत्र भगवान् जैमिनिः । चोदनालक्षणोऽर्थो धर्म्म इत्यादि ।

End. दत्तकविषयस्तु मत्कृतदत्तकमीमांसायां परिज्ञेय इति ।

Colophon. इति महामहोपाध्यायश्रीदेवशर्म्मसूनुश्रीनन्दपण्डितविरचितः स्मार्त्तसमुच्चयः समाप्तः ।

विषयः । धर्म्मस्वरूपनिरूपणं । कालविवेचनं । तिथ्यादिनिरूपणं । तत्र प्रतिपदादितिथिद्वैधे व्यवस्थानिर्णयः । संक्रान्तिनिर्णयः । मलमासविवेचनं । क्षयमासादिविवेचनं । विवाहनिरूपणप्रसङ्गेन सापिण्ड्यादिकथनं । विवाहादिनिरूपणं । गर्भाधानादिसंस्कारनिर्णयः । आह्निकविधिः । अन्त्येष्टिविधिः । अशौचनिरूपणं । शुद्धिनिरूपणं । श्राद्धादिविधिकथनं । प्रायश्चित्तनिरूपणं । दायभागकथनं । व्यवहारनिरूपणञ्च ।

No. 2106. दायभागटीका। Substance, country-made paper, 14 × 4 inches. Folia, 182. Lines, 7 on a page. Extent, 4,684 ślokas. Character, Bengali. Date, ? Place of deposit, Majidá, Post Ránághaṭ, Paṇḍit Madhusúdana Nyáyaratna. Appearance, decayed. Prose. Correct.

Dáyabhága-ṭíká. A commentary on the Dáyabhága of Jímútaváhana. By Rámabhadra Nyáyálaṅkára, son of S'rínátha Ácháryachúḍámaṇi.

Beginning. आलोच्य तातनिर्म्मित-निबन्धमाराध्य विश्वेश्वरं।
आर्य्याचार्य्यसुतनुते विवृतिमिमां दायभागस्य॥

ग्रन्थारम्भे विघ्नविघाताय इष्टदेवताकीर्त्तनरूपं मङ्गलमाचरन् शिष्यप्रवृत्तये सम्बन्धाभिधेयप्रयोजनान्याह। मन्वादीति। अत्र प्रयोजनं दायभागनिर्णयः। स च संशयापनोदनद्वारा दुःखनिवृत्तिहेतुतया गौणः। अभिधेयो दायभागः। सम्बन्धश्च ग्रन्थस्य फलाभिधेयाभ्यां कार्य्यकारणभावो विषयविषयिभावश्च। इत्यादि

End. अतस्तस्य तात्पर्य्यं वर्णयित्वा विरोधञ्च परिहरतः तद्प्रयोजकीभूतस्य जड़ानुरागस्याभावेऽपि न वैयर्थ्यमिति भावः। बहुतरेति सुबोधमिति।

श्रीरामभद्ररचितां पाणौ संस्थाप्य दीपिकामेतां।
जीमूतवाहनकृते-र्गभीरार्थं विदन्तु विद्वांसः॥

Colophon. इति श्रीमहामहोपाध्यायश्रीनाथाचार्य्यचूड़ामणितनूजश्रीरामभद्रन्यायालङ्कारभट्टाचार्य्यविरचिता दायभागटीका समाप्ता।

विषयः। जीमूतवाहनकृतदायभागस्य व्याख्यानं।

No. 2107. कामसूत्रं। सभाष्यं जयमङ्गलाख्यटीकासहितञ्च। Substance, country-made paper, 13 × 7 inches. Folia, 126. Lines, 14 on a page. Extent, 6,125 ślokas. Character, Nágara. Date, ? Place of deposit, S'ántipur, Paṇḍit Kálidása Vidyávágíśa. Appearance, new. Prose. Generally correct.

Káma-sútra with the commentary of Mallinága, and the gloss called **Jayamaṅgala.** The aphorisms of Vátsyáyana on worldly enjoyment with the commentary of Mallinága, and an exegesis by Yas'odhara. The last two have been very much mixed up. The text is divided into 7 chapters, and treats successively of all the different branches of the subject. The exegesist cites the name of Mahimalla Deva, a Chalukya king.

The objects of human life are, according to Hindu writers, fourfold, including 1st, duty or *dharma*; 2nd, wealth or *artha* economics; 3rd, enjoyment, *káma*, and 4th, salvation or *moksha*. On each of these subjects there were at one time, it would seem, several text-books in Sanskrit, but they are not all forthcoming now. On the first subject the Aphorisms of Jaimini constitute the leading text. On the second, a text is attributed to S'ukra Achárya, but it nowhere has yet been met with. On the third, the *káma-sutra* is the only text now known, but its author refers to seven different writers who preceded him. The fourth forms the theme of five out of the six leading systems of philosophy, as also of several minor ones. Of enjoyment in its grossest sense women form the most important object, and the text therefore devotes an unduly large part of it to sexual love, and hence it is that in describing the work, it is usual to class it among erotic works. Káma in its most comprehensive sense, however, includes everything that promotes the gratification of the five senses of hearing, feeling, seeing, tasting and smelling, and Vátsáyana refers to all these. He begins with education in early life, giving brief notes about the 14 sciences and the 64 arts recognised by the Hindus. Then he adverts to housekeeping, furniture and household decorations, to friends, associates and companions, to occupations and ornaments, as well as conduct towards women. This explanation is necessary with reference to what has been said on page 98 of volume I, on the subject.

Vátsyáyana is supposed to have lived over two thousand years ago, and the oldest commentary on the Nyáya aphorisms is attributed to him.

Beginning. (एकत्रीकृतसूत्रभाष्यस्य प्रारम्भवाक्यं यथा,) शास्त्रे प्रकृतत्वात् तत् समयावबोधकेभ्यश्चाचार्य्येभ्यस्तत्सम्बन्धात्। प्रजापतिर्हि प्रजाः सृष्ट्वा तासां स्थितिनिबन्धनं त्रिवर्गस्य साधनमध्यायानां शतसहस्रेणाग्रे प्रोवाच। तस्यैकदेशं मनुः स्वायम्भुवो धर्म्माधिकारिकं पृथक् चकार। बृहस्पतिरर्थाधिकारिकं। महादेवानुचरश्च नन्दी सहस्रेणाध्यायानां पृथक् कामसूत्रं प्रोवाच। — — — — — — — — — — — — सर्व्वमल्पेन ग्रन्थेन कामसूत्रमिदं प्रणीतवान् वात्स्यायनः।

टीकायाः प्रारम्भवाक्यं यथा,—

वात्स्यायनीयं किल कामसूत्रं प्रस्तावितं कैश्चिदिहान्यथैव।
तस्माद्विधास्ये जयमङ्गलाख्यां टीकामहं सर्व्वविदं प्रणम्य॥

इह चत्वारो वर्णा ब्राह्मणादयश्चत्वारश्चाश्रमा ब्रह्मचारी गृहस्थवैखानसौ भिक्षुरिति। तत्र ब्राह्मणादीनां गृहस्थानां मोक्षस्यानभिमतत्वात् त्रिवर्गः पुरुषार्थः। तत्रापि धर्म्मार्थयोर्हेतुत्वात् काम एव फलभूतः पुरुषार्थ इति कामवादिनः। स चोपायं विना न भवतीति तमुपायमाचिख्यासुराचार्य्यो मल्लिनागः पूर्व्वाचार्य्यमतानुसारेण शास्त्रमिदं प्रणीतवान्। इत्यादि।

End. शास्त्रस्यार्थप्रधानत्वात् तेन योगोऽत्र योषितां।
सन्ति रागपरा नार्य्यः सन्ति चार्थपरा अपि॥
प्राक् तत्र वर्णितो रागो वेश्यायोगाश्च वैशिके॥

इति वात्स्यायनीयकामसूत्रे वैशिके षष्ठेऽधिकरणे अनुबन्धार्थानर्थसंशयविचारा वेश्याविशेषाश्च षष्ठोऽध्यायः॥

समाप्तञ्चेदं वैशिकं षष्ठमधिकरणं व्याख्यातञ्च कामसूत्रम्॥

भाष्यस्य शेषवाक्यं यथा ——————

एता षट्रूपाजीवायामन्तर्भवन्ति विशेषः सम्पद्यते सर्व्वासामिति। इति वात्स्यायनीयकामसूत्रटीकायां जयमङ्गलाभिधायां विदग्धाङ्गनाविरहकातरेण गुरुदत्तेन्द्रपादाभिधानेन यशोधरेणैकत्रकृतसूत्रभाष्यायां वैशिके षष्ठेऽधिकरणे षष्ठोऽध्यायः। समाप्तञ्चेदं वैशिकं षष्ठमधिकरणं॥

Colophon. इत्यपरार्ज्जुन + जबलमल्लराजनारायणमहाराजाधिराजत्रैलोक्यचूड़ामणिश्रीमद्वीसल्लदेवस्य भारतीभाण्डागारे श्रीवात्स्यायनकामसूत्रटीकायां जयमङ्गलाभिधायां वैशिकमधिकरणं समाप्तम्॥

विषयः। प्रथमे साधारणाधिकरणे,—शास्त्रसंग्रहः, त्रिवर्गप्रतिपत्तिः, विद्यासमुद्देशः, नागरिकवृत्तं, नायकसहायदूतीकर्म्मविमर्शश्चेति पञ्च प्रकरणानि।

द्वितीये साम्प्रयोगिकाधिकरणे,—प्रमाणभावकालेभ्यो रतावस्थानं, प्रीतिविशेषाः, आलिङ्गनविचाराः, चुम्बनविकल्पाः, नखरदनजातयः, दशनच्छेदविधयः, देश्या उपचाराः, संवेशनप्रकाराः, चित्ररतानि, प्रहणनयोगाः, तद्युक्ताश्शीत्कृतोपक्रमाः, पुरुषायितं, पुरुषोपसृप्तानि, औपरिष्टकं, रतारम्भः, रतावसानिकं, रतिविशेषाः, प्रणयकलहश्चेति अष्टादशप्रकरणानि।

तृतीये कन्यासम्प्रयुक्ताधिकरणे,—वरणविधानं, सम्बन्धनिर्णयः, कन्याविस्रम्भणं, बालायामुपक्रमाः, इङ्गिताकारसूचनं, एकपुरुषाभियोगाः, प्रयोज्यस्योपावर्त्तनं, अभियोगतः कन्यायाः प्रतिपत्तिः, विवाहयोगाश्चेति नव प्रकरणानि।

चतुर्थे भार्य्याधिकारिकाधिकरणे,—एकचारिणीवृत्तं, प्रवासचर्य्या, सपत्नीषु ज्येष्ठावृत्तं, कनिष्ठावृत्तं, पुनर्भूवृत्तं, दुर्भगावृत्तं, आन्तःपुरिकं, पुरुषस्य बह्वीषु प्रतिपत्तिश्चेति अष्टौ प्रकरणानि।

पञ्चमे पारदारिकाधिकरणे,—स्त्रीपुरुषशीलावस्थापनं, स्त्रीषु सिद्धाः पुरुषाः, अयत्नसाध्ययोषितः, परिचयकारणानि, अभियोगाः, भावपरीक्षा, दूतीकर्म्माणि, ईश्वरकामितं, आन्तःपुरिकं, स्वदाररक्षितकञ्चेति दश प्रकरणानि।

षष्ठे वैशिकाधिकरणे,—सहायगम्यागम्यचिन्तागमनकारणानि, उपावर्त्तनविधिः, कान्तानुवृत्तं, अर्थागमोपायाः, विरक्तेषु प्रतिपत्तिः, निष्कासनक्रमाः, विशीर्णप्रतिसन्धानं, लाभालाभविशेषाः, अर्थानर्थानुबन्धसंशयः, विचारविशेषाश्चेति दश प्रकरणानि ।

(पुस्तकेऽस्मिन् औपनिषदिकं सप्तममधिकरणं नास्ति)

(तत्रत्य विषया यथा,—सुभगङ्करणं, वशीकरणं, द्रव्ययोगाः, नष्टरागप्रत्यानयनं, वृद्धिविषयः, चित्रयोगाश्चेति षट् प्रकरणानीति ।)

No. 2108. **वैष्णवसिद्धान्तवैजयन्ती, प्रकाशिकासहिता ।** Substance, country-made paper. 12 × 4 inches. Folia, 140. Lines, 12 on a page. Extent, 4,182 ślokas. Character, Bengali. Date, ? Place of deposit, S'ántipur, Paṇḍit Kálidása Vidyávágíśa. Appearance, old. Prose and verse. Correct.

Vaishṇava-siddhánta-vaijayantí with a commentary entitled **Prakáśiká.** A manual of Vaishṇava faith and worship. By Rághavendra Muni.

Beginning. उद्वर्त्तुं भवसागरातुरनरं धातुर्विधातुं वच-
स्सिद्धातुः पतगेन्द्रकेतुरवितुं लीलावतीर्णो धरां ।
धर्म्माणामपि धूमकेतुरमतां सेतुः सतां सात्वतां
जीवातुर्जगदिन्द्रजालरचनाहेतुर्हरिः पातु वः ॥
श्रीमद्वैष्णवसिद्धान्तवैजयन्ती प्रकाश्यते ।
श्रुतिस्मृतिप्रमाणेन सत्तर्केण स्वयं कृता ॥

इति खलु प्रारिप्सितग्रन्थारम्भसम्भावितविघ्नविघाताय सदाचारपरम्परापरिपालनाय च स्वग्रन्थप्रतिपाद्यं वेदान्तवेद्यं वस्तु प्रस्तौति विश्वेषामित्यादिपद्येन ॥

विश्वेषामनवद्यमागमगिरामापाद्यमाद्यं परं
रुद्राद्यैरपि विद्यया परमया नासाद्यते यन्महः ।
प्रेमाचिद्घनविग्रहो मुकुन्दहो गोपीभिरामोदितः
सोऽयं नन्दसुतोऽभिनन्दति सदानन्दाय वृन्दावने ॥ इत्यादि ।

End. गौड़ादागत्य वृन्दावनभुवि वसता राघवेन्द्राभिधेन
प्रायो जित्वा विवादान् निगमपथनयैर्जीवसंसारशान्त्यै ।
सिद्धान्तैर्वैष्णवानां स्वमतिविरचिता वैजयन्ती विचित्रा
कण्ठैर्धार्य्या कवीन्द्रैरखिलगुणवती वादिविध्वंसनाय ॥
श्रीमद्वैष्णवसिद्धान्तवैजयन्तीप्रकाशिका ।
दीपिकेव करे धार्य्या साधुवर्य्यायतैर्नरैः ॥

Colophon. इति श्रीराघवेन्द्रमुनिप्रणीतायां वैष्णवसिद्धान्तवैजयन्त्यां भगवत्स्वरूपनिरूपणो नाम पञ्चमो ग्रन्थः । समाप्तश्चायं ग्रन्थः ।

विषयः । ब्रह्मणः साकारत्वकथनं । श्रीकृष्णस्यैव परब्रह्मशब्दवाच्यत्वनिरूपणं । श्रीकृष्णविग्रहस्य सच्चिदानन्दरूपतया नित्यत्वकथनं । अत्र विविधवादनिरसनं । जगन्नित्यत्वादिवादिनां विप्रतिपत्तिनिरासपूर्व्वकं भगवानेव स्वस्मान्मणिवत्स्वद्विभिनावेनाविद्याविवर्त्तानां कारणमितिनिरूपणं । संसारस्य स्वप्नायमानत्वकथनं । तत्र विविधवादखण्डनं अध्यासस्वरूपविवेचनादिकं । जीवस्य व्यवहारदशायां संसारबन्धो न तु परमार्थतः तस्य साक्षाज्जगदीश्वराभेदश्रवणादितिनिरूपणं । वैराग्योपयोगित्वेन संसारस्य—मिथ्यात्वं निरूप्य तन्निरसकारणं किञ्चिदस्ति न वेति वादिविप्रतिपत्तेस्तन्निरूपणं । तत्र सांख्यमतमुपपाद्य तत्खण्डनं । पातञ्जलमतोपपादनपूर्व्वकं तन्निरसनं । वैशेषिकमतोपपादनपूर्व्वकं तत्खण्डनं । न्यायमतोपपादनं तत् खण्डनञ्च । एवं शून्यवादिस्वभाववादिमीमांसकादिमतान्युपपाद्य तत्खण्डनपुरःसरं भगवानेव तत्कारणमिति सप्रपञ्चप्रपञ्चनं । नानाजीववादखण्डनपुरःसरमेकजीववादव्यवस्थापनं । आत्मस्वरूपनिरूपणमुखेन अन्यान्यमतखण्डनं । तत्र आत्मख्यातिवादखण्डनं । असत्ख्यातिकथनं । अख्यातिनिरूपणं । अन्यथाख्यातिनिरूपण । अनिर्व्वाच्यख्यातिनिरूपणं । तत्र अनिर्व्वाच्यत्वस्वरूपादिविवेचनं । अविद्यास्वरूपादिनिर्णयः । भेदवादखण्डन । आत्मनः स्वप्रकाशत्वकथनं । संवित् स्वरूपविवेचनं । वेदस्य स्वतः प्रामाण्यनिरूपणं । तस्य अपौरुषेयत्वादिकथनञ्च । कर्म्म-ज्ञानकाण्डयोः सामञ्जस्यकथनं । गुरूपसदनादिप्रकारकथनं । श्रवणमननादिस्वरूपकथनादिकं । समाधिलक्षणतद्भेदादिकीर्त्तनं । तत्त्वज्ञानानन्तरमुक्तिरितिविवेचनं । जीवन्मुक्तस्वरूपादिकथनं । मोक्षस्वरूपविवेचनं । अत्र तार्किकादिमतखण्डन वेदान्तिमतखण्डनं । मुक्त्यधिकारिनिरूपणं । संसारलक्षणादिकथनं । संसाराद्विरक्तस्य सन्न्यासिन एव मोक्षाधिकारो नान्यस्येति निरूपणं । तथा भगवत्प्राप्तिरेव मोक्ष इति निरूपण । अत्र पाशुपतादिमतखण्डनं । भगवदुपासनादिफलकीर्त्तनं । द्वैतश्रुतिसमन्वयादिकथनं । भगवद्भक्तलक्षणं, तद्भेदादिकथनञ्च । भगवद्भक्तानां मोक्षेष्वपि स्पृहाभाव इत्यादि वाक्यानां समाधानादिकथनं । भक्तिलक्षणं । तथासाध्यसाधनभेदेन द्वैविध्यकथनं । साध्यरूपापि द्विविधा ज्ञानलक्षणा प्रेमलक्षणा चेति । तथा श्रवणकीर्त्तनादिनवविधसाधनभक्तिनिरूपणं । कर्म्मयोगस्यापि भक्तिसाधनार्थत्वात् भक्तेः प्रागेवकर्त्तव्यतेतिनिरूपणं । धर्म्मस्वरूपादिनिरूपणं । साकार-निराकार-सगुण-निर्गुणत्वादिप्रतिपादिकानां श्रुतीनां समाधानकथनं । भगवच्छरीरस्य नित्यत्वादिनिरूपणमुखेन तार्किकादिमतनिरसनं । भगवल्लीलादिचिन्तनं । रमागोपीपरिकरस्य भगवच्छक्तित्वकथनं । लीलावतारतात्पर्य्यकथनं । गोलोकादिस्थानस्य नित्यत्वकथनञ्च ।

No. 2109. स्कन्दपुराणे,—केदारखण्डम् । Substance, country-made paper, 18 × 3 inches. Folia, 165. Lines, 6 on a page. Extent, 4,010 ślokas.

Character, Bengali. Date, ? Place of deposit, Ránághát, Bábu Surendranátha Palachaudhúrí; another copy at Darbhángá, Bábu Gauresvara Sinha. Appearance, fresh. Verse. Generally correct.

Kedára-khanda of the Skanda Purána. This is one of the several books or Khandas, of the Skanda Purána. It is divided into 32 chapters, and comprises a number of legends designed for the glorification of S'iva as the supreme divinity.

CONTENTS: I. Story of Daksha's visit to Naimisha forest, where he was disrespectfully treated by his son-in-law S'iva, and for which he rebuked S'iva.

II—III. Daksha commences a great feast to which he does not invite S'iva. Dákshávani hears of the feast, and obtains her husband's permission to go to her father's house, where she commits suicide. S'iva hears the news, and, in a fit of anger, plucks out a lock of hair, which becomes two demons Káli and Vírabhadra.

IV—V. The demons wage war with the gods. Decapitation of Daksha; his head replaced by that of a goat. His hymn to S'iva. Adoration of S'iva, and advantages of putting on the tridental sectarial mark, ashes, &c. Story of Nandi, a Vaisya of Avanti, who was a great devotee.

VI—VII. S'iva's grief at the loss of his wife; his asceticism. Origin of the Lingam; its worship. S'aíva philosophy. Story of Sundarí, daughter of a king of Kásí.

VIII. Lingams of various kinds. Dispute between the Devas and Rávana. Devas repair to Vishnu, and devise means for the destruction of Rávana.

IX—XIV. The churning of the ocean. Origin of the Háláhala poison. Birth of Ganes'a. Consequences of the churning.

XV—XIX. Story of Nahusa. Ditto of Dadhichi. Ditto of Bali and of the Dwarf incarnation.

XX—XXV. The superiority of the Lingam over Brahmá and Vishnu. Story of Taraka, a demon, who oppressed the Devas. Marriage of S'iva with Umá.

XXVI—XXXI. Honey-moon of S'iva on the Gandhamádana mountain. Birth of Kártika. His battle with Táraka. Destruction of Táraka. Adoration of Kártika.

XXXII. Story of S'vetarájá. Merits of the S'ivarátri fast. Lu-

nations most appropriate for the worship of S'iva, Gánes'a, Kártika, &c. Gambling between S'iva and Umá, S'iva, losing everything by play, retires from Kailása to a forest. Umá, assuming the disguise of a wild hill woman, repairs to S'iva. Their reconciliation and adoration by the Devas. Merits of reciting the Kedára-khanda.

Beginning. यस्याज्ञया जगत्स्रष्टा विरिञ्चिः पालको हरिः।
संहर्त्ता कालरुद्राख्यो नमस्तस्मै पिनाकिने॥
तीर्थानामुत्तमं तीर्थं क्षेत्राणां क्षेत्रमुत्तमम्।
तत्रैव नैमिषारण्ये शौनकाद्यास्तपोधनाः॥
दीर्घसत्रं प्रकुर्व्वन्तः सत्रिनां सुमतेन सः।
तेषां सन्दर्शनौत्सुक्यादागतो हि महातपाः॥
व्यासशिष्यो महाप्राज्ञो लोमशो नाम नामतः।
तत्रागतं ते ददृशुर्मुनयो दीर्घसत्रिणः॥
उत्तस्थुर्युगपत्सर्व्वे सार्घ्यहस्ताः समुत्सुकाः।
दत्त्वार्घ्यपाद्यमसकृन्मुनयो वीतकल्मषाः॥
तं पप्रच्छुर्महाभागाः शिवधर्म्मं सुविस्तरं।
मुनय ऊचुः।
कथयस्व महाप्राज्ञ देवदेवस्य शूलिनः।
महिमानं महाभाग ध्यानार्चनसमन्वितम्॥
सम्मार्ज्जने किं फलं स्यात्तथारङ्गावलीषु च॥ इत्यादि।

End. शृण्वन्ति चैव ये भक्त्या शम्भोर्माहात्म्यमुत्तमम्।
शैवशास्त्रमिदं विप्रास्ते यान्ति परमां गतिम्॥

Colophon. इति श्रीस्कान्दे महापुराणे केदारखण्डे शैवशास्त्रे अष्टशतचतुर्दशाधिकनिमहस्रे पञ्चत्रिंशोऽध्यायः। समाप्तश्चेदं केदारखण्डम्। (इतः परं स्कन्दपुराणमाहात्म्यकथनश्लोका विद्यन्ते।)

विषयः। १मे, अध्याये,—लोमशेन सह शौनकादीनां संवादेन भगवान् शूलपाणिरेव परं ब्रह्म तदुपसेवया च जीवोऽमृतत्वमाप्नोतीतिनिरूपणं। अथकदा नैमिषारण्यं समागतस्य दक्षस्य पुरतः प्रणिपातपुरःसरं दण्डायमानेषु सुरासुरनिकरेषु अकृतप्रणामं रुद्रं प्रति तस्य कोपादिविवरणकीर्त्तनं। दक्षनन्दिनोरन्योन्यं शापविवरणकथनं।

२-३, अध्याय,—दक्षस्य शिवरहितयज्ञानुष्ठानविवरणकथनं। अथैकदा गन्धमादनपर्व्वते सह सखीभिः क्रीड़न्ती दाक्षायणी दक्षालयमुद्दिश्य प्रचलतां चन्द्रादीनां प्रवृत्तिमुपलभ्य विजयामुखात् शङ्करमभ्युपेत्य च पितृगृहगमनाय कृतानुमोदना नितरां ममुदे।

अथ पितृगृहं समनुप्राप्ता सतीयं पितृमुखात् पतिनिन्दनमाकर्ण्य अत्यर्थं निर्व्वेदमापन्ना हुता-शनं प्रविवेश। अनन्तरं नारदमुखेन प्रवृत्तिमिमामाकलय्य क्रोधज्वलितो भगवान् रुद्रो जटामेकां गिरिशिरसि आस्फालयामास। ततः समुद्भूतयोः कालीवीरभद्रयोः दक्षयज्ञविनाशादिवर्णनं।

४—५, अध्याये,—इन्द्रोपेन्द्रप्रभृतिभिः सार्द्धं वीरभद्रस्य युद्धवर्णनं। ब्रह्मकृतशिवस्तोत्रकथनं। दक्षस्य छागमस्तकलप्राप्तिकथनं। दक्षकृतशिवस्तोत्रकथनं। शिवमाहात्म्यकथनं। शिवालयनिर्म्मा-णादिफलकीर्त्तनं। अथ इन्द्रसेनस्य राज्ञ उपाख्यानकथनं। करवीर अर्क-धुस्तूरादिपुष्पैः शिव-पूजाकरणे उत्तरोत्तरं फलाधिक्यकथनं। त्रिपुण्ड्रमाहात्म्यकथनं। विभूतिमाहात्म्यकथनं। शिव-पूजामाहात्म्यकथनमुखेन अवन्तिपुरवासिन्यस्य नन्दिनामकवैश्यस्य उपाख्यानकथनं।

६—७ अध्याये,—लिङ्गप्रतिष्ठाविधिकथनप्रसङ्गेन सतीविरहविधुरस्य विधुभूषणस्य मनो-हरवेशेन दारुवनप्रवेशवर्णनं। तत्र ऋषीणां शापेन शिवस्य षण्डत्वप्राप्तिः लिङ्गपतनञ्चेतिकथनं। शिवलिङ्गस्वरूपकथनं। मुखं ते अपवित्रमस्त्विति सुरभिं प्रति देवानां शापदानकथनञ्च। ब्रह्म-कृतलिङ्गस्तोत्रकथनं। लिङ्गार्च्चनमाहात्म्यकीर्त्तनं। स्थानभेदे शिवलिङ्गस्य नामभेदकथनञ्च। पा-शुपतधर्म्मकीर्त्तनं काशीराजकुमार्य्याः सुन्दर्य्याः उद्दालकस्य ऋषेः सपर्य्याकरणवृत्तान्तकीर्त्तनं।

८ अध्याये,—इन्द्रचन्द्रसूर्य्यादीनां रत्नमुक्तातायमयादिलिङ्गपूजनकथनं। लिङ्गमाहात्म्यक थनव्याजेन गोकर्णपर्व्वते रावणकृतलिङ्गार्चनविवरणकथनं। नन्दिना सह रावणस्य विरोधकथन। रावणं प्रति तस्य शापदानविवरणकथनञ्च। रावणविप्रकृतानां देवानां वैकुण्ठगमनपूर्व्वकं वैकुण्ठस्तोत्रकीर्त्तनं। भगवत उपदेशेन देवानां वानररूपेण जन्मग्रहणकथन। रामावतार-कथनादिकञ्च।

९—११ अध्याये,—बलिकृतशक्रैश्वर्य्यहरणविवरणं। बलिविप्रकृतस्य इन्द्रस्य ब्रह्मलोक-गमनादिकथनं। भगवत उपदेशेन तस्य सुतलगमनपूर्व्वकं बलिना सह संवादकथनं। समुद्रमन्थन-वृत्तान्तकथनं। रुद्रस्य कोपात् कालकूटस्य उद्भवः, तेन च ब्रह्माण्डस्य भस्मीभूतत्वकथनञ्च। अथ हेरम्बस्य प्रार्थनया शिवलिङ्गात् ब्रह्मविष्णुप्रभृतीनां प्रादुर्भावकथनं। गणेशस्य उत्पत्त्यादिकथ-नञ्च। चतुर्थ्यां गणेशपूजनमाहात्म्यकीर्त्तनं। तस्य पूजनविधिकथनं। मथ्यमानात् समुद्रात् चन्द्रा-दीनामुद्भवकथनादिकं।

१२—१४ अध्याये,—समुद्रात् लक्ष्म्याः उत्पत्तिकथनादिकं। अमृतपरिवेशनकाले विष्णोः मोहिनीरूपधारणादिकथनं। सुरासुरयोः युद्धवर्णनं। राहुं पुरस्कृत्य दैत्यानां जयलाभकथनं। राहुभयेन चन्द्रस्य शिवमान्निध्यगमनादिकथनं। विष्णुकृतकालनेमिवधवर्णनादिकं। युद्धहतानां सर्व्वेषां प्राणिनां स्वर्गफलप्राप्तिकथनं। इन्द्रेण सह बृहस्पतेः विरोधकथन। विश्वकर्म्मसुतस्य विश्व-रूपस्य इन्द्रपौरोहित्यकरणविवरणकथनं। अथैकदा शक्रः वज्रेण विश्वरूपस्य शिरांसि चिच्छेद। ततश्च येन मुखेन विश्वरूपः सोमपानमकरोत् ततः कपिञ्जलाः समजायन्त। तथा सुरापानम-खाच्च कलविङ्कतित्तिरिप्रभृतीनामुत्पत्तिकथनञ्च।

१५—१९ अध्याये.—देवानां नहुषाय स्वाराज्यदानविवरणकथनं, पुनरिन्द्रविधरस्य स्रष्टुः ब्रह्मवरदानेन वृत्रासुरस्य उद्भवादिकथनं। दधीचे रस्थ्यादिना अस्त्रादिनिर्म्माणकथनं। देवान् प्रति दधीचिपत्न्याः सुवर्चायाः शापदानकथनं। तद्गर्भात् पिप्पलादस्य उत्पत्तिकथनं। वृत्रासुरवधकथनमुखेन प्रदोषशैवव्रतविधिकथनं। बलिकृतामरावतीरोधवृत्तान्तकीर्त्तनं। इन्द्रसोम-वह्निप्रभृतीनां मयूरकाक-कलाशादिरूपेण पलायनविवरणकथन। वामनावतारकथन। बलिच्छलनवृत्तान्तकीर्त्तनं। बलेः पातालगमनकथनं।

२०—२५ अध्याये,—ब्रह्मविष्णुरुद्राणां मगुणत्वनिरूपणपूर्व्वकं लिङ्गरूपस्य भगवतः निर्गुणत्वादिकथनं। नमुचिपुत्रेण तारकेण उपद्रुतानां देवानां ब्रह्मिणसमीपगमनपूर्व्वकं स्तोत्रयाजेन स्वावस्थावर्णनं। दाक्षायण्या गिरिराजकन्यात्वेन जन्मग्रहणादिकथनं। पार्व्वत्याः शिवशुश्रूषणं। मदनदाहनविवरणकथनं। रत्या सह नारदस्य संवादकथनं। पार्व्वत्यास्तपस्यादिवर्णनं वटुरूपस्य शिवस्य तत्सन्निधौ गमनादिकथनं। अतिविस्तरेण शिवविवाहमहात्म्यवर्णनं। चण्ड्या आविर्भावादिकथनञ्च।

२—३१ अध्याये,—गन्धमादनपर्व्वते शिवाशिवयोः विहारवर्णनं। देवानामनुरोधेन वह्नेः हंसरूपेण तत्र गमनादिविवरणकथनं। कार्त्तिकेयस्य जन्मादिकथनं। कुमारस्य सेनापतित्वे वरणादिकथनं। तारकेण सह घोरयुद्धवर्णनं। कुमारविजयकथनञ्च। यमकृतशङ्करस्तोत्रकथनं। कार्त्तिकदर्शनादिमाहात्म्यकथनं। यमेन जिज्ञासितस्य शिवस्य ज्ञानयोगस्वरूपादिकथनं। सुरनागकिन्नरादिकृतकुमारस्तोत्रकीर्त्तनं। कुमारेण सह नन्दिनः संवादेन शिवालयनिर्म्माणादिमाहात्म्यकीर्त्तनं।

३२ अध्याये.—शिवभक्तस्य श्वेतराजस्य उपाख्यानकीर्त्तनं। शिवरात्रिव्रतमाहात्म्यकथनप्रसङ्गेन चण्डाभिधानस्य पुक्कषस्य विवरणकथनं। शिवगणेश नागराजकुमार-रविप्रभृतीनां देवानां प्रियतिथ्यादिनिरूपणं। एकदा पार्व्वत्या द्यूते पराजितस्य शिवस्य भूषणमोषणं कौपीनग्रहणेन नग्नीकरणञ्चेतिरहस्यवर्णनं। अथ विरक्तस्य शिवस्य कैलासं विहाय वनप्रवेशविवरणकथनं। ततः पार्व्वत्याः शवरीरूपमाकलय्य शिवसान्निध्यगमनकथनं। तयोर्द्देवगणकृताभिषेकवर्णनञ्च। केदारखण्डपाठादिफलश्रुतिकथनञ्च। इति।

No. 2110. नामकौमुदी। Substance, country-made paper, 13 × 4 inches. Folia, 82. Lines, 6 on a page. Extent, 1,154 ślokas. Character, Bengali. Date, Sk. 1602. Place of deposit, Purohitapáḍá, Ránághát, Paṇḍit Rámalála Bandyopadhyáya. Appearance, old. Prose and verse. Correct.

Náma-kaumudí. A treatise on faith in Kṛishṇa as the supreme divinity, and the rituals and duties of Vaishṇavas. By Gaṅgádhara, son of Śiva Bhaṭṭa, and grandson of Vireśvara Bhaṭṭa Máhánkara.

Beginning. नमस्कृत्य रमानाथं करुणावरुणालयं।
सदाशिवतनूजन्मा वत्सर्षिकुलसम्भवः॥
गङ्गाधर इतिख्यातो भगवद्भक्तकिङ्करः।
शास्त्रसारं समालोक्य मनोनिग्रहहेतवे॥
अपवर्गफलां रम्यां हरिपादपरायणां।
उक्तियुक्तिविशेषेण कुर्व्वेऽहं नामकौमुदीं॥
तत्र ब्रह्मसंहितायां।
ईश्वरः परमः कृष्णः सच्चिदानन्दविग्रहः। इत्यादि।

End. तस्मात् भगवन्नामोच्चारणमात्रेणैव जीवानां चतुर्व्वर्गप्राप्तिरवश्येति दिक्।

Colophon. इति श्रीमन्महाउकरोपनामकवीरेश्वरभट्टाग्निहोत्रिसूनुसदाशिवभट्टात्मजभगवद्भक्तकिङ्करगङ्गाधरविरचिता नामकौमुदी समाप्ता। शकाब्दाः। १६०२।

विषयः। श्रीकृष्णस्य स्वयं भगवत्तानिरूपणं। तस्य पूर्णनिर्णयः। विविधप्रमाणोपन्यासेन श्रीकृष्णतत्त्वनिरूपणं। नाममहिमा प्रकटाप्रकटलीलाद्यवस्थाकीर्त्तनं। कृष्णनामबहिर्मुखानां निन्दाकथनं। दशविधभक्तिलक्षणं। गर्व्वाद्यर्थविवेककथनं। महाभागवतप्रसङ्गकीर्त्तनं। श्रवणकीर्त्तनादिषु नामसंकीर्त्तनस्यैव प्राधान्यमितिनिरूपणं। नामापराधविवेचनं। भगवत्यत्र सर्व्वेषां शास्त्राणां तात्पर्य्यमितिप्रपञ्चनं। भगवन्नामफलकथनादिकं। संक्षेपेण श्रीमद्भागवततात्पर्य्यकथनं। नामसंकीर्त्तनेनैव जीवानां चतुर्व्वर्गप्राप्तिरितिकीर्त्तनञ्च।

No. 2111. निर्व्वाणप्रकरणम्। Substance, country-made paper, 7×4 inches. Folia, 3. Lines, 5 on a page. Extent, 58 s'lokas. Character, Bengali. Date, ? Place of deposit, Purohitapáḍá, Ráṇághát, Paṇdit Rámalála Bandyopádhyáya. Appearance, fresh. Verse. Correct.

Nirváṇa-prakaraṇa. Eight stanzas on the unreality of the universe, as inculcated in the Vedánta philosophy. By S'uka, son of Vyása.

श्रीशुकाचार्य्य उवाच।

Beginning. भेदाभेदौ सपदि गलितौ पुण्यपापे विशीर्णे
मायामोहौ क्षयमधिगतौ नष्टसन्देहवृत्तिः।
शब्दातीतं त्रिगुणरहितं प्राप्य तत्त्वावबोधं
निस्त्रैगुण्ये पथि विचरतां को विधिः को निषेधः॥ इत्यादि।

End. सत्यं सत्यं परमममृतं शान्तकल्याणरूपं
मायारण्ये दहनदग्धं शान्तिकल्याणदीपं।

तेजोरूपं निगमसदनं व्यासपुत्राष्टकं यः
प्रातः काले पठति मनसा याति निर्व्वाणमार्गं ॥

Colophon. इति श्रीशुकाचार्य्यविरचितं निर्व्वाणप्रकरणं सम्पूर्णं ।

विषयः । निर्व्वाणस्वरूपकथनपूर्व्वकं तदुपायकीर्त्तनं ।

No. 2112. आर्षानुक्रमणी । Substance, country-made paper, 8 × 4 inches. Folia, 22. Lines, 7 on a page. Extent, 320 ślokas. Character, Nágara. Date, Sm. 1820. Place of deposit. Sántipur, Paṇdit Kálidása Vidyávagís'a. Appearance, fresh. Prose. Correct.

A'rshánukramaṇí. Index to the Ṛishis who are supposed to be the authors of the Ṛig Vedic hymns. By Saunaka.

आर्षानुक्रमणी लिख्यते ।

Beginning. ॐ ऋग्वेदसंहितायां हि द्रष्टारो मुनिपुङ्गवाः ।
तदनुक्रमणार्थाहं नमामि परमेश्वरीम् ॥
अथाग्निमील इत्यादि प्रथमं मण्डलं प्रति ।
शतर्च्चिनस्तु विज्ञेया ऋषयः सुखसिद्धये ॥
तेषां पूर्व्वो मधुच्छन्दा मेधातिथिरनन्तरः ।
शुनःशेफस्तृतीये च हिरण्यस्तूप उत्तरः ॥ इत्यादि ।

End. ये वेदमन्त्राः सकलाः सुदृष्टा येनार्षानुक्रमणी प्रदिष्टा ।
नमोऽस्तु तेभ्यो मुनिपुङ्गवेभ्यो भवन्तु ते चापि मयि प्रसन्नाः ॥

Colohpon. इति शौनकाचार्य्यकृतार्षानुक्रमणी समाप्ता । संवत् १८२० ।

विषयः । ऋग्वेदसंहितोक्तमन्त्राणामृषिनिरूपणं ।

No. 2113. रासोल्लासतन्त्रे रासगीतिका । Substance, country-made paper, 8 × 4 inches. Folia, 13. Lines, 7 on a page. Extent, 137 ślokas. Character, Nágara. Date, ? Place of deposit, S'ántipur, Paṇdit Kálidása Vidyávagíśa. Appearance, new. Prose. Correct.

Rása-gítá. A poem in praise of the Rása festival of Kṛishṇa and Rádhá. It professes to be an extract from the Rásollása Tantra.

श्रीनारद उवाच ।

Beginning. श्रीराधाकृष्णदेवस्य नाम्नामष्टोत्तरं शतम् ।
राससङ्कीर्त्तनं नाम शृणु भागवतोत्तम ॥

राधानामसुधायुक्तं कृष्णनामरसायनम् ।
यः पठेत् प्रातरुत्थाय व्याधिभिः स न बध्यते ॥ इत्यादि ।

End. लक्ष्मीस्तस्य वसेद्गेहे मुखे भाति सरस्वती ।
धर्म्मार्थकामकैवल्यं लभते सत्यमेव च ॥

Colophon. इति श्रीरासोल्लासतन्त्रे रासगीतिका सम्पूर्णा ।

विषयः । राधाकृष्णयोः रासोत्सवकालीनस्तोत्रकथनं ।

No. 2114. सर्व्वानुक्रमणिका । Substance, country-made paper, 10 × 3 inches. Folia, 37. Lines, 7 on a page. Extent, 630 ślokas. Character, Nágara. Date, ? Place of deposit, S'ántipur, Paṇḍit Kálidása Vidyávágís'a. Appearance, fresh. Prose. Correct.

Sarvánukramaṇiká. An index to the Ṛishis, the Devas and the metres of the hymns of the Vájasaneyi Sañhitá of the Yayur Veda. By Kátyáyana.

Beginning. ॐ मण्डलं दक्षिणमक्षि हृदयं चाधिष्ठितं येन शुक्लानि यजूंषि भगवान् याज्ञवल्क्यो यतः प्राप तं विवस्वन्तं त्रयीमयमर्चिष्मन्तमभिध्याय माध्यन्दिनीये वाजसनेयके यजुर्व्वेदाम्नाये सर्व्वे सखिले सशुक्रिये ऋषिदैवतच्छन्दांस्यनुक्रमिष्यामोयजुषामनियताक्षरत्वादेकेषां छन्दो न विद्यते । द्रष्टार ऋषयः स्मर्त्तारः परमेष्ठ्यादयो देवता मन्त्रान्तर्भूता अग्न्यादिकाः शाखोखाग्न्योपवेषकपालेध्मोलूखलादयश्च प्रतिमाभूतास्छन्दांसि गायत्र्यादीन्येतान्यविदित्वा योऽधीतेऽनुब्रूते जपति जुहोतीत्यादि ।

End. षडष्टका वा महापंक्तिर्माध्यन्दिनीये वाजसनेयके सर्व्वानुक्रमणिकैषा कृतिर्भगवतः कात्यायनस्यैषाकृतिर्भगवतः कात्यायनस्य । च ।

Colophon. इति सर्व्वानुक्रमणिकायां पञ्चमोऽध्यायः समाप्तः । समाप्ता चेयं सर्व्वानुक्रमणिका ।

विषयः । सर्व्वेषां माध्यन्दिनयजुर्मन्त्राणाम् ऋषिदैवतनिरूपणं । क्वचित् छन्दआदिकथनञ्च ।

No. 2115. विदन्मण्डनम् । Substance, country-made paper, 12 × 4 inches. Folia, 102. Lines, 6 on a page. Extent, 1,969 ślokas. Character, Nágara. Date, Sm. 1889. Place of deposit, S'ántipur, Paṇḍit Kálidása Vidyávágís'a. Appearance, fresh. Prose. Generally correct.

Vidvanmaṇḍana. An essay in refutation of the doctrine of Máyá. It attempts to prove that the human soul is not a mere reflection of the Divine soul, but an actual emanation from the Divinity, and that Krishṇa is the perfection of the Divinity. It represents the philosophy of the Vaishṇavas in a condensed form. By Viṭṭhala Díkshita, son of Vallabha Díkshita.

Beginning. निजमुरलिकानादाकृानागतब्रजसुन्दरी-
निरुपमनवस्नेहाम्भोधेर्विचित्रतरोर्म्मिभिः ।
किमपि परितश्चार्द्रार्द्रोऽस्तु प्रभुः प्रकटीभवन्
प्रतियुवतिमभेदेनास्मद्दृशां विषयः सदा ॥
पितृचरणान्नत्वाहं हरिरतिमार्गाम्बुजातमार्त्तण्डान् ।
तदनुग्रहतः किञ्चिल्लिखामि यत्नाद्यथाबुद्धि ॥
श्रुतिसूत्रादिमणिभिर्जटिलं युक्तिमौक्तिकैः ।
ग्रथितं कुरुते विद्वन्मण्डनं विट्ठलः सुधीः ॥

इह हि विविधवृजिनतापोपतप्यमाननिखिलजनापवर्गाय श्रुतिस्मृतिपुराणेषु श्रवणादयः प्रतिपाद्यन्ते । इत्यादि ।

End. पुनरपि नमामि गोपीपतिरतिमार्गप्रवर्त्तनाचार्य्यान् ।
श्रीवल्लभाभिधानान पितृचरणान् वाङ्मनःकायैः ॥

Colophon. इति श्रीमन्निजकटाक्षपाततरणिविघटितमायावादिप्रभृतिप्रतिवादितमःपुञ्जविकाशितश्रीगोकुलाधीशरसि+श्रीवल्लभदीक्षितात्मजश्रीगोकुलनाथचरणैकतानश्रीविट्ठलविरचितं विद्वन्मण्डनं सम्पूर्णं ॥ संवत् । १८८९ ।

विषयः । प्रकरणेऽस्मिन् मायावादादिखण्डनपूर्व्वकं विष्णुस्वामिमतेन शुद्धाद्वैतवादोपपादनं । एतन्मते हि जीवपरमेश्वरयोर्जलविन्दुजलाशययोरिव अंशांशिभावः । सर्व्वमिदं जगत् श्रीकृष्णादाविर्भवति तमेव लूतातन्तुरिव अप्येति च । मायिकगुणरहितः परमेश्वरः श्रीकृष्ण एव भगवानुपास्यदेवः । एतस्यैवोपासनया आनन्दाविर्भावान्मोक्षदशायां जीवः श्रीकृष्ण एव जलविन्दुर्ज्जलाशय इव अभेदमापद्यते—इति । अत्र श्रीकृष्णलीलायाः प्रयोजनादिकीर्त्तन लीलाया नित्यत्वादिनिरूपणञ्च ।

No. 2116. मलमासतत्त्वटीका । Substance, country-made paper, 16 × 4 inches. Folia, 142. Lines, 7 on a page. Extent, 4,626 Slokas. Character, Bengali. Date, ? Place of deposit, Májidá, Post Ráṇághát, Paṇḍit Madhusúdana Nyáyaratna. Appearance, fresh. Prose. Correct.

Malamásatattva-ṭíká. A commentary on the Malamásatattva of Raghunandana; on intercallary months. By Rádhámohana Gos'vamí.

Beginning. प्रणम्य राधानलिनीतुभृङ्ग-मङ्गं घनश्यामलमच्युतस्य ।

परं चिदानन्दमयं तनोति श्रीमोहनोऽर्थं मलमासतत्त्वे ॥

ग्रन्थसमाप्तिप्रतिकूलविघ्नविनाशाय परमेश्वरप्रणतिरूपमङ्गलं कुर्व्वन् शिष्यशिचार्थं तदुपनिबन्धनं कृत्वा शिष्यावधानाय प्रतिजानीते प्रणम्येति । स्मृतेस्तत्त्वेति स्मृतिवाक्यस्य तत्त्वमर्थविशेषं । मलिम्लुचे इत्यादेस्तत्त्वं वच्यामीति परेणान्वयः । इत्यादि ।

End. तस्य मल्यामपि चैत्रादिसंज्ञायां चैत्रादिमासविहितकर्म्मानर्हतया तत्तन्नामकत्वरूपमन्यथा मलस्थले द्विचैत्रादिपदप्रयोगानुपपत्तेरिति ॥

Colophon. इति श्रीमदद्वैतवंशोद्भवश्रीराधामोहनगोस्वामिभट्टाचार्य्यविरचिता मलमासतत्त्वटीका समाप्ता ।

विषयः । रघुनन्दनकृतमलमासतत्त्वस्य व्याख्यानं ॥

No. 2117. उद्वाहतत्त्वटीका । Substance, country-made paper, 16 × 4 inches. Folia, 95. Lines, 7 on a page. Extent, 2,161 s'lokas. Character, Bengali Date, ? Place of deposit, Májidá, Post Ráṇághaṭa, Paṇḍit Madhusudana Nyáyaratna. Appearance, fresh. Prose. Correct.

Udváhatattva-ṭíká. A commentary on Raghunandana's digest of the laws relating to marriage. By Kás'iráma Váchaspati Bhaṭṭáchárya.

Beginning. नत्वा गुरोश्चरणपद्मरजांसि मूर्द्ध्नि

श्रीकान्तकान्तचरणञ्च निधाय चित्ते ।

श्रीकाशिरामसुकृती कृतिनां हिताय

सम्बन्धतत्त्वविवृतिं वितनोति यत्नात् ।

स्मृतिशास्त्राम्बुधौ लीलाकृतसेतुं जगद्गुरुं ।

विदितं त्रिषु लोकेषु नमामि रघुनन्दनं ॥

स्वकर्त्तव्यग्रन्थसमाप्तिप्रतिबन्धकविघ्नसम्भावनास्ति । अतः सम्भावितताद्दशविघ्नविनाशार्थं ग्रन्थकारः परमेश्वरप्रणामरूपं मङ्गलं कृतवान् । तच्च शिष्यशिचार्थमादौ निबध्नाति प्रणम्येति । वागरूपस्य ग्रन्थस्य समाप्त्यर्थं वागीशस्य प्रणाम उचित इति सूचनार्थं वागीशमिति विशेषणमुपात्तं ।

End. अप्रजाः शूद्रादनुत्पन्नगर्भा । इतराः न शुध्यन्तीति ।

यं प्रासूत समस्तशास्त्रनिपुणः श्रीरामकृष्णात्मजः

श्रीराधोनरवल्लभाख्यसुकृती सद्वीरचूड़ामणिः ।
तेन श्रीयुतकाशिरामकृतिना यत्नेन निष्पादिता
टीका नातिसुस्पष्टकृत्लापि कृतिभिः सानुग्रहैर्दृश्यतां ॥

Colophon. इति श्रीकाशीरामवाचस्पतिभट्टाचार्य्यविरचिता उद्वाहतत्त्वटीका समाप्ता

विषयः । रघुनन्दनकृतोद्वाहतत्त्वस्य व्याख्यानं ।

No. 2118. देवीपुराणम् । Substance, country-made paper, 14 × 4 inches. Folia, 182. Lines, 8—9 on a page. Extent, 7,371 ślokas. Character, Bengali. Date, ? Place of deposit, Ráṇághát. Bábu Surendranátha Pála Chaudhúri. Appearance, old. Verse. Incorrect.

Deví Puráṇa. Legends and traditions regarding the Deví and her wars, designed so as to glorify the Deví, and exalt her as the greatest divinity. It professes to have been imparted by Brahmá himself at the request of an assembly of Ṛishis. The S'áktas insist that this is an original Puráṇa, and one of the eighteen alleged to have been compiled by Vyása; but the Vaishṇávas denounce it as apocryphal, got up with a view to set aside the claims of the Bhágavata Puráṇa. Dr. Wilson, in the introduction to his translation of the Vishṇu Puráṇa has noticed at length the arguments urged by the two sects. The codex is incomplete.

CONTENTS: 1—2. Introduction, Ṛishis repair to the hermitage of Agastya by the advice of Vaśishṭha. Story of Nṛipaváhana and Chitráṅgada. Ghora, an Asura, attains absolute invincibility on earth through the blessings of Vishṇu. Vaśishṭha advises Ghora how to obtain the nature of a Vidyádhara.

3 to 6. Conquest of Pátála by Kála, son of Ghora. Conquest by him of the kingdom of heaven from Indra and the other gods. The gods seek the aid of the Deví, and address her hymns.

7 to 9. The Deví descends on the Vindhya mountain. Nárada descends to delude the demon. The demon proposes to marry the Ḍeví. Selection of brides. Mantras for deluding people.

10 to 13. Description of Sanatkumára Yoga. Story of Hutágni, a demon. Story of Surala, who obtains an invincible standard. Descriptions of standards.

14 to 21. Ghora sees a frightful dream. The Deví, under the name of Vindhyavásini, destroys Korakála and other demons. Indra praises the Deví.

22 to 29. Durgápújá. Planting of standards. Transit of the sun from one to another month. Worship of the Deví at such times and on other occasions.

30 to 33. Agency of the Deví in the creation of the universe. Her superiority over Brahmá, Vishṇu and Mahádeva, who attain their greatness and strength through her. Her worship. Her car festival. Her worship on cremation ground on particular occasions.

34 to 38. Details about her worship, her temples, offerings to her, &c. Hymns in her praise.

39 to 43. Further details. Story of Bala. Do. Dundubhi. Worship of Kshemaṅkarí.

44 to 48. Aparájitá-vidyá. Story of Amayásura. Names of Rudras, Vasus, Viśvedevas, &c. Conjunctions of Nakshatras. Deví worshipped by Paras'uráma. Astronomical and astrological details in connection with her worship.

49 to 53. Further astronomical details and special rules about her worship.

54 to 70. Special worship of the Deví and her manifestations as Mátrikás on particular occasions, and also of S'iva in connexion with her.

71 to 80. Worship of Vináyaka. Character of forts, gates, triumphal arches, &c. Bathing during eclipses. Merit of pouring water on Lingams. Rites, fasts and sacrifices in honour of the Deví.

81 to 89. Merit of cleaning the temple of the Deví. Her omnipresence. Periods of existence of Brahmá and others. Praise of Kálágnirudra. Description of Háṭakes'varapura. Story of the demon Kuru. Origin of Bhimá. Do. of the signs of the planets. Do. of Chaṇḍeśvara. Praise of the Deví on the destruction of Kuru.

91 to 96. The fasts of the 8th and of the 9th lunations in Áśvina. Worship of the Mátris. Advantage of worshipping clay images. Praise of Vidyá, and her worship. Praise of Nanda, a place sacred to the Deví.

97 to 103. Duties of the different orders, classes and castes. Various fasts.

104 to 114. Various fasts. Origin, classification and division of the Vedas. The subsidiary Vedas. Science of medicine. Qualities of drugs. Story of Khaṭṭásura. Birth of Gaṇeśa.

115 to 128. Hymn to Gaṇeśa by Vishṇu. Lustration of Gaṇeśa

and blessings by him on Vishṇu. Story of Vighna, his destruction by Gaṇeśa. Praise and worship of the Mátrikás. Story of Harischandra. Repairs of images of gods. Controul of the passions. Story of Naraváhana. Rules regarding Triragni. Names of Agni under different conditions. Flowers meet for worship. Worship of spiritual guides. Hymn in praise of the Deví.

Beginning. नमस्कृत्य शिवां देवीं सर्व्वभागवतां शुभाम्।
पुराणं संप्रवक्ष्यामि यथोक्तं ब्रह्मणा पुरा ॥
ऋषय ऊचुः।
भगवंस्त्वं समस्तस्य दृष्टादृष्टस्य तत्त्ववित्।
पुराणार्थं वयं सर्व्वे आगता भुवि भाविताः ॥
कथ्यतां यत्र घोराद्या भूताः साम्प्रतदानवाः।
भविष्यांश्च विनाशिष्ये देवी देवनमस्कृता ॥
इन्द्रस्य च दिवः प्राप्तिर्हृतराज्यस्य दानवैः।
यथा शक्रोच्छ्रयं चक्रे देवदेवनमस्कृतः।
अवतारा मुनिश्रेष्ठ षष्टिभेदगता यथा ॥ इत्यादि।

End. मयापि कथितं तुभ्यं निरुक्तं पापनाशनम्।
पुराणं पावनं दिव्यं देवदेवेन भाषितम् ॥

Colophon. इत्याद्ये देवीपुराणे देवदेवीसंवादे देव्याः स्तवराजः समाप्तः ॥
१२८ अध्यायः।

विषयः। १—२ अध्याये,—वसिष्ठस्योपदेशेन ऋषीणामगस्त्याश्रमगमनविवरणकथनं। नृपवाहनचित्राङ्गदयोरुपाख्यानकथनं। घोराभिधानस्य दैत्येन्द्रस्य विष्णूपासनया पृथिव्यामजेयत्ववरप्राप्तिकथनं। अगस्त्येन सह नृपवाहनस्य संवादे केनोपायेन विद्याधरत्वप्राप्तिर्भवति तदुपायकथनं।

३—६ अध्याये,—घोरपुत्रस्य कालस्य वज्रदण्डस्य च भगवदाराधनया देववरयोः पातालादिविजयवर्णनं। शुक्रस्योपदेशेन तयोरिन्द्रादिपराजयसम्पादनपूर्व्वकं स्वाराज्यैश्वर्य्यप्राप्तिकथनं। घोरपुत्रविप्रकृतानां देवानां ब्रह्ममुखेन देवीस्तोत्रकीर्त्तनं। एवं विष्णुरुद्रादिकृतदेवीस्तोत्रकथनं।

७—९ अध्याये,—देव्या विन्ध्यावतरणविवरणकथनं। ब्रह्मण उपदेशेन घोरनामकदैत्यमोहनार्थं नारदस्य गमनवृत्तान्तकथनं। प्रलोभनमुग्धस्य दैत्यराजस्य विन्ध्यवासिनीं पत्नीत्वेन लब्धुं

चेष्टादिकथनं। अत्र विवाहयोग्यकन्यालक्षणादिकथनञ्च। लोकमोहनपद्मालाकथनप्रसङ्गेन सम्मन्त्रादिकथनं।

१०—१३ अध्याये,—उक्तविद्यालाभाय मन्त्रकुमारयोगानुष्ठानप्रकारकथनं। तत्र कृताग्निनामकस्य दानवस्य विवरणकथनं। सुरलनामधेयस्य दैत्येन्द्रस्य विवरणकथनं। तस्य विष्णोः शत्रुना मानकेतुलाभकथनं। केतुमसच्छ्रायविधिकथनं। इन्द्रध्वजलक्षणादिकथनं।

१४—२१ अध्याये,—आमन्नन्तर्यादित्येन्द्रस्य घोरस्य दुःस्वप्नदर्शनकथनं। विन्ध्यवासिनीकृत घोरकालादिदैत्यवधवर्णनं। इन्द्रकृतदेवीस्तोत्रकीर्त्तनं। नारदस्य विन्ध्यवासिनीदर्शनेन स्तवकीर्त्तनं। सुषेणवधकथनं। मायामैन्यवधकथनञ्च।

२२—२९ अध्याये,—आश्विनशुक्लाष्टमीमहानवम्योर्देवीपूजावश्यकताकथनं। नवमीकल्पविधिकथनं। अत्र दुर्गापूजाविधिकथनञ्च। ध्वजारोपणविधिकथनं। द्वादशसङ्क्रान्तिलक्षणकथनपूर्व्वकं तत्र तत्र कृत्यनिरूपणं। प्रदोषादौ सङ्क्रमणे फलादिकथनञ्च। वसोर्डारायां स्थिताया देव्याः पूजने फलाधिक्यकथनं। वसुधारादानयोग्यस्थानादिनिरूपणं। होमविधिकथनप्रसङ्गेन कुण्डनिर्म्माणादिविधिकथनं। विशेषेण देवीमाहात्म्यकथनं। देवीमाहात्म्यपाठादिविधिकीर्त्तनञ्च।

३०—३३ अध्याये,—देव्याः प्रकृतिरूपत्वेन जगत्कर्त्तृत्वादिकथनं। तस्याः परत्वादिनिरूपणञ्च। हरिहरादीनां सर्व्वेषां देवीपूजनेन सामर्थ्यप्राप्तिकथनं। तत्र देवभेदेन देव्याहेमस्फटिकादिमूर्त्तिभेदपूजकत्वकथनं। देव्यारथयात्राविधिकथनं। कर्म्मविशेषे नदीतीरदुर्गारण्यश्मशानादिषु देव्याः पूजनकर्त्तव्यताकथनं। देव्याः प्रतिष्ठापनविधिकथनं।

३४—३८ अध्याये,—शक्रकृतशिवस्तोत्रकीर्त्तनं। तत्पुरतः शिवेन दुर्गाव्रतविधानादिकथनं। देव्याः गृहनिर्म्माणलेपनसंस्कारादिकरणे फलश्रुतिकथनं। देवीपूजनं कृत्वा दुःखिभ्योऽन्नादिदानकर्त्तव्यताकथनं। देवीग्रामादगिरिनि ध्वजदानादिविधिकथनं गद्येन शिवोक्तदेवीस्तोत्रकीर्त्तनं। सर्व्वमङ्गलाशिवादिदेवीनामनिर्व्वचनकथनं। अत्र सर्व्वेषां देव्यभिधानानां निरुक्तं ज्ञेयं।

३९—४३ अध्याये,—महादेवीनां स्थाननिरूपणं। स्थलभेदे देवदेवेन देव्या मूर्त्तिविशेषपूजनविवरणकथनं। देवीमन्त्रप्रभावकथनमुखेन दैत्यराजस्य बलस्य वृत्तान्तकीर्त्तनं। दुन्दुभिनामकस्य दैत्येन्द्रस्य उपाख्यानकथनं। चमङ्ग्या आविर्भावकथनं। तस्याः पूजाविधिकथनं। घर्मासुरवधवृत्तान्तकथनं। कामरूपादिदेवीस्थानप्रशंसादिकीर्त्तनं।

४४—४८ अध्याये,—महादेवात् नन्दिन अपराजिताविद्याप्राप्तिकथनं। चमयासुरस्य विवरणकथनं। एकादशरुद्राष्टवसुद्वादशादित्यविश्वेदेवादीनां नामकथनं। नक्षत्रयोगमाहात्म्यकथनं। परशुरामकृतदेवीप्रतिष्ठाविधिकथनं। ग्रहयागानुष्ठानयोग्यतिथ्यादिनिरूपणं कालयवस्याकथनमुखेन तिथिरश्म्यादिलक्षणकथनं। ज्योतिषकसंस्थानादिकथनं। ग्रहाणां गत्यादिनिरूपणं।

४८—५३ अध्याये,—पूर्णिमामावस्यानिरूपणमुखेन चन्द्रचयवृद्धिनिरूपणं। सूर्य्याचन्द्रमसोरुपरागे छायारूपराहुकारणत्वकथनं। ग्रहणनिरूपणादिकथनं। संवत्सरं यावत् जन्मर्क्षदोषापनुत्तये ग्रहनक्षत्रादिभेदेन देव्या मूर्त्तिभेदपूजनविधिकथनं। तत्र मण्डलतोरणादिनिर्म्माणविधिकथनं। महास्नानविधिः शिवा-शान्ति-धृति-क्षमा-ऋद्धि-सिद्धि-तुष्टि-प्रभृतिषष्टिविधदेवीमूर्त्तिलक्षणकथनं। तथा ब्राह्म्यादिमातृकालक्षणकीर्त्तनञ्च। आसां पूजाविधिकथनं। ग्रहाधिष्ठात्रीणां देवतानां लक्षणादिकथनं। संवत्सरमण्डलकथनं। तत्र तत्र बलिदानादिविधिकथनञ्च।

५४—६४ अध्याये,—मातृमण्डलकथनं। तत्र तत्र पूजायां पात्रपुष्पादिनिरूपणं। अपमृत्युहरणादित्ययोगकथनं। ग्रहणमातृकाविधिकथनं। तत्र होमविधिकथनञ्च। महोत्पातस्वरूपकथनपूर्व्वकं सर्व्वोत्पातशान्तिविधिकथनं। पूर्णिमादौ तिलधेन्वादिदानविधिकथनं। सौभाग्यद्वादशीव्रतविधानं। द्वादशमासेषु क्रमेण देव्याः पूजाविधिकथनं। काम्यनीलवृषोत्सर्गविधिकीर्त्तनं। गन्धाष्टमीक्षीराष्टमीप्रभृतीनां विधानकथनं। सर्व्वकामलाभार्थं चित्रादिषु नक्षत्रेषु देव्याः पूजाविधिकथनं।

६५—७० अध्याये,—मासविशेषे पूजाविशेषेण देव्याः पूजाविधिकथनं। वाराणसी-प्रयाग-नैमिषारण्यादिषु स्थानेषु शिवस्य रूपभेदेन अवस्थानकथनं अतएव अष्टषष्टिस्थानेषु तत्पूजनविधानकथनञ्च। गोरत्नव्रतविधिकथनं। पुष्याभिषेकविधिः। तत्र मण्डलादिनिर्म्माणविधानकथनं। कलसोत्पत्ति-निवेशाधिदेवतालक्षणादिकथनं।

७१—८० अध्याये,—विनायकमण्डलविधिकथनं। पूजनस्नपनादिविधिकीर्त्तनञ्च। दुर्गगोपुरद्वारादिलक्षणं। पुरदुर्गयात्रादिविधिकथनं। पुण्यनद्यादिषु स्नाने ग्रहणकालीनस्नानजन्यपुण्यप्राप्तिकथनं। शिवादिशिरसि जलादिधारादानमाहात्म्यकथनं। मृत्युञ्जयविद्याकथनं तत्र कपोतकीर्त्तनाध्यायकीर्त्तनं। देवीयागविधिकथनं। अयाचितव्रतविधिकथनं। कृष्णाष्टमीव्रतविधिः। उमामाहेश्वरव्रतविधिकथनं। शङ्करनारायणव्रतविधिकथनं। लक्ष्म्यपर्णाव्रतविधानकथनञ्च।

८१—८९ अध्याये,—देवीगृहसम्मार्ज्जनमाहात्म्यम्। देव्याः सर्व्वगतत्वादिनिरूपणं। ब्रह्मादीनां कालव्यवस्थाकथनं। भावव्यवस्थाकथनञ्च। कालाग्निरुद्रमाहात्म्यकथन। हाटकेश्वरपुरवर्णनं। अथैकदा गौरीशङ्करं द्रष्टुकामा विधिवासवादयः स्वस्ववाहनेन कैलासं समाययुः। अत्र च कौमारवर्हिणा समाहतस्य ब्रह्मवाहनस्य हंसस्य विरावेण रुरुनामकस्य असुरस्य उत्पत्तिकथनं। तदुपद्रुतानां देवानां देवीस्तोत्रकीर्त्तनं। रुरुवधकाले ब्रह्माण्या उत्पत्तिकथनं। भीमाया उत्पत्तिकथनं। ग्रहोत्पत्तिकथनं। चण्डेश्वरोत्पत्तिकथनं। रुरुवधे देवगणकृतदेवीस्तोत्रकीर्त्तनं।

९१—९६ अध्याये,—देव्यष्टमीव्रतकथनं। देवीनवमीव्रतकथनं। मातृगणस्य प्रतिष्ठादिविधिकथनं। मृन्मयप्रतिमापूजनमाहात्म्यकथनं। विद्यागममाहात्म्यकथनं। विद्याविवेकमाहात्म्यं। विद्याविमानादिविधिकथनं। विद्यामूर्त्तिदानफलकीर्त्तनं। देव्याः प्रियस्थानकथनं। नन्दातीर्थमाहात्म्यकथनं। नन्दापुरीवर्णनादिकं। सुनन्दामाहात्म्यकथनमुखेन तत्पुरीवर्णनादिकं। तत्र प्रवेशविधिकथनं। कनकनन्दामाहात्म्यादिकथनं।

९७—१०३ अध्याये,—वर्णाश्रमधर्म्मकथनं। तत्र स्वाध्यायविधिकथनं। वेदपाठस्थानादिनिरूपणं। अग्निहोत्रादिविधिकथनं। वैधातिरिक्तस्थले हिंसायाः पापजनकत्वकथनं। सामान्यतः सर्व्ववर्णाश्रमधर्म्मकथने निषिद्धानि। आचारकथनं। पवित्रारोपणविधिकथनं। मासविशेषे द्रव्यविशेषेण देवीपूजनमाहात्म्यकथनं। विजयाव्रतविधिकीर्त्तनं। रूपसौभाग्यजनकनन्दाव्रतविधिकथनं। अन्यविधविजयाव्रतविधिः। नक्षत्रव्रतविधिकथनं।

१०४—११४ अध्याये.—तोयधेनुघृतधेनुतिलधेन्वादिदानविधिः। पदव्रतविधिकथनं। हेमगोव्रतविधिकथनं। मासविशेषे शय्यादिभेददानव्रतविधिः। वेदोत्पत्तिकथनं। चरणव्यूहकथनञ्च। षडङ्गनिरूपणं। आयुर्व्वेदोपोद्घातकथनं। शिष्यसम्बोधनप्रकारकथन। आयुर्व्वेदनिरूपणमुखेन द्रव्यगुणादिकथनं। खड्गासुरोत्पत्तिकथनप्रसङ्गेन माल्यपर्व्वते गजरूपस्य महादेवस्य भ्रमणविवरणकथनं तत्र विनायकोत्पत्तिकथनञ्च।

११५—१२८ अध्याये.—विष्णुकृतविनायकस्तोत्रकीर्त्तनं। विनायकस्य अभिषेककथनं। वरदानवृत्तान्तकीर्त्तनञ्च। विनायकं पुरस्कृत्य विघ्ननाशाय देवानामुदयाचलगमनवृत्तान्तकथनं। विघ्नवधकथनमुखेन तस्य रूपादिवर्णन। उत्पत्त्यादिकथनञ्च। मातृगणपूजामाहात्म्यकथनं। तत्र हरिश्चन्द्रचरणविवरणकीर्त्तनञ्च। जीर्णदेवमूर्त्तिप्रतीकारकथनं। यमानयमणुद्धिनिरूपणं। तत्र नरवाहनस्य वृत्तान्तकथनं। निरग्निविधिकथनं। कर्म्मविशेष वर्ज्जनीयभेदकथन। पुष्पविधिकथनं। गृहदेवपूजाविधिः। देवीस्तवराजकथनञ्च।

No. 2119. वैष्णवामृतम्। Substance, country-made paper, 10 × 4 inches. Folia, 182. Lines, 6 on a page. Extent, 4,628 ślokas. Character, Bengali. Date, ? Place of deposit, Ráṇághâṭa, Bábu Surendranátha Pála Chaudhúrí. Appearance, new. Prose and verse. Correct.

Vaishṇavámṛita. On the duties, feasts and fasts of Vaishṇavas. Anonymous.

Beginning. श्रीदामोदरपादपङ्कजयुगं नित्यं मुनीन्द्रैः स्तुतं
देवानामपिदुर्लभं किमपरं धर्म्मार्थमुक्तिप्रदं।
संसारार्णवतारणार्थतरणी यत्कर्णधारः स्वयं
सानन्दं स्मरतो ममास्तु हृदये स्वाभीष्टसिद्धौ सदा॥
सारात्सारं समाकृष्य वैष्णवानां हिताय वै।
भक्तानां तोषणार्थञ्च वैष्णवामृतमुच्यते॥ इत्यादि।

End. अयं सिद्धमनुः सर्व्वपापानां हारकः क्षणात्।

निर्म्मलं गगनं यद्वत् कालुष्यं न हि तस्य च ॥

इति हृद्गतमीयवचनात् सर्व्वमवदातं ।

Colophon. इति श्रीवैष्णवामृते श्रीविष्णोर्द्वादशयात्राविधिः ॥ समाप्तञ्चेदं वैष्णवामृतं ।

विषयः । वैष्णवधर्म्मप्रशंसाकीर्त्तनं । सर्व्वधर्म्मान् परित्यज्य वैष्णवधर्म्मग्रहणावश्यकताकथनं । वैष्णवगुरुलक्षणं । गुरुकरणावश्यकत्वनिरूपणं । शिष्यलक्षणादिकथनं । वैष्णवदीक्षायामधिकारिनिरूपणं । दीक्षाप्रकरणं । तत्र नक्षत्रराशिचक्रादिविचारकथनं । दीक्षाकालनिरूपणं । जपमालानिर्णयः । जपसंख्याकरणे विहिताविहितद्रव्यादिकथनं । वर्णमालाप्रकारः । मालानिर्णयादिकथनं । विष्णुपूजाविधिः । हरिनामग्रहणविधिः । मन्त्रोपदेशविधिः । दशसंस्कारविधिः । वैष्णवानामाह्निककृत्यनिरूपणं । तत्र शौचदन्तधावनस्नानतर्पणसन्ध्यादिविधिकथनं । षोड़शोपचारादिविधिः । श्रीकृष्णस्तोत्रकवचादिकथनं । पुरश्चरणविधिकथनं । विष्णुमन्त्रनिरूपणं । श्रीराममन्त्रकथनं । वालगोपालमन्त्रकथनं । वासुदेवमन्त्रकथनं । हयग्रीवमन्त्रकथनं । वामनमन्त्रकथनं । नृसिंहमन्त्रकथनं । वराहमन्त्रकथनं । हरिहरमन्त्रकथनं । राधाकृष्णमन्त्रकथनं । वलराममन्त्रकथनं । हनूमन्मन्त्रकथनं । गरुड़मन्त्रकथनं । अत्र पूजापुरश्चरणविधिकथनं ज्ञेयं । तिलकविधिकथनं । तुलसीमाहात्म्यकीर्त्तनं । करवीरादिपुष्पमाहात्म्यकथनं । विष्णोरपराधाः । प्रणामविधिः । प्रायश्चित्तविधिः । विष्णोर्द्वादशयात्राविधिकीर्त्तनञ्च ।

No. 2120. भगवद्भक्तिचन्द्रिका । Substance, country-made paper, 12 × 4 inches. Folia, 164. Lines, 5 on a page. Extent, 3,260 ślokas. Character, Bengali. Date, ? Place of deposit, Purohitpáḍá, Ráná-ghát, Paṇḍit Rámalála Bandyopádhyáya Bhaṭṭáchárya. Appearance, old. Prose and verse. Correct.

Bhagavad-bhakti-chandriká. On the doctrine of faith and the divinity of Krishṇa. including directions how faith and devotion should be evinced. Anonymous.

Beginning. कनकरुचिदुकूलः कुण्डलोल्लासिगण्डः

शमितभुवनभारः कोऽपि लीलावतारः ।

त्रिभुवनसुखकारी शैलधारी मुकुन्दः

परिकलितरथाङ्गो मङ्गलं नस्तनोतु ॥

इह खलु भक्तमुक्तमुमुक्षुप्रभृतीनां सर्व्वेषामशेषणीयो निरुपाधिमहाविभूतिरानन्दाकारः सर्व्वानेव प्राणिनोऽपूर्व्वरसास्वादनेनानन्दयन् नन्दनन्दन एव सकलवेदवेदान्तप्रतिपाद्य इति सर्व्ववेदान्तार्थनिष्कर्षरूपेण प्रमाणशिरोमणिना भागवतशास्त्रेण प्रतिपादितं । इत्यादि ॥

End. अत एव सर्व्वभूताश्रयस्य भगवतोयुधिष्ठिरसाहाय्यकरणमपि धर्म्मसंस्थापनार्थमेवेति दिक्।

Colophon. इति श्रीभगवद्भक्तिचन्द्रिकापरिपूर्णा।

विषयः। भगवान् नन्दनन्दन एव सकलशास्त्रप्रतिपाद्य इति निरूपणं। श्रीमद्भागवतस्य सकलप्रमाणश्रेष्ठत्वकथनं। वेदादिशास्त्रेभ्यः प्राधान्यकीर्त्तनञ्च। भक्तेः रसत्वव्यवस्थापनं। भगवानेव भक्तिरसालम्बन इति निरूपणं। भक्तिमाहात्म्यं। ज्ञानात्तस्याः श्रेष्ठत्वकथनं। भगवन्माहात्म्यकथनं। अवतारतारतम्यकथनं। भगवद्भजनाकरणे दोषकीर्त्तनं। तामसराजससात्त्विकपुराणेषु यथाक्रमं शिवब्रह्मविष्णूणां महात्म्याधिक्यनिरूपणं। भगवत्सेवायामेकान्तिन एव अधिकारीतिनिरूपणं। वासुदेवादिचतुर्व्यूहनिरूपणं। अहङ्ग्रहोपासनानिरूपनं। भगवतः साकारत्वसंस्थापनं। तच्छरीरस्य अमायिकत्वन्नित्यत्वमितिकथनं। भक्तिरेव तद्दर्शनोपाय इति निरूपणं। भगवतो भक्तानुवर्त्तित्वकथनं। भगवद्भक्तानां मोक्षेष्वपि निष्पृहत्वकथन। भक्त्युपायकीर्त्तनञ्च।

No. 2121. प्रायश्चित्तप्रकाशः। Substance, country-made paper, 12 × 3½ inches. Folia, 84. Lines, 6 on a page. Extent, 2,805 ślokas. Character, Bengali. Date, Sk. 1698. Place of deposit, Purohitpáḍá, Ráṇághát, Paṇḍit Rámalála Bandyopádhyáya Bhaṭṭáchárya. Appearance, old. Prose. Correct.

Práyaśchitta-prakáśa. Principles which regulate expiations, and the different forms thereof for the expiation of particular offences. By Pradyotana Bhaṭṭáchárya, son of Balabhadra.

Beginning. मम सहजविरोधी निर्ज्जितोऽनेन भित्वा
धनुरिति + + + + प्रीतिभाजा स्मरेण।
स्रगिव कुवलयानामादरेणोपनीता
जयति जनकजा या राघवे गाङ्गदृष्टिः॥
गुरुं गणेशं संस्तुत्य नत्वा स्मृतिकृतो मुनीन्।
प्रायश्चित्तप्रकाशोऽयं प्रद्योतनेन तन्यते॥

अथ प्रायश्चित्तलक्षणं। तत्र हारीतः। यद्दोपचितमशुभं नाशयति तत्प्रायश्चित्तं। यद् यथाविध्यनुष्ठानात् सञ्चितमशुभमेव नाशयति तत्प्रायश्चित्तं। इत्यादि॥

End. आत्मघातकपत्रेण प्रायश्चित्तं विधाय नारायणबलिर्देय इति मतभेदं सर्व्वत्रैवेह न परं प्रचरतीतिक्रम्।

Colophon. इति मस्मिथवलभद्रात्मजसकलशास्त्रारविन्दप्रद्योतनश्रीप्रद्योतनभट्टाचार्य्यविरचितः प्रायश्चित्तप्रकाशः सम्पूर्णः ।

विषयः । प्रायश्चित्तस्वरूपकथनं । दीर्घकालं प्रायश्चित्ताकरणे व्यवस्थाकथनं । लोभादिना अनुग्रहकरणे दोषकथनं । अतिपातकमहापातकोपपातकजातिभ्रंशकरणादिपापलक्षणं । ब्रह्महत्यादिकर्म्मविपाककथनं । प्रायश्चित्तपूर्व्वाहृत्यनिरूपणं । कृच्छ्रादिव्रतलक्षणं । अनुतापादिविधिकथनं । सर्व्वेषां पापानां प्रायश्चित्तकथनं । गोवधप्रायश्चित्तं । व्रतभङ्गप्रायश्चित्तं । निषिद्धमांसलशुनपलाण्डुप्रभृतिभोजनप्रायश्चित्तं । अगम्यागमनप्रायश्चित्तं । अपात्रसम्प्रदानककन्यादानप्रायश्चित्तं । परिवेदनप्रायश्चित्तं । विवाहात् पूर्व्वं कन्याया रजोदर्शने प्रायश्चित्तं । उच्छिष्टस्पर्शादौ प्रायश्चित्तं । कन्यापुत्रविक्रयप्रायश्चित्तं । निन्दितान्नभोजनादिप्रायश्चित्तं । अभिचारादिप्रायश्चित्तं । सामान्यतः स्त्रीवधप्रायश्चित्तं । व्रात्यप्रायश्चित्तं । वृक्षच्छेदनादिप्रायश्चित्तं । जलादौ विष्ठादित्यागप्रायश्चित्तं । नीलीरञ्जितवसनधारणे प्रायश्चित्तं । संसर्गप्रायश्चित्तं । आत्मघातप्रायश्चित्तकथनञ्च ।

No. 2122. वृन्दावनशतकम्, वा वृन्दावनरहस्यम् । Substance, country-made yellow paper, 9 × 4 inches. Folium, 1. Lines, 18. Extent, 28 ślokas. Character, Bengali. Date, ? Place of deposit, Ráṇágháṭa, Bábu Surendranátha Pála Chaudhúrí; another copy at Calcutta, Bábu S'uvaladása Mallik. Appearance, new. Verse. Correct.

Vṛindávana-rahasya *alias* **Vṛindávana-śataka.** A century of verses in praise of the sanctity of the town of Vṛindávana. By Prabodhánanda Sarasvatí. The codex is obviously incomplete, for it contains only 28 s'lokas when from its name it should contain a hundred.

Beginning. नमस्तस्मै कस्मैचिदपि पुरुषायाद्भुतमहा-
भहिम्ने विभ्राजत्कनकरुचिधाम्ने स्वक्रपया ।
अमङ्क्षैवैव श्वपचमखिलेभ्यः स्वयमहो
ददौ यः सद्भक्तिं विमलतरनानारसमयीम् ॥
यस्मिन् प्रविशेन्मनोऽपि महतां का तत्र वार्त्ता पुनः
शास्त्राणां ज्ञपितश्च यद्भगवता भक्त्यैव भक्तोत्सवः
तद्वृन्दावनमन्मदेन रसिकद्वन्द्वेन केनाप्यहो
नित्याक्रीड़तया गृहीतमिह के विद्युर्न गौराश्रयाः । इत्यादि ।

End. श्रीमद्वृन्दावनैश्वर्य्यं मृष्टन्नामैव केवलम् ।
इति श्रीवृन्दावनरहस्यम् ।

Colophon. इति श्रीप्रबोधानन्दसरस्वतीश्रीपादविरचितं श्रीवृन्दावनशतकं समाप्तम् ।

विषयः । वृन्दावनमाहात्म्यवर्णनं ।

No 2123. दायभागटिप्पनी । Substance, country-made paper, 13 × 4 inches. Folia, 122. Lines, 6 on a page. Extent, 3,099 slokas. Character, Bengali. Date, ? Place of deposit, Májidá, Post Ráṇághát, Paṇdit Madhusúdana Nyáyaratna; another copy at S'ántipura, Paṇdit Kálidása Vidyávagísa. Appearance, very decayed. Prose. Correct.

Dáyabhága-ṭippaní. A gloss on the Dáyabhága of **Jímúta-váhana.** By S'rínátha, son of S'ríkara Achárya.

Beginning. नवनीरधरनीलमुज्ज्वलमचञ्चलामचिरमेदुराम्बरं ।
नौमि वाङ्मनसयोरगोचरं चिन्मयं मुरहराह्वयं महः ॥
जीमूतवाहननिबन्धमथो विरुद्ध-
प्रायप्रसिद्धमुनिदृष्टवचःसमाधि ।
दुर्बोधमत्र विषये नितरां मया तत्
व्याख्यायतेऽमितमतिप्रतिबोधहेतोः ॥
श्रीकराचार्य्यपुत्रेण प्राचीरत्नेन धीमता ।
टिप्पनी दायभागस्य श्रीनाथेन विधीयते ॥

शास्त्रारम्भे विघ्नविघाताय सदाचारबोधितकर्त्तव्यताकं मङ्गलं विधित्सु परतत्त्वार्थं प्रयोजन सम्बन्धाभिधेयांश्चाभिधित्सुर्ग्रन्थकारः प्रतिजानीते, सन्ध्यादीत्यादि । शृणुध्वमित्यवधानार्थमत्याक्षेपः । इत्यादि ।

End. एवञ्चेति दुहितृतोऽप्यर्हितायाः पत्न्या भोगावशिष्टधने यावत्सन्तानाधिकारिणामधिकारस्तदा सुतरां दुहितुरधिकारोऽपीति भावः । शेषं सुगमं ।

Colophon. (इतः परं नास्ति ।)

विषयः । जीमूतवाहनकृतदायभागस्य पत्न्यधिकारान्तं व्याख्यानं ।

No. 2124. गुणप्रकाशविवृतिः । Substance, country-made paper, 11 × 2¼ inches. Folia, 91. Lines, 7 on a page. Extent, 3,344 slokas. Character, Bengali. Date, ? Place of deposit, Nisidágaḍa Grama, Post Vñaichi, Zilla Burdwan, Paṇdit Váṇeśvara Vidyáratna; other copies at S'ántipura, Rámayádava Chuḍámaṇi, and at Calcutta, Government of India. Appearance, old. Prose. Correct.

Guṇaprakáśa-vivṛiti. A commentary on the Kíraṇávali of Varddhamána Mis'ra. By Mathuránátha Tarkavágís'a, son of S'rírâma Tarkálankára. In Hall's "Contributions," (p. 67) the work is named Guṇaprakás'a-didhiti-Máthuri. There is Guṇaprakás'a-vivṛiti by Raghu-nátha S'iromaṇi.

Beginning. कुञ्चिताधरपुटेन पूरयन् वंशिकां प्रचलदङ्गुलिपङ्क्तिः ।
मोहयन्नखिलवामलोचनाः पातु कोऽपि नवनीरदच्छविः ॥
श्रीमताभयरानाथतर्कवागीशधीमता ।
गुणप्रकाशविवृतिः क्रियते विदुषां मुदे ॥
निर्व्विघ्नं परिसमाप्तिकामनया कृतं महादेवसन्ध्याजलाञ्जलिनमस्काररूपं मङ्गलं शिष्यशिक्षायै आदौ निबध्नाति एकचेति । इत्यादि ।

End. प्रकृतेचाग्निसंयोगस्य कार्य्यसत्त्वभावेन कुतोहेतुत्वं कल्पनीयं गौरवान्मानाभावाच्च न्यायवैशेषिकसिद्धान्तस्य निर्य्युक्तिकत्वेनाश्रद्धेय इति प्राहुः । (इत्यतोनास्ति)

विषयः । वर्द्धमानकृत किरणावलीप्रकाशस्य व्याख्यानं ।

No. 2125. वैष्णवतोषणी । Substance, country-made paper, 13 × 5 inches. Folia, 470. Lines, 6—12 on a page. Extent, 25,380 ślokas. Character, Bengali. Date, ? Place of deposit, Nisiḍágaḍa Gráma. Post Vñaichi, Zilla Burdwan, Paṇḍit Vánesvara Vidyáratna; other copies, at Calcutta, Dr. Rájendralála Mitra, and Calcutta, Government of India. Appearance, fresh. Prose. Generally correct.

Vaishṇava-toshaṇí. A commentary on the tenth book of the Bhágavata Puráṇa. By Sanátana Gos'vámi. The commentator's object is to establish the divinity of Kṛishṇa, and elaborate the philosophy of the Bhakti doctrine. In the colophon of the work a long account is given of the author, and of the associates of Cháitanya who the author holds is an incarnation of Kṛishṇa.

Beginning. श्रीमन्मदनगोपालं वृन्दारण्यपुरन्दरं ।
श्रीगोविन्दं प्रपद्येऽहं दीनानुग्रहकारकं ॥
वन्दे श्रीकृष्णचैतन्यं भगवन्तं कृपार्णवं ।
प्रेमभक्तिवितानार्थं गौड़ेष्ववततार यः ॥
श्रीमाधवपुरीं वन्दे यतीन्द्रं शिष्यसंयुतं ।
लोकेष्वङ्कुरितोयेन कृष्णभक्तिसुराङ्घ्रिपः ॥
श्रीभागवतनिष्यर्थटीकाद्दष्टिरतायि यैः ।
श्रीधरस्वामिपादांस्तान् वन्दे भक्त्येकरक्षकान् ॥
— — — — — — — — — — — ।
श्रीचैतन्यपदाम्भोजगन्धज्ञैरेव वैष्णवैः ।

सम्यग्प्रसयितुं शक्या सेयं वैष्णवतोषणी ॥

— — — — — — — — — ।

श्रीयुक्तश्रीराजेतिप्रायोगोऽत्र श्रीकृष्णलीलारम्भेऽतिशयेन प्रेम्णा विराजमानत्वात् । टजभावः समासान्तविधेरनित्यत्वात् । इत्यादि ।

End. अद्दामधुपुरीधन्या वैकुण्ठाच्च गरीयसीत्यादि ॥

Colophon. इति श्रीदशमटिप्पण्यां नवतितमः ।

श्रीमच्चैतन्यरूपस्य प्रीत्यै भगवतः प्रभोः ।
टिप्पणी दशमस्कन्धे पूर्णावैष्णवतोषणी ॥
ये श्रीभागवतं प्राप्य स्वप्ने प्राप्ताश्च जागरे ।
स्वप्नदृष्टा देवविप्राः प्रथमे वयसि स्थिताः ॥
ममज्जुः श्रीभगवतः प्रेमामृतमहाम्बुधौ ।
तेषामेवहि लेखोऽयं श्रीसनातननामिनां ॥
तदेतद्विनिवेद्यापि किञ्चिदन्यद्विवक्षया ।
अथैतदङ्घ्रिजीवेन जीवेनेदं निवेद्यते ॥
उद्यच्चारुपदक्रमाश्रितवती यस्यामृतस्राविनी
जिह्वा कल्पलता त्रयी मधुकरी भूयोनरीनृत्यते ।
रेजे राजसभाजितपदः कर्णाटभूमिपतिः
श्रीसर्व्वज्ञजगद्गुरुर्भुवि भरद्वाजान्वयग्रामणीः ॥ १ ॥
पुत्रस्तस्य नृपस्य कश्यपतुलामारोहते रोहिणी-
कान्तस्पर्द्धियशोधरः सुरपतेस्तुल्यप्रभावोऽभवत् ।
सर्व्वक्ष्मापतिपूजितोऽखिलयजुर्वेदैकविश्रामभू-
रुच्चैरानिरुद्धदेव इति यः ख्यातिं चितौ जग्मिवान् ॥ २ ॥
मद्विद्योभूयस्यप्रथितयशसस्तस्य तनयौ
प्रजज्ञाते रूपेश्वरहरिहराख्यौ गुणनिधी ।
तयोराद्यः शास्त्रे प्रवलतरभावं वहुविधे
जगामान्यः शास्त्रे निजनिजगुणप्रेरिततया ॥ ३ ॥
विभज्य स्वं राज्यं मधुरिपुपुरप्रस्थितिदिने
पिता ताभ्यां रूपेश्वरहरिहराभ्यां किल ददौ ।
निजज्येष्ठं रूपेश्वरमथकनिष्ठो हरिहरः
स्वराज्यादार्य्याणां कुलतिलकमभ्रंसयदसौ ॥ ४ ॥
श्रीरूपेश्वरदेव एवमरिभिर्निर्धूतराज्यः क्रमा-

दृष्टाभिस्तुरगैः समं दयितया पौरस्त्यदेशं ययौ ।
तत्रासौ शिखरेश्वरस्य विषये सख्युः सुखं संवसन्
धन्यः पुत्रमजीजनद्गुणनिधिं श्रीपद्मनाभाभिधं ॥ ५ ॥
यजुर्वेदः साङ्गोविततिरपि सर्व्वोपनिषदां
रसज्ञायां यस्य स्फुटमघटयत्ताण्डवकलां ।
जगन्नाथप्रेमोल्लसितहृदयः कर्णपदवीं
न यातः केषां वा स किल न्टपरूपेश्वरसुतः ॥ ६ ॥
विहाय गुणिशेखरः शिखरभूमिवासस्पृहां
स्फुरत्सुरतरङ्गिणीतटनिवासपर्य्युत्सुकः ।
ततोदनुजमर्द्दनक्षितिपपूज्यपादः क्रमा-
दुवास नवहट्टके स किल पद्मनाभः कृती ॥ ७ ॥
कूर्त्तिं श्रीपुरुषोत्तमस्य यजतस्तत्रैव सत्रोत्सवैः
कन्याष्टदशकेन सार्द्धमभवद्देतस्य पञ्चात्मजाः ।
तत्राद्यः पुरुषोत्तमः खलुजगन्नाथस्य नारायणो-
धीरः श्रीलमुरारिरुत्तमगुणः श्रीमान् मुकुन्दः कृती ॥ ८ ॥
जातस्तत्र मुकुन्दतोद्विजवरः श्रीमान् कुमाराभिधः
कञ्चिद्द्रोहमवाप्य सत्कुलजनिर्वङ्गालयं सङ्गतः ।
तत्पुत्रेषु महिष्ठवैष्णवगणप्रेष्ठास्त्रयोजज्ञिरे
ये स्वं गोत्रममुत्र चेह च पुनस्थकृस्तवैरर्च्चितं ॥ ९ ॥
आदिः श्रीलसनातनस्तदनुजः श्रीरूपनामा ततः
श्रीमद्वल्लभनामधेयवलितोनिर्व्विद्य ये राज्यतः ।
आसाद्यातिकृपां ततो भगवतः श्रीकृष्णचैतन्य+ -
माषाज्यं खलु भेजिरे मुरहरप्रेमाव्धभक्तिश्रियि ॥ १० ॥
यः सर्व्वावरजः पिता मम स तु श्रीराममानेदिवान्
गङ्गायां द्रुतमग्रजो पुनरमू वृन्दावनं सङ्गतौ ।
याभ्यां माथुरगुप्ततीर्थनिवहोव्यक्तीकृतोमक्तिभि-
रप्युच्चैर्व्रजराजनन्दनगताः सर्व्वत्र संवर्द्धिताः ॥ ११ ॥
यन्मित्रं रघुनाथदास इति विख्यातः क्षितौ राधिका-
कृष्णप्रेममहार्णवोर्म्मिनिवहे घूर्णन सदा दीव्यति ।
दृष्टान्तत्रकरप्रभाभरमतीत्यैवानयोर्भ्राजतो-
र्यत्नुत्यत्वपदे मतस्त्रिभुवनेसाद्यर्य्यमार्य्योत्तमैः ॥ १२ ॥

गोपालपालकव्याजाद्ययोः साचाद्बभूव ह ।
साचाच्छ्रीयुतगोपालः चीराहरणलीलया ॥
तयोरनुजहृष्टेषु काव्यं श्रीहंसदूतकं ।
श्रीमदुद्धवसन्देशश्छन्दोऽष्टादशकस्तथा ॥
स्तवाश्चोत्कलिकावल्ली गोविन्दविरुदावली ।
प्रेमेन्दुसागराद्याश्च बहवः सुप्रतिष्ठिताः ॥
विदग्धललिताद्याख्यमाधवं नाटकद्वयं ।
भाणिकादानकेल्याख्या रसामृतयुगं ततः ॥
मथुरामहिमा पद्यावली नाटकचन्द्रिका ।
संक्षिप्तश्रीभागवतामृतमेते च सङ्ग्रहाः ॥
अथाग्रजकृतेष्वग्र्यं श्रीलभागवतामृतं ॥
हरिभक्तिविलासस्य तट्टीका दिक्प्रदर्शिनी ॥
लीलास्तवटिप्पणी च श्रीमद्वैष्णवतोषिणी ॥

विषयः । श्रीमद्भागवतीयदशमस्कन्धस्य व्याख्यानं ।

No. 2126. महाभारतार्थसङ्ग्रहदीपिका, (आदिपर्व्व) । Substance, palm-leaf, 10 × 1½ inches. Folia, 121. Lines, 5 on a page. Extent, 2,571 ślokas. Character, Bengali. Date, Sk. 1600. Place of deposit, Nisidígada Gráma, Post Vñaichi, Zilla Burdwan. Pandit Vánésvara Vidyaratna; another copy at Calcutta, Government of India. Appearance, old. Prose. Correct.

Mahábháratártha-sangraha-dípiká. A commentary on the Mahábhárata. By Arjuna Mis ra, son of Is'ána. The codex contains only the Ádi Parva or the first book.

Beginning. यस्यैकवेणुपरमाणुरपि चणेन
तुदेषाति विपुलं शमभीप्सितेषु ।
सन्नो हरेर्हरतु पादसरोजयुग्मं
प्राग्भिस्थितप्रतिहतीर्भितस्थिराय ॥
वेदव्यासवैशम्पायनदेववोधविमलबोधसर्व्वज्ञनारायणभट्टगाण्डिल्यमाधवदिव्यपादेभ्यो नमः ।
श्रीदेववोधपादादिमतमालोक्य यत्नतः ।
क्रियतेऽर्ज्जुनमिश्रेण भारतार्थप्रदीपिका ॥

तत्र प्रायेण पुस्तकेषु भगवद्वासुदेवादिपञ्चानां नमस्कारोदृश्यते तत्र श्रीदेवबोधपादानां स्वरसेनास्ति। तत्र श्रीमद्विमलबोधादिमतानुसारेण पञ्चनमस्कारतात्पर्य्यं यथामति विव्रियते। ॐ नमो भगवते वासुदेवाय। ॐ नमः पितामहाय। ॐ नमः प्रजापतिभ्यः। ॐ नमः श्रीकृष्णद्वैपायनाय। ॐ नमः सर्व्वविघ्नविनायकेभ्यः। इत्यादि।

End. अपवर्गार्थे मोक्षार्थे। कुल्याः स्वल्पाः कृत्रिमाः सरितः। २२४। श्रीकृष्णः।

Colophon. इति भारताचार्य्यपाठकराजश्रीमदीशानतनयभारताचार्य्यमिश्रार्ज्जुनकृतौ महाभारतार्थसङ्ग्रहदीपिकायां टीकायामादिपर्व्व समाप्तं। शकाब्दाः १६।

मासे नभसि कृष्णाख्ये पक्षे गुरुदिने मुदा।
टीकेयं लिखिता यत्नात् श्रीदुर्गारामशर्म्मणा॥

विषयः। महाभारतीयादिपर्व्वव्याख्यानं।

No. 2127. योगचन्द्रिका। Substance, palm-leaf, 10 × 2¼ inches. Folia, 23. Lines, 5 on a page. Extent, 426 ślokas. Character, Bengali. Date, ? Place of deposit, Vegunegráma, Post Sátgechhe. Zilla Burdwan, Pandit Sadánanda Bhattáchárya. Appearance, old. Prose and verse. Correct.

Yoga-chandriká. A commentary on the Yoga aphorisms of Patanjali. By Ananta Sarmá. Very rare. Mr. Hall found the name cited in the *Hatha-sañketa-chandriká* but no MS. of the work. *Contributions*, p. 17.

Beginning. गुरुं प्रणम्य सूत्रार्थचन्द्रिका क्रियते मया।
अनन्तेनेश्वरप्रीत्यै सच्चिदानन्दरूपिणम्॥

अथ योगानुशासनम्।

अथशब्दोऽधिकारवाची, योगोनाम समाधानम्। अनुशिष्यते व्याख्यायते येन तत्। इत्यादि।

End. सर्व्वसिद्धिमूलभूता समाधिसिद्धिः सैव साधनीयेति। ३२॥

सूत्रार्थवृत्तिमालोक्य कृतेयं योगचन्द्रिका।
अनन्तेनेश्वरप्रीत्यै चार्पिता शिवपादयोः॥

Colophon. इति श्रीपतञ्जलिकृते योगशास्त्रे योगचन्द्रिकायां चतुर्थः पादः।

विषयः। पतञ्जलिकृतयोगसूत्रस्य व्याख्यानं।

No. 2128. आचारदर्पणः। Substance, country-made paper, 12 × 8 inches. Folia, 92. Lines, 5 on a page. Extent, 1,535 ślokas. Character, Nágara. Date, ? Place of deposit, Vegunegráma. Post Sátgechhe, Zilla Burdwan, Pandit Sadánanda Bhattácharya. Appearance, new. Prose and verse. Correct.

A'chára-darpaṇa. A digest of the rules regarding the daily duties of householders, including S'ráddhas and other obligatory rites. By S'rídatta Paṇḍita.

Beginning. दीक्षितोरण्यज्ञेषु विबुधानन्ददायिषु ।
हरिरब्धिसुतावक्त्रसोमपीती पुनातु वः ॥
अहोरात्राश्रितोधर्म्म इह वाजसनयिनां ।
निबध्यते निबन्धोऽयं धर्म्मशास्त्रनिबन्धुभिः ॥

तत्र मनुः । ब्राह्मे मुहूर्त्ते बुध्येत धर्म्मार्थौ चानुचिन्तयेत् । इत्यादि ।

End. अपि च काठके प्रवचने विज्ञायेत । अद्य श्वोवा विजनिष्यमानाः पतिभिः सह शयन्तामिति स्त्रीणामिन्द्रदत्तोवरः ॥

समूलवचनाभोगो मीमांसान्यायनिर्म्मल ।
श्रीदत्तेन सतामेष आचारे दर्पणः कृतः ॥
दुरुक्तमपि सूक्तं मे मन्वादिवचनाश्रितं ।
अपि चर्म्मोदकं तीर्थसलिलान्तर्गतं शुचि ॥

Colophon. इति श्रीमहोपाध्याय श्रीदत्तकृत आचारदर्पणः समाप्तः ।

विषयः । शय्योत्थानविधिकथनं । मूत्रपुरीषोत्सर्गविधिः । शौचविधिः । आचमनविधिः । आचमननिमित्तानि । द्विराचमननिमित्तानि । आचमनानुकल्पविधिः आचमनापवादः । दन्तधावनविधिः । प्रातः स्नानादिविधिः । सामान्यतः स्नानविधिः । अस्पृश्यस्पर्शनादौ स्नानविधिः । स्नानानुकल्पकथनं । कात्यायनीयस्नानप्रयोगः । वासः परिधानविधिः । सन्ध्योपासनविधिः प्रयोगकथनञ्च । जपविधिः । अक्षमालादिविधिः । कर्म्मकर्त्तुर्नियमादिकथनं । ब्रह्मयज्ञविधिकथनं । स्वाध्यायविधिः । तर्पणविधिः । तर्पणोत्तरकर्म्मकथनं । पूजाविधिः । देवपूजादौ पूजाधारकथनं । पुष्पादिविवेचनं । वैश्वदेवबलिकर्म्मकथनं । अत्र प्रयोगकथनं । नित्यश्राद्धविधिः । तत्प्रयोगकथनञ्च । अतिथिपूजाविधिः । भोजनविधिकथनं । शयनविधिकीर्त्तनञ्च ।

No. 2129. तत्त्वचिन्तामणौ द्वितीयपरिच्छेदे ईश्वरानुमानप्रकरणम् ।
Substance, palm-leaf, 10 × 2 inches. Folia, 56. Lines, 5 on a page. Extent, 1,135 slokas. Character, Bengali. Date. Sk. 1178. Place of deposit, Vegunegráma. Post Sátgechhe, Zilla Burdwan. Paṇḍit Sadánanda Bhaṭṭáchárya. Appearance, old. Prose. Correct.

Tattvachintámaṇi The great Nyáya work of Gaṅges'a. The codex contains only that portion of the work which treats of inference

as bearing on the existence of the Godhead, (*Is'varánumána-prakárana*) and of the errors of the Chárváka Baudha and Jaina theories on the subject and emancipation. The codex is 377 years old. The entire work has been noticed before. This section of the work is exceedingly rare; it has not been included in the Calcutta edition.

Beginning एवमनुमाने निरूपिते तस्माज्जगन्निर्म्माहपुरुषधौरेयसिद्धिः चित्यादौ कार्य्यत्वेन घटवत् सकर्तृकत्वानुमानात्। ननु चित्यादिकं प्रत्येकं न पक्षः तस्य स्वस्वशब्देनाभिधातुमशक्यत्वात्। नापि मिलितमेकरूपाभावात्। इत्यादि।

End. अतएवानुमानेनागमबाधाप्रयोजकत्वे, न च श्रुतिवाक्यशेषे नानाभावः उत्पन्नतत्त्वज्ञानस्यापवर्गविलम्बोपपत्त्यर्थमुक्तरीत्या भोगस्यैवाक्षेपादिति तदस्यापवर्गस्य परमपुरुषार्थस्य श्रुतिमिदं कारणमनुमानं विविक्तमिति॥

Colophon. इति महामहोपाध्याय श्रीगङ्गेश्वरविरचिते तत्त्वचिन्तामणौ द्वितीयपरिच्छेदः। शाके १४७८।

विषयः। ईश्वरानुमानप्रकारकथनं। अत्र चार्व्वाकबौद्धजैनादिमतखण्डनं। शक्तिर्न कारणत्वाद्धिकेति व्यवस्थापनं। मोक्षलक्षणकथनं। ज्ञानान्मोक्ष इति निरूपणञ्च।

No. 2130. षट्चक्रदीपिका। Substance, country-made yellow paper, 10 × 3 inches. Folia, 22. Lines, 7 on a page. Extent, 731 slokas. Character, Bengali. Date, ? Place of deposit, Gudapgrama, Post, Bhástádá, Zilla Burdwan, Pandit Aghoranátha Bhattácharya. Appearance, new. Prose. Correct.

Shatchakra-dípiká. A commentary on Púrnánanda's Shatchakra, a work on mystic diagrams connected with Kaula worship. By Rámanátha Siddhánta.

Beginning प्रनम्य गुरुपादाब्जद्वन्द्वमद्वन्द्वसाधनं।
षटचक्रदीपिकाटीका रच्यते नामदेशतः॥
अथेति। अथशब्दो मङ्गलपूर्व्वकानन्तर्य्यार्थः। उक्तञ्च। इत्यादि

End. स तथा यतं संयतानन्तर्मना यस्येति॥ ५५॥
श्रीरामनाथसिद्धान्तरचिता तत्त्वदर्शिनी।
सतां मनोपमाधत्तां टीका षट्चक्रदीपिका॥

Colophon. इति श्रीरामनाथसिद्धान्तविरचिता षट्चक्रदीपिका समाप्ता।

विषयः। पूर्णानन्दकृतषट्चक्रस्य व्याख्यानं।

No. 2131. भावचन्द्रिका। Substance, partly palm-leaves and partly country-made paper, 10 × 3½ inches. Folia, 35. Lines, 6 on a page. Extent, 813 ślokas. Character, Bengali. Date, ? Place of deposit, Vegunegráma, Post Sátgechhe, Zilla Burdwan, Pandit Sadánanda Bhaṭṭáchárya. Appearance, decayed. Prose and verse. Correct.

Bháva-chandriká. A dissertation on the nature of devotion (*bhava*) as an element of the Bhakti doctrine, and the various ways in which it should be evinced towards Krishṇa in the various relations of father, mother, son, lover, &c. By Chaṇḍídása.

Beginning. वन्दे वृन्दावनासीनमिन्दिरानन्दमन्दिरं।
उपेन्द्रं सान्द्रकारुण्यं सानन्दं नन्दनन्दनं॥

इह खलु परमतत्त्वसाक्षात्कारस्यैव परमपुरुषार्थरूपतया तद्विगमाय इत्यादि।

End. अतएव ऐश्वर्य्यमाधुर्य्यमय्योर्माधुर्य्यमय्या एव श्रीकृष्णाविर्भावपूर्णतया समुत्कर्ष इति सर्व्वमवदातं। इति।

Colophon. इति श्रीभगवच्चरणारविन्दमधुव्रतश्रीचण्डीदासकृता भावचन्द्रिका सम्पूर्णा।

विषयः। महाभावं विना श्रीकृष्णमाधुर्य्यातिशय्यानुभवो न जायते इति निरूपणं। महाभावस्वरूपकथनं। भावलक्षणं। रागानुरागादिस्वरूपकथनं। समञ्जसा रतिस्वरूपकथनं। कामानुगास्वरूपकथनं नित्यसिद्धागन्तुकभेदेन द्विविधभावनिरूपणं। रागानुगाय शुद्धताकथनं। साधनचतुष्टयनिरूपणं। अवकरभेदनिरूपणं। सामान्यतस्तत्त्वनिरूपणं। भगवल्लीलाया नित्यत्वादिकथनं। महाभावस्य सर्व्वत उत्कर्षप्रदर्शनं। ज्ञानिभक्तादिषु भावव्यवस्थाकथनं। भगवत एव पूर्णतत्त्वाकारत्वमिति कथनं। भगवत्कामविशेषस्य प्रेमविशेषत्वकथनं। माधुर्य्यलीलाया उत्कृष्टत्वनिरूपणञ्च।

No. 2132. शुद्धिदर्पणम्। Substance, palm-leaf, 8 × 2 inches. Folia, 89. Lines, 5 on a page. Extent, ? ślokas. Character, Bengali. Date, ? Place of deposit, Vegunegráma, Post Sátgechhe, Zilla Burdwan, Pandit Sadánanda Bhaṭṭáchárya. Appearance, decayed. Prose and verse. Correct.

S'uddhi-darpaṇa. A summary of the laws relating to purification and mourning. By Ananta Yájnika.

Beginning. नत्वा गणेशपादाब्जं गुरूनपि महीयसः।
याज्ञिकानन्तदेवेन क्रियते शुद्धिदर्पणं॥

Colophon. इति श्रीभगवत्प्रकाशात्मविरचिता न्यायमुक्तावली सम्पूर्णा।

विषयः। कार्य्येण कारणसंप्रत्यय इति न्यायस्य स्वरूपादिकीर्त्तनं। एवं परत्र ज्ञेयं। कीटभृङ्गन्यायः। व्रीहिबीजन्यायः। हस्तप्रकम्पनन्यायः। शाखाचन्द्रन्यायः। रेखागवयन्यायः। प्रासादवासिन्यायः। ज्योतिन्यायः। अध्यारोपापवादन्यायः। सोपानारोहणन्यायः। सम्भवत्येकवाक्यत्वे इति न्यायः। कारणगुणप्रक्रमन्यायः। वरगोष्ठीन्यायः। देवदत्तापुत्रन्यायः। स्वामिभृत्यन्यायः। धर्म्मिकल्पनान्यायः। स्थूणानिखननन्यायः। कण्ठचामीकरन्यायः। परिषन्न्यायः। अर्के चेन्मधुन्यायः। सिंहावलोकनन्यायः। मण्डूकप्लुतिन्यायः। स्थूलारुन्धतीन्यायः। सम्भवत्येकवाक्यत्वे न्यायः। देवताधिकरणन्यायः। सावकाशनिरवकाशन्यायः। गोवलीवर्द्दन्यायः। अहिकुण्डलन्यायः। यत्कृतकं तदनित्यं न्यायः। न हि निन्दा निन्दितुं प्रवर्त्तते न्यायः। शतपत्रशतभेदन्यायः। अनधीते महाभाष्ये-न्यायः। तद्भिन्नभिन्नस्य तद्भिन्नत्वन्यायः। चतुर्व्वेदविन्न्यायः। अन्धगजन्यायः। नीरक्षीरन्यायः। सन्दंशन्यायः। स्थूललशुनकन्यायः। एकाकिनीप्रतिज्ञान्यायः। काकदधिघातकन्यायः। तप्तमाषकोद्धारणन्यायः। घटारोहणन्यायः। विषभक्षणन्यायः। सच्छिद्रघटाम्बुन्यायः। घुणाक्षरन्यायः। ब्राह्मणश्रमणन्यायः। तिर्य्यगधिकरणन्यायः। आभाणकन्यायः। गङ्गास्रोतोन्यायः। सिंहावलोकनन्यायः। पूर्व्वमपवादा निविशन्तेन्यायः। कौण्डिन्यन्यायः। पिष्टपेषणन्यायः। सूचीकटाहन्यायः। गन्धर्व्वनगरन्यायः। स्थालीपुलाकन्यायः। ब्राह्मणपरिव्राजकन्यायः। आयुर्घृतमितिन्यायः। खलेकपोतन्यायः दग्धपटन्यायः। कूर्म्माङ्गन्यायः। एकत्र निर्णीतः शास्त्रार्थ इति न्यायः। तुष्यतु दुर्ज्जन इति न्यायः। गजभुक्तकपित्थन्यायः। काकाक्षिन्यायः। कैमुतिकन्यायः। अर्द्धजरतीन्यायः। अर्द्धं त्यजति पण्डित इति न्यायः। उष्ट्रलगुड़न्यायः। देहलीदीपन्यायः। रूढिर्योगमपहरतीतिन्यायः। शाब्दी ह्याकाङ्क्षान्यायः। छद्विहितोभाव इतिन्यायः। हस्तामलकन्यायः। कारणनाशे कार्य्यनाशन्यायः। स्वप्नयाशन्यायः। चक्रभ्रमणन्यायः। दग्धरसनान्यायः। अन्धदर्पणन्यायः। मूर्खसेवनन्यायः। चित्रपटन्यायः। अरण्यरोदनन्यायः। काकतालीयन्यायः। संयोगपृथक्त्वन्यायः। अश्वतरीगर्भन्यायः। व्याघ्रीक्षीरन्यायः। जलौकान्यायः। कूपन्यायः। चालनीन्यायः। दूरादस्पर्शनं वरमितिन्यायः। विवाहप्रवृत्तभृत्यन्यायः। तमःप्रकाशन्यायः। अहिनकुलन्यायः। स्फटिकलौहित्यन्यायः। प्रतिविम्बितचन्द्रन्यायः। मृषासिक्तताम्रन्यायः। शैलूषीन्यायः। बध्यघातकन्यायः। सन्दिग्धस्य सन्दिग्धमितिन्यायः। गलेपादुकान्यायः। वह्निधूमन्यायः। आकाशापरिच्छिन्नत्वन्यायः। येन चोपक्रम्यते येन चोपसंह्रियते स वाक्यार्थ इति न्यायस्वरूपादिकथनञ्च।

No. 2135. पातञ्जलसूत्रभाष्यं। Substance, country-made yellow paper, 13 × 2½ inches. Folia, 42. Lines, 6 on a page. Extent, 959 ślokas. Character, Bengali. Date, ? Place of deposit, Guádpa, Post Bhástádá, Zilla Burdwan, Pandit Aghoranátha Bhaṭṭácharya. Appearance, new. Prose. Incorrect.

Patanjala-sútra-bháshya. A commentary on the Yoga aphorisms of Patanjali. By Bhavadeva, pupil of Bhavadeva Ṭhakkura, son of Srikrishṇadeva Mahámahopádhyáya, of Mithilá.

Beginning. पतञ्जलिं नमस्कृत्य योगिनोऽन्यांश्च योगिनः।
भवदेवेन तत्सूत्रव्याख्यानं क्रियतेऽधुना॥
मङ्गलं कुर्व्वन्नेव शिष्यावधानाय प्रतिजानीते अथेति। अत्र श्रीकेशवार्थतया अकाराथशब्देश्च मङ्गलं करोत्यनेन मङ्गलाचरणं। इत्यादि।

End. आनन्दं ब्रह्मणोरूपं तच्च मोक्षे प्रतिष्ठितं।
इत्यादिश्रुतिरपीत्यर्थः॥
एवं चतुर्थचरणे कैवल्यं प्रतिपादितं।
पतञ्जलिमुनीन्द्रेण येन तं भावयाम्यहं॥
रमापांशुजलव्याख्यां कल्पयित्वा व्रजाम्यहं।
श्रिया हृदिकृते श्रीमत्पादाम्भोजे रमापतेः॥
शाकेऽद्रिषट्वाण + + + + + मासेऽयहायणवलक्षपक्षे।
+ + तिथौ श्रीभवदेवशर्म्मा पतञ्जलेर्भाष्यमिदं व्यधासीत्॥
क्षमध्वमेतन्मम धार्ष्ट्यमीषा यद्भाष्यतोभाष्यमिदं व्यधायि।
भागीरथीतो + + शटन्नीत्वा ये स्वकीयत्वमुशन्ति सन्तः॥
— — — — — —।

Colophon. इति मैथिलमिश्रश्रीकृष्णदेवतनयमहामहोपाध्याय ठक्कुरश्रीभवदेवप्रियशिष्यमिश्रश्रीभवदेवविनिर्म्मिते पतञ्जलसूत्रभाष्ये कैवल्यचरणव्याख्या सम्पूर्णा।

विषयः। पतञ्जलिप्रणीतयोगसूत्रस्य व्याख्यानं।

No. 2136. व्यवहारदर्पणम्। Substance, country-made paper, 13 × 4 inches. Folia, 78. Lines, 6 on a page. Extent, 2,093 ślokas. Character, Bengali. Date, ? Place of deposit, Vegunegrám, Post Sátgechhe, Zilla Burdwan, Paṇdit Sadánanda Bhaṭṭácharya. Appearance, old and decayed. Prose and verse. Correct.

Vyavahára-darpaṇa. A summary of the laws relating to Judicature. By Ananta Yájnika.

Beginning. गणेशं भारतीं + + वाञ्छितार्थसमाप्तये।
तनोति याज्ञिकोऽनन्तो व्यवहारेषु दर्पणम्॥

अथ व्यवहारशब्दव्युत्पत्तौ कात्यायनः ।

वि नानार्थेऽवसन्देहे हरणं हार उच्यते ।

नानासन्देहहरणाद्व्यवहार इति स्मृतः ॥ इत्यादि ।

End. न तच्छक्यमपाकर्त्तुं क्रमात् त्रिपुरुषागतं ।

पित्रा सह त्रिभिरित्यर्थं इति ।

Colophon. इति श्रीमदनन्तयाज्ञिककृतौ व्यवहारदर्पणं समाप्तं ।

विषयः । व्यवहारशब्दव्युत्पत्तिकथनं । व्यवहारकालनिरूपणं । भाषापादकथनं । भाषालेख्यानुसन्धानविधिः । प्रतिज्ञापत्रे लेख्यनियमकथनं । उत्तरपादकथनं । विचारकरणविधिः । उत्तरस्वरूपकथनं । एतद्भेदकथनं । प्रत्यवस्कन्दनविधिः । प्राङ्न्यायोत्तरविधिः । हीनवादिलक्षणं । उत्तराभासलक्षणं । सभ्यलक्षणतत्कालादिनिरूपणं । साक्षिलक्षणतद्भेदादिकथनं । असाक्षिणः । साक्ष्यग्रहणप्रकारकथनं । लेख्यविधिः । तत्कालादिनिरूपणं । जयपत्रलेखनप्रकारकथनं । भुक्तिनिरूपणं ।

No. 2137. मालतीमाधवटीका । Substance, country-made yellow paper, 9 × 4 inches. Folia, 192. Lines, 8 on a page. Extent, 1824 ślokas. Character, Nágara. Date, ? Place of deposit, Nisiḍágaḍa, Post Vñaichi, Zilla Burdwan, Paṇḍit Vaneśvara, Vidyáratna; another copy at Magráṇí, Post Madhuvaní, Zilla Darbhángá, Paṇḍit Chhoṭilál Jhá. Appearance, new. Prose. Generally correct.

Málatimádhava-ṭíká A commentary on the Málatimádhava of Bhavabhútí. By Jagaddhara Mahámahopádhyáya. He is described as a Dharmádhikárí or chief judge, but of what place and under what king is not mentioned.

Beginning. चञ्चच्चन्द्रिकचन्द्रचारुकुसुमोमाद्यज्जटापल्लवो-

द्यद्दारुणदन्दशूकमणिमान तत्पद्मशाखालयः ।

स्थाणर्मे फलदोभवत्वतितरां गौरीमुखेन्दुद्रवत्

पीयूषद्रवदोहनादिव दधद्देवद्रुमत्वं सदा ॥

नत्वा गुरून् गुणगुरूनवलोक्य टीकां

विश्वादिकोषभरतप्रतिशब्दविद्यां ।

छन्दांस्यलङ्करणमर्थगतिं विचिन्त्य

श्रीमान् जगद्धरकृती वितनोति टीकां ॥

श्रीकण्ठकण्ठविलसत्पटुनाटकेऽस्मिन्
टीका मयाल्पमतिनाऽपि वितन्यते यत् ।
हासाय दुर्ज्जनगणस्य भवेन्नचैत-
दुच्चैःपदं तदभिकाङ्क्षति सर्व्वदैव ॥

इह तावदष्टपदां नान्दीं विदधान एव कविरप्रत्यूहमीहितसिद्धिमनुरुध्य प्रचण्डचण्डीप-तेरकाण्डताण्डवाडम्बरेण लम्बोदरोत्कीर्त्तनरूपं मङ्गलं प्रकरणादौ विबध्नाति सानन्दमिति । इत्यादि ।

End. अत्र एताहे इदानीं ——— ——— ।
आशाकान्तप्रतीपजयिनं मीमांसयालङ्कृतं ।
शुद्धं धीरगदाधरं कविवरं पुत्रं पवित्राशयं ॥
विद्याधरं वरमजीजनदेष धीरः हीरं जनेषु जयिनं गुरुणोक्तशास्त्रे ।
प्रासूत सोऽयममलं गुणिनं सुपुत्रं तं रत्नपूर्व्वधरमेष जगद्धरञ्च ॥
येनापाठि कठोरगोतममतं वैशेषिकं खण्डितं
येनाश्रावि सकोषकाव्यनिवहं तत्पाणिनीयं मतं ।
छन्दोलङ्करणञ्च भव्यभरतं येनाश्रगायि श्रुति-
स्तस्यामुष्य जगद्धरस्य कवितुर्टीकेयमुज्जृम्भतां ॥
अमूत यं रत्नधरोऽतिभव्योऽतिभव्यरूपा दमयन्तिकापि ।
जगद्धरं तत्कृतटिप्पणेऽङ्कः समाप्तिमागाद्दशमोऽनवद्यः ॥

Colophon. इति श्रीमहामहोपाध्यायधर्म्माधिकरणिकश्रीजगद्धरकृतटीकायां दशमोऽङ्कः समाप्तः ।

विषयः । भवभूतिकृतमालतीमाधवप्रकरणस्य व्याख्यानं ।

No. 2138. गीताप्रदीपः । Substance, palm-leaf, 11 × 2 inches. Folia, 178. Lines, 6 on a page. Extent, 4.205 slokas. Character, Bengali. Date, ? Place of deposit, Nisidágad, Post Yñaichi, Zilla Burdwan, Pandit Vánesvara Vidyáratna; another copy at Calcutta, Government of India. Appearance, old. Prose. Correct.

Gítá-pradípa. A commentary on the Bhagavadgítá section of the Mahábhárata. By Jagaddhara, probably the same author to whom is due the work noticed under the last preceding No. There is an account of the author at the end of the codex, but that part is so smudgy and full of lacunæ, that it cannot be satisfactorily read.

Beginning. नीलेन्दीवरसुन्दरं द्वरलसत्पीताम्बराडम्बरं
पद्मासद्महृदम्बुजं प्रविकसत्मत्कौस्तुभाभासितं ।
वन्द्यैरप्यभिवन्दितं त्रिजगतामानन्दसन्दोहदं
श्रीगोविन्दपदारविन्दमधिकानन्दाय वन्दामहे ॥
गीता सुगीता मुनिपुङ्गवेन व्यासेन या सर्व्वविदां वरेण ।
समाल्पकस्यात्र परिश्रमेण गूढ़प्रका+चरविन्द+पि ॥
+ + + शङ्करादिरचितान्यालोक्य भाष्याणि च
यन्निर्णीय निजाशयेन महता कृत्वावधानं मुहुः ।
श्रीमानेष जडरोवितनुते गीताप्रदीपं ततो-
धीरैरत्र महागुणैरपि मनोदेयं गुणग्राहिभिः ॥

इह भगवतः कृष्णस्य संसारसागरमग्नलोकानामुद्दिधीर्षया योगमुपदिशतः अर्ज्जूनेन समं सम्वादोगीताशास्त्रेण कृतः समरशिरसि समारब्धः। तमुत्थापनीयं भगवान् कृष्णद्वैपायनोधृतराष्ट्रसञ्जययोः प्रश्नोत्तरे अवतारयति धर्म्मक्षेत्रे इत्यादि ।

End. एवञ्च सकलाभिलाषसिद्धिः पाण्डवानां भवेदिति ।
(इतः परं ग्रन्थकर्तृपरिचयस्य लुप्तप्रायतया यत्किञ्चिल्लिख्यते।)
— — — — — — — — — ।
लब्धे दुर्लभशासने सुरगणग्राम+ कैवर्त्तिका
विद्यावंशविभूषणो + + + + + +
येनाऽयं समभूद्द्विजातितिलकश्चण्डेश्वरः पण्डितो-
मीमांसैकरहस्यवश्यहृदयोदातावदानाश्रयः ॥
— — — — — — — — ।
प्रासूताऽयमपि प्रतीपजयिनं विद्याधरं सद्गुणं ।
प्रासोष्टान्यमपि प्रसिद्धयशसं तं रत्नपूर्व्वेश्वरं ॥
— — — — — — — — ।
श्रीजगद्धरनामानमनर्घ्यगुणशालिनं ।
येनाऽपाठि कठोरगोतममतं वैशेषिकं खण्डितं
येनाश्रावि सकोषकाव्यनिवहं तत्पाणिनीयं मतं ।
छन्दोऽलङ्करणञ्च भव्यभरतं येनाध्यगायि स्मृति-
र्व्याख्यादीदमशेषमेककविना ग्रन्था अनेके कृताः ।
— — — — — — — — — ।

विषयः । भगवद्गीतायाः व्याख्यानं ।

No. 2139. संक्रान्तिविवेकः। Substance, country-made paper, 14 × 3 inches. Folia, 6. Lines, 6 on a page. Extent, 110 ślokas. Character, Bengali. Date, ? Place of deposit, Post Dighápatiyá, Atákulágrám, Zillá Rájasáhi, Paṇdit, Rádhánátha Vidyáváchaspati. Appearance, old. Prose and verse. Correct.

Sañkránti-viveka. A dissertation on the passage of the sun from one sign of the zodiac to another, and the religious duties meet on such occasions. By S'úlapáṇi, who was the chief judge in the Court of Lakshmaṇasena of Gour.

Beginning. नत्वा इन्दारकैर्वन्द्यं सानन्दं नन्दनन्दनं।
संक्रमणविवेकोऽयं क्रियते शूलपाणिना॥

अथ संक्रान्तिः। आदौ संज्ञा ततोराशिस्थनिर्णयस्ततोव्यवस्था समासतोवक्तव्या। तत्र सामान्यसंज्ञा। मन्दा मन्दाकिनी ध्वाङ्क्षी घोरा चैव महोदरी। इत्यादि

End. तस्य प्रतीकारमात्र। धुस्तूरबीजसलिलैः स्नायादित्यादिसंक्रान्तिदोषशान्तये इत्यादिना।

Colophon. इति साड्डियालमहामहोपाध्यायश्रीशूलपाणिविरचितः संक्रान्तिविवेकः समाप्तः।

विषयः। सामान्यतः संक्रान्तिसंज्ञाकथनं। विशेषसंज्ञाकथनं। दिनसंक्रान्तिव्यवस्था। रात्रिसंक्रान्तिव्यवस्था। परार्द्धरात्रसंक्रान्तिव्यवस्था। संक्रान्तिश्राद्धव्यवस्था। युगादियुगान्तनिरूपणं। संक्रान्तिदोषशान्त्युपायकथनञ्च।

No. 2140. तत्त्वचन्द्रिका। Substance, palm-leaf, 11 × 2 inches. Folia, 217. Lines, 5 on a page. Extent, 4,590 ślokas. Character, Bengali. Date, ? Place of deposit, Post Dighápatiyá, Atákulágrám, Zillá Rája-śáhí, Paṇdit Rádhánátha Vidyáváchaspati; another copy at Post Málipotá, Zillá Nadiyá, Paṇdit Káśinátha Bhaṭṭácharya. Appearance, old. Prose. Correct.

Tattva-chandriká. A commentary on the Kirátárjuníya of Bháravi. By Gadasiñha, a grammarian of some repute.

Beginning. प्रणम्य गां प्रतिपदं + + रस पयस्वतीं।
क्रियते भारवेर्यत्नाद्विद्वतिस्तत्त्वचन्द्रिका॥

सन्ति प्रकाशवर्षादिटीका अपि सुविस्तराः ।
तथापि लघुबोधार्थं गद्सिंहोऽकरोदिमां ॥
पितृकल्पाद्यथाऽधीतं भ्रातुः श्रीसिंहसिंहतः ।
तद्वेतोर्भोह्रजादीनां स्मरणार्थं विलिख्यते ॥

कविकुञ्जरोभारविः प्राणद्देवोऽपरनामधेयः किरातार्ज्जुणीयं काव्यं प्रणिनीषुस्तल्लक्षणं वस्तु-निर्द्देशं प्रणयन्नाह । श्रिय इति ।

End. एकोऽद्वितीयश्चासौ स्तनुश्चेति तस्य शिशु द्वौ । वाल्ये अक्रमागतस्याविनयं यथा पिता सहते तद्वदित्यर्थः ।

Colophon. इति श्रीगद्सिंहविरचितायां तत्त्वचन्द्रिकायां सप्तदशः सर्गः ।

विषयः । भारविकृतकिरातार्ज्जुणीयाभिधानमहाकाव्यस्य सप्तदशसर्गान्तव्याख्यानम्

No. 2141. महावेदान्तषट्कम् । Substance, country-made paper, 14 × 4 inches. Folium, 1. Lines, 12 on a page. Extent, 12 ślokas. Character, Bengali. Date, ? Place of deposit, Vonáslegrám, Post Májanagara, Zillá Rájaśáhí, Bábu S'ámácharaṇa S'ányála. Appearance, fresh. Verse. Correct.

Mahávedánta-shaṭka. Six stanzas on the essence of the Vedánta doctrine, showing the identity of the divine and the human soul. By S'añkara Achárya.

Beginning. मनोबुद्ध्यहङ्कारचित्तादि नाऽहं न श्रोत्रं न जिह्वा न च घ्राणनेत्रं ।
न वा व्योम न भूमिर्न तेजोन वायुश्चिदानन्दरूपः शिवोऽहं शिवोऽहं ॥

End. अहं निर्व्विकल्पोनिराकाररूपोविभूतिश्च सर्व्वत्र सर्व्वेन्द्रियाणां ।
न वा बन्धनं नैव मोक्षोन भातिश्चिदानन्दरूपः शिवोऽहं शिवोऽहं ॥

Colophon. इति श्रीमत्परमहंसपरिव्राजकाचार्य्यश्रीशङ्कराचार्य्यविरचितं महावेदान्त-षट्कं समाप्तं ।

विषयः । जीवन्मुक्तावस्थावर्णनं ।

No. 2142 तत्त्वसारः । Substance, country-made paper, 14 × 4 inches. Folia, 4. Lines, 8 on a page. Extent, 84 ślokas. Character, Bengali. Date, ? Place of deposit Vonáslegram, Post Májanagara, Zillá Rájaśáhí, Bábu Syámácharaṇa Sányála. Appearance, fresh. Verse. Correct.

Tattvasára. The means of obtaining the knowledge of Brahma, disclosed in a dialogue between Mahádeva and Skanda. This is probably an extract from the Skanda Puráṇa.

Beginning. मेरुपृष्ठे सुखासीनं देवदेवं जगद्गुरुं ।
प्रणम्य शिरसा भक्त्या स्कन्दोवचनमब्रवीत् ॥
भ्रामितोऽस्मि त्वया नाथ दुस्तरे शास्त्रसागरे ।
धर्म्माधर्म्ममहाग्राहमतभेदादिसङ्कुले ॥ इत्यादि ।

End. अद्य मे सफलं जन्म अद्य मे सफलं तपः ।
अद्य मे सफला भक्तिरद्योत्तीर्णाभवार्णवात् ॥

Colophon. इति तत्त्वसारः समाप्तः ।

विषयः । महादेवस्कन्दसंवादेन ब्रह्मज्ञानलाभोपायकीर्त्तन ।

No. 2143. गर्भगीता । Substance, country-made paper, 10 × 4 inches. Folia, 2. Lines, 8 on a page. Extent, 32 ślokas. Character, Bengali. Date, ? Place of deposit, A'tákulígrám, Post Dighápatiyá, Bábu A'nandachandra Maitra. Appearance, fresh. Verse. Generally correct.

Garbha-gítá. On the Vedánta doctrine bearing on transmigration. The work professes to contain the substance of a discourse between Krishṇa and Arjuna, and to be a sequel to the Bhagavadgítá, but it is exceedingly scarce. It calls itself a Upanishad.

Beginning. ब्रह्मानन्दं परमसुखदं केवलं ज्ञानमूर्त्तिं
द्वन्द्वातीतं गगनसदृशं तत्त्वमस्यादिलक्ष्यं ।
एकं नित्यं विमलमचलं सर्व्वदा साक्षिभूतं
भावातीतं त्रिगुणरहितं सद्गुरुं तं नमामि ॥
अर्ज्जुन उवाच ।
गर्भवासं जरामृत्युं किमर्थं भ्रमतेनरः । इत्यादि ।

End. तस्मात्त्वं पृथक्कृत्य आत्मन्येव वसेत् सदा ।
मिथ्याभूतं जगत्त्यक्त्वा नान्यथा कल्पकोटिषु ॥

Colophon. इति श्रीकृष्णार्ज्जुनसम्वादे श्रीभगवद्गर्भगीतासूपनिषत्सु प्रथमोऽध्यायः । समाप्ता गर्भगीता ।

विषयः । श्रीकृष्णार्ज्जुनसंवादेन आत्मतत्त्वयोगकीर्त्तन ।

No. 2144. सुबोधिनी। Substance, country-made yellow paper, 14 × 4 inches. Folia, 12 Lines, 7 on a page. Extent, 315 slokas. Character, Bengali. Date, ? Place of deposit, Vonslegrám, Post Májanagara, Bábu Syámácharaṇa Sányála. Appearance, new. Prose. Correct.

Subodhiní. A commentary on the Bhagavadgítá. By Gauḍapáda A'chárya.

Beginning यस्माज्जातं जगत्सर्वं यस्मिन्नेव प्रलीयते ।
येनेदं धार्य्यते चैतत् तस्मै ज्ञानात्मने नमः ॥
यैरिमे गुरुभिः पूर्व्वं पदवाक्यप्रमाणतः ।
व्याख्याताः सर्व्ववेदान्तास्तान् नित्यं प्रणमाम्यहं ॥

इह खल्वर्ज्जुनो धर्म्मक्षेत्रे भगवदुपदिष्टं आत्मतत्त्वोपदेशं विषयभोगप्राबल्येन विस्मृत्य पुनस्तदेव आत्मतत्त्वं ज्ञातुं भगवन्तं इच्छति अर्ज्जुन उवाच । इति ।

End. वर्त्तमानवस्तुनि लब्धे इष्टराचित्ये सिद्धे पुनर्जन्म न विद्यते । इति भावः ।

Colophon. इति श्रीमदुत्तरगीताटीकायां सुबोधिन्यां श्रीगौड़पादाचार्य्यविरचितायां तृतीयोऽध्यायः । समाप्तेयं टीका ।

विषयः । उत्तरगीतायाः व्याख्यानम् ।

No. 2145. ज्योतिःसूत्रं। Substance, country-made paper, 12 × 2½ inches. Folia, 18. Lines, 6 on a page. Extent, 405 slokas. Character, Bengali. Date, ? Place of deposit, Sonápatilagrám, Post Májanagara, Zilla Rájaśáhí, Paṇdit Madhusúdana Misra. Appearance, old. Prose and verse.

Jyotiḥ-sútra. A manual of civil astrology. By S'ríkrishṇa Chakravartí. CONTENTS. Signs of the zodiac, ecliptic signs, lunar constellations, ascending constellations. Provinces of the planets. Entry of a planet in the mansion of the planet which presides at the nativity of a person. Adverse stars. Auspicious constellations. Auspicious conjunctions (siddhiyoga). Inauspicious parts of the days of the week. Auspicious conjunctions for starting on a journey. Ditto for ploughing. Ditto for sowing, reaping, &c. Ditto for entering a new house, wearing new clothes &c. Sacrament of nativity. Ditto of naming, new rice feast (*navánna*). S'ráddhas at convenience. Sacraments of tonsure, investiture with the sacred thread, &c. Marriage. Earthquakes.

Beginning. नत्वा श्रीगुरुमार्त्तण्डं दुर्बोधध्वान्तनाशनं ।
क्रियते ज्योतिषां सूत्रं श्रीकृष्णचक्रवर्त्तिना =
तत्रादौ राश्यादीनां संज्ञा ।
वह्नि मनयोराशिं चेवस्त्वं गृहञ्च भं । इत्यादि ।

End. यात्रायामुक्ततिथयः शस्ताल्लयोदशीं विना ।
येषां वैवाहिकं प्रोक्तं कुयोगान् परिवर्ज्जयेत् ॥

Colophon. इति श्रीकृष्णचक्रवर्त्तिना विरचितं ज्योतिःसूत्रं समाप्तम् ।

विषयः । राशिनिरूपणं । लग्ननिरूपणं । नक्षत्रविभागकथनं । अधोमुखादिनक्षत्रनिरूपणं । ग्रहाणां दृष्टिनिरूपणं । गोचरशुद्धिः । विपत्तारादिनिरूपणं । नक्षत्रामृतं । सिद्धियोगादिकथनं । वारवेलादिनिरूपणं । यात्रिकलग्नादिनिरूपणं । हलप्रवाहकथनं । वीजवपनधान्यच्छेदनादिनिरूपणं । नववस्त्रशय्याद्युपभोगकथनं । जातकर्म्म । अन्नप्राशनं । नवान्नं । सावकाशश्राद्धनिरूपणं । चूड़ोपनयनादिकथनं । विवाहकथनं । भूमिकम्पविवेचनञ्च ।

No. 2146. दोलयात्राविवेकः । Substance, country-made paper, 11 × 3 inches. Folia, 9. Lines, 5 on a page. Extent, 81 ślokas. Character, Bengali. Date, ? Place of deposit, Post Májanagara, Sonápátilá-grám, Zillá Rájaśáhí, Paṇḍit Madhusúdana Miśra. Appearance, old. Prose and verse. Generally correct.

Dolayátrá-viveka. An essay on the swing festival of Govinda. By S'úlapáṇí Mahámahopádhyáya, who lived in the court of Lakshmaṇasena, of Gauḍa.

Beginning. नत्वा नारायणं दृष्ट्वा धर्म्मशास्त्रञ्च सङ्ग्रहात् ।
विवेकोदोलयात्रायाः क्रियते शूलपाणिना ॥
स्कन्दपुराणे । जैमिनिरुवाच ।
फाल्गुने मासि कुर्व्वीत दोलारोहणमुत्तमं ।
तत्र क्रीड़ति गोविन्दोमहाविभवविस्तरैः । इत्यादि ।

End. उभयत्र नक्षत्रयोगः फलातिशयार्थः । स्कन्दपुराण-देवीपुराण-ब्रह्मपुराण-भुजबलभीमैः सहस्थितत्वादिति दिक् ।

Colophon. इति शूलपाणिमहामहोपाध्यायविरचिते दोलयात्राविवेकः समाप्तः ।

विषयः । दोलयात्राविधिकथनं । तत्र वह्न्युत्सवविधि. तत्कालादिनिरूपणं । अधिवासविधिकथनञ्च ।

No. 2147 विचारनिर्णयः। Substance, country-made paper, 14 × 3 inches. Folia, 48. Lines, 6 on a page. Extent, 916 ślokas. Character, Bengali. Date, ? Place of deposit, Post Májanagara, Syámanagara-grám, Zillá Rájaśáhí, Paṇḍit Kailáśachandra Bhaṭṭáchárya; another copy at S'ántipura, Paṇḍit Kálidása Vidyávágíśa. Appearance, old. Prose and verse. Correct.

Vichára-nirṇaya. Miscellaneous dissertations on various topics of the Smṛiti. By Gopála Nyáyapanchánana Bhaṭṭáchárya.

Beginning. प्रणम्य राधिकाकान्तं स्निग्धवारिदसुन्दरं।
विचारनिर्णयोरम्योगोपालेन वितन्यते॥
अथ विचारनिर्णयः। स च विचाराईवाक्यस्य संशयपूर्व्वपक्षोपन्यासपूर्व्वकं यथार्थतात्पर्य्यनिर्णयात्मकः। इत्यादि।

End. पूर्णाङ्गत्यनन्तरं वह्निनमस्कारमाह स्मृतिः।
नमोनमस्ते त्रिपुरारिचक्षुषे चराचराणां जठरेषु संस्थित।
+++++++++++++++ भक्ताय नमोऽस्तु वह्नये॥

Colophon. इति श्रीगोपालन्यायपञ्चाननभट्टाचार्य्यकृतविचारनिर्णयः समाप्तः।

विषयः। विचारस्वरूपनिरूपणं। अधिकरणनिरूपणं। अर्थवादादिविवेचनं। यागस्वरूपविवेचनं। दानस्वरूपविवेचनं। स्वत्वनिरूपणं। द्रव्यदेवतानिरूपणं। कन्यादाननिरूपणं। आद्यश्राद्धादौ द्विजदम्पतीषोड़शदानादिविवेचनं। मृतभ्रान्त्या कृतश्राद्धादिकस्य पश्चादागमने कृत्यविवेचनं। वृषोत्सर्गविवेचनं। वृषाङ्कनविवेचनं। होमविवेचन। तत्र कुण्डादिनिरूपणञ्च। इति।

No. 2148. दुर्गोत्सवनिर्णयः। Substance, country-made paper, 14 × 3 inches. Folia, 14. Lines, 5 on a page. Extent, 238 ślokas. Character, Bengali. Date, ? Place of deposit, Post, Májanagara, S'yámanagara-grám, Zillá Rájaśáhí, Paṇḍit, Kailáśachandra Bhaṭṭáchárya. Appearance, old. Prose and verse. Generally correct.

Durgotsava-nirṇaya. A treatise on the Durgápújá and the ritual for performing it. Anonymous, (*cf.* II, p. 312.)

Beginning. नत्वा कृष्णपदद्वन्द्वं संसारध्वान्तनाशनं।
निर्णयः शारदार्चाया गोपालेन वितन्यते॥
अथ दुर्गोत्सवव्यवस्थानिर्णयः। तत्र शरत्कालीयदुर्गापूजा नित्या। तथा च कालिकापुराणं।
योमोहादथवालस्याद्देवीं दुर्गां महोत्सवे। इत्यादि।

End. अशुभं खञ्जनं दृष्ट्वा देवब्राह्मणपूजनं।
दानं कुर्व्वीत कुर्य्याच्च स्नानं सर्व्वौषधीजलैः ॥

Colophon. इति दुर्गोत्सवनिर्णयः समाप्तः ॥

विषयः। दुर्गापूजाया नित्यत्वकथनं। नवम्यादिकल्पव्यवस्थाकथनं। प्रतिकल्पव्यवस्था एवं षष्ठ्यादिषु ज्ञेयं। बलिदानविधिः। होमविधिः। नवम्यामेव दक्षिणा कर्त्तव्येति नवखण्डनं। शुभाशुभखञ्जनदर्शनफलकीर्त्तनञ्च।

No. 2149. तत्त्वदीपिका। Substance, country-made paper, 12 × 3 inches. Folia, 118. Lines, 7 on a page. Extent, 2,364 ślokas. Character, Bengali. Date, ? Place of deposit, Post Májanagara, Sonápátilá-grám, Zillá Rájaśáhí, Paṇḍit Madhusúdana Miśra. Appearance, old. Prose. Correct.

Tattva-dípiká. A commentary on the Chaṇḍí section of the Márkaṇḍeya Puráṇa. By Kavikaṇṭhábharaṇa Áchárya Virúpáksha.

Beginning. ॐ नमश्चण्डिकायै।
शब्दार्थभागोविषमश्चण्डिकाया यथाबलं।
विविच्यते विरूपाक्षशर्म्मणा तद्गतात्मना ॥

क्रोष्ठकिनामा द्विजः प्रियशिष्यः शिरसा नतोमार्कण्डेयं महामुनिं पप्रच्छ भगवन्निह जगति बहवोमनवोभूताः, तेषां मध्ये सावर्णिरष्टमोमनुर्बभूव। स च भगवत्या महामायायाः प्रभावेण कीदृशोऽभूदिति श्रोतुमिच्छामि। मार्कण्डेयोमुनिरपि तस्मै प्रियशिष्याय कथां कथयितुमुपचक्रमे मार्कण्डेय उवाचेति। कडि मदे तस्मात् मृगय्वादयश्चेति उप्रत्यये कण्डुः मृगस्य कण्डुरिति पृषोदरादित्वाद्गलोपे मृकण्डुरित्यागमः। इत्यादि।

End. पुरुषोत्तम आरेभे। संज्ञापकसमुच्चयमित्यादयः। देव्या इति मुनिसर्व्वेषामिति यकारलोपः।

Colophon. इति श्रीकविकण्ठाभरणाचार्य्यविरूपाक्षकृतायां तत्त्वदीपिकायां चण्डी-श्लोकार्थप्रकाशः सम्पूर्णः।

नेत्रबाणश्रुतिक्षौणीभिर्गणिते शकवत्सरे।
अकारि चण्डिकाटीका श्रीविरूपाक्षशर्म्मणा ॥
विज्ञाः सदा सदसतां ग्रहणप्रवीणा नैवं मदीयचरिते कुरुतोपहासं।
द्वैपायनस्य कवितावितथार्थतत्त्वं ब्रह्मादयोयदि विदन्ति वयं वराकाः
तस्माद् यदत्र लिखितं शिशुबोधहेतोः कार्य्या सता गुणवता न कदाप्यवज्ञा।

ज्ञानेन हीनमनसां जनसंहतीनां ज्ञानार्पणं मतिमतां किल धर्म्म एषः ॥
द्वैपायनो जगति वाग्विषये स्वतन्त्रः शब्दाम्बुराशिचयपारपरीतचेताः ।
तद्वक्त्रनिर्गतपदेषु पदं यदेतत् सिद्धं न पाणिनिमतेन च वाच्यमेवं ॥

विषयः । मार्कण्डेयपुराणान्तर्गतदेवीमाहात्म्यव्याख्यानम् ।

No. 2150. चमत्कारचन्द्रिका । Substance, country-made paper, 14 × 5 inches. Folia, 22. Lines, 5 on a page. Extent, 302 s'lokas. Character, Bengali. Date, ? Place of deposit, Post Boyáliyá, Sonapura-grám, Zillá Rájas'áhí, Sábá Bábu; another copy at Post Khayarás'úla, Podo-grám, Zillá Vírabhúma, Bábu Vinodavihári Kaviràja; another at Calcutta, Government of India. Appearance, fresh. Prose and verse. Incorrect.

Chamatkára-chandriká. On the amours of Kṛishṇa at Vrindávana. By Kavikarṇapura Gos'vámí.

Beginning. यत् कारुण्यं सुचिरमचमत्कारवारांनिधींस्तान्
स्वश्ये बाधा गिरिवरभृतः स्पर्शयेत्तर्षयेन्नः ।
तत्स्वैकं द्रुषतमचिराज्ञस्वमाशाचिदानैः
सोऽव्या + + ईश्मनविततेः कृष्णचैतन्यरूपः ॥
मातः प्रातः किमिह कुरुषे दृश्यते पेटिकेयं
यन्नादस्यां किमिह निहितं किं तवानेन सूनो ।
ज्ञातव्येन प्रणयसखिभिः खेलगन्द्दाद्विहस्व
जिज्ञासा मे भवति महती ब्रूहि नोचेन्नयामि ॥
कस्यां चन्दनचन्द्रपङ्कजरजःकस्तूरिकाकुङ्कुमा-
द्यङ्गानामनुलेपनार्थमथ ते नेपथ्यहेतोस्तथा ।
काञ्चीकुण्डलकङ्कणाद्यनुपमं वैदूर्य्यमुक्ताहरि-
द्रत्नाद्यं वरजातमप्यतिमहानर्घ्यं क्रमाद्वर्त्तते ॥ इत्यादि ।

End. कभ्रूविभङ्गकुटिलास्यसरोजमाभमाद्यन्मधुव्रतविलाससुमौरभाणि ।
कम्प्राप्य यानविवरेषु जघुरेवं प्रेष्ठालयः प्रतिपदं प्रमदोर्म्मिकुञ्जे ॥

Colophon. इति श्रीकविकर्णपूरगोस्वामिविरचितचमत्कारचन्द्रिकायां चतुर्थकुतूहलं । समाप्ता चेयं चमत्कारचन्द्रिका ।

विषयः । प्रथमे कुतूहले,—मञ्जुपान्तःप्रविष्टस्य कृष्णस्य अभिमन्युस्त्रिरमा राधिकाशयन-गृहप्राप्तिकौतुकवर्णनं । २ये कुतूहले,—एकदा मञ्जुकुञ्जे राधिकया सह विलसन्नेव श्रीकृष्णः

तत्र समागतां जटिलामाकलय्य अभिमन्युरूपपरिग्रहेण तां वञ्चयामासेतिवर्णनं । इयं कुतूहलं,—अथैकदा । व्याजेन विषपानलक्षणमभिनयन्त्याः राधायाश्चिकित्सार्थं विषवैद्यरूपेण श्रीकृष्णस्य तत्र समागमरहस्यवर्णनं । इयं कुतूहलं,—अनन्तरमेकदा मानमलिनहृदयां राधिकां सामादिभिरुपायैरपि प्रसादयितुमशक्नुवान्नेव श्रीकृष्णः स्त्रीरूपपरिग्रहेण तां प्रसादयामासेति-रहस्यवर्णनं । इति ।

No. 2151. रासोल्लासतन्त्रं । Substance country-made paper, 11 × 4 inches. Folia, 12. Lines, 6 on a page. Extent, 260 ślokas. Character, Bengali. Date, ? Place of deposit, Post Boyáliyá, Sonápura-grám, Zillá Rájaśáhí, Sáhá Bábu; another copy at Post Khayaráśúla, Poḍo-grám, Bábu Vinodavihári Kavirája. Appearance, new. Verse. Correct.

Rásollása-tantra. Descriptions of the Rásas, or amorous rejoicings of Krishṇa at Vṛindávana and disquisition on their true meaning. The work professes to be a Tantra.

Beginning. श्रीनारद उवाच ।

श्रीराधाकृष्णदेवस्य नाम्नामष्टोत्तरं शतं ।
रासमङ्कीर्त्तनं नाम शृणु भागवतोत्तम ॥
राधानामसुधायुक्तं कृष्णनामरसायनं ।
यः पिवेत् प्रातरुत्थाय व्याधिभिः स न वाध्यते ॥
येनोच्चैरुच्यते रागैराधाकृष्णपदद्वयं । इत्यादि ।

End. लक्ष्मीस्तस्य वसेद्गेहे मुखे भाति सरस्वती ।
धर्म्मार्थकामकैवल्य लभते सत्यमेव स ॥

Colophon. इति श्रीरासोल्लासतन्त्रे श्रीराधाकृष्णयोः क्रीड़ावर्णनं समाप्तं ।

विषयः । श्रीकृष्णस्य रासमङ्कीर्त्तनस्तोत्रकथनं । रासलीलास्वरूपवर्णनं । रासगीता-कीर्त्तनञ्च ।

No. 2152. गोविन्दविरुदावलीव्याख्या । Substance, country-made paper, 12 × 4 inches. Folia, 38. Lines, 9 on a page. Extent, 894 ślokas. Character, Bengali. Date, ? Place of deposit, Post Boyáliyá, Sonápura-grám, Zillá Rájaśáhí, Sáhá Bábu. Appearance, decayed. Prose. Incorrect.

Govinda-virudhávali-vyákhyá. A commentary on the work described under No. 1673, Volume IV, p. 284, on the career of Kṛishṇa at Vṛindávana. Anonymous.

Beginning. गौड़ोदयमुपयातस्तमःसमस्तं निहन्ति योयुगपत् ।
ज्योतिस्वयोऽतिशीतः पीतस्तमुपास्महे कृताञ्जलयः ॥
सत्काव्यसद्मसु य एव हरिप्रियेषु शब्दार्थरत्ननिकरैस्तनुतेऽतिभव्यैः ।
शिल्पक्रियां बहुविधां कविविश्वकर्म्मा रूपाभिधोरसिकचित्तहरः स जीयात् ॥
अधीत्य विरुदावल्या गोविन्दविरुदावलौ ।
योऽभ्यधायि विशेषस्तु स तावदिह लिख्यते ॥

— — — — — — — — — — — — यस्यां कलिकानामादिमायाखण्डहत्तमहा-कलिकायाः प्रारम्भे श्लोकयुग्मं वर्णयति । ब्रह्मेत्यादि । हे सरसिजनयनश्रीगोविन्द येन त्वया—इत्यादि ।

End. वासुदेवोविशुद्धसत्त्वाविर्भावी श्रीकृष्णः । स्फुटमन्यत् ।
गोविन्दविरुदावल्या व्याख्यातरि विशारदाः ।
गोविन्दभक्तास्तुष्यन्तु मयि विद्याविभूषणे ॥

Colophon. इति श्रीगोविन्दविरुदावली व्याख्याता ।

विषयः । विरुदावलीलक्षणादिविवेचनपुरःसरं गोविन्दविरुदावल्या व्याख्यानम् ।

No. 2153. **सारात्सारतत्त्वसङ्ग्रहः ।** Substance, country-made paper, 14 × 4 inches. Folia, 30. Lines, 6 on a page. Extent, 576 ślokas. Character, Bengali. Date, ? Place of deposit, Post Boyáliyá, Sonápura-grám, Zillá Rájaśáhí, Sáhá Bábu; another copy at Post Khayráśúla, Poḍo-grám, Zillá Vírabhúma, Bábu Vinodavihári Kavirája. Appearance, decayed. Prose and verse. Generally correct.

Sárátsára-tattva-saṅgraha. On the essential principles, dogmas, fasts, observances and rituals of the Vaishṇavas. By Raghunáthadása.

Beginning. अन्तर्द्ध्वान्तविनाशाय कृष्णभक्तिप्रदाय च ।
करुणासिन्धुरूपाय तस्मै श्रीगुरवे नमः ॥
गौराङ्गं तप्तहेमाङ्गं धृतशुद्धाम्बरोज्ज्वलं ।
कृपालुं परमानन्दं वन्दे प्रेमोत्सवप्रदं ॥
श्रीकृष्णं राधिकाकान्तं व्रजेशं जगतां गुरुं ।

गोविन्दं सच्चिदानन्दं वन्दे वृन्दावनेश्वरं ॥
गुरुः कृष्णः कृष्णनाम तद्भक्तिस्तज्जनस्तथा ।
एते पञ्च निरूप्यन्ते त्यक्त्वा तद्विमुखान् जनान् ॥
गुरुः कृष्णः कृष्णनाम सारात्सारं परात्परं ।
तद्भक्तिरपि तल्लोका तत्परोऽपि तथा जनः ॥

तत्रादौ श्रीगुरुतत्त्वलक्षणं । इत्यादि ।

End. ततो दुःसङ्गमुत्सृज्य सत्सु सज्जेत बुद्धिमान् ।
सन्त एवास्य छिन्दन्ति मनोव्यासङ्गमुक्तिभिः ॥

Colophon. इति सारात्सारतत्त्वसङ्ग्रहे पञ्चतत्त्वोपाख्याने षष्ठविवेकः ।
इति श्रीरघुनाथदासविरचितः सारात्सारतत्त्वसङ्ग्रहः समाप्तः ।

विषयः। प्रथमे विवेके,—गुरुलक्षणतन्माहात्म्यकीर्त्तनं । वैष्णवलक्षणं । वैष्णवदीक्षाया-आवश्यकत्वकथनञ्च ।

द्वितीये विवेके,—श्रीकृष्णस्वरूपादिनिरूपणं । तन्माहात्म्यकीर्त्तनं । कृष्णं परित्यज्य देवतान्तरभजनदोषकथनञ्च ।

तृतीये विवेके,—श्रीकृष्णनाममाहात्म्यकीर्त्तन ।

चतुर्थे विवेके,—भक्तिस्वरूपादिकथनं । भक्तजनकर्त्तव्यनिरूपणं । श्रवण-वन्दन-दर्शन-अर्चन-स्मरण-कीर्त्तनादिफलकथनादिकं । श्रीमद्भागवतास्वादकर्त्तव्यतानिरूपणं । वैष्णवसङ्ग-माहात्म्यकथनं । मथुराद्वारकादिवासमाहात्म्यकथनं । प्रसादमाहात्म्यकथनं । हरिवासरकर्त्त-व्यता । अशक्तौ प्रतिनिधिविधानं । उपवासनिरूपणं । जन्माष्टम्यादिव्रतविधिकथनं । गङ्गा-सेवनविधिः । तुलसीसेवनविधिः । अश्वत्थादिपूजनमाहात्म्यकथनञ्च ।

पञ्चमे विवेके,—वैष्णवलक्षणकथनं । तन्माहात्म्यकथनं । तत्कर्त्तव्यनिरूपणञ्च ।

षष्ठे विवेके,—बहिर्मुखलक्षणादिकथनं । तत्सङ्गवर्ज्जनस्यावश्यकताकथनञ्च । इति ।

No. 2154. कलापदीपिका, भट्टिटीका । Substance, country-made paper, 13 × 3 inches. Folia, 300. Lines, 8—9 on a page. Extent, 9.300 ślokas. Character, Bengali. Date, Sk. 1650. Place of deposit, Post Boyáliyá, Sonápuragrám, Zillá Rájaśáhí, Sáhá Bábu; another copy at Calcutta, Government of India. Appearance, fresh. Prose. Correct.

Kalápadípiká. A commentary on the epic poem called Rávaṇabadha of Bhaṭṭi Svámí, (*ante* p. 148). By Puṇḍaríkáksha son of S'ríkánta Paṇḍit. The peculiarity of this commentary is that it explains the text by references to the rules of the Kalápa Vyákaraṇa. The commentary in common use is based on the grammar of Vopadeva.

Beginning. नत्वा शङ्करचरणं ज्ञात्वासकलं कलापतन्त्वञ्च ।
दृष्ट्वा पाणिनितन्त्रं वदति श्रीपुण्डरीकाक्षः ॥
पाणिनिप्रक्रियायां ये प्रसिद्धत्वान्न कौतुकं ।
कलापप्रक्रिया तस्मादप्रसिद्धा प्रकथ्यते ॥
कुनिवन्धतमस्तोमसपहस्तयितुं मया ।
कलापदीपिका चक्रे सत्पथालोकनाय च ॥

अत्र कविना सर्गवन्धोल्लक्ष्यसूचनाय काण्डवन्धश्च लक्षणसूचनाय कृतः । तत्र प्रकीर्णाधिकार-प्रसन्नतिङन्तकाण्डानि चत्वारि लक्षणमपि द्विविधं शब्दलक्षणकाव्यलक्षणभेदात् । तत्र प्रसन्नकाण्डातिरिक्तैस्त्रिभिः काण्डैः शब्दलक्षणं प्रसन्नकाण्डे च काव्यलक्षणं यत्र नाना + + वहां वह्वनां लक्षणानां प्रदर्शनं तत् प्रकीर्णकाण्डं तदेवादौ दर्शितं व्यापकत्वात् । महाकाव्यस्यादावाशीर्नमस्-क्रियावस्तुनिर्देशोवा कर्त्तव्य इति सम्प्रदायानुरोधात् वस्तुनिर्देशं कुर्व्वन्नेवेष्टदेवतास्मरणात्मकं मङ्गलमप्यादावाविष्करोति अभूदिति । इत्यादि ।

End. यस्मि + + + ति दुर्गमकाव्यसिन्धौ
खञ्जीभवन्ति शतशोऽपि महाकवीन्द्राः ।
वालस्य मे चपलतां तदहो क्षमध्वं
यद्ग्राहतावपि कृतोऽस्य मया प्रयत्नः ॥
रत्नाकरोजयति यद्वचनामृतानि
पीत्वा प्रयान्ति विबुधाः पदवीं सुराणां ।
श्रीकान्तधीर इति तस्य सुतोऽभिजज्ञे
तस्यात्मजेन मयका लपितं तदेतत् ॥

Colophon इति महामहोपाध्याय श्रीमच्छ्रीकान्तपण्डितात्मजश्रीपुण्डरीकाक्षकृतायां कलापदीपिकायां भट्टिटीकायामयोध्यागमनं नाम द्वाविंशः सर्गः । समाप्तश्चायं ग्रन्थः । शकाब्दाः १६५०॥

विषयः । कातन्त्रमतानुसारेण व्याकरणप्रक्रियां प्रदर्श्य भट्टिकाव्यस्य व्याख्यानं ।

No. 2155. भाषावृत्तिः । Substance, country-made paper, 14 × 4 inches. Folia, 202. Lines, 6—7 on a page. Extent, 6,039 ślokas. Character, Bengali. Date, Śk. 1618. Place of deposit, Post Boyáliyá, Sonápura-grám, Zillá Rájaśáhí, Sáhá Bábu; another copy at Calcutta, Government of India. Appearance, fresh. Prose. Correct.

Bháshávritti. A commentary on the epic poem called Rávaṇabadha of Bhaṭṭi S'vámí. By Purushottama. This differs from the work described under the next preceding Number in making the Kátantra its grammatical authority.

Beginning. नमोबुद्धाय भाषायां यथा चिमुनिलक्षणं

पुरुषोत्तमदेवेन लघ्वी वृत्तिर्विधीयते ॥

अथ शब्दानुशासनं। लौकिकानां प्रकृतिप्रत्ययविभागपरिकल्पनया सामान्यविशेषवता च लक्षणेन गत्यन्तराभावात्। वर्णानामुपदेशः क्रमसन्निवेशानुबन्धासङ्गनार्थः। तदुभयं संज्ञार्थं। सा च लाघवेन शास्त्रप्रवृत्त्यर्था। अकारस्य विवृतोपदेश आकारस्य ग्रहणार्थः। अ इ उ ण ऋ लृ क इत्यादि।

End. अकारस्य विवृतोपदेशः प्रतिज्ञातः स प्रयोगे संवृतोभवेत्। वृत्तः सिद्धिः।

Colophon. इति महामहोपाध्यायश्रीपुरुषोत्तमदेवस्य भाषावृत्तावष्टमोऽध्यायः समाप्तः।

काशिकाभागवृत्त्योश्च सिद्धान्तं वोद्धुमस्ति धीः।

तदा विचिन्त्यतां भ्रातर्भाषावृत्तिरियं मम ॥

वसतु मम मनः श्रीदौर्गपादाब्जयुग्मे

दिशति हितमपारं सेवितं यत्सुराद्यैः।

व्यलिखदतिमनोज्ञं चिन्तयंस्तद्भवानी-

चरणविदितनामा भूसुरः श्रीपदाद्यः ॥

शकाब्दाः १६४५।

विषयः। वैदिकप्रक्रियोपयोगिसूत्रपरित्यागेन काशिकावृत्त्यनुसारेण च पाणिनिसूत्राणां सोदाहरणव्याख्यानं।

No. 2156. स्मरणक्रममाला। Substance, country-made yellow paper, 12 × 4 inches. Folia, 18. Lines, 5 on a page. Extent, 182 ślokas. Character, Bengali. Date, ? Place of deposit, Post, Boyáliyá, Sonápura-grám, Zillá Rájaśáhí, Bábu Madhusúdana Sháhá. Appearance, fresh. Prose and verse. Correct.

Smaraṇakrama-málá. Directions for meditating upon and mentally worshipping Kṛishṇa, Gaurachandra, and his followers,—a Vaishṇavite tract. By Viśvanátha Chakravarti, the author of the Chaitanya-charitámṛita.

Beginning. सर्व्वाभीष्टप्रद श्रीमद्गुरुदेव दयानिधे।

नानाविघ्नभयान्नित्यं पाहि मां मङ्गलालय ॥

तत्र श्रीगौरचन्द्रस्य । यथा।

निशान्ते गौरचन्द्रस्य शयनञ्च निजालये।

प्रातःकाले कृतोत्थानं स्नानं तद्भोजनादिकं ॥

पूर्व्वाह्नसमये भक्तमन्दिरे परमोत्सुकं ।

मध्याह्ने परमाश्चर्य्यकेलिं सुरसरित्तटे ॥ इत्यादि ।

End. ततः श्रीमत्प्रसादमेवनं कुर्य्यात् ।

Colophon. इति श्रीविश्वनाथचक्रवर्त्तिविरचिता स्मरणक्रममाला समाप्ता ।

विषयः । गौरचन्द्रस्य प्रातरादिकालेषु स्मरणप्रकारकथनं । एवं श्रीकृष्णस्य वृन्दावनस्य च । तथा गौरचन्द्रस्य मानसोपचारैः पूजाक्रमकथनं । एवं श्रीकृष्णस्य अपिच गौरगणस्य पूर्व्वोक्त-विधानेन स्मरणपारिपाट्यकथनं ।

No. 2157. पद्धतिप्रदीपः । Substance, country-made paper, 10 × 6 inches. Folia, 23. Lines on a page, 12. Extent, 82 ślokas. Character, Bengali. Date, ? Place of deposit, Post Boyáliyá, Sonápura-grám, Zillá Rájaśáhí, Bábu Madhusúdana Sháhá. Appearance, fresh. Prose and verse. Correct.

Paddhati-pradípa. Rituals and mantras for the meditation and worship of Krishṇa, Rádhá, Gauráñga, and the followers of the last. By Ghanasyámadása.

Beginning. श्रीशचीनन्दनं गौरचन्द्रं गोकुलवल्लभं ।

वन्दे श्रीमन्नवद्वीपे सदा कैशोरविग्रहं ॥

अद्वैतप्रकटीकृतो नरहरिप्रेष्ठः स्वरूपप्रियो-

नित्यानन्दसखः सनातनगतिः श्रीरूपहृत्केतनः ।

लक्ष्मीप्राणपतिर्गदाधररसोल्लासी जगन्नाथभूः

साङ्गोपाङ्गसपार्षदः स दयतां देवः शचीनन्दनः ॥ इत्यादि ।

End. श्रीराधाकृष्णचैतन्यभजनक्रमपद्धतिः ।

साधकानां प्रमोदाय संक्षेपान्निर्म्मिता मया ॥

दीने मयि घनश्यामे कृपामेतां कुरु प्रभो ।

श्रीपद्धतिप्रदीपोऽयं ग्रन्थोभवतु जीवनं ॥

Colophon. इति श्रीघनश्यामदासविरचितः श्रीपद्धतिप्रदीपः सम्पूर्णः ।

विषयः । अष्टकालीयगौरस्मरणविधिकथनं । एवं श्रीकृष्णस्य । ततो गौरादीनां ध्यानक्रमकथनं । श्रीराधिकादीनां ध्यानक्रमकथनमुखेन षोडशवेशादिचिन्तनप्रकारकथनं । पूर्व्ववत् नित्यानन्दाद्वैतगदाधरसार्व्वभौमादीनां ध्यानादिकथनं । प्रियनर्म्मसखी-प्राणसखीप्रभृतीनां ध्यानादिकथनं । बलदेवनन्दयशोदारोहिणीसुबलमधुमङ्गलगोवर्द्धनराधाकुण्डश्यामकुण्डयमुनादीनां ध्यानकथनं । प्रत्येकं प्रार्थनाकथनञ्च ।

No. 2158. **विराटपर्व्वटीका।** Substance, country-made paper, 12 × 3 inches. Folia, 30. Lines, 7 on a page. Extent, 696 ślokas. Character, Bengali. Date, ? Place of deposit, Tájapura-grám, Post, Deñgápáḍá, Zillá Rájasáhi, Paṇḍit Gaurasundara Bhaṭṭácbárya. Appearance, fresh. Prose. Generally correct.

Viráṭaparva-ṭíká. A commentary on the Viráṭa section of the Mahábhárata. By Arjuna Mis'ra, son of I's'ána Mis'ra. (*Cf.* p. 154).

Beginning. हरेरर्ज्जुनमिश्रेण प्रणम्य चरणाम्बुजं।
विराटपर्व्वणः श्लोका व्याख्यायन्ते यथामति॥

कथं विराटनगरे इत्यादेः सभां विराटस्य ततोऽभिजग्मुरित्यन्तस्य विराटपर्व्वणस्तुर्वर्गसाधनीभूतं सत्यं द्यूतच्छलप्रयुक्तायामज्ञातवत्सरकर्त्तव्यताप्रतिज्ञायां न हातव्यमिति तात्पर्य्यार्थः। विराटनगरे इत्यादेः सर्व्वे द्वैतवनादित्यन्तस्य अज्ञातवासनिर्व्वाहाज्ञातपरिचर्य्यापरिग्रहः तत्र च यां कामवस्थामुपगतस्योपजिजीविषोः प्रभुत्रीणनं श्रेयःसाधनमिति। इत्यादि।

End. मैरेयं मद्यविशेषः। अभ्यत एव अभिहृय स्थिता। श्रिया शोभया॥
अल्पधीमन्दधीध्वान्तशान्तये कृतिनां मुदे।
विराटदीपिकैषास्तु मम सञ्चित्तवेश्मनि॥

Colophon. इति श्रीभागवताचार्य्यपाठकाचार्य्यश्रीमदीशानतनयश्रीमदर्ज्जुनमिश्रकृता विराटटीका समाप्ता।

विषयः। महाभारतीयविराटपर्व्वव्याख्यानं।

No. 2159. **महाभारतं आश्वमेधिकपर्व्व।** Substance, palm-leaf, 29 × 2 inches. Folia, 179. Lines, 4—5 on a page. Extent, 4,806 ślokas. Character, Bengali. Date, ? Place of deposit, Sonápura-grám, Post, Boyáliyá, Zillá Rájaśáhí, Bábu Madhusúdana Sháhá. Appearance, old. Verse. Correct.

Mahábhárata, A'śvamedha Parva. The history of the Páṇḍava brothers and of the great fratricidal war of Kurukshetra. By Jaimini. This work is quite distinct from the Mahábhárata of Vyása, and contains many narratives and descriptions which do not occur in Vyása's work. It is, however, no longer extant in its entirety—superceded, probably, by the more elegant recession of Vyása. The only portion extant is the A'śvamedha section, on the sacrifice of a horse, and it is about four times the size of Vyása's version. The codex under notice professes to be complete in 69 chapters, but in the Berlin codex, noticed by Weber, there are 81 chapters.

Beginning नारायणं नमस्कृत्य नरञ्चैव नरोत्तमं ।
देवीं सरस्वतीं व्यासं ततोजयमुदीरयेत् ॥
जन्मेजय उवाच ।
कथं युधिष्ठिरः प्रीतोमम पूर्व्वपितामहः ।
हयमेधं क्रतुवरं चक्रे बन्धुभिरन्वितः ॥
जैमिनिरुवाच ।
शृणु राजन् प्रवक्ष्यामि धर्म्मराजस्य चेष्टितं ।
दिवं पितामहे याते धर्म्मपुत्रोऽभिदुःखितः ॥
यदृच्छयात्र संप्राप्तं व्यासं पप्रच्छ सादरं ।
केनोपायेन मे ब्रह्मण् गोत्रबध्याकृतं भयं ॥
ध्रुवं विनाशमाप्नोति तन्मे ब्रूहि तपोधन ।
विना भीष्मेण कर्णेन द्रोणेन च विवर्ज्जितं ॥
न मे प्रीतिपदं राज्यं यत् प्राप्तं पूर्व्वजार्ज्जितं ।
कर्णस्य मन्दिरं रम्यं ब्रह्मघोषसमन्वितं ॥
मया शून्यं कृतं तत्तु साम्प्रतं दानवर्ज्जितं ।
यत्रार्थिनां गणा नित्यं लब्ध्वा यान्ति प्रहर्षिताः ॥
हर्षादश्रूणि मुञ्चन्ति तत्र मुञ्चन्ति शोकजं ।
धिङ्मदीयमिदं राज्यं यत्र भीष्मोन भानुजः ॥
ताभ्यां विरहितं यद्वद्देहं चक्षुर्व्विवर्ज्जितं ॥ इत्यादि ।

End. प्रत्यक्षं वृषभोदेयस्तदा पर्व्वफलं लभेत् ।
यथाशक्त्यपि वै कार्य्योविधिः शाठ्यविवर्ज्जितः ॥
त्रयोदशैव पर्व्वाणि कथितानि विशांपते ।
ततस्त्वाश्रमवासाख्यं पर्व्व राजन् शृणुष्व तत् ॥
रममाणेषु राजेन्द्र कुरुराज्ये कुरूद्वह ।
वर्षाणि नव जातानि सुखेन भरतर्षभ ॥

Colophon. इति श्रीमहाभारते जैमिनीये आश्वमेधिके पर्व्वणि श्रवणफलं नाम नवषष्टितमोऽध्यायः समाप्तश्चायं ग्रन्थः ॥

विषयः । १—३ अध्याये,—जैमिनिना सह जन्मेजयस्य संवादेन भीष्मद्रोणादिगुरुजनविनाशमन्तप्तस्य युधिष्ठिरस्य व्याससमीपे शोकप्रकाशनं । भगवता व्यासेन च त्वमद्य हयमेधानुष्ठानेन पूतोभवेति सन्दिष्टोऽसौ कथं मया महायशून्येन वित्तरहितेन च यज्ञमिमं शक्यते कर्त्तुमिति सकरुणमुक्ताभूय एव भगवानाह मरुत्ताभिधानेन वदान्येन राज्ञा हिमालयशिखरे यज्ञमनुष्ठाय

ब्राह्मणेभ्योवहुलं धनं प्रदत्तं, तच्च तैस्तत्र परित्यक्तमद्यापि केनाप्यगृहीतं वर्त्तते। तदानीय समारभ्यतां याग इति। पीतपुच्छश्यामकर्णादिलक्षणलक्षितस्य यज्ञीयाश्वस्य लाभार्थं वृषकेतुमेघवर्णाभ्यां सह भीमस्य यौवनाश्वराज्यगमनविवरणकथनं। भद्रावतीपुरीवर्णनं।

४—६ अध्याये,—भीमपौत्रस्य मेघवर्णस्य अश्वहरणपूर्वकं पलायमानस्य पश्चात् धावन्तं सबलं यौवनाश्वमुपलभ्य कर्णपुत्रस्य वृषकेतोः समरसंरम्भवर्णनं। अथ मूर्च्छामापन्ने वृषकेतौ भीमेन सह यौवनाश्वकुमारस्य सुवेगस्य युद्धवर्णनं। अत्रान्तरे मूर्च्छितस्य यौवनाश्वस्य वृषकेतुप्रयत्नेन लब्धचैतन्यस्य च नितरां निर्व्विन्नतया भीममाहूय तेन सह सन्धाय तान्च स्वपुरीं प्रवेशयतोहस्तिनापुरप्रयाणवर्णनं। अत्र जरद्गवाया वृत्तान्तकीर्त्तनञ्च।

७—११ अध्याये,—कृष्णयुधिष्ठिरादिभिः सह साक्षात्कारं विधाय सपरिजनस्य युवनाश्वस्य स्वपुरीगमनकथनं। संक्षेपेण मरुत्तकृतयज्ञविवरणं संक्षेपतः ब्राह्मणादीनां वर्णानां धर्म्मकथनं। विधवाकृत्यनिरूपणं। बन्धकीस्वैरिणीप्रभृतिलक्षणकथनं। लक्ष्मीस्थैर्य्यकारणकथनं। अथ यज्ञानुष्ठानकाले रुक्मिण्या सार्द्धं भगवतः सान्निध्यार्थं तमानेतुं भीमस्य द्वारकापुरीप्रवेशपूर्व्वकं तत्र भोजनपारिपाट्यदर्शनवर्णनं। कृष्णस्य भोजनकाले सत्यभामायाः परिहासकरणं। सपरिवारस्य कृष्णस्य हस्तिनापुरीमुद्दिश्य गमनकाले कामिनीनां व्यङ्गोक्तिवर्णनं। कृष्णमुद्दिश्य गोपानां मुग्धभाषितकथनञ्च।

१२—१५ अध्याये,—सन्न्यासिगणकृतकृष्णस्तोत्रवर्णनं। स्मार्त्तगणकृततत्स्तोत्रकथनं। अथ पुरीप्रवेशपूर्व्वकं कृष्णादीनां यज्ञीयाश्वदर्शनकाले अनुशाल्वकर्त्तृकाश्वहरणवृत्तान्तकीर्त्तनं। तेन सह युद्धकाले प्रद्युम्नकृष्णादीनां मूर्च्छाप्राप्तिकथनं। अनुशाल्वेन सह युधिष्ठिरस्य बन्धुत्वकरणकथनं। अथ चैत्रपूर्णिमायां युधिष्ठिरस्य हयमेधारम्भकथनं। हयरक्षार्थमर्ज्जुनस्य नियोजनकथनं। अथ माहिष्मतीपतेर्नीलध्वजस्य पुत्रः प्रवीराभिधानः पुष्पितासु लतासु सार्द्धं स्त्रीसहस्रेण रममाणोऽसौ हयवरं वीक्ष्य स्वां पुरीं निनायेतिकथनं। तेन सह पार्थादीनां युद्धवर्णनं। तत्र स्वाहानामिकया नीलध्वजकुमार्य्या वह्नेर्विवाहवृत्तान्तकथनञ्च। अथ नीलध्वजेन पार्थाय हयवरे दत्ते नितरां मन्युवेगमापन्नाया नीलध्वजपत्न्या भ्रातृराजधानीं प्रविष्टायाः परुषाक्षरश्रवणेन मन्युचितपुत्रशोकाया गङ्गाया वाणरूपेण बभ्रुवाहणतूणप्रवेशकथनं।

१६—२१ अध्याये,—अथ विन्ध्यगिरिप्रदेशं प्रति चलितस्य हयवरस्य शिलास्पर्शेन जड़ीभावप्राप्तिकथनं। ततश्च पार्थस्य सौभरिमुखात् उद्दालकमुनिपत्न्याः शिलाभावप्राप्तिविवरणश्रवणकथनं। तत्र प्रसङ्गेन श्राद्धे विहिताविहितद्रव्यादिकथनञ्च। अथ चम्पापुरीपतेर्हंसध्वजस्य तद्‌-श्वरक्षग्रहणकथनमुखेन तत्पुत्रस्य सुधन्वनः प्रियामनोरथसम्पादनव्यग्रतया पार्थमभियोधयितुं पित्रा दत्ताज्ञस्यापि कालविलम्बदर्शनात् शङ्खलिखितोपदेशेन तस्य तप्ततैलप्रवेशरूपदण्डकथनं। तत्र भगवन्मन्त्रप्रभावेण अक्षतशरीरस्य तस्य पुनः पित्रा सह पाण्डवकुलहताय प्रयाणवर्णनं। अथ

अर्ज्जुनहन्तस्य सुधन्वशिरसः कृष्णपादयोः पतनकथनं। तथा तदनन्तमस्तकपतने संवृत्ते कृष्णाज्ञया गृहीततन्मस्तकस्य प्रयागमुद्दिश्य चलितस्य गरुडस्य पुरतस्तन्मुण्डग्रहणाय शिवादेशेन भृङ्गिरीटेः पराक्रमप्रदर्शनं। अथ पराजितोऽसौ शिवानुचरोनिजावस्थां पार्व्वत्यै कथयामास। तथा च सोऽखण्डमभिचितोभगवान् भूतपतिः स्ववाहनं जरद्गवं गरुडदर्पनाशाय प्रेरयामास। अथ तन्निःश्वासवातेन संमर्च्छितइव पक्षिराट् कथमपि प्रयागतीर्थे तन्निचिक्षेप। अत्रान्तरे नन्दी तन्मस्तकग्रहणेन शिवसन्तोषमापाद्य तत्कण्ठमालायां योजयामासेतिवृत्तान्तकथनं। अथ तुरगस्य सरोवरप्रवेशेन तुरगीभावप्राप्तिकथनं। ततस्तस्य व्याघ्रभावप्राप्तिकीर्त्तनञ्च।

२१—३६ अध्याये,—अथ स्वभावमापन्नस्य हयवरस्य स्त्रीराज्यप्रवेशपूर्व्वकं तत्र बन्धनप्राप्तिकथनं। अथ युद्धे पराजिताया नारीपुरीस्वामिन्याः प्रमीलायाः पार्थकृतपाणिग्रहणकथनं। अश्वस्य राक्षसपुरीगमनवृत्तान्तकथनं। तस्य मणिपुरगमनप्रसङ्गेन मणिपुरवर्णनं। पितृशापेन चित्राङ्गदाया नक्रीभावप्राप्तिकथनं। बभ्रुवाहनस्य पार्थेन सह युद्धनैपुण्यवर्णनप्रसङ्गेन कुशेन सह रामस्य समरसंरम्भे दृष्टान्ततया समुद्धृङ्क्षिते संक्षेपेण रामचरितवर्णनं। सीतानिर्व्वासनकाले रामेण सह भरतादीनां विवादकथनं। विस्तरेण रामकृताश्वमेधवृत्तान्तकीर्त्तनं। शत्रुघ्नसमीपात् लवस्य बन्धनप्राप्तिकथनादिकञ्च।

३७—४८ अध्याये,—बभ्रुवाहनकृतपार्थवृषकेतुविनाशकथनं। उलूपीचित्राङ्गदयोः परिदेवितवर्णनं। तयोरुपदेशेन सञ्जीवकमणिप्रभावात् तेषां जीवनप्राप्तिकथनञ्च। प्रसङ्गात् बभ्रुवाहनस्य सञ्जीवकमण्यागमविवरणकीर्त्तनं। यदा खलु बभ्रुवाहनेन पार्थोनिपातितस्तदा धृतराष्ट्रोपदेशेन दुर्बुद्धिकृतपार्थशिरोऽपहरणविवरणकथनं। रत्नगराधिपतिपुत्रस्य ताम्रध्वजस्य हयबन्धनवृत्तान्तकीर्त्तनं। तत्र तत्पितुर्मयूरध्वजस्य वृद्धब्राह्मणरूपाय कृष्णाय देहार्द्धदानविवरण कथनञ्च।

४९—५९ अध्याये,—अर्ज्जुनस्य मयूरध्वजादश्वद्वयलाभकथनं। सारस्वतपुरनाथस्य वीरवर्म्मणः अश्वद्वयबन्धनविवरणकथनं। यमेन सह वीरवर्म्मसुताया मालिन्या विवाहकथनं। तत्र यक्ष्मप्रमेहविसूचिकादिरोगाणां वंशादिकथनं। सर्व्वेषां रोगाणां कर्म्मविपाककथनञ्च। अश्वयोश्चन्द्रहासपुरगमनविवरणकथनं। अर्ज्जुनादीनां नारदमुखात् चन्द्रहासनृपतिचरित्रश्रवणकथनं। तत्र एकादशीव्रतमाहात्म्यादिकीर्त्तनञ्च मदनतनयया सार्द्धं चन्द्रहासस्य विवाहादि[illegible]र्त्तनञ्च।

६०—६९ अध्याये,—कौन्तलपस्य राज्ञः पुरतोगालवस्य अरिष्टाध्यायकथनं। चण्डिकागृहे मधुपाननार्थं समुपस्थितस्य मदनस्य बधवृत्तान्तकीर्त्तनं। शालग्रामशिलामाहात्म्यकथनं। अथाश्वयोरुत्तरमहासागरजलप्रवेशवृत्तान्तकीर्त्तनं। तत्र प्रविष्टानामर्ज्जुनादीनां दृष्टवकुलमार्कण्डेयलोमशपतनस्य वकदाल्भ्यस्य मुनेर्द्दर्शनप्राप्तिकथनं। अथ जयद्रथराज्यगमनानन्तरं पार्थस्य दुःशलासमाश्वासनं। विस्तरेण युधिष्ठिरस्य हयमेधमहोत्सववर्णनं। कलिधर्म्मकीर्त्तनञ्च।

No. 2160. आयुर्व्वेददीपिका, वा चरकतात्पर्य्यटीका । Substance, foolscap paper, 12 × 4 inches. Folia, 266. Lines, 9 on a page. Extent, 10,688 ślokas. Character, Bengali. Date, 1277 Bengali era. Place of deposit, Punṭiyá, Zillá Rájaśáhí, Bábu Rádhikádhara Kavirája. (He is a native of S'rírámapura-grám, Post, Dumkolá, Zillá Murisidábád.) Appearance, new. Prose. Incorrect.

Ayurveda-dípiká *alias* **Charakatátparya-dípiká.** A commentary on Charaka's institutes of medicine. By Chakrapáṇidatta. The work of Charaka, which is older than Suśruta, professes to be a compilation from a treatise by A'treya, a Vedic sage. It is divided into eight books, named respectively, Sútrasthána, Nidánasthána, Vimánasthána, Sárírasthána, Indriyasthána, Chikitsitasthána, Kalpasthána, and Siddhisthána. This eightfold division obtains also in Suśruta, but the order of arrangement and some of the names are different. The codex under notice is incomplete, containing only the first five books. Each book has a different series of pagination, and the total thereof is given above. One complete, but incorrect, edition of the text of Charaka has been published in Calcutta, and three incomplete editions are also extant.

Beginning. गुणत्रयविभेदेन मूर्त्तित्रयमुपेयुषे ।
त्रयीभुवे त्रिनेत्राय त्रिलोकीपतये नमः ॥
सरस्वत्यै नमो यस्याः प्रसादात् पुण्यकर्म्मभिः ।
बुद्धिदर्पणसंक्रान्तं जगद्ध्यत्र मीक्ष्यते ॥
ब्रह्मदक्षाश्विदेवेशभरद्वाजपुनर्व्वसून् ।
कृताग्निवेशचरकप्रभृतीन्प्रोन्नमाम्यहम् ॥
पातञ्जलमहाभाष्ये चरकप्रतिसंस्कृते ।
मनोवाक्कायदोषाणां हर्त्रेऽहिपतये नमः ॥
नरदत्तगुरुद्दिष्टचरकार्थानुगामिनी ।
क्रियते चक्रदत्तेन टीकायुर्व्वेददीपिका ॥
सभ्याः सद्गुरुवाक्सुधाश्रुतिपरिस्फीतश्रुतीनस्मि वो-
नालं तोषयितुं पयोदपयसां नाम्भोनिधिस्तृप्यति ॥
व्याख्याभ्यासरसप्रकाशनमिदं त्वस्मिन् यदि प्राप्यते
क्वापि + + कणागुणस्य तदमी कर्णे क्षणं दीयतां ॥

इह हि धर्म्मार्थकाममोक्षपरिपन्थिरोगोपशमाय ब्रह्मप्रभृतिभिः प्रणीतायुर्व्वेदतन्त्रेष्वति-विस्तरत्वेन सम्प्रति वर्त्तमानाल्पायुर्म्मेधसां पुरुषाणां न सम्यगर्थाधिगमः। तदनधिगमाच्च तद्विहितानानुष्ठाने तथैवोपद्रवोऽयजायतेति मन्यमानः परमकारुणिकोभगवानग्निवेशोऽल्पायुर्म्मेधसामपि सुखोपलम्भार्थं नातिसंक्षेपविस्तरं कायचिकित्साप्रधानमायुर्व्वेदतन्त्रं प्रणेतुमारब्धवान्। तस्मिंश्च तन्त्रे सूत्रनिदानविमानशारीरेन्द्रियचिकित्सितकल्पसिद्धिस्थानात्मकेऽभिधातव्ये निखिलतन्त्रप्रधानार्था-भिधायकतया सूत्रस्थानमेवाग्रे वक्तव्यमतोऽन्यद् वक्ष्यति। सूत्रस्थानं समुद्दिष्टं। तन्त्रस्य शिवं शुभं। इत्यादि।

End. अध्यात्मविषयत्वेन पूर्व्वोक्तो + + रोगाधिकारिणां किमयं सप्तकः आयुर्व्वेदमित्या-दि ऋषकः प्रश्नस्तन्त्रार्थमित्यादि। अर्थोमहादग्रमूलीयः।

Colophon. इति श्रीचक्रपाणिदत्तकृतायामायुर्व्वेददीपिकायां चरकतात्पर्य्यटीकायां इन्द्रियस्थानं समाप्तं। सन१२७७ साल।

विषयः। चरकेतिप्रसिद्धचिकित्साशास्त्रस्य व्याख्यानं।

No. 2161. रसेन्द्रसारसङ्ग्रहः। Substance, foolscap paper, 12 × 4 inches. Folia, 108. Lines, 8 on a page. Extent, 3,210 ślokas. Character, Bengali. Date, ? Place of deposit, Punṭiyá, Zillá Rájaśáhi, Bábu Rádhikádhara Kavirája. Appearance, new. Prose and verse. Correct.

Rasendrasára-sañgraha. A pharmaceutical treatise, containing directions for the preparation of metalic medicines, particularly mercurial compounds. Directions are also given for the employment of those medicines in fever and other diseases. Some remarks are also appended on the *rationale* of medical treatment. By Gopálakṛishṇa Kavirája.

Beginning. रसेन्द्रमिव निःशेषजराव्याधिविनाशनं।
प्रणमामि गुरुं भक्त्या शङ्करं योगसाधनं॥
नत्वा गुरुपदद्वन्द्वं दृष्ट्वा तन्त्राण्यनेकशः।
श्रीलगोपालकृष्णेन क्रियते सारसङ्ग्रहः॥
सिद्धयोगाश्च ये केचित् ख्यातिसाध्या भवन्ति हि।
एकीकृत्य तु ते सर्व्वे लिख्यन्ते यत्नतोमया॥
तत्र रसप्राधान्यमाह।
अल्पमात्रोपयोगित्वादरुचेरप्रसङ्गतः।
क्षिप्रमारोग्यदायित्वाद्दोषेभ्योरसोऽधिकः॥ इत्यादि।

End. दौर्भाग्यादिमहादोषात्तस्याः नश्यन्ति सेवया।
अस्य सूत्रस्य माहात्म्यं वेत्ति शम्भुर्न चापरः॥
महानीलकण्ठः।

Colophon. इति रसेन्द्रसारसङ्ग्रहे रसायनाधिकारः।

विषयः। पारदादिधातूनां जारणमारणादिविधिकथनपूर्वकं ज्वरादिषु सर्व्वेष्वधिकारेषु भैषज्यविधानकथनं। भैषज्यकरणप्रकारकीर्त्तनञ्च।

No. 2162. रसमञ्जरी। Substance, country-made paper. 11 × 3½ inches. Folia, 36. Lines, 6 on a page. Extent. 187 ślokas Character, Bengali. Date, ? Place of deposit, Puṇṭiyá, Zillá Rájaśahí, Babu Rádhidhara Kavirája; Appearance, fresh. Verse. Incorrect.

Rasamanjarí. On metalic, principally mercurial, and vegetable medicaments, their preparation and their uses, founded on the works of Chakrapáṇidatta and Náráyaṇa. By S'álinátha.

Beginning. यद्वा मे भूमिपुत्री निवसति सततं निश्चला चञ्चलेव
यस्याः सव्ये धनुष्मान् सुकनकसुषमो लक्ष्मणः शोभमान्।
भक्त्याग्रे षड्वहस्तस्त्रिदशपतिधनुःखण्डवद्भाति चापो-
देवेन्द्रैः स्तूयमानं जलधररुचिरं तं भजे रामचन्द्रं॥
उक्तास्सक्रेण ये द्रव्यगुणा नारायणेन च।
तथान्ये ते विलिख्यन्ते शालिनाथेन यत्नतः॥
क्वचिट्टीकाकृतोव्याख्याविशेषमधिगम्य सः।
पद्येन लिख्यते व्यक्तं व्याख्यानं वचनस्य च॥
अथ द्रव्यगुणा व्यक्तं कथ्यन्ते राजवल्लभाः।
येषां ज्ञानेन भिषजो न मुह्यन्ति कदाचन॥
किञ्चिद्गुणेन कुरुते कर्कपाकेन चापरं।
गुणान्तरेण वीर्य्येण स्वशक्त्या द्रव्यमेव च॥ इत्यादि।

End. येषां परिच्यवति शाश्वतमद्वितीयं
तेजस्तमोनिवहनाशकरं हरस्य॥
तेषां मुखे शशिक + + पल + भाजां
स्वप्नेन वा भवति कालभयं नराणां॥

Colophon. इति श्रीशालिनाथविरचिता रसमञ्जरी समाप्ता।

विषयः। रसधातूपधातुविषादीनां प्रत्येकमधिकारक्रमेण गुणनिरूपणं।

No. 2163. **नाड़ीविज्ञानम्।** Substance, country-made paper, 20 × 3½ inches. Folia, 6. Lines, 7 on a page. Extent, 173 ślokas. Character, Bengali. Date, ? Place of deposit, Puṇṭiyá, Zillá Rájaśáhí, Bábu Rádhidhara Kavirája. Appearance, fresh. Prose and verse. Incorrect.

Náḍivijṇána. On the examination of the pulse in fever and other general diseases. By Govindaráma Sena.

Beginning. यन्नामस्मरणादेव विघ्नं विघ्नन्ति साधवः।
तं गोपवेशं गोविन्दं नौमि सर्व्वभयव्ययं॥
शैलेन्द्रतनयापुत्रं सर्व्वप्रत्यूहनाशनं।
प्रणम्य नाड़ीविज्ञानं लिख्यते शास्त्रदर्शनैः॥
श्रीमद्गोविन्दरामेण सेनेन भिषजाधुना।
श्रीगुरोश्चरणाम्भोजयुगमेवनमाचरात्॥
प्रथमं तावन्नाड़ीपरीक्षणादेव वातादिजनितरोगाणां साध्यासाध्यत्वमविशेषज्ञानमुत्पद्यते।
इत्यादि।

End. तस्माद्विद्वान् प्रयत्नेन तज्ज्ञानं समुपार्ज्जयेत्।
क्वचित् + + + सन्धानात् कालदेशविभागतः॥
क्वचित् प्रकरणाच्चापि नाड़ीज्ञान + + दिह॥

Colophon. इति नाड़ीविज्ञान समाप्तं।

विषयः। ज्वरादौ नाड़ीपरीक्षाविधिकथनं।

No. 2164. **णत्वभेदः।** Substance, country-made paper, 20 × 5 inches. Folium, 1. Lines, 12 on a page. Extent, 27 ślokas. Character, Bengali. Date, ? Place of deposit, Puṇṭiyá, Zillá Rájaśahi, Paṇḍit Íśáṇachandra Vidyávágíśa. Appearance, fresh. Verse. Correct.

Natvabheda. A vocabulary of words having the cerebral ṇ. By Mádhava Áchárya.

Beginning. स्थाणुर्व्वाणो गुणः कोणो लवणं पण इत्यपि।
वाणी मणिः फाणितञ्च गणो वेणुः कणा कणः॥ इत्यादि.

End. मल्लवाची च चाणूरः स्थूणा स्तम्भस्य वाचिका।
औपदेशिकणत्वेषु शब्दाः केऽपि न कीर्त्तिताः॥

Colophon. इति माधवाचार्य्यकृतो णत्वभेदः समाप्तः।

विषयः। स्वभावादेव मूर्द्धन्यणकारयुक्तानां शब्दानां प्रदर्शनं।

No. 2165 रसेन्द्रकल्पद्रुमः। Substance, country-made paper. 21 × 4 inches. Folia, 111. Lines, 7 on a page. Extent, 3,753 ślokas. Character, Bengali. Date, ? Place of deposit, Puṇṭiyá, Zillá Rájas'áhí, Bábu Rádhikádhara Kaverája. Appearance, old. Prose and verse. Correct.

Rasendra-kalpadruma. A treatise on various kinds of instruments, furnaces, retorts, sublimators, &c., for the preparation of mercurial medicines. By Rámakrishṇa Bhaṭṭa, Mahámahopádhyáya, son of Nílakaṇṭha Bhaṭṭa, a Vaidika Bráhmáṇa of Drávida. The number of instruments described is large, and the details given are full, obviously the work of a practical pharmaceutist.

Beginning. लोकेशं व्यक्तमव्यक्तं निर्गुणं त्रिगुणात्मकं।
सदसद्रूपिणं वन्दे तं कारणमकारणम॥
वन्दे चरणसरोजं श्रीगौरीनीलकण्ठयोः पित्रोः।
यद्भक्त्या कृतकृत्यास्तरन्ति दुःखाम्बुधिं लोकाः॥
तापत्रयापहर्त्ता हरिरिव बलिजिद्धिरण्यगर्भाढ्यः।
स जयति शुद्धोऽदीप्तः पीताम्बर एष पारदो हरजः॥
रसलोहोपरसादेः शुद्ध्याद्याः सिद्धियोगाश्च।
तत्तद्रसेन्द्रतन्त्राद्रसेन्द्रकल्पद्रुमे वाच्याः॥
वेमल्लपल्लिग्रामिक आत्रेयः कौशलेयकुलजनितः।
श्रीरामकृष्णभट्टः कृतिमानिह नीलकण्ठभट्टसुतः॥
अनधिगतस्तुतशास्त्रश्चिकित्सति प्राज्ञमानी यः।
स कथं सरससमाजे नो यात्युपहास्यतां वैद्यः॥ इत्यादि।

End. पक्वाशयगते कुर्याद्रेचनं चोभयोर्द्वयं।
इति विषाधिकारः।
इतीदमुक्तं निखिलामयेषु सुस्थेषु चैवोभयकर्म्मकारि।
सिद्धौषधं यत् सुलभं प्रसिद्धं यच्चानुभूतं व्यवहारसिद्धं॥
सिद्धौषधमत्राभिचरितशक्तिकमिति।

Colophon. इति दाक्षिणात्यद्राविड़वैदिक-श्रीनीलकण्ठभट्टात्मज-श्रीरामकृष्णभट्टमहामहोपाध्यायकृते रसेन्द्रकल्पद्रुमे प्रयोगकाण्डः समाप्तः। समाप्तश्चायं रसेन्द्रकल्पद्रुमाभिधो ग्रन्थः॥

विषयः। रस (पारद) शुद्धि-मूर्च्छा-बन्धन-मारणादिविधिकथनं। एवमभ्र-गन्धक-माणिक-हरिताल-मनःशिला-हिङ्गुलशोधनादिकथनं। तथा चपलविमलादिशोधनकथनं। लोहभं-

खानिविधिः। स्वर्ण-रौप्य-ताम्र-सीसक-रङ्ग-लौहप्रभृतीनां मारणविधिः। गणाध्यायकथनं। यन्त्राध्यायकथनं। तत्र, दोलायन्त्रं। स्वेदनीयन्त्रं। कच्छपयन्त्रं। सोमानलयन्त्रं। हंसपाकयन्त्रं। पटयन्त्रं। पातन-डमरु-लवणयन्त्राणि। भूधरयन्त्रं। वज्रमूषायन्त्रं। वालुकायन्त्रं। नलिकायन्त्रं। जालिकायन्त्रं। गौरीयन्त्रं। तप्तखल्लयन्त्रं। कोष्ठयन्त्रं। टङ्कयन्त्रं। जलयन्त्रं। एतेषां यन्त्राणां निर्म्माणप्रक्रियाकथनं उपयोगिता निरूपणञ्च। रसायनविधिकथनं। ज्वरादिषु सर्व्वेषु रोगेषु भैषज्यनिरूपणं। औषधकरणविधिकीर्त्तनञ्च।

No 2166. त्रिपुरासुन्दरीस्तुतिकाव्यम्। Substance, country-made paper, 14 × 4 inches. Folia, 34. Lines, 9—10 on a page. Extent, 827 ślokas. Character, Bengali. Date, ? Place of deposit. Puṇṭiyá. Zillá Rajaśáhí, Mahárání S'aratsundarí Deví. Appearance, old. verse. Correct.

Tripurásundarí-stuti-kávya. A lyrical poem in praise of the goddess Tripurásundarí and of her achievements. By Kálidása, son of Rámagovinda. The work is an imitation of the Gítagovinda of Jayadeva.

Beginning वन्दे वागीशवन्द्यां त्रिपुरपरगतां सुन्दरीं दिव्यवेशां
प्रातर्मार्त्तण्डपुञ्जद्युतिजयिवपुषं सच्चिदानन्दरूपां।
भक्ताभीष्टातिरिक्तप्रदपदकमलां सस्मितां सानुकम्पां
कृत्या चित्रायमानामखिल + + तनुं शम्भुसम्भोगभङ्गां॥

— — — — — — — — — — — ।

उद्यच्छ्रीभुवनेश्वरीपदपरः श्रीशङ्करामेश्वरो-
दाता श्वशुरदरिद्रतोषधवरः सर्व्वंशनाकोज्ज्वलः।
नाम्ना रामगतिस्मृतिर्न हि कथं चेदीदृशोऽयं कृती
पीयूषप्रभवोदयालुरनघः सर्व्वप्रियः सर्व्वदा॥
श्रीकालीचरणाक्कयोगुरुरतः श्रीमत्प्रभामातुल-
स्तन्वीया परया शिवार्च्चनमनाः श्रीरामगोविन्दजः।
श्रीलश्रीहरिनन्दनः सुविदितः श्रीकाकदेवे महान्
राढीयद्विजनायकोमुखवरस्तस्यान्वये सम्भवः॥

— — — — — — — — — ।

रामेश्वरकृतबकुवरिवस्यः।
प्रचलितचिन्तनभावनमस्यः॥ इत्यादि।

End. हरिहरहरनतीर्प्रादिवरङ्गप्रणाः प्रणयवशतिपादाम्भोजधूलिप्रसक्ताः।
गमयितुमिदमायर्याचते माधमङ्गं स्वजनसुखविधाने कामकामारिकामे॥

धीरान्तोषकारी मुखकुलविदितोमातृमत्याद्विभामा
तातश्रीरामनोविन्दचरणशरणः श्रीमतः कालिदासः ।
सर्गोऽयाद्द्वादशोऽयं त्रिभुवनजननीस्तोत्रमाध्ये सुकाव्ये
नव्ये तस्यातिभव्ये सुत भव उत तत्साधवः श्लाघयन्तु ॥

Colophon. इति श्रीत्रिपुरसुन्दरीस्तुतिकाव्ये द्वादशः सर्गः ॥
शाकेऽग्निमुनिषट्चन्द्रमानितेऽब्दे कृतं मया ।
मातापितृपदध्यानकालिदासेन धीमता ॥

विषयः । प्रथम सर्गे,—त्रिपुरसुन्दर्य्या आविर्भाववर्णनं । २ये सर्गे,—तस्यास्तपस्यावर्णनं । ३ये सर्गे,—तस्या माहात्म्यवर्णनं । ४र्थे सर्गे,—तत्कृतजगत्सृष्टिवर्णनं । ५मे सर्गे—जगद्रक्षणनाशनत्व-वर्णनं । ६ष्ठे सर्गे,—देव्याः शरीरवर्णनं । ७मे सर्गे,—रूपवर्णनं । ८मे सर्गे,—स्वाभीष्टसिद्धये प्रार्थनावर्णनं । ९मे सर्गे,—देव्या रत्याभासवर्णनं । १०मे सर्गे,—सुरसंसदि देव्या अधिष्ठानवर्णनं । ११शे सर्गे,—देवीभक्तमाहात्म्यवर्णनं । १२शे सर्गे,—भक्तमनोभिलाषवर्णनमुखेन देव्या नाममाहात्म्यादिकीर्त्तनञ्च । (जयदेवकृतगीतगोविन्दानुकरणेन निर्म्मितमिदं गीतकाव्यमिति भ्रम् ।)

No. 2167. गीर्व्वाणपदमञ्जरी । Substance, country-made paper, 14 × 4, inches. Folia, 15. Lines, 8 on a page. Extent, 318 ślokas. Character, Bengali. Date, ? Place of deposit, Puṇṭiyá, Zillá Rájaśáhí, Mahárání Saratsundarí Deví. Appearance, fresh. Prose and verse. Incorrect.

Girváṇa-padamanjarí. An elementary grammar of the Sanskrit language, in the form of a dialogue, interspersed with moral tales. By Varadarája.

श्रीगणेशाय नमः ।

Beginning. कुत्रत्या भवन्तः । कस्मादागताः । कां दिशमलङ्कुर्वन्ति स्म । कां दिशमलं कर्त्तुमीहा । कुत आगताः कर्णाटदेशादागताः । कस्मादेशात् समागता भवन्तः । महाराष्ट्रदेशात् समागतावयं । के यूयं । वयमुत्तरदेशिकाः । किमागमनकारणं । अत्र किञ्चित् प्रयोजनमुद्दिश्य समागतास्माभिः । इत्यादि ।

End. मम यद्यद्वस्तु भक्षणीयं तदेव मया गृहीत स्वामिनः ॥
कृता वरदराजेन गीर्व्वाणपदमञ्जरी ।
गर्म्भप्रीतये चैव वैदिकप्रीतये तथा ॥

Colophon. इति श्रीगीर्व्वाणपदमञ्जरी समाप्ता ।

विषयः । बालानां संस्कृतप्रवेशाय प्रश्नोत्तरक्रमेण संस्कृतवाक्यरचनाप्रकारकीर्त्तनं । कचिदुपन्यासावतारेण च हितोपदेशकथनञ्च ।

No. 2168 देवीभक्तिरसोल्लासः। Substance, country-made paper. 11 × 4 inches. Folia, 10. Lines, 9 on a page. Extent, 222 ślokas. Character, Bengali. Date, ? Place of deposit, Puṇṭiyá, Zillá Rájaśáhí, Mahárání S'aratsundarí Deví. Appearance, fresh. Verse. Incorrect.

Devíbhakti-rasollása. The work is divided into two parts, the first treating of Siddhi Yoga in course of a hymn in praise of the goddess Durgá, and the second of the true nature of Vidyá, or the female energy. By Jagannáráyaṇa.

Beginning. परब्रह्माभे स्फुरितमहमोहद्द्यवहसो-
वचोद्योतस्वाध्यस्ताखिलजगदतीवोग्रतमसः।
स्मरन्मर्त्त्यामर्त्त्यान्धपरमनिर्व्वाणरहमः
स्मरामि श्रद्धालुः सुगरिमगुरोः पादकमलं॥
कुलीनश्चापश्चासुरभुवननारायणसुतो-
जगत्पूर्व्वानारायण उदितभक्तिर्गिरिभुवोः।
मुदा देवीभक्तिप्रकल्पितरसोल्लासममलं
विधत्ते विज्ञात्मा स्वविविदिषया साधनविधेः॥

End. महावाणी विद्याधनविरचितैषाऽतिविषदा
गुणाप्ताऽनल्पाप्ता निरवधिनवीना रुचिकरी।
सुरम्या सम्मान्या श्रभिसुदीप्तोज्ज्वलतरा
सतां कण्ठे्लुठ लगतु गजमुक्तास्रगिव मे॥

Colophon. इति देवीभक्तिरसोल्लासे जगन्नारायणकतोऽभिलाषे विरचितमहद्दयहृदय विरागः शेषविभागः।

विषयः। प्रथमविभागे देव्याः स्तोत्रकीर्त्तनमुखेन नैष्कर्म्म्यसिद्धिनिरूपणं। द्वितीये विद्यास्वरूपादिकथनं।

No. 2169. मुग्धबोधपरिशिष्टम्। Substance, country-made paper. 11 × 4 inches. Folia, 157. Lines, 5 on a page. Extent, 1,858 ślokas. Character, Bengali. Date, ? Place of deposit, Puṇṭiyá, Zillá Rájaśáhí, Paṇḍit I'śanachandra Vidyávagíśa. Appearance, old. Prose. Correct.

Mugdhabodha-pariśishṭa. A supplement to the Mugdhabodha grammar, of Vopadeva. By Ráma Tarkavágíśa. The work has been printed in Calcutta.

Beginning. नत्वा शम्भुपदाम्भोजमणिमाद्यष्टसिद्धिदं ।
मुग्धबोधस्यावशेषस्त्यन्ते रामशर्म्मणा ॥

विंशत्यादेरनाहत्ता वेवर्क्ता । विंशत्यादेः परार्द्धपर्य्यन्ते वेवर्क्ता स्यात् । अनाहत्ता सत्यां । एकोनविंशतिः शूराः । इत्यादि ।

End. घुनन्वत्याः । विभिन्नकालीनतया घुनन्वन्ते माधवः स्युः । अग्निष्टोमयाजी पुत्रोजनिता कृतः कटः श्वोभविता गोमानादीत् यशस्वी भविता इत्यादौ ।

विद्वद्वन्द्योद्ववन्द्योऽमरगुरुरिव बोवोपदेवः कवीन्द्र-
स्तेन व्याख्यातिशास्त्रं कठिनतरमपि प्रेक्ष्य विस्तार्य्य यत्नात् ।
नानातन्त्राणि दृष्ट्वाऽसममतविहितं रामशर्म्माऽवशेषं
तस्यासावग्रुबोधं जडमतिमतये श्रीगतः सन्ततन ॥

Colophon. इति महामहोपाध्यायश्रीरामतर्कवागीशविरचितं मुग्धबोधपरिशिष्टं परिपूर्णं ।

विषयः । वोपदेवकृतमुग्धबोधव्याकरणानुक्तानां वैयाकरणप्रक्रियाणां सोदाहरणलक्षण-प्रदर्शन ।

No. 2170. उष्मभेदः । Substance, country-made paper. 18 × 5 inches. Folia, 2. Lines, 9 on a page. Extent, 90 ślokas. Character, Bengali. Date ? Place of deposit, Puntiyá, Zillá Rájaśáhí, Pandit I'śánachan ra Vidyávágíśa. Appearance, old. Verse. Correct.

Ushmabheda. Three separate vocabularies of words which have naturally the three sibilants. By Purus'ottama.

Beginning. श्रेयःशर्म्मनिशातशातशकटं संचिच्छशीविस्मेसः
स्वच्छश्रीपदशाङ्गशोभनकृशः शूलं शरण्य ।शम ।
शृङ्गः दर्शनशातनं शुभशत किशारशूर्पांशव
स्विचं श्रोत्रकशेशशौरिशरः शेवालशफश्रतं । इत्यादि ।

End. संमनं सीमकं सस्यं मन्हनाहसमाश्रमं ।
सहमारससंसारसाधुसमुद्रसोदराः ।
+ + + कमहरत्र दन्त्यसत्वेन संस्थिताः ॥

Colophon. इति पुरुषोत्तमविरचित उष्मभेदः समाप्तः ।

विषयः । स्वभावादेव शषसयुक्तानां शब्दानां निर्द्देशकीर्त्तनं ।

No. 2171. **हैमाङ्गिकी ।** Substance, country-made paper, 14 × 4 inches. Folia, 16. Lines, 8 on a page. Extent, 564 ślokas. Character, Bengali. Date, ? Place of deposit, Puṇṭiyá. Zillá Rájaśáhi, Raya Nimanáráyaṇa Ṭhákura. Appearance, fresh. Verse. Correct.

Haimáṅgíkí. A poem in praise of Gauráṅga, describing his career and his merits, and proving him to be an incarnation of Vishṇu. By Mahes'anáráyana S'armá, disciple of Rádháramaṇadása, a Vaishṇava of great sanctity.

Beginning. चेतोभिः कलितः सदा मिह नवद्वीपे पुनद्यं दध-
हेम्नां कान्तिमयं यतीन्द्रचरितां मूर्त्तिं मदद्रूण फलं ।
श्यच्यां प्रादुरभावि यः कलिमलध्वान्तार्कमद्भ्राजितं
तं सर्व्वद्रविणेन्द्रवन्दितपदं चैतन्यदेवं भजे ॥
छन्दोभिस्तदमाध्वरेण वदनेनाराध्य योगाध्वना यं
भक्ताः कवयोऽभियन्ति सुमहज्योतिः किलाङ्कः परं ।
यं ब्रह्म पुनरोऽपि योनिविलयं भूयांमसस्या ययं
तस्यायं पु.षे तमस्य विहितः पीतावतारः कलौ ॥
षड्भिर्दस्युजनैर्दुरन्तगहनं नीत भ्रमं दुःखिता
दृष्ट्वा हृष्टकुटुम्बकण्टकमिदं वात्यामरु द्रोपितं ।
भिल्लीस्वानमरीरितं विपद्धरं ग्राणद्यादिभ्रैवनरं
सद्यः प्राणहरं कृतान्तरभमं शार्दूलविक्रीडितं ॥
ये नेमं हरिमाश्रयन्ति शरणं निर्ल्लिप्तमाकाशवद्
भसानं सकलेषु भूतनिकरेष्वन्तर्वहिः साक्षिणं ।
तेषां भारतभूजनिः किमसतां साफल्यमासेदुषी
तस्मादाशु निषेवतामशठधीः कृष्णाङ्घ्रिपङ्केरुहं । इत्यादि ।

End. तत्त्वावबोधकमयं ददद्भक्तिमनुत्तमां ।
श्रीमद्भागवतं भूयादस्मज्ज्ञायां सदा मम ॥
नमो नारायणाय दो नराय च नमोनमः ।
नरोत्तमाय भारत्यै वेदव्यासाय ते नमः ॥

Colophon. इत्यशेषशास्त्रादपर्विद्याभ्यासप्रवचनसमवमायानुशीलनप्रागल्भ्योपचितपुण्ययशश्चन्द्रिकापरिपूरितसमस्तदिङ्मण्डला खल्वरण्यारण्यवरिष्ठश्रीवृन्दारण्यविराजमानपरमभागवतश्रील-श्रीमद्राधारमणदासाभिधान-श्रीवैष्णवाचार्य्यवर्य्यपादानुशिष्य-श्रीमहेशनारायणद्विजविरचिता हैमाङ्गिकी नाम श्रीमद्गौराङ्गदेवस्तुतिः समाप्ता ।

विषयः। गौराङ्गापरनामधेयस्य चैतन्यस्य स्तवव्याजेन तस्य भगवदवतारसंस्थापनं माहा-त्म्यवर्णनं चरितकीर्त्तनञ्च।

No. 2172. तन्त्रप्रदीपः। Substance, palm leaf, 12 × 2 inches. Folia, 187. Lines, 7 on a page Extent, 6,691 ślokas. Character, Bengali. Date, Sk., 1493. Place of deposit, Puntiyá, Zillá Rájaśáhí, Ráya Níma-náráyana Ṭhákura. Appearance, decayed. Prose. Incorrect.

Tantra-pradípa. A commentary on the Sáradá-tilaka, a Tantra of considerable repute. By Lakshmaṇa Des'ika.

Beginning. लक्ष्मीदृगम्बुरुहचुम्बनसंविधान-
लग्नाञ्जनं मधुरमाननमच्युतस्य।
माध्वीकसौरभविलासकलाविलम्बि
वोलम्बमम्बुजमिव श्रियमातनोतु॥
क्षौणीपालकिरीटरत्नतरणिप्रोद्यत्प्रभामण्डल-
स्मेरस्मेरपदार — — — — — —।
— — — — राघवेन्द्रसुकृती दारिद्र्यविद्रावण-
स्तस्मादाविरभूद्गदाधर इतिख्यातः कुमाराग्रणीः॥
श्रीशारदातिलकदुर्गममार्गवीथ्या-
मज्ञानसान्द्रतमसोतितिरोहितायां।
संख्यावतामनुपदं स्खलितं विलोक्य
— — — — — — — — — ॥

अस्य तन्त्रस्य देवताप्राधान्याद्देवतानाञ्च मन्त्रमयतया मन्त्राणामपिवर्णात्मकतया वर्णाना-मपि शक्तिपरिणामित्वात् शक्तेरपि शिवाभिन्नतया तन्त्रमूलं दैवतं शिवं मूलीभूतं — — — — — — — — — — शिष्यशिचार्थे तन्निबध्नाति। विद्यानन्देति। इत्यादि।

End. देशिकोग्रन्थकारगुरुः। तस्यैतानि विशेषणानि। शेषं सुगमं॥
प्राभूद्भूदेवराजोजितरिपुनृपतिर्दर्पनारायणाख्य-
स्तस्यापि द्वौ तनूजौ हरिहरविभवौ रामसौमित्रिमित्रौ।
तत्र श्रीधीरसिंहः क्षतमदन + + + कणीयान्
पारीन्द्रोयेन सद्योद्रुतविपुलमदोद्रावितोरावणेन्द्रः॥
श्रीधीरसिंह + + + श्रीराघवेन्द्रः सुरपादपोऽभूत्।

यदङ्कमप्यापि + + + लक्ष्मीर्मङ्गसुराणां विलये व्यपासीत् ॥

— — — — — — — — — —।

— — — नादित्यप्रकाशस्थितचरणसरोजन्मविश्रान्तकीर्त्तिः।

भूपः श्रीरामभद्रोधरणिसुरतरुर्भैरवेन्द्रात्मजन्मा

चौणीमेतामिदानीं चतुरुदधि + + पूरसीमां प्रशास्ति॥

श्रीराघवेन्द्रप्रभवप्रभावी गदाधरोनाम कुमारराजः।

श्रीशारदायास्तिलकप्रकाशं तन्त्रप्रदीपं समपूरि धीरः॥

श्रीधीरसिंहात्मजराघवेन्द्रतनूप्रसूतस्य गदाधरस्य।

तन्त्रप्रदीपे समपूरि पञ्चविंशप्रकाशोभुवनप्रकाशः॥

शुभमस्तु १४९३।

विषयः। लक्ष्मणदेशिककृतशारदातिलकस्य व्याख्यानं।

No. 2173. सात्त्वताचारवादार्थः, वा भक्तिविलासमतदीपिका। Substance, country-made paper, 9 × 4 inches. Folia, 102. Lines, 7—8 on a page. Extent, 1,516 ślokas. Character, Bengali. Date, ? Place of deposit, Punṭiya, Zillá Rájaśáhí, Ráya Nímanáráyaṇa Ṭhákura. Appearance, fresh. Prose and verse. Generally correct.

Sáttvatácháravádártha *alias* **Bhaktivilása—matadípiká.** A dissertation on the propriety of abstaining, on the part of Vaishṇavas, from slaughter even for sacrifices ordained in the S'ástras, particularly at the Durgápújá festival. By a disciple of Rádháramanadása, of Vrindávana.

Beginning. अपि वैधत्वबुद्ध्या यद्बुद्धिः प्राणिविहिंसके।

न तेषामधिकारोयद्धर्म्मे तद्विष्णवे नमः॥

हिंसा चतुर्विधीनैर्य्या पारम्पर्य्योपदेशतः।

वैधी श्रेयस्तथैताहङ्कमते ह्यपास्यते हि सा॥

शारदश्रीमहामायापूजनादिविधाविह।

गौड़ादौ निवसङ्गौड़सम्प्रदायाभिमानिनः॥

प्रायशोवैष्णवंमन्याः कुर्व्वन्ति पशुघातनं।

सच्छन्दं महिषच्छागच्छतजैः चितिकर्द्दमं॥

तदेतद्वक्ष्यमाणाया अपि देयास्तु विद्विषं।

दुर्म्मतं तद्विधाज्ञानाध्यवसायकृतं मया॥

बहुमानोपपत्तिभ्यां निराकर्त्तुं विलिख्यते ।
स्मार्त्तादिमतमाक्षिप्य श्रीमधर्म्मवहिर्म्मुखं ॥
— — — — — — — — —।

वैधत्वबुद्ध्या मनसापि प्राणिविहिंसनाद्यसहमानेभ्यस्तत्परेभ्योजनेभ्यस्तन्महदेकान्तपरायणस्य हरेः——इत्यादि ।

End. इमं भागवतादिशास्त्रविहिताहिंसाख्यसिंहस्वने-
स्नाद्दक्स्मार्त्तमतञ्च यूथपतयस्त्यक्त्वा सुपेतुः क्षितौ।
दीना वादिविदारकाः परमतः श्रावान् श्रनेर्विभ्यतो-
बद्दान् मुञ्चत मायिकाः त्रियकृतस्वेत् स्वात्मभूतेष्वलं॥
यत्प्रत्तागमरीतिरेष निखिलश्रोताचराणभ्यधात्
स्राघ्यश्रीयुतदाक्षिणात्यगुरुभिः ख्यातश्च मह्यां कविः ।
श्रीराधारमणप्रियोद्विजवरस्तद्दासनामाचरो-
वृन्दारण्ये वरालयोमम गुरुर्ज्ञानोपदेष्टा हि सः ॥

Colophon. इति सात्त्वताचारवादार्थापरनाम्न्यां भक्तिविलासतत्त्वदीपिकायां वैधहिंसापरिहारः ।

विषयः । निसर्गकरुणात्मभिर्वैष्णववर्त्मानुसारिभिः सभक्तिकयथावद्वैष्णवत्वमिच्छद्भिः सात्त्वतगणैर्वैधहिंसापि मा जातु कर्त्तव्येति श्रुतिस्मृतिपुराणादिप्रमाणसंवादेन विविधवादप्रदर्शनेन च प्रतिकूलवादखण्डनपूर्व्वकं सर्व्वथापि हिंसायास्त्याज्यत्वनिरूपणं ।

No. 2174. **स्मृतिसङ्ग्रहसारम् ।** Substance, country-made paper, 14 × 3 inches. Folia, 27. Lines, 7 on a page. Extent, 811 ślokas. Character, Bengali. Date, ? Place of deposit, Ulá, Post Ráṇágháṭa, Zillá Nadiyá, Bhavaśaṅkara Bhaṭṭáchárya. Appearance, old. Verse. Correct.

Smṛiti-saṅgrahasára. A collection of Vyavasthás on various Smriti topics, founded on the rules laid down in Raghunandana's digest. By Mahes'a Pañchánana.

Beginning. प्रणम्य गोपालपदारविन्दं विलोक्य मन्वादिकृतञ्च शास्त्रं ।
अवश्यकर्त्तव्यविधानहेतुं महेशशर्म्मा वितनोति धीरः ॥
विहितस्य निषिद्धस्य कर्म्मणोज्ञानकारकः ।
व्यवस्थासङ्ग्रहः सर्व्वैः पण्डितैः परिलिख्यते ॥
ब्राह्मणक्षत्रियविशां जनने मरणे तथा ।
दशद्वादशपक्षाहैः शुद्धिः शूद्रस्य मासतः ॥ इत्यादि ।

End. अष्टवर्षा भवेद्गौरी नववर्षा तु रोहिणी ।
दशमे कन्यका प्रोक्ता अत ऊर्द्ध्वं रजस्वला ॥

Colophon. इति श्रीमहेशपञ्चाननविरचितं स्मृतिसङ्ग्रहसारं समाप्तं ।

विषयः । रघुनन्दनमतमधिगम्य विरचितोऽयं सङ्ग्रहः । तत्र अशौचनिरूपणं । शुद्धिनिरूपणं । मलमासादिनिरूपणं । परिणयादिकर्म्मविशेषे सौरमासादिनियमनं । सङ्कल्पवाक्यरचनाविधिकथनं । युग्मादितिथिविवेचनं । एकादश्युपवासनिरूपणं । पारणविधिनिरूपणं । जन्मतिथिनिरूपणं । संक्रान्तिनिरूपणं । ग्रहणादावामश्राद्धविधिकथनं । पुरश्चरणविधिः । सावित्रीचतुर्द्दशीविधिः । दशहरादिनिरूपणं । रथयात्रादिविधिः । जन्माष्टम्यादिविधिः । शारदीयापूजाकोजागरादिलक्ष्मीपूजादिनवान्नविधानं । श्रीपञ्चमी । शिवचतुर्द्दशी । अशोकाष्टमी । श्राद्धविधिः । सपिण्डीकरणादिविधिः । आह्निककृत्यविधिः । उद्वाहविधिः । तत्र सापिण्ड्यादिनिरूपणञ्च । (अत्र सर्व्वत्र व्यवस्थासौष्टवं दृश्यते ।)

No. 2175. दुर्गावबोधिनी । Substance, country-made yellow paper, 13 × 3 inches. Folia, 27. Lines, 8 on a page. Extent, 848 ślokas. Character, Bengali. Date, Sk. 1712. Place of deposit, Ulá, Post Ráṇágháṭa, Zillá Nadiyá, Bhavaśaṅkara Bhaṭṭáchárya and Gopivallabha Bhaṭṭácharya; another copy at S'ántipura, Kálidása Vidyávágíśa. Appearance, fresh. Prose. Correct.

Durgávabodhiní. A commentary on the Chaṇḍí section of the Márkaṇḍeya Puráṇa. By Chaturbhuja Mis'ra.

Beginning. एकमूर्त्तिरपि भिन्नरूपिणी या जगज्जननपालनक्षये ।
काच्युतेश्वरतया विवर्त्तते ब्रह्मशक्तिमहसा नतोऽस्मि तां ॥
श्रीचतुर्भुजधराम्रतान्भसा चण्डिकासुचरितं विविच्यते ।
धीरसार्थ इह तुष्यतां यतः कौरवाण्यपि सतां विनोदिनी ॥

प्राक् किल भगवद्वादरायणान्तेवासी जैमिनिर्महाभारतविषयेषु केषुचित्पदार्थेषु सन्दिहानो मार्कण्डेयमहर्षिमुपगम्याप्राक्षीत् । अथ नायमस्माकं कथाक्षण इति सर्व्वार्थाभिज्ञान् विन्ध्याचलनिलयांश्चतुरः पक्षिणः पृच्छत मुनिनोपदिष्टोऽसावपि तथैवाकार्षीत् । — — — —•— — अष्टममन्वन्तरमुपक्रममाणा धर्म्मपक्षिणः ऊचुः । मार्कण्डेय उवाचेत्यादि । मृकण्डोरपत्यं मार्कण्डेयः इत्यादि ।

End. देवीमाहात्म्यतात्पर्य्यटीका दुर्गावबोधिनी ।
श्रीचतुर्भुजमिश्राणां कृतिरास्तामियं चिरं ॥
श्रीचतुर्भुजमिश्रेण प्रहैर्य्यामरमाननैः ।

वेदनवविधौ शाके टीका दुर्गावबोधिनी ॥

Colophon. इत्योपमन्यवश्रीचतुर्भुजमिश्रविरचितायां देवीमाहात्म्यतात्पर्य्यटीकायां दुर्गावबोधिन्यां देवीमाहात्म्यं समाप्तं ।

शाके रविद्वये चन्द्रे सूर्य्ये कर्कटसंस्थिते ।
देवीमाहात्म्यटीकां हि काशीनाथोऽलिखन्मुदा ॥

विषयः । चण्ड्यपरनामधेयदेवीमाहात्म्यस्य व्याख्यानम् ।

No. 2176. अनुमानदीधितिसारमञ्जरी । Substance, country-made paper, 18 × 2½ inches. Folia, 159. Lines, 6 on page. Extent, 8,111 ślokas. Character, Bengali. Date, ? Place of deposit, Ulá, Post Ráṇágháṭa, Zillá Nadiyá, Dínanátha Bhaṭṭáchárya. Appearance, old. Prose. Correct.

Anumána-didhitisára-manjarí. Glossarial notes on Raghunátha's commentary on the Anumánakhaṇḍa of Gaṅgeśa. By Siddhántavágís'a Bhaṭṭáchárya.

Beginning. प्रथमतः चत्वारि पत्राणि न सन्ति । संयोगादिसम्बन्धेन उपाधावव्यभिचारित्वमित्यादिदूषणमनवकाशं विशेषणतावच्छिन्नेति साध्याव्यापकसाधनाव्यापकत्वेत्यादि ।

End. नीलविशिष्टधूमेऽपि विशेष्यत्वस्य उपाधेः सत्त्वेन निरुपाधिसाधनाव्यापकत्वादिति विशेष्यत्वपर्य्यन्तपाठस्य चाप्रामादिकत्वादुपेक्षितं ॥

Colophon. इति महामहोपाध्यायश्रीसिद्धान्तवागीशभट्टाचार्य्यविरचिता अनुमानदीधितिसारमञ्जरी समाप्ता ।

विषयः । रघुनाथशिरोमणिकृतानुमानखण्डदीधितेर्व्याख्यानम् ।

No. 2177. संस्कारपद्धतिरहस्यम् । Substance, country-made paper, 18 × 2½ inches. Folia, 88. Lines, 6 on a page. Extent, 2,519 ślokas. Character, Bengali. Date, Sk. 1575. Place of deposit, Ulá, Post Ráṇághaṭa, Zillá Nadiyá, Dínanátha Bhaṭṭáchárya. Appearance, decayed. Prose and verse. Correct.

Sañskára-paddhati-rahasya. A commentary on Bhavadeva Bhaṭṭa's treatise on Sañskáras. By Rámanátha Vidyáváchaspati. The commentator not only explains all difficult passages, but also supplements the text with expositions of topics not therein referred to, but which are germane to the subject.

Beginning. पाण्डवयज्ञसदस्यं सततमुपास्यं विधीन्द्राद्यैः ।
वेदाविदितरहस्यं गिरिशमनस्यं नमस्यामः ॥
गृह्यपरिशिष्टसारं वारं वारं विचार्य्य चिन्वानः ।
सामगकर्म्मरहस्यं विद्यावाचस्पतिर्विकाशयति ॥
भवदेवीयच्छान्दोगकर्म्मानुष्ठानपद्धतौ ।
उक्तानुक्तदुरुक्तानि चिन्तयामि प्रमाणतः ॥

ग्रन्थारम्भे विघ्नविघाताय कृतं समुचितेष्टदेवनतिरूपमङ्गलं शिष्यशिक्षायै प्रसङ्गादध्येत्रध्यापकलेखकादीनां मङ्गलसम्पत्तये ग्रन्थादौ निबध्नाति चतुर्व्वेदनेति ।

End. इदं सर्व्वं विवेचितं श्राद्धरहस्यसंस्काररहस्यरहस्येषु ।
तन्त्रं सौवर्णमिदं मत्स्वरवाग्दहनदीपितं विमलं ।
तान्त्रिककरावलम्बान्मधुरस्वरीणं ध्वनिं तनुते ॥
निरवद्या सदा सर्व्वविद्या यस्य पुरःसरी ।
श्रीवाचस्पतिना तेने तेनेदं तन्त्रमुत्तमं ॥
वेदवेदेषुशीतांशुगणिते शाकवत्सरे ।
भवदेवीयटीकेयं रामनाथेन निर्म्मिता ॥

Colophon. इति महामहोपाध्यायश्रीरामनाथविद्यावाचस्पतिविरचिते संस्कारपद्धतिरहस्ये द्वितीयः परिच्छेदः । समाप्तश्चायं ग्रन्थः ।
यथादृष्टं तथाङ्कितं लेखके नास्तिदूषणं ।
भीमस्यापि रणे भङ्गो मुनीनाञ्च मतिभ्रमः ॥
शाके वाणाचलतिथिमिते भास्करे कर्कटस्थे
विंशत्यंशे विधुसुतदिने शुक्लपक्षे च षष्ठ्यां ।
व्यालेख्येषा सहृदयजनाश्चिन्तयित्वा क्षमध्वं
दोषांश्चाचारलिपिकृतान् तत्त्वतो दूरयित्वा ॥

विषयः । भवदेवभट्टकृतसामवेदीयसंस्कारपद्धतेः अनुक्तांशपूरणपूर्व्वकं दुरुक्तांशशोधनेन व्याख्यानं ।

No. 2178. अमरकोषभाष्यम् । Substance, palm-leaf, 12 × 1½ inches. Folia, 134. Lines, 6 on a page. Extent, 4,005 ślokas. Character, Bengali. Date, ? Place of deposit, Ulá, Post Ráṇágháṭa, Zillá Nadíyá, Dínanátha Bhaṭṭáchárya. Appearance, decayed. Prose. Correct.

Amarakosha-bháshya. A commentary on the Námaliṅgánusásana of Amara Siṅha. By Raghunandana S'armá, son of S'ríkṛishṇa Bhaṭṭa. The work is limited to the Manushyavarga section of the text.

Beginning. यं शैवाः शिवमित्युपेन्द्रमपरे पौराणिका वेधसं
सर्व्वज्ञं सुगताश्च यज्ञपुरुषं यं याज्ञिका मेनिरे।
वेदान् वेदविदोदिगम्बरमिति द्वैतागमद्वेषिण-
स्तं ज्ञानं परमं परात्परतरं वन्दे प्रपञ्चात्परं॥
कात्यायनव्याड़ि+माधवादीन् कातन्त्रतन्त्राणि विचार्य्य यत्नात्।
श्रीराघवेन्द्रोऽमरसिंहकोषे तनोति भाष्यं सुधियां हिताय॥

विशिष्टशिष्टाचारानुमितकर्त्तव्यताकं विघ्नविघातकं मङ्गलमादौ निबध्नाति + + + + + + + + अभीष्टदेवस्तवरूपं मङ्गलं समाप्तिहेतुभूतमुपोद्घातसङ्गत्या शिष्योपदेशायाच यस्येति हे धीराः स आराध्यतां। तच्छब्देन विशेषणवलात् प्रसादनामालङ्कारेण विष्णुरुक्त इति भावः। इत्यादि।

End. तालवृन्तमिव तालवृन्तकमिति। तालवृन्तानिलाधिकमिति कालिदासः।

Colophon. श्रीश्रीकृष्णस्य भट्टस्य तनूजेन द्विजन्मना।
निरमायि सतां प्रीत्यै भाष्यं मानुषवर्गकं॥

विषयः। अमरसिंहकृतनामलिङ्गानुशासनस्य मनुष्यवर्गान्तं व्याख्यानं।

No. 2179. दानसागरः। Substance, country-made paper, 19 × 4 inches. Folia, 102. Lines, 6 on a page. Extent, 2,348 ślokas. Character, Bengali. Date, ? Place of deposit, Ulá, Post Ránágháṭa, Zillá Nadiyá, Dínanátha Bhaṭṭácharya. Appearance, fresh. Prose and verse. Correct.

Dánáságara. A treatise on the merits of religious gifts, and the proper times and modes of consecrating them, preceded by a dissertation on the Bráhmaṇ caste. By Mahárájádhirája Kámadeva, according to the colophon. It is evidently an imitation of the Dánaságara of Vallálasena. (*ante* I, p. 151.)

Beginning नमामि नीरदश्यामं रामं कामदमीश्वरं।
गुरुञ्च ज्ञानदातारं तारकं भववारिधेः॥
अथादौ दानपात्रतया ब्राह्मणप्रशंसा। तत्र मनुः।
ब्राह्मणोजायमानोहि पृथिव्यामधिजायते।
ईश्वरः सर्व्वभूतानां धर्म्मकोषस्य गुप्तये॥
प्रणीतश्चाप्रणीतश्च यथाग्निर्द्दैवतं महत्।
श्मशानेष्वपि तेजस्वी पावकोनैव दुष्यति॥

ह्रयमानस्य यज्ञेषु भूय एवाभिवर्द्धते।
एवं यद्यप्यनिष्टेषु वर्त्तते सर्व्वकर्म्मसु॥
सर्व्वथा ब्राह्मणः पूज्योद्दैवतं परमं महत्। इत्यादि।

End. जलदानसमं दानं न भूतं न भविष्यति।
अतन्द्रितेण कर्त्तव्यं भुक्तिमुक्ती समिच्छता॥

Colophon. इति श्रीमहाराजाधिराजनिःसङ्करभुवनज्योतिःश्रीकामदेवविरचिते दानसागरे वारिदानवर्त्तः॥

विषयः। ब्राह्मणप्रशंसाकीर्त्तनं। दानप्रशंसा। दानलक्षणादिकथनं। दानपात्रापवादः। दानपरिपाटीकथनं। दानकालनिरूपणं। पुण्यदेशकथनं। देयस्वरूपविवेचनं। असद्दानकथनं। प्रतिग्रहविधिः। द्रव्यदेवताकथनं। परिभाषाकथनं। तत्र नक्षत्रादिपरिभाषाकथनं। सर्व्वौषधिगणकथनं। सर्व्वगन्धगणकथनं। सर्व्वरसगणकथनं। मानपरिभाषाकथनं। महादानविधिकथनादिकं। तुलानिर्म्माणविधिः। तुलामानप्रयोगकथनं। (एवं परत्र ज्ञेयं।) हिरण्यदानं। ब्रह्माण्डदानं। कल्पपादपदानं। गोसहस्रप्रदानं। कामधेनुदानं। हिरण्याश्वदानं। हेमहस्तिरथदानं। पञ्चलाङ्गलदानं। धरादानं। विश्वचक्रदानं। महाकल्पलतादानं। सप्तसागरदानं। रत्नधेनुदानं। महाभूतघटदानं। मेरुदानं। धान्याचलदानं। एवं लवण-गुड़-तिल-कार्पास-घृत-रत्न-रौप्य-शर्कराचलदानानि। तिलधेनु-घृतधेनु-जलधेनुप्रभृतिदानं। वृषदानादिकथनं। भूमिदानादिकथनं। आसनशयनादिदानकथनं. जलदानमाहात्म्यकीर्त्तनञ्च।

No. 2180. स्मृतिरत्नाकरः। Substance, country-made paper, 14 × 3½ inches. Folia, 257. Lines, 9 on a page. Extent, 6,800 ślokas. Character, Bengali. Date, ? Place of deposit, Ulá, Post Ráṇágháṭa, Zillá Nadiyá, Paṇḍit Rámeśvara Chúḍámaṇi. Appearance, decayed. Prose and verse. Correct.

Smṛiti-ratnákara. An elaborate digest of all the different topics treated of in the Smṛitis. By Vedáchárya Avasathika. The author says he prepared the digest for the use of his pupils.

Beginning. हेतवे सर्व्वभूतानां संसाराब्धिसुसेतवे।
गुरवे सर्व्वविद्यानां शम्भवे विभवे नमः॥
आलोच्य सर्व्वशास्त्राणि सारमुद्धृत्य यत्नतः।
हिताय निजशिष्याणां सङ्ग्रहः क्रियते मया॥
नित्यनैमित्तिकाचारकर्म्माणि विविधानि च।
सर्व्वाण्यत्र निरूप्यन्ते स्वर्गमोक्षार्थदानि च॥

तत्र मनुः ।

आचाराल्लभते ह्यायुराचाराल्लभते सुखं । इत्यादि ।

End. अजा गावोमहिष्यश्च ब्राह्मणी च प्रसूतिका ।

शुद्ध्यन्ति दशरात्रेण भूमिष्ठन्तु नवोदकं ॥ इति ॥

आसीत् पूर्व्वं सुरगुरुसमः कामरूपेऽग्रजन्मा

दृष्ट्वा रूपं प्रमुदितमनाः प्रार्थयामास पृथ्वी ।

हासं कृत्वा तदनु नृपतिर्वाक्यमुच्चैर्बभाषे

ह्यात्मानं मे + + + + + + + + ॥

— — — — — — गान्धारीतत्त्वस्यापि सूचय — — — । — — — —

- — ।

मातुः सपत्न्या वाक्येन सन्तप्तेव + ने पुरा ।

जात एव वने सोऽपि भाविते — — — — ॥

— — — — — — — — — यस्या-

स्यात्तद्विदित्वा श्रुतिचयकुशला भूमिदेवा बभूवुः ।

विष्णूपाध्यायदेवात् — — — — — — — —

— — — — — — — — ।

— — — — — तेनैव शिष्योघानां कुतूहलात् ।

संक्षिप्य विस्तरं शास्त्रं ग्रन्थः सङ्ग्रथितोऽधुना ॥

Colophon. इत्यावसथिकश्रीवेदाचार्य्यकृतौ स्मृतिरत्नाकरः परिपूर्णः ।

विषयः । सदाचारप्रशंसा । प्राभातिकपुण्यश्लोकादिस्मरणविधिः । शौचस्थाननिरूपणं । विण्मूत्रादित्यागविधिः । तत्र उपवीतस्य कर्णे निधानमेकचन्द्रविषयमितिनिर्णयः । तत्र मौनस्यावश्यकता चाशौचविधिः । स्थानविशेषे द्रव्यहस्तोऽपि विण्मूत्रादिकमुत्सृजेदितिकथनं । शारीरमलशौचविधिः । आचमनविधिः । सर्व्वादौ पादप्रक्षालनस्यावश्यतानिरूपणं । आचमनीयजललक्षणं । आचमननिमित्तकथनं । क्षुतनिष्ठीवनादौ दक्षिणकर्णस्पर्शस्यावश्यकता । दन्तधावनविधिः । तत्र दन्तकाष्ठलक्षणतद्ग्रहणमन्त्रादिकथनं । प्रातरेव केशप्रसाधनं कर्त्तव्यमिति तद्विधिकथनं । कुशनिरूपणं तद्ग्रहणमन्त्रादिकथनञ्च । प्रातःस्नानविधिकथनप्रसङ्गेन तत्कालादिविवेचनं । मृत्तिकादिभिः स्नानविधिकथनं । शिखाबन्धनविधितन्मन्त्रादिकथनं । प्रातःसन्ध्याविधिः । तत्र प्राणायामविधितत्स्वरूपनिरूपणं । गायत्रीजपविधिः । प्रसङ्गान्मध्याह्नसायंसन्ध्यानिरूपणं । अशौचादिनिमित्तसन्ध्यावर्ज्जनव्यवस्थानिरूपणं । ब्रह्मयज्ञविधिः । मध्याह्नस्नानविधिः । तिलकविधिः । तल्लक्षणतन्मन्त्रादिकथनञ्च । रुद्राक्षतुलस्यादिमाल्यधारणविधिः । तर्पणविधिकथनं । तत्करणपात्रनिरूपणञ्च । तत्र संक्षेपेण विधिकथनं । वैश्वदेवविधिः । तत्र होमलक्षणादिकथनं । शान्तिकरण-

विधिकीर्त्तनञ्च। अतिथिपूजाविधिः। विप्रपादोदकपानविधितन्मन्त्रकथनं। भोजनविधिः। तत्र दिङ्निरूपणादिकं। भोजनपात्रनिरूपणं। आचमनविधिः। शयनविधिः। तत्कालतन्मन्त्रादिकथनं। मलापकर्षणस्नानविधिः। ऋतादौ कर्म्मनिषेधकथनं। नववस्त्रपरिधानविधिः। जपहोमादौ वस्त्रविशेषधारणविधिकथनं। गर्भाधानकालनिरूपणमुखेन ऋतुकालादिनिरूपणं। ऋतुस्नानविधिकथनं। केशबन्धनविधिः। पुंसवनविधिः। सीमन्तोन्नयनविधिः। जातकर्म्मविधिः। एवं नामकरणनिष्क्रमणादिविधिकथनं। तत्र अमृतजलदानविधिः। ताम्बूलदानविधिकथनञ्च। अन्नप्राशनविधिः। चूड़ाकरणविधिः। कर्णवेधविधिः। स्त्रीसंस्कारविधिः। विद्यारम्भविधिः। अनध्यायनिरूपणं। उपनयनादिविधिः। यज्ञोपवीतलक्षणादिकथनं। गुर्व्वादीनामभिवादनकालादिनिरूपणं। वेदाध्यापनादिविधिकथनं। त्रिविधस्नातकलक्षणादिकथनं। विवाहकथनप्रसङ्गेन विवाहयोग्यायोग्यस्त्रीनिरूपणं। सापिण्ड्यादिनिरूपणं। दत्तकपुत्रीविधिकथनादिकं। प्रसङ्गाद्दत्तकपुत्रविधिकथनञ्च। कालशुद्धिदेशाचारादिशुद्धिनिरूपणं। चन्द्रतारादिशुद्धिनिरूपणं। तत्र चन्द्रतारादिदोषशान्तिनिरूपणं। वरलक्षणं। कन्याया हस्तोदकविधिः। कन्यादानकरणार्थं वेदिकरणादिविधिः। परिवेत्तादिकथनं। शङ्खाद्यलङ्कारधारणविधिः। अथ सौरादिभेदेन चतुर्व्विधमासविवेचनं। अहोरात्रादिनिरूपणं। क्रियाविशेषे मासाद्युल्लेखविधिविवेचनं। अधिमासकृत्यनिरूपणं। भूकम्पादिनिमित्तकाकालनिरूपणं। तिथिस्वरूपादिनिरूपणं। तत्र युग्मादितिथिव्यवस्था। संक्रान्तिनिरूपणं। वैशाखादिद्वादशमासकृत्यनिरूपणं। तत्र विशेषेण दशहरास्नानयात्रादिविधिविवेचनं। हरिशयनकृत्यनिरूपणं। दूर्व्वाष्टमीविधिः। शक्रोत्थापनविधिः। श्रवणद्वादशी। रोहिण्यष्टमीविधिविवेचनं। तत्र दिवसेऽपि पूजा कर्त्तव्येतिनिरूपणं। अगस्त्यपूजाविधिः। दुर्गोत्सवनिरूपणं। बकपञ्चकनिरूपणं। प्रेतचतुर्द्दशीविधिः। अत्र प्रेतोपाख्यानादिकीर्त्तनं। कोजागरविधिः। सुखरात्रिविधिः। कुवेरपूजाविधिः। उल्कादानविधिः। द्यूतप्रतिपद्विधिः। भ्रातृद्वितीयाविधिः। आकाशदीपप्रतिष्ठाविधिः। नवान्नविधिः। रटन्तीपूजाविधिः। भीष्माष्टमी। फाल्गुने कार्त्तिकेयस्य रथयात्राविधिः। शिवरात्रिविधिः। ब्रह्मपुत्रस्नानादिविधिः। मदनत्रयोदशी। वारुणीमन्वन्तरानिरूपणं। एकभक्तनक्तव्रतादिविधिः। अथ श्राद्धविधिनिषेधविवेचनं। श्राद्धे देयादेयद्रव्यादिनिरूपणं। श्राद्धदिनपूर्व्वाह्णकृत्यनिरूपणं। तत्पराह्णकृत्य निरूपणञ्च। सपिण्डीकरणनान्दीमुखादिश्राद्धविधानं। अपरपक्षश्राद्धविधिः। जीवत्पितृकश्राद्धविधिः। आमश्राद्धाधिकारिणः। नित्यश्राद्धविधिः। अष्टकाश्राद्धविधिः एकादशाहकृत्यनिरूपणं। महागुरुनिपाते प्रतिषिद्धानि। ग्रहणकालतत्कृत्यादिनिरूपणं। तीर्थयात्रादिविधिः। भगवत्पूजायोग्यपुष्पादिविवेचनं। हरिवासरमाहात्म्यतद्विधिकथनं। साधारणधर्म्मनिरूपणं। मांसभक्षणविधिकथनं जलदानादिमाहात्म्यकथनं। निवासकरणयोग्यदेशलक्षणादिकथनं। अथ यात्रिकतिथ्यादिनिरूपणं। अथ वास्तुलक्षणादिकथनं। तत्र वृक्षादिरोपणविधिः। गृहप्रवेशविधिः। वापीकूपादिप्रतिष्ठाविधिः। कूपादिखननविधिः। जीर्णवापीकूपादिखनने पूर्णफलकथनं। गृहकारादिवृक्षरोपणे दूरत्वादिनियमकथनं। सेतुनि-

स्नानादिविधिः। यूपकाष्ठयूपादिनिर्णयः। अथ भवदेवभट्टादिमतेन प्रायश्चित्तविधिनिरूपणं। तत्र महापातकादिनिरूपणं। हननलक्षणादिविवेचनं। आततायिनिरूपणादिकं। पापभेदेन नरकभेदनिरूपणं। धर्म्मदण्डव्यवस्थानिरूपणं। धेनुसङ्कलनादिकथनं। सम्बन्धविशेषे प्रायश्चित्तविशेषकथनं। सर्व्वत्र पापेषु प्रत्येकं प्रायश्चित्तविधानं। गोवधादौ बालातिबालादिभेदेन प्रायश्चित्तकथनं। सुरापानादिप्रायश्चित्तं। अपेयक्षीरपानादिप्रायश्चित्तं। चण्डालाद्यन्नभक्षणप्रायश्चित्तं। अगम्यागमनादिप्रायश्चित्तं। निन्दितविवाहप्रायश्चित्तं। अविक्रेयद्रव्यविक्रयप्रायश्चित्तं। पाषण्डसंसर्गप्रायश्चित्तकथनमुखेन तल्लक्षणकथनं। शृगालादिदंशने प्रायश्चित्तकथनं। सामान्यपापप्रायश्चित्तं। व्रात्यप्रायश्चित्तं। संस्कारपातप्रायश्चित्तं। अथ अशौचनिरूपणं। अन्त्येष्टिविधिकथनं। क्रियार्हनिरूपणं। शुद्धिनिरूपणञ्च।

No. 2181. रघुवंशविवेकः, वा, व्याख्यावृहस्पतिः। Substance, palm-leaf, 11 × 1½ inches. Folia, 279. Lines, 6 on a page. Extent, 8,579 ślokas. Character, Bengali. Date, ? Place of deposit, Ulá-grám, Post Ráṇágháṭa, Zillá Nadiyá, Dínanátha Bhaṭṭáchárya. Appearance, very old. Prose. Incorrect.

Raghuvañśa-viveka *alias* **Vyákhyá-vrihaspati.** A commentary on Kálidas'a's great epic, the Raghuvañs'a. By Vrihaspati Mis'ra.

Beginning. जयन्ति हरिशम्भ्वाश्रभिदुराः सं+रच्छिदः।
मुकुन्दचरणद्वन्द्वनखरेन्दुकरोर्म्मयः॥
चतुष्पदलं + + + + काम्यं
ततोप्यवद्यं खलु षट्पदलं।
तदेव वाञ्छन्ति सुरासुर+
+ + + + + + + + + + ॥
दम्भाविचरणद्वयपद्मभृङ्गो-
गङ्गावगाहनविनोदविलङ्घिताघः।
मायाप्रतिग्रहनिहत्तधृतिप्रतिज्ञो-
गोविन्द इत्यवनिनिर्ज्जरकुञ्जरोऽभूत्॥
तस्याङ्गनाभवदमीमगुणैरुदारैः
सालङ्कृता सुकृतिनीह मथायिनाम्नी।
या वल्लभस्य वचनार्थविधानपूर्णे
प्राणादपि —— रुपदीकरोति॥

तांभ्यामवाप्तजनुषो गुणशीलमाली
शालीनतादिगुणगैारवगुम्फितश्रीः ।
यस्योचिता प्रियतमा प्रतिमानवृत्ति-
मूर्त्तेव निर्वृतिरभूद्भुवि निर्वृतीति(?) ॥
सन्दर्भशुद्धिगम्यगिरां गुरोर्यत्
+ + + + वृता—मिश्र + + शुमिश्रात् ।
विद्वत्सभासु विनयी प्रणयी गणेषु
गैाड़ाधिपादुचितप्रचुरप्रतिष्ठः ॥
सोऽहं मतिवृहस्पति + नल्पकाव्यो-
———— रघुवंशविवेकमेकं
तत्तत्पुराणकृतिकीर्त्तिदुराशयाद्य
— — — — — — — — — ॥

End. अत अस्मात्,—पूर्व्वापेचेति । पूर्व्वं रघवे धनं दत्तं । अस्मै च तदंशाय तादृशधनं दातुमर्हतीत्यपेचमाणः । मन्दाक्रान्तावृत्तं ॥

Colophon. इति महीन्तापनीयकविचक्रवर्त्तिराजशराचार्य्यश्रीमद्वृहस्पतिमिश्रकृते रघुवंशविवेके व्याख्यावृहस्पतैा सप्तदशः सर्गः ।

विषयः । कालिदासकृतरघुवंशस्य व्याख्यानम् ।

No. 2182. धर्म्मपुराणं । Substance, country-made paper, 14 × 3 inches. Folia, 105. Lines, 6 on a page. Extent, 2,433 ślokas. Character, Bengali. Date, ? Place of deposit, Ulá-grám, Post Ráṇágháṭa, Zillá Nadiyá, Dínanátha Bhaṭṭáchárya. Appearance, old. Verse. Correct.

Dharma-puráṇa. One of the Upapuránas. The codex is apparently incomplete. It contains 24 chapters, each called a *Sarga,* not Adhyáya as the subdivisions of the Purâṇas and the Upapuráṇas are usually designated. It professes to have been related by Vyása, in compliance with the request of the Ṛishis assembled at the Naimisha forest.

Contents. Praise of Bráhmaṇas. Do. of Gáyatrí. The presiding divinity of the Gáyatrí. Gáyatrí five-headed. Mantras of Vásudeva. Classification of Bráhmaṇas according to their merits. The worst of Bráhmaṇas not to be subjected to capital punishment. Stories relating to bad and good Bráhmaṇas. Praise of Garuḍa. General rules regarding punishment for Bráhmaṇas. Heinous crimes. Diseases resulting

from sins in former existences. Taking of the property of Bráhmaṇas prohibited. Fornication with Bráhmaṇís prohibited. Discussion regarding what constitutes killing of Bráhmaṇas. Professions for Bráhmaṇas for earning their livelihood, commerce and warfare. Giving of fodder and water to other's cattle. Praise of cows and Bráhmaṇas. Maturation of milk in cattle. Presiding divinities of the different members of the body of a cow. Merit of giving away cows of different colours. Rituals for the rite of Vṛishotsarga. Morning duties. Morning oblations to the manes. Presiding divinities of waters. The divinity of the kus'a grass. Praise of the Vilva tree. Worship of Ganes'a and other gods. Rules regarding good conduct (*áchára*). Impropriety of not bathing daily. Purification of things. Purity of meals, beds, vehicles, &c. Rules regarding salutation to females. Sin of association with prohibited women. Offence of touching chaff, &c. Salutation to uncles, &c. Sides facing which meals may be taken. Kali defined. Filial devotion. Offence of going out on pilgrimage without the permission of parents. Story of a chaste woman. Story of Tuládhára. Propriety of performing the Vṛishotsarga rite at the first s'ráddha for a parent. Charities on such an occasion. Special rules regarding the performance of the first s'ráddha at particular sacred places. Duties on the day next after that of the death of a parent. Proper time for performing the first anniversary s'rádda. Expiations for accidental omission of a s'ráddha. Story of seven fowlers. Story of Máṇḍavya. Prohibition of adultery. Merits of the name of Govinda. Merit of hearing the Puráṇas recited. Duties of widows. Presentation of pitchers full of water for the remission of all sins. Rules for concremation. Fit time for marriage of girls. Sin of selling daughters. Praise of truthfulness. Story of a S'údra. Story of a daughterless man. Story of Manobhavá. Story of five Bráhmaṇ boys. Merit of consecrating tanks for public use. Praise of As'vattha and other trees. Dedication of bridges. Rules regarding postures. Merit of burning pastiles in temples. Rules for erecting temples, &c., and planting trees, &c Praise of the rosary made of Rudráksha seeds (*Elœocarpus ganitrus*). Merits of the emblic myrobalan tree. Story of a ghost. Merits of the tulsi plant, and of its blossoms. Praise of the river Ganges.

Beginning रक्षन्तु वः प्रवरदानवयुद्धखिन्नाः
कालीयनागदलनाहतचिचिताङ्गाः ।

चानूरचूर्णकहिरण्यकषायलग्नाः
प्रत्यग्ररत्नखचिता हरिवाङ्कदण्डाः ॥
नमः परमदेवाय त्रैगुण्यविषयात्मने ।
सर्व्वतोयोगरूपाय संसारार्णवहेतवे ॥
नारायणं नमस्कृत्य नरञ्चैव नरोत्तमं ।
देवीं सरस्वतीञ्चैव ततोजयमुदीरयेत् ॥
श्रीव्यास उवाच ।
पूतानां परमः पूतोगुरूणां परमोगुरुः । इत्यादि ।

End. इच्छयानिच्छया वापि प्रेरणात् पुरुषोत्तम ।
जाह्नवीं ये गताः पुण्यां ते गता निर्ज्जरालयं ॥

Colophon. इति श्रीधर्म्मपुराणे गङ्गामाहात्म्ये अष्टादशः सर्गः ॥
शाके व्योमविभावसुश्रुतिगणाङ्कक्ष्मामिते कार्त्तिके
क्रीतं केशवशर्म्मणः प्रवसता श्रीरामदेवेन वै ।
ढाकायां किल धामराइनगरे वाणेश्वरस्यालये
पुस्तं धर्म्मपुराणनाम सुखदं दत्त्वा तु सप्तानकाः ॥
पुराणं यत्नतः क्रीतं योहरेत्स हि पातकी ।
धनवंशविहीनोऽत्र परत्र नरकं व्रजेत् ॥ शकाब्दाः १६३० ।
(अयन्तु न लिपिकाल इति ज्ञेयं ।)

विषयः । व्यासेन सह ऋषीणां संवादेन ब्राह्मणमाहात्म्यकीर्त्तनं । गायत्रीमाहात्म्यकथनं । तदधिष्ठातृदेवतानिरूपणं । गायत्र्याः पञ्चशीर्षलक्षणादिकथनञ्च । वासुदेवमन्त्रादिजपमाहात्म्यकीर्त्तनं । उत्तममध्यमाधमब्राह्मणलक्षणानि । अधमस्यापि ब्राह्मणस्य वधनिषेधकीर्त्तनं । दुष्टस्यापि पश्चात् साधुचरितस्य उपाख्यानकीर्त्तनं । गरुड़माहात्म्यकथनं । सामान्यतोब्राह्मणनिग्रहनिषेधः । महापातकादिनिरूपणं । दुरितस्यानुरूपेण शारीरादिरोगविशेषनिरूपणं । ब्रह्मस्वहरणादिनिषेधः । ब्राह्मण्यादिगमननिषेधः । ब्रह्मवधविचारः । ब्राह्मणस्य धनोपार्ज्जनोपायकथनं । तत्र युद्धवाणिज्यादिकरणनिरूपणं । परगोवत्सादिभ्यः तृणादिदानविधिकथनं । गोब्राह्मणमाहात्म्यं । धनदुग्धादीनां क्रमेण पञ्चसप्तदिनादिविलम्बेन परिपाकोभवतीतिकथनं । गोरङ्गप्रत्यङ्गेषु अधिष्ठातृदेवतागणकथनं । शुक्लादिवर्णभेदेन गोदानफलकथनं । वृषोत्सर्गविधिः । अथ प्रातःकृत्यनिरूपणं । स्नानतर्पणादिविधिः । जलदेवतादिकथनं । कुशनिरूपणमुखेन कुशदेवतादिनिरूपणं । तिलमाहात्म्यकथनं । गणेशादिपूजाविधानं । आचारविधिकथनं । स्नानाकरणे दोषकथनं । द्रव्यशुद्धिकथनं । भोजनशय्यारथ्यादिशुद्धिकथनं । स्त्रीनामभिवादने विशेषकथनं । निषिद्धस्त्रीसंसर्गे दोषकथनं । तुषादिस्पर्शे दोषकथनं । कनिष्ठपितृव्यमातुलादिनमस्कारे

दोषकथनं। भोजनादौ दिङ्निरूपणं। कलिनिरूपणं। पितृभक्तिकथनं। पित्रोरननुज्ञया तीर्थादिगमने दोषकथनं। अत्र पतिव्रतोपाख्यानकथनं। तुलाधारोपाख्यानकथनञ्च। पितृश्राद्धे वृषोत्सर्गकर्त्तव्यतानिर्णयः। तत्र दानादिविधिकथनं। तीर्थविशेषे पितृश्राद्धे विशेषनिरूपणं। मरणोत्तरदिनकर्त्तव्यकथनं। सपिण्डीकरणादिश्राद्धकालनिरूपणं। दैवात् श्राद्धाकरणे प्रायश्चित्तकथनं। अत्र सत्यव्याधोपाख्यानकथनं। माण्डव्योपाख्यानकीर्त्तनञ्च। परदारगमननिषेधकथनं। गोविन्दनाममाहात्म्यकथनं। पुराणश्रवणमाहात्म्यकीर्त्तनं। विधवाधर्म्मकथनं। सर्व्वपापक्षयाय अम्बुघटदानविधिकथनं। सहमरणविधिकथनं। विवाहयोग्यकन्यादिनिरूपणं। कन्याविक्रयादौ दोषकथनं। सत्यप्रशंसा। अत्र शूद्रोपाख्यानकथनं। चकन्धोपाख्यानकथनं। मनोभवाख्यानकथनं। ब्रह्मपुत्रपद्मोपाख्यानकथनञ्च। अथ खातादिदानमाहात्म्यकीर्त्तनं। अश्वत्थवृक्षादिमाहात्म्यकीर्त्तनं। सेतुप्रकरणकथनं। गोप्रचारकथनं। यूपादिदानविधिः। देवगृहनिर्म्माणादिकथनं। वृक्षरोपणादिविधिः। रुद्राक्षमाहात्म्यकीर्त्तनं। धात्रीमाहात्म्यं। अत्र प्रेतोपाख्यानकीर्त्तनं। तुलसीमाहात्म्यकथनं। तुलसीमञ्जरीमाहात्म्यकथनमुखेन तुलस्याः स्तवादिकथनं। गङ्गामाहात्म्यकीर्त्तनञ्च।

No. 2183. कृत्यकल्पतरुः, (नियतकालकृत्यकाण्डम्।) Substance, country-made paper, 10 × 3 inches. Folia, 167. Lines, 9 on a page. Extent, 3,446 ślokas. Character, Bengali. Date, Sk. 1510. Place of deposit, Ulá-grám, Post Ráṇágháṭa, Zillá Nadiyá, Dínanátha Bhaṭṭácházrya. Appearance, decayed. Prose and verse. Incorrect.

Kṛitya-kalpataru. An elaborate digest on duty. By Lakshmídhara Bhaṭṭa. The codex contains only the chapter on Nityakálakṛitya. The subject is A'chára in all its phases.

Beginning. येन प्रत्यहमत्र सिञ्चयसि स्नानादिभिः कर्म्मभि-
यैञ्ज्ञैः पञ्चभिरप्यपास्तकलिभिर्नीतः + + + + + ।
+ + + + + + कृतस्य विरहक्षमं स लक्ष्मीधरः
काण्डं नैयतकालिकं कलयति प्रीत्यै तृतीयं सतां ॥
दन्तानां धावनं शौचविधिः स्नानविधिर्जपः ।
तर्पणं वैश्वदेवादिपञ्चयज्ञविधिस्ततः ।
भोजनं पञ्चवोपेतं कृत्यं च भोजनोत्तरं ॥
+ + + + + + + + शयनं तदनन्तरं ।
तिथिकृत्यञ्च कान्तारदीपदानविधिस्तथा ॥
गोशुश्रूषा वृषोत्सर्गः पुराणश्रवणे विधिः ।
+ + + + + + + + + + त्यन्त शुद्धबुद्धिना ॥

चतुर्द्दशात्र पर्व्वाणि काण्डे नैयतकालिके ।

अथ नैयतकालकृत्यानि । तत्र दृचः ।

End. स श्रेयस्तामसोराजन् श्रावणोवा नरः सदा ।

न तस्य पुरतोधीर वाचयेत् प्रार्थितोऽपि च्चि ॥

प्रसङ्गात् शृणुयाद्यस्तु श्रद्धाभक्तिसमन्वितः ।

श्रोता कैातुकमाचन्तु स श्रेयोराजसोबुधैः ॥

Colophon. इति महासन्धिविग्रहिकभट्टश्रीलक्ष्मीधररचिते कृत्यकल्पतरैा नियतकालकृत्यकाण्डं समाप्तमिति ।

सर्व्वजगतीप्रतिष्ठितभट्टाचार्य्यैावमैालिरत्नानां ।

नैयतकालिकपुस्तकमेतद्विद्यानिवासानां ॥

दिक्पच्चदिवसे गणिते शाके चैत्रस्य सप्तमांशे ।

परिपूरितं विलिख्य श्रीरविचन्द्रेण शूद्रेण ॥

शकाब्दाः १५१० । मासः १ चैत्रः । लेखकगणिताक्षराणि ४२५० ।

विषयः । प्रातःकृत्यनिरूपणं । दन्तधावनादिविधिः । विस्तरेण दन्तकाष्ठनिरूपणं । प्रातःस्नानादिविधिकथनं । स्नातकव्रतादिनिरूपणं । केशादिप्रसाधनविधिः । देवकार्य्यकालादिनिरूपणं । क्रियास्नानादिविधिः । सन्ध्याविधिः । जपविधिः । तर्पणविधिः । वैश्वदेवादिविधिः । अतिथिपूजाविधिः । भोजनविधिः । भोज्याभोज्यनिरूपणं । पशुहिंसाविधिप्रतिषेधविवेचनं । सुरादिलक्षणकथनपूर्व्वकं तत्पानविधिप्रतिषेधविवेचनं । भोजनोत्तरकर्म्मनिरूपणं । शयनविधिः । गर्भाधानविधिः । रजस्वलाधर्म्मकथनं । पर्व्वकृत्यनिरूपणं । तत्र संक्रान्तिनिर्णयः । ग्रहणनिर्णयः । सामान्यतस्तिथिकृत्यनिरूपणं । अथ विशेषेण चैत्रादिषु तिथिविशेषे कृत्यविशेषनिरूपणं । गाकुलश्मशानादिषु कार्त्तिकपैार्णमास्यां दीपदानावश्यकतादिकथनं । गोपरिचर्य्याविधिः । वृषोत्सर्गविधिः । वृषपरीक्षादिविधिः । पुराणपाठश्रवणविधिः । तत्र सात्त्विकराजसिकादिश्रोतृलक्षणादिकथनञ्च । अत्र सर्व्वत्र विस्तरेण विधिविवेचनं कृतमितिज्ञेयं ।

No. 2184. आह्निकाचारराजः । Substance, country-made yellow paper, 17 × 5 inches. Folia, 213. Lines, 10 on a page. Extent, 7,900 ślokas. Character, Bengali. Date, ? Place of deposit, Ulá-grám, Post Ránághâṭa, Zillá Nadíyá, Dínanátha Bhaṭṭácharya. Appearance, new. Prose and verse. Correct.

A'hnikácháraraája. A digest of the Smṛiti rules regarding everyday duty. By Rámánanda Váchaspati, great-great-grandson of Pushkaráksha, of the family of Sarvánanda. It was compiled under the auspices of Rájá Kṛishṇachandra Ráya, of Nadíyá, about the middle of the last century. The Rájá is named Mahárája Rájendra.

Beginning. भक्त्या पुण्यबलेन चातिमहता स्वीकृत्य मूर्त्त्यैकतां
गोविन्दो गिरिजापतिश्च रमते यस्यालये राजते ।
नत्वा पादसरोजराजमनयोः श्रीकृष्णचन्द्रोऽन्वयः
सम्बन्धं स समादिदेश विदुषो ग्रन्थं दिवाकर्म्मणे ॥

अपि च ।

कीर्त्त्या येन विकाशितं त्रिभुवनं कान्त्या जितश्चन्द्रमा
मत्या देवगुरुः सुधा च वचसा मूर्त्त्या मनःसम्भवः ।
धृत्या क्ष्मा क्षमया द्विजाः सुकृतिनः पुण्यैः प्रतापैस्तपा
दानैर्दीनजनौघदुःखमखिलं दृष्टारिभावाश्रितः ॥
येनेष्टं वाजपेयप्रभृतिमखगणैरग्निहोत्रैश्च नित्यं
भक्त्या श्रीरामकृष्णेश्वरगिरितनयामूर्त्तयः स्थापिताश्च ।
गेहे यस्याब्धिकन्या निवसति सततं भारती कण्ठदेशे
अद्वैतब्रह्मरूपा स्मरहरमहिषी निश्चला हृत्सरोजे ॥
योऽयं गौड़द्विजेन्द्रो भरतभुवि महाराजराजेन्द्रनामा
धीरो धीराग्रगण्योऽन्वयकुलतिलकः श्रीनवद्वीपनाथः ।
आदेशात्तस्य पूर्व्वोदितविविधमतग्रन्थसंघान् विलोक्य
श्रीरामानन्दनामा रचयति रुचिरं चाह्निकाचारराजं ॥
आचार्य्यः पुष्कराचार्य्यः सर्व्वानन्दिकुलोज्ज्वलः ।
तस्य प्रपौत्रपौत्रेण श्रीराजेन्द्रसभासता ॥
श्रीवाचस्पतिना ग्रन्थो निबन्धोऽन्वयसम्मतः ।
निरूप्यतेऽत्र संक्षेपात् शय्योत्थानादिकं प्रगे ॥
विण्मूत्रदोः सुत्सर्गस्तस्य शौचं विशेषतः ।
— — — — — — दिवसपदञ्चात्र अरुणोदयावधिप्रदोषान्तकालपरं । इत्यादि ।

End. मलिनाम्बरधारित्वमभ्यङ्गक्षौरनग्नता ।
उत्सवाचरणं पातौ दोलारोहश्च निन्दितः ॥

Colophon. इति श्रीमन्महाराजराजेन्द्रादेशकृताह्निकाचारराजीये सप्तमाध्यायनगरं । समाप्तोऽयं ग्रन्थः ।

विषयः । शय्योत्थानविधिः । विण्मूत्रत्यागविधिः । शौचविधिः । पादप्रक्षालनविधिः । दन्तधावनविधिः । व्रताशौचनिरूपणं । कर्म्माङ्गवस्त्रधारणविधिः । तत्र स्त्रीणां विशेषकथनं । क्रियाङ्गोपवीतादिलक्षणं । कर्म्माङ्गशिखाबन्धनक्रमः । रुद्राक्षधारणादिविधिः । कर्म्माङ्गतिलकविधिः । ऊर्द्ध्वपुण्ड्रादिलक्षणं । शङ्खचक्रादिधारणविधिः । सम्प्रदायविशेषे तिलकविशेषलक्षणं । कर्म्माङ्गदर्भनिरू-

पणं। क्रियाङ्गस्वर्णादिधारणविधिः। कर्म्माङ्गोपवेशनादिविधिः। क्रियाङ्गाचमनविधिः। प्रातःस्नान-विधिः। अरुणोदयकालादिविवेचनं, स्नानाशक्तस्य कर्त्तव्यानि। तर्पणविवेकः, अत्र पाश्चात्यादि-मतेन विविधप्रयोगकथनं। प्रातःसन्ध्योपासनविधिः। तत्र मुख्यकाले अकरणे प्रायश्चित्तादिनि-रूपणं। अननुष्ठानप्रायश्चित्तकथनञ्च। गायत्र्यर्थादिविवेचनं। देवयात्रादिविधिः। गुर्व्वादीनामभि-वादनविधिः। गुर्व्वादिलक्षणं। कुटीचकवहूदकादियतिलक्षणं। ब्रह्मचर्य्यादिधर्म्मकथनं। सन्न्यास-धर्म्मकथनं. गार्हस्थ्यधर्म्मकथनं। नित्यदानविधिः। मङ्गल्यनिरूपणमुखेन अमङ्गल्यकथनं। वेदा-भ्यासादिविधिः। अध्यापनविधिः। वेदलक्षणादिकथनं। विध्यर्थवादादिनिरूपणं। शिक्षाशास्त्र-कथनं। एवं कल्पाद्यङ्गनिरूपणं। महापुराणादिनिरूपणं। धनुर्व्विद्यादिचतुर्द्दशविद्याकथनं। अन-ध्यायनिरूपणं। अतिथिलक्षणं। अभ्यागतादिलक्षणं। ब्राह्मणादीनां जीविकानिरूपणं। षट्कर्म्मा-दिविधिः। एवं क्षत्रियादिधर्म्मकथनं। आपद्वृत्तिनिरूपणं। शूद्राणां संस्कारविधिकथनं। सर्व्ववर्ण-कर्त्तव्यानि। मध्याह्नस्नाने अभ्यङ्गविधिकथनं। मन्त्रस्नानादिसप्तविधगौणस्नानविधिः। मध्याह्नसन्ध्या-विधिः। स्नानयोग्यजलाशयादिनिरूपणं। कूपवापीपुष्करिण्यादिलक्षणं। गङ्गामाहात्म्यकीर्त्तनं। गङ्गागर्भनिरूपणं। कालविशेषे गङ्गास्नानफलं। गङ्गाजलपानादिफलं। मध्याह्नतर्पणविधिः। ब्रह्म-यज्ञविधिः। देवपूजाविधिः। पूजाकालनिरूपणं। शिवलिङ्गादिपूजनविधिः। अभ्यङ्गोपचारादि-निरूपणं। पुष्पादिविवेचनं। पञ्चदेवतापूजाक्रमः। अशौचादौ देवपूजाधिकारविवेचनं। शाल-ग्रामशिलालक्षणं। अत्र अवान्तरभेदलक्षणकथनञ्च। अन्यदेवताशिलालक्षणं। शालग्रामपूजानि-यमादिकथनं। सामान्यतोविहितपुष्पाणि। तुलसीमाहात्म्यं। सामान्यतोदेवपूजायां विशेषक-थनं। गणेश-सूर्य्य-विष्णु-शिव-दुर्गापूजासु विशेषकथनं। कामनाभेदेन शिवलिङ्गपूजायां संख्याभे-दकथनं। वैश्वदेवादिविधिकथनं। पितृबल्यादिकथनं। चतुर्द्दशबलिदानविधिः। अतिथिपूजा-विधिः। भोजनविधिकथनमुखेन तत्कालादिनिरूपणं। भोजनकाले निषिद्धानि। भक्ष्याभक्ष्यनि-रूपणं। भक्ष्यपशुनिरूपणं। भक्ष्यपक्षिनिरूपणं। तत्र पशुषु आरण्यमहिष-मेष-सौरभवराहाणां भक्ष्यत्वकथनं। तथा छाग-मृग-खड्ग-पार्षतादीनां गोधादिपञ्चनखानां भक्ष्यत्वञ्च। पक्षिषु तित्ति-रि-कपिञ्जल-वर्त्तक-मयूर-चित्रकपोत-भारद्वाज-क्रौयष्टिक-चित्रहंसादीनां भक्ष्यत्वकथनं। भक्ष्य-मत्स्यनिरूपणं। सामान्यतोऽभक्ष्याः पक्षिणः। एवं पशुषु अभक्ष्यत्वनिरूपणं। मांसभोजनादिविधिवि-वेचनं। रात्रिकृत्यनिरूपणं। तत्राग्निहोत्रवैश्वदेवादिपुनर्व्विधानकथनं। शयनविधिकथनं। दारो-पगमनविधिकथनं। तत्र युवत्यादिलक्षणकथनं। रजस्वलाधर्म्मकथनं। स्वप्ने शुभाशुभदर्शनफल-कथनं। अत्र सर्व्वत्र विषयेषु विस्तरतोऽवान्तरभेदप्रयोगकथनपूर्व्वकं विविधग्रन्थकारमतोपासनं कृतमिति ज्ञेयं।

No. 2185. गायत्र्युपनिषत्। Substance, foolscap paper, 7 × 3 inches. Folia, 3. Lines, 8 on a page. Extent, 36 ślokas. Character, Bengali. Date, ? Place of deposit, Ulá, Post Ránágháṭa, Zillá Nadiyá, Bábu Annadáprasáda Mukhopádhyáya. Appearance, new. Prose. Correct.

Gáyatrí Upanishad. Praise of the Gáyatrí and on the divinities presiding on the different words and feet of that sacred hymn. The work professes to be a Upanishad, and bears no author's name.

Beginning. अथ गायत्र्युपनिषत्। ॐ तत् सत्। ॐ ब्रह्म हेदं श्रियं प्रतिष्ठामायतनमैचत। तत्तपस्व यदि तन्तते अधीयेत् तत् सत्यप्रतिष्ठं सविता सावित्र्यां ब्राह्म्यां इत्यादि।

End. स योगी स सर्व्वयोगी स एव परमब्रह्म। कृतकृत्योभवति कृतकृत्योभवति। ॐ शान्तिः शान्तिः शान्तिः।

Colophon. इति गायत्र्युपनिषत्।

विषयः। गायत्र्याः पदभेदेन पादभेदेन च देवताकथनपूर्व्वकं तत्तन्माहात्म्यादिकीर्त्तनं।

No. 2186. गायत्रीहृदयम्। Substance, foolscap paper, 7 × 3 inches. Folia, 8. Lines, 7 on a page. Extent, 112 ślokas. Character, Bengali. Date, ? Place of deposit, Ulá, Post Ránágháṭa, Zillá Nadiyá, Bábu Annadáprasáda Mukhopádhyáya; another copy at Benares, Bábu Hariśchandra. Appearance, new. Prose and verse. Correct.

Gáyatrí-hṛidaya. On the origin of the Gáyatrí hymn, the purport of that part of it which is called Vyáhṛiti, the true meaning of the Gáyatrí, different modes of contemplating the Gáyatrí at the morning, noon and evening prayers, and the merits of the hymn. Anonymous. The work opens with the benedictory verse which occurs at the beginning and end of some of the authentic Upanishads, and apparently pretends to be a Upanishad.

Beginning. ॐ परात्मने नमः। विष्णुरोम् सह नाववतु सह नौ भुनक्तु सहवीर्य्यं करवावहै। तेजस्विनावधीत मस्तु मा विद्विषावहै। ॐ नमस्कृत्य भगवान् याज्ञवल्क्यः स्वयम्भुवं परिपृच्छति। इत्यादि।

End. इदं नित्यमधीयेत ब्राह्मणः प्रयतः शुचिः।
सर्व्वपापैः प्रमुच्येत ब्रह्मलोके महीयते॥

ॐ सह नाववतु सह नौ भुनक्तु सहवीर्य्यं करवावहै। ॐ शान्तिः।

Colophon. इति गायत्रीहृदयं समाप्तं ।

विषयः । गायत्र्याः उत्पत्तिकथनं । व्याहृतीनां तात्पर्य्यकथनं गायत्र्यर्थकथनं । प्रातःसन्ध्यादौ गायत्र्याः ध्यानविशेषकथनं । गायत्रीमाहात्म्यकथनञ्च ।

No. 2187. गायत्रीव्याख्या । Substance, foolscap paper, 7 × 3 inches. Folia, 4. Lines, 8 on a page. Extent, 36 ślokas. Character, Bengali. Date, ? Place of deposit, Ulá, Post Ráṇagháṭa, Zillá Nadiyá, Bábu Annadáprasáda Mukhopádhyáya. Appearance, new. Prose. Correct.

Gáyatrí-vyákhyá. A commentary on the Gáyatrí hymn. Anonymous.

Beginning. अथ गायत्रीव्याख्या । हे धीमहि गायत्रि धीर्बुद्धिः मह्री ध्यानं यचेति व्युत्पत्तिः भर्गः शिवः नोऽस्माकं धियोबुद्धिप्रवृत्तीः देवस्य भगवतः सम्बन्धे प्रचोदयात् प्रेरयतु भगवद्विषयकं ज्ञानं जनयत्वित्यर्थः । इत्यादि ।

End. इत्यत्र गायत्री चतुर्व्विंशत्यक्षरा सम्पूर्णा ।

Colophon. इति गायत्रीव्याख्या समाप्ता । ॐ तत्सत् ।

विषयः । गायत्र्या व्याख्यानं ।

No. 2188. पिच्छिलातन्त्रम् । Substance, country-made yellow paper, 14 × $3\frac{1}{2}$ inches. Folia, 12. Lines, 6 on a page. Extent, 186 ślokas. Character, Bengali. Date, ? Place of deposit, Ulá, Post Ráṇágháṭa, Zillá Nadiyá, Bábu Annadáprasáda Mukhopádhyáya; another copy at Siuḍi, Zillá Vírabhuma, Kuladánanda Mukhopádhyáya. Appearance, new. Prose and verse. Incorrect.

Pichchhilá Tantra. An apochryphal or mediæval Tantra. The codex is incomplete. CONTENTS: I. Faith in spiritual guides. II. Praise of the goddess Káliká. III. Praise of the mantra of Durgá. IV. Rules regarding the use of the mantra of Kṛishṇa. V. Mantras for removing infertility in women, and for the cure of certain female diseases. VI. Mantras for performing incantations for subjugating and dementing people. VII. Do. for apprehending thieves. VIII—IX. Do. (in the Bengali language) for neutralizing poisons. X. Assumption by Kaulas of Víra and Pas'u characteristics during the

daytime. XI. Recitation of the mantra of Kálí for the fruition of particular desires. XII. Purification of ritual articles. XIII. Mantra of Durgá.

Beginning. कैलासशिखरासीनं देवदेवं वृषध्वजं ।
भवानी रहसि प्रीत्या जगाद मधुरं वचः ॥
देव्युवाच ।
भगवन् देवदेवेश लोकानुग्रहकारक
सूचितं यत्पुरा देव कालिकासाधनक्रमं ।
अन्यासामपि देवीनां साधनानि वदस्व मे ॥ इत्यादि ।

End. तस्य विघ्नाः पलायन्ते वर्षं सर्व्वसुखं वसेत् ।
इयं तिथिः कालिकायाः दुर्गायाः श्रीप्रदा मता ॥

Colophon. इति पिच्छिलातन्त्रे चतुर्द्दशः पटलः ।

विषयः । प्रथमे गुरुभक्तिनिरूपणं । २ये,—कालिकामाहात्म्यकीर्त्तनं । ३ये,—दुर्गामन्त्रमाहात्म्यकथनं । ४र्थे,—कृष्णमन्त्रादिविधिकथनं । ५मे,—वन्ध्यत्वादिनाशनयन्त्रादिकथनं । ६ष्ठे,-वशीकरणोच्चाटनविधिकथनं । ७मे,—चौरधारणविधिकथनं । ८मे,—९मे,—वङ्गभाषया विषनाशनादिमन्त्रकथनं । १०मे,—दिव्यवीरपशुभावकथनं । ११शे,—अभीष्टविशेषे कालीमन्त्रजपविधिकथनं । १२ शे,—नित्यपूजाविधिकथनं । १३शे,—भूतशुद्धिविधिकथनं । १४शे,—दुर्गामन्त्रनिरूपणं ।

No. 2189. शृङ्गारतिलकटीका । Substance, country-made yellow paper, 13 × 4 inches, Folia, 14. Lines, 6 on a page. Extent, 216 ślokas. Character, Bengali. Date, ? Place of deposit, Ulá, Post Ráṇágháṭa, Zillá Nadiyá, Bábu Annadáprasáda Mukhopádhyáya. Appearance, new. Prose. Incorrect.

S'ṛiṅgára-tilaka-ṭíká A commentary on an erotic work called *S'ṛiṅgára-tilaka,* and commonly attributed to Kálidása. By Kavirája-chandra, or Chandra, the great poet.

Beginning. यदङ्घ्रिवारिजरजःपरमाणोरनुग्रहात् ।
नश्यत्यज्ञानतिमिरं तं वन्दे गुरुमव्ययं ॥
श्रीकालिदासेन कवीन्द्रवृन्दशिरोऽवतंसेन कृतेष्वपीषु ।
श्लोकेषु मौढ्यकुलप्रसूतस्तनोति टीकां कविराजचन्द्रः ॥
सर्व्वत्र शृङ्गाररसस्य पद्यं पश्यन्ति शान्तस्य तु वेत्ति कश्चित् ।
प्रच्छन्नभूतं सुतरां यथास्मिन् देहे निविष्टं परमं पुमांसं ॥

— — — — — — — — इह कालिदासमहाकविः शृङ्गाररसतिरोहितं काष्ठपुटकाधिकरणस्थार्पितमणिन्यायेन शान्तरसमाहितवान् — — — — — — — — —कान्तायाः शान्त्यन्तरायभूतत्वात् परिहारमुपदिशति,—वाक् द्वौ चेति——इत्यादि।

End. शृङ्गं प्राधान्यमस्यास्ति-इत्यनेन शृङ्गारः प्रधानभूतः, तस्य तिलकमिव तिलकमलङ्काररूपमित्यर्थः, शृङ्गं प्राधान्यसले चेत्यमरः।

Colophon. इति शृङ्गारतिलकटीका समाप्ता।

विषयः। कालिदासकृतशृङ्गारतिलकाभिधानखण्डकाव्यस्य शान्तिपरेऽपि व्याख्यानम्।

No. 2190. **तन्त्रकौमुदी।** Substance, country-made yellow paper, 17 × 3 inches. Folia, 123. Lines, 7 on a page. Extent, 4,412 ślokas. Character, Bengali. Date, Sk. 1729. Place of deposit, Ulá, Post Ráṇágháṭa, Zillá Nadiyá, Dínanátha Bhaṭṭáchárya. Appearance, fresh. Prose and verse. Correct.

Tantra-kaumudí A Tantric digest. Anonymous.

Contents: Religion defined. Káliká, the highest divinity. Twenty-seven Mahávidyás. The six Ámnáyas, their origin and classification. Circumstances which lead to the assumption of the forms of Káliká, Ugratárá, Nílasarasvatí, &c. Praise of Vidyá. Creation of the universe. Origin of Brahmá, Vishṇu and Rudra from the union of S'iva and S'akti. Origin of the alphabet of 50 letters and of the names of Mádhava, Govinda, &c., from the body of the Deví. Origin of the earth and other regions Do. of virtue and vice. Do. of vegetables and animals. Phantasmal character of the creation. Sexual genesis. Anatomy of animals. Character of the bodies assumed after death. Múládhára and other Sákta diagrams. Initiation into religion. Spiritual guides defined. The Siddhavidyás defined. Duties of S'údras. Philosophy of Jnána Yoga. Do. of Dhyánayoga. Rules for counting rosaries. Do. for reciting the *Ajapá* mantra. Ritual for the worship of S'iva. Do. do. of S'yámá. External worship. Internal worship. Purification of the month. Kulluka, &c, defined. Religious bridges defined. Charms and amulets. The fivefold purifications. Mantra of Chauragaṇes'a. Rules for Purus'charaṇa. Duties of S'údras. Incantations for bringing on rain. Rules for performing a mystic rite with an owl.

Beginning. त्रिलोकीं त्रिगुणातीतां नित्यां विश्वस्वरूपिणीं।
प्रणम्यादौ महादेवीं क्रियते तन्त्रकौमुदी॥
तन्त्राणां सारमुद्धृत्य सारात्सारं परात्परं।

अतिगुह्यतमं लोके नित्यं सेव्यं मुमुक्षुभिः ॥
भावाभावविनिर्मुक्ता गुणातीता विरच्यते ।
नित्यत्वमाह,—
ब्रह्मविष्णुशिवादीनां भवोयस्या निजेच्छया ।
पुनः प्रलीयते चान्ते सा नित्या परिकीर्त्तिता ॥ इत्यादि ।

End. उलूकचरणाभ्यां घृष्टं तिलकमाचरेत् ।
मधुना भीमवारेण अथवा कविवासरे ॥
सर्व्वसिद्धिर्भवत्याशु रुद्रस्य वचनं यथा ॥

Colophon. इति पारमहंस्यां तन्त्रकौमुद्यां हरगौरीसंवादे उलूकस्य प्रयोगः । समाप्तश्चायं ग्रन्थः । शकाब्दाः । १७२९ ।

विषयः । ब्रह्मनिरूपणं कालिकैव परं ब्रह्मेति निरूपणं । मतभेदेन सप्तविंशतिप्रकारमहाविद्याकथनं । पूर्व्वपश्चिमादिषड़ाम्नायकथनं तेषामुत्पत्तिकथनं विभागकीर्त्तनञ्च कालीमूर्त्तिपरिच्छदत्तान्तकथनं । उग्रतारानीलसरस्वत्यादिरूपधारणविवरणकीर्त्तनञ्च । विद्यामाहात्म्यकीर्त्तनं । जगत्सृष्टिप्रकरणकथनं । शिवशक्त्यात्मकत्रिगुणाद्ब्रह्मविष्णुरुद्राणामुत्पत्तिकथनं । पञ्चाशद्वर्णरूपदेवीशरीरात् स्वरमात्रेण माधवगोविन्दकृष्णादीनामुत्पत्तिकथनं । तथा कीर्त्तिकान्तिलज्जालक्ष्मीप्रभृतीनामुत्पत्तिकथनञ्च । पृथिव्यादीनामुत्पत्तिः । धर्म्माधर्म्मानामुत्पत्तिः । स्थावरजङ्गमादिसृष्टिः । जगतोमायामयत्वकथनं । तथा जगतः प्रतिविम्बस्वरूपत्वकीर्त्तनञ्च । स्त्रीपुरुषसंयोगेन जीवानामुत्पत्ति प्रकारकथनं । शारीरविद्याकथनं । मरणोत्तरमातिवाहिकादिशरीरग्रहणविवरणकथनं । मूलाधारादिषट्चक्रक्रमकीर्त्तनं । दीक्षाविधिकथनं । विहिताविहितगुरुनिरूपणं । सिद्धविद्यानिर्णयः । शूद्राणां कर्त्तव्याकर्त्तव्यनिरूपणं । ज्ञानयोगकथनं । ध्यानयोगकथनं । जपविधिकथनं । अजपाविधिः । शिवपूजाविधिः । श्यामापूजाविधिः । तत्र बाह्ययजनविधिः । अन्तर्यजनविधिकथनं । मुखशोधनविधिः । कुल्लुकादिनिरूपणं । सेतुमहासेतुनिरूपणं । कवचसेतुनिरूपणं । पञ्चशुद्धिनिरूपणं । चौरगणेशमन्त्रविधानं । पुरश्चरणविधिकथनं । शूद्राणां कर्त्तव्याकर्त्तव्यनिरूपणं । वृष्टिकरणविधिकथनं । उलूककर्म्मविधिकीर्त्तनञ्च ।

No. 2191. काशीखण्डटीका (उत्तरार्द्धं ।) Substance, country-made paper, 16 × 5 inches. Folia, 151. Lines, 5 on a page. Extent, 2,344 ślokas. Character, Bengali. Date, ? Place of deposit, Ulá, Post Ráṇágháṭa, Zillá Nadiyá, Bábu Annadáprasáda Mukhopádhyáya. Appearance, old. Prose. Correct.

Kásíkhaṇḍa-ṭíká. A commentary on the Kásíkhaṇḍa section of the Skanda Puráṇa. By Chaitanya *alias* Rámánanda, disciple of Rámendravana.

Beginning रामं नमामि परमात्मसुखप्रकाशं
विश्वस्य सृज्जननपालनमङ्गमेकं ।
स्वेच्छावतारमतसीकुसुमावभासं
श्रीजानकीसमुपलालितपादपद्मं ॥
यत्कृपातरणिं प्राप्य निस्तीर्णोऽहं भवार्णवं ।
सदयं तं गुरुं वन्दे श्रीरामेन्द्रवनाभिधं ॥
गुणरत्नोदधिः सर्व्वदोषकारणघस्मरः ।
जयतात् सच्चिदानन्दसदाशिवकृती वरः ॥
श्वरुणदृढकेशवादित्या विमलगङ्गायमादित्याश्च ।
व्यक्तोऽत्र षड्नुक्रमादेकपञ्चाशत्तमेऽध्याये ॥

अतीतेऽध्याये कद्रोः काद्रवेयानाञ्च श्रुतं विनताया दास्यं अघटमानं मन्वानः पृच्छति पार्व्वतीत्यादिना। पुत्रशापाद्दासत्वं प्राप्नवतीति वक्तुं तदनुक्तमनूद्य तदाख्यानं प्रतिजानाति । यच्छ्रिका त्वं दासी त्वं। इत्यादि।

End. वेदान्ते सत्यवत्यात्मज इव "मुनये" भार्गवोवाथ जीवो-
न्याये काणादवत्मन्यथ च गुरुतरो "गौतमोवाक्षपादः" ।
सांख्येयोदेवहूत्यात्मज इव हि तथा वासुकिर्योगशास्त्रे
प्राक्काण्डे भट्टतुल्यः स जयति परमः श्रीसुरेन्द्रोगुरुर्नः ॥
वेदान्तेऽथ पुराणभारतविधौ श्रीसत्यवत्यात्मजः
सांख्येदेकपिलः कणाद इव योवैशेषिके गौतमः।
न्याये योगनये पतञ्जलिरथो चन्द्रप्रभावल्लभो-
भट्टाचार्य्यचतुर्भुजोविजयते प्राक्काण्डकौमारिलः॥
अकोषा च सकोषा च द्वे टीके लिखिते मया ।
यत्र यस्याभिलाषः स्यात्मा तेन परिग्टह्यतां ॥
आसीत्काशपवंशभूषणमणिर्मान्योमुकुन्दप्रियो
+ + + + गदाधरस्य तनयः शुल्काम्बरः सन्मतिः।
गन्धर्व्वीजटरे ततः समभवत् श्रीरामनामा सुत-
स्तेनेयं विहिता हिताय विदुषां टीका बुधैर्वीच्यतां ।
इति श्रीकाशीखण्डटीकायां शततमोऽध्यायः ।

Colophon. इति श्रीमत्परमहंसपरिव्राजकाचार्य्यश्रीमद्भगवत्पूज्यपादशिष्यश्रीरामेन्द्रवनशिष्येण चैतन्यापरपर्य्यायेण रामानन्देन कृता काशीखण्डटीका समाप्ता ।

विषयः। स्कन्दपुराणीयकाशीखण्डस्य एकपञ्चाशत्तमाध्यायादारभ्य परिशेषपर्य्यन्तं व्याख्यानं।

No. 2192. तत्त्वोपनिषत् । Substance, foolscap paper, 9 × 3 inches. Folia, 2. Lines, 6 on a page. Extent, 23 ślokas. Character, Bengali. Date, ? Place of deposit, Ulá, Post Ráṇágháṭa, Zillá Nadiyá, Bábu Annadáprasáda Mukhopádhyáya. Appearance, new. Prose and verse. Correct.

Tattvopanishad. A dissertation on the great Vedántic dogma of *Tattvamasi*, "thou art that." Anonymous. The work professes to be a Upanishad.

Beginning. अथ तत्त्वोपनिषत् । अथ महावाक्यप्रकरणं व्याख्यास्यामः । तत्त्वमसीति सोऽहमिति महावाक्यं ।—इत्यादि ।

End. हृदयकमलमध्ये सूर्यविम्बासनस्थं
सकलपुरुषवीजं सृष्टिसंहारहेतुं ।
घवम्लवपुषमिन्दुं वडपद्मासनस्थं
भुजगवलयहारं भस्मदिग्धाङ्गमीशं ॥

ॐ तत् सत्, ॐ तत् सत्, ॐ तत् सत् । ॐ शान्तिः ॐ शान्तिः ॐ शान्तिः ।

विषयः । तत्त्वमस्यादिमहावाक्यार्थप्रकाशनं । तत्र अध्यारोपनिरूपणमुखेन लक्षणाकथनञ्च ।

No. 2193. कौलिकोपनिषत् । Substance, foolscap paper, 9 × 3 inches. Folium, 1. Lines, 7 on a page. Extent, 12 ślokas. Character, Bengali. Date, ? Place of deposit, Ulá, Post Ráṇágháṭa, Zillá Nadiyá, Bábu Annadáprasáda Mukhopádhyáya. Appearance, new. Prose. Correct.

Kaulikopanishad. A manual on the duties of Kaulas. A Tantric digest, but professing to be a Upanishad.

Beginning. अथ कौलिकोपनिषत् । अथातो धर्म्मजिज्ञासा । ज्ञानं बुद्धिश्च ज्ञानं मोक्षस्य कारणं मोक्षः सर्व्वज्ञताबुद्धिः—इत्यादि ।

End. प्रातरुत्थाय देशिकः आज्ञासिद्धिर्भवति भैरवाज्ञा परमेश्वरी यथाचारविहीनोऽपि इति पूजां कुर्व्वन्ति यदि ज्येष्ठा मन्यन्ते "दिशन्ते" नन्दने वने । ॐ तत् सत् ।

Colophon. इति कौलिकोपनिषत् समाप्ता ।

विषयः । संक्षेपेण कौलिकानामाचारकथनं ।

No. 2194. कालिकोपनिषत्। Substance, foolscap paper, 9 × 3 inches. Folia, 4. Lines, 7 on a page. Extent, 61 ślokas. Character, Bengali. Date, ? Place of deposit, Ulá, Post Ránágháṭa, Zillá Nadiyá, Bábu Annadáprasáda Mukhopádhyáya. Appearance, new. Prose. Correct.

Kálikopanishad. A dissertation on the mantras of Káliká, the mode of meditating on that goddess, and her praises. This also professes to be a Upanishad.

Beginning. अथ कालिकोपनिषत्। अथ हैनां ब्रह्मरन्ध्रे ब्रह्मस्वरूपिणीं आप्नोति सुभगां त्रिगुणां मुक्तां सुभगां—इत्यादि।

End. नान्यप्रकारेण सिद्धिर्भवति इह वै कालिकामन्त्रो वा तारेति तारामन्त्रो वा त्रिपुरामन्त्रो वा सर्व्वस्य दुर्गामन्त्रो वा इत्योम् शिवः। ॐ तत् सत् ॐ तत् सत्। ॐ तत् सत्। ॐ शान्तिरोम्। ॐ शान्तिरोम्। ॐ शान्तिः।

Colophon. इत्याथर्व्वणे वेदे सौभाग्यकाण्डे कालिकोपनिषत् समाप्ता।

विषयः। कालिकायाः मन्त्रध्यानमाहात्म्यादिकथनं।

No. 2195. परीक्षापद्धतिः। Substance, agallochum bark, 14 × 4 inches. Folia, 40. Lines, 6 on a page. Extent, 716 ślokas. Character, Bengali. Date, ? Place of deposit, Ulá, Post Ránágháṭa, Zillá Nadiyá, Bábu Annadáprasáda Mukhopádhyáya. Appearance, fresh. Prose and verse. Correct.

Paríkshápaddhati. A digest of rules regarding various kinds of ordeals. By Vásudeva. The ordeals are what have been fully described in Mcnaughten's Hindu Law.

Beginning. विश्वरूपयज्ञपार्श्वशूलपाणिमिताचराः।
विचार्य्य धर्म्मशास्त्रञ्च परीक्षाविधिरुच्यते॥
प्रमाणं मानुषप्रोक्तं लिखितादित्रयं परः।
इदानीं द्विविधं प्राह तुरीयं + + धं मुनिः।
तुलाग्न्यापोविषं कोषादिव्यानीह विशुद्धये॥ इत्यादि।

End. एवं दानशब्दोनानार्थः। अत्र एतेन प्रकारेण सर्व्वमादिकार्य्यमिति परीक्षापद्धतिः।

Colophon दृष्ट्वा प्रामाणिकं ग्रन्थं प्रयत्नेन विचार्य्य च।
श्रीवासुदेवधीरेण परीक्षापद्धतिः कृता॥

विषयः। चौर्य्यादिषु महाभियोगेषु लौकिकप्रमाणेन याथार्थ्यानवधारणे संशयापनोदनाय तुलाग्न्यादिपरीक्षा कर्त्तव्येतिनिरूपणानन्तरं तेषां प्रयोगकथनं। तत्र—कालवयोऽवस्थाविशेषे परीक्षाविशेषकर्त्तव्यताकथनं। तुलापरीक्षाविधिः। एतत्प्रयोगः। एवं परत्र ज्ञेयं। अग्निपरीक्षाविधिकथनं। उदकपरीक्षाविधिः। विषपरीक्षाविधिः। कोषपरीक्षाविधिः। तण्डुलपरीक्षाविधिः। तप्तमाषकविधिः। धर्म्माधर्म्मादिव्यविधिः। दण्डविधिकथनं। पलादिपरिमाणकथनं।

No. 2196. तारोपनिषत्। Substance, foolscap paper, 9 × 3 inches. Folia, 3. Lines, 7 on a page. Extent, 45 ślokas. Character Bengali. Date, ? Place of deposit, U'lá, Post Ráṇágháṭa, Zillá Nadiyá, Bábu Annadáprasáda Mukhopádhyáya. Appearance, new. Prose. Incorrect.

Táropanishad. A treatise on the worship of the goddess Tárá, giving the mantras, explaining their meanings, and supplying details. The work professes to be a Upanishad, and supplies no author's name.

Beginning. अथ तारोपनिषत्। अथ हैनां ब्रह्मरन्ध्रे ब्रह्मस्वरूपिणीं तारिणीं प्राप्नोति। तारयतीति तारा तारा सार्द्धपञ्चाक्षररूपा ब्रह्मविष्णुरुद्रेश्वरसदाशिवविन्दुमेलनरूपा विद्या—इत्यादि।

End. गणनासिद्धविद्यानां देवताज्ञानप्रकाशनानां कालिकाविहितानि कल्पानि कुर्य्यात्। ॐ तत् सत्। ॐ शान्तिः, ॐ शान्तिः, ॐ शान्तिः।

Colophon. इति नक्षत्रविद्या तारोपनिषत्।

विषयः। तारायाः मन्त्रोद्धारविधिपूजाप्रकारादिकथनं।

No. 2197. त्रैपुरोपनिषत्। Substance, foolscap paper, 9 × 3 inches. Folia, 2. Lines, 6 on a page. Extent, 33 ślokas. Character, Bengali. Date, ? Place of deposit, U'lá, Post Ráṇágháṭa, Zillá Nadiyá, Bábu Annadáprasáda Mukhopádhyáya. Appearance, new. Prose. Correct.

Traipuropanishad. A treatise on the worship of the goddess Tripurá. This work also professes to be a Upaṇishad, and to belong to the Saubhágya Káṇḍa of the Atharva Veda.

Beginning. ॐ नमस्त्रिपुरायै। ॐ तिस्रः पुरस्त्रिपथा विश्वचर्षणी यत्राकथा अक्षराः सन्निविष्टाः अधिष्ठाये नाम पुरा पुराणी महत्तरा मही नां देवतानां—इत्यादि।

End. एष ऋग्यजुः परमेतच्च साम हा अयमथर्व्वयमन्या च विद्या। ॐ।

Colophon. इत्याथर्व्वणे वेदे सौभाग्यकाण्डे त्रैपुरोपनिषत् समाप्ता । ॐ तत् सत् । ॐ शान्तिः ।

विषयः । त्रिपुरासुन्दर्य्या मन्त्रोद्धारपूजादिकथनं ।

No. 2198. कपिलसूत्रभाष्यम् । Substance, country-made paper, 15 × 6 inches. Folia, 55. Lines, 9 on a page. Extent, 1,336 ślokas. Character, Bengali. Date, ? Place of deposit, Ulá, Post Ráṇágháṭa, Zillá, Nadiyá, Bábu Annadáprasáda Mukhopádhyáya. Appearance, new. Generally correct.

Kapila-sútra-bháshya. A commentary on the Sáṅkhya aphorisms of Kapíla. By Sáṅkhyáchárya. According to the commentator, a Bráhman of the name of Ásuri, oppressed by threefold pain, sought the help of Kapila, and obtained the work which includes only 22 aphorisms in one chapter. This story would make the text to be the archetype of the current Sáṅkhya Sútra which includes 526 aphorisms divided into six chapters. Other commentators are of the same opinion, and Colebrooke, adverting to one, says, "If the authority of the scholiast of Kapila may be trusted, the *Tattvasamása* is the proper text of the *Sáṅkhya;* and its doctrine is more fully, but separately set forth, by the two ampler treatises," the *Sáṅkhya-sútra* and the *Yoga-sútra.* (Essays, p. 244. Mr. Hall, however, demurs to this, and takes the *Tattvasamása* to be an abridgement of the larger work, (*Contributions,* p. 2). The Tattvasamása is the same with the Kapila-sútra under notice. Mr. Hall noticed two commentaries, but, they are different from our text.

Beginning. अथासुरिर्नाम कश्चिद्ब्राह्मणस्त्रिविधेन दुःखेनाभिभूयमानस्तत्कारणं सांख्ययोगाभिपन्नं ज्ञात्वा देव मुच्यते सर्व्वपाशैरिति श्रुत्यं प्रसूतं कपिलं यस्तमग्रे ज्ञानैर्विभर्त्ति जायमानञ्च पश्येदिति च श्रवणमवगम्य परमर्षिपञ्चमभगवत्कपिलमुपमन्नः शरणं तद्दपनोदकं तद्दपनोदकतत्त्वजिज्ञासुः सद्दोवाच भगवन् शिष्ययोग्यतां वितर्कयन् सांख्यतन्त्रमाम्नानामविवेकं द्वाविंशतिसूत्रैकाध्यायं चतुष्पादं तद्व्याचाख्यामि तस्यादिममेतत् सूत्रं—अष्टौ प्रकृतय इति । नन्वस्य सौकर्य्याद्दृष्टोपायानां कृते बहुदुःखसाध्यविवेकख्यात्येतिचेन्न सव्यभिचारित्वात् - इत्यादि ।

End. जिज्ञासवे शिष्यायासुरये ज्ञानार्थमन्येभ्योऽपि इत्यतः स्यादित्युत्सर्गनियोगः कृत इति ।

इति सांख्यभाष्ये चतुर्थः पादः ।

Colophon. इति श्रीसांख्याचार्य्यकृतकपिलसूत्रभाष्ये प्रथमाध्यायः। समाप्तञ्चेदं ससूत्रं सांख्यभाष्यं।

विषयः। तत्त्वसमासाख्यकापिलसांख्यसूत्रस्य व्याख्यानं।

No. 2199. गुप्तवती। Substance, foolscap paper, 16 × 3½ inches. Folia, 143. Lines, 7 on a page. Extent, 3,055 ślokas. Character, Bengali. Date, ? Place of deposit, Ulá, Post Ránágháṭa, Zillá Nadiyá, Bábu Annadáprasáda Mukhopádhyáya. Appearance, new. Prose. Incorrect.

Guptavatí. A commentary on the Chaṇḍí section of the Márkaṇḍeya Puráṇa. By Bháskararáya Bhárati Díkshita, son of Gambhíraráya Bhárati Díkshita. There are a number of mantras, charms, amulets, &c. appended to the work.

Beginning. श्रीरामं प्रति पुष्करामिधमहायत्तेण वेदत्रयव्याख्यानावसरे विशिष्य कथितं श्रीविष्णुधर्म्मोत्तरे। दुर्गां धेनमुपक्रयामि सुदुघामित्य + तं शङ्कराचार्य्यशिष्यचतुष्टयेन सहितं वन्दे गुरूणां गुरुं॥

विधिविष्णुप्रमुखामरोदयस्थितिनाशेषु शिवोऽप्यनीश्वरः।
जगद + + + वलयं क्रमः त्तणमुद्दानकपुष्पभञ्जिका॥
कवचार्गले च कीलकमादौ मध्ये त्रयोदशाध्यायी।
अन्ते प्राधानिकवैकृतिके मूर्त्तित्रयं रहस्यानां॥
इति मार्कण्डेयपुराणाध्यायेषूनविंशतौ गुप्तान्।
अर्थान् प्रकटीकुरुते भास्कररायोऽग्निचित् कतिचित्॥

End. तेज इति। १९। २०। २१। २२। रहस्यत्रयस्यापि अध्ययनं विधत्ते व्याख्यानमिति। अवहितः अर्थावधानसहित इति सर्व्वं शिवं।

इति गुप्तवत्यां मूर्त्तिरहस्यव्याख्या नाम षोड़शोऽध्यायः। १६

Colophon. इति श्रीमत्पद्वाक्यप्रमाणपारावारपारीणधुरीणसर्व्वतन्त्रस्वतन्त्रश्रीमद्गम्भीररायभारतीदीक्षितात्मजभास्कररायभारतीदीक्षितविरचिता गुप्तवतीसमाख्या सप्तशतीव्याख्या समाप्ता।

विषयः। कवचार्गलाकीलकव्याख्यानपुरःसरं सप्तशतीतिप्रथितस्य देवीमाहात्म्यस्य व्याख्यानमन्ते च मूर्त्तिरहस्यरहस्यार्थकीर्त्तनं।

No. 2200. वेदान्तचिन्तामणिः। Substance, aguru-bark, paper, 18 × 4 inches. Folia, 183. Lines, 10 on a page. Extent, 7,260 ślokas. Character,

Bengali. Date ? Place of deposit, U'lá, Post Ráṇágháṭa, Zillá Nadiyá, Bábu Annadáprasáda Mukhopádhyáya. Appearance, new. Prose. Generally correct.

Vedánta-chintámaṇi. A dissertation on the Vedánta doctrine as expounded by Sañkara A'chárya and refutation of adverse comments thereon. The work is written in the form of a comment on the first four aphorisms of the Vedánta-sútra. By S'uddha Bhikshu, disciple of Vis'ves'vara. Hall's Contributions, p. 97.

Beginning. ॐ नमः श्रीनीलशैलशिरोमणये रघुनाथाय ।
श्रीरामविश्वेश्वरपादपद्मं संसारसन्तापहरं प्रणम्य ॥
भाष्यादितत्त्वं सुविचार्य्य शुद्धोवेदान्तचिन्तामणिमातनोति ॥
नमस्तस्मै विचाराय ब्रह्मानन्दफला + पि ।
यनाथाय +ते वेदा विधिना किङ्करीकृताः ॥

अथ कश्चिदधीतसाङ्गस्वशाख इह जन्मनि जन्मान्तरे वा ज्ञानार्थानुष्ठितनित्यादिकर्म्मणा शुद्धसत्त्वः साधनचतुष्टयवान् मोक्षोपायं वेदेऽन्विष्य इदमापाततोजानाति आत्मनस्तु कामाय सर्व्वं प्रियं भवतीत्यात्मशेषत्वेन सर्व्वस्य प्रियत्वोक्तेः सर्व्वतोविरक्तोऽधिकारी आत्मनि खल्वरे दृष्टे श्रुते विज्ञाते इदं सर्व्वं विज्ञातमित्युपक्रम्य तावदरे खल्वमृतत्वमित्युपसंहारादात्मज्ञानं मोक्षोपायः ज्ञानस्य च विषेयत्वादात्मा वा अरे द्रष्टव्य इत्यात्मज्ञानं अनूद्य तद्धेतुः श्रोतव्योमन्तव्योनिदिध्यासितव्य इत्यनेन मननिदिध्यासनाभ्यां फलोपकार्य्यङ्गाभ्यां श्रवणमङ्गि विधीयत इति । इत्यादि ।

End. भाष्यटीकाविवरणतत्प्रकाशार्थसङ्ग्रहः ।
वेदान्तचिन्ता + + + कृतशान्ते विशुद्धये ॥
वर्गवर्णकसंयुक्तचतुःसूत्रीसमाश्रितः ।
वेदान्तचिन्तामणिना प्रीयात् श्रीरघुनन्दनः ॥
उपक्रमादिभिर्लिङ्गैर्वेदान्ता+तनिष्ठितं ।
तं वन्दे श्रीरघूद्वारकारुण्यं गुरुरूपिणं ॥

इति श्रीपरमहंसपरिव्राजकाचार्य्यश्रीविश्वेश्वरभगवत्पूज्यपादपादपङ्कजभृङ्गश्रीशुद्धभिक्षुसंदृब्धोवेदान्तचिन्तामणिः सम्पूर्णः ।

विषयः । शाङ्करमतमवलम्ब्य विरुद्धमतजातखण्डनपूर्व्वकं ब्रह्मसूत्रप्रथमाध्यायप्रथमपादीयचतुःसूत्रीव्याख्यानं ।

No. 2201. शक्तितन्त्रम् । Substance, country-made yellow paper, 11 × 6 inches. Folia, 18. Lines, 8 on a page. Extent, 306 ślokas. Character,

Bengali. Date, ? Place of deposit, Ulá, Post Ráṇágháṭa, Zillá Nadiyá, Bábu Annadáprasáda Mukhopádhyáya. Appearance, new. Verse. Correct.

S'aktitantra. A Tantra of the S'ákta class, treating of the adoration of S'ákti in various forms. The codex is incomplete, containing only five chapters.

Beginning. कैलासशिखरे रम्ये निकुञ्जकुसुमान्विते ।
रत्नसिंहासने देवी मुदिता शिवसन्निधौ ॥
नानारसकथा रम्या ऊचतुस्तौ परस्परं ।
देवी पप्रच्छ भो नाथ ब्रह्माण्डं केन वा कृतं ॥
केन वा पाल्यते सम्यक् केन वा ह्रियते च तत् ।
किं वा तद्ब्रह्मणोरूपं किं कर्म किञ्च साधनं ।
तत्सर्व्वं ज्ञातुमिच्छामि कृपया वद शङ्कर । इत्यादि ॥

End. चतुरस्रे महेशानि लोकपालान् समर्च्चयेत् ।
तद्वहिस्सैव वज्राद्यान् पूजयेद्भाग्यहेतवे ॥
ततोयथाशक्ति जप्त्वा पूर्व्ववच्च समाचरेत् ।

Colophon. इति शक्तितन्त्रे पञ्चमः पटलः ।

विषयः । १मे पटले,—महाकालदर्शनेन जगदुत्पत्तिकथनं । परापश्यन्तीमध्यमावैखरीशक्तिनिरूपणं । दुर्गादिनाममाहात्म्यकीर्त्तनं । त्रिशक्तेः शतनामकीर्त्तनं ।

२ये पटले,—त्रिशक्तिभेदकथनमुखेन दुर्गामन्त्रनिरूपणं । षड़ङ्गन्यासादिकथनं । पुरश्चरणविधिकथनं । पूजाद्रव्यादिनिरूपणं । वलिदानयोग्यपशुपक्ष्यादिनिरूपणं । ध्यानयन्त्रादिकथनं । नवशक्तिपूजादिविधिः । भुवनेश्वर्य्यादिशक्तिकथनञ्च ।

३ये पटले—भुवनेश्वरीमन्त्रध्यानादिकथनं । त्रिपुटामन्त्रध्यानादिकथनं । शूलिनीमन्त्रध्यानादिकथनं । वज्रप्रस्तारिणीमन्त्रध्यानादिकथनं । नित्यामन्त्रध्यानादिकथनं । महिषमर्द्दिनीमन्त्रध्यानादिकथनं । शक्तिगायत्रीमन्त्रध्यानादिकथनञ्च ।

४र्थे पटले,—त्रिपुरामन्त्रध्यानादिकथनं । तत्र पुरश्चरणविधिकथनं । त्रिपुरायन्त्रनिर्म्माणद्रव्यनिरूपणं । दग्धस्फुटितयन्त्रादौ प्रायश्चित्तादिविधानं । श्रीचक्रदर्शनादिफलकीर्त्तनं । त्रिपुण्ड्रविधानकथनञ्च ।

५मे पटले,—पश्यन्तीशक्तिगणनाकथनं । तारामन्त्रोद्धारध्यानादिकथनं । छिन्नमस्तामन्त्रध्यानादिकथनं । धूमावतीमन्त्रध्यानादिकथनं । उच्चाटनादिविधिकथनं । विशालचीमन्त्रध्यानादिकथनं । गौरीमन्त्रोद्धारादिकथनञ्च ।

No. 2202. तन्त्रदीपिका। Substance, country-made paper, 18 × 3⅓ inches. Folia, 255. Lines, 9 on a page. Extent, 11,715 ślokas. Character, Bengali. Date, ? Place of deposit, Ulá, Post Ráṇágháṭa, Zillá Nadiyá, Bábu Annadáprasáda Mukhopádhyáya. Appearance, old. Prose and verse. Correct.

Tantra-dípiká. A digest of the various forms of worship of S'ákta divinities inculcated in Tantras. By Gopála Bhaṭṭa.

Beginning. नित्यां प्रणम्य चिद्रूपां नित्यानन्दञ्च निर्गुणं।
अखण्डं परमानन्दं गुरुं ब्रह्ममयं तथा॥
विलोक्यागमशास्त्राणि विविधान् सङ्ग्रहानपि।
श्रुतिस्मृत्यविरोधानि ज्ञानस्य कारणानि च॥
आगमवागीशपौत्रेण हरिनाथस्य सूनुना।
श्रीगोपालेन विज्ञेन कृतेयं तन्त्रदीपिका॥
दीक्षादिलक्षणञ्चैव मन्त्रयन्त्रादिनिर्णयं।
तन्त्रेऽस्मिन् सम्प्रवक्ष्यामि विदुषां प्रीतिहेतवे॥
अथ का दीक्षा दिव्यप्रबोधोदयदुरितक्षयाय स्यात्—इत्यादि।

End. अष्टाक्षरी महाविद्या सर्व्वकामफलप्रदा।
अस्याः पूजादिकं सर्व्वं पूर्व्ववच्च समाचरेत्॥

Colophon. इति कात्यायनीकल्पः।

विषयः। दीक्षास्वरूपकथनं। दीक्षाया आवश्यकतानिरूपणं। सद्गुरुलक्षणादिकथनं। शिष्यलक्षणतद्भक्तिप्रकरणं। महाविद्यादिस्वरूपकथनं। सिद्धमन्त्रादिलक्षणकथनं। दीक्षाकालादिनिरूपणं। अत्र नक्षत्रचक्रादिकथनञ्च। दीक्षा-महादीक्षा-उपदेशभेदनिरूपणं। पञ्चायतनीदीक्षाविधिः। सर्व्वसाधारणनित्यपूजाविधिः। आह्निककृत्यनिरूपणं। तत्र तन्त्रोक्तविधानेन प्रातःकृत्यस्नानतर्पणादीनां विस्तरतोविधानकीर्त्तनं। पूजाविशेषे आसननियमकथनं। विशेषेण भूतशुद्धिनिरूपणं। प्राणायामनिरूपणञ्च। सामान्यतोविहिताविहितपुष्पाणि। पूजाधिकरणनिरूपणं। नैमित्तिककाम्याद्यर्च्चनविधिनिरूपणं। परमयोगिनां मोक्षपूजाविधिकथनं। जपादिविधिकथनं। अन्तःपूजाविधिः। नवविधकुण्डनिरूपणं। कुण्डानां विशेषफलकथनं। काम्यहोमार्थं कुण्डनिरूपणं। होमविधिकथनं। जपमालानिरूपणादिकं। ग्रहणनिमित्तपुरश्चरणविधिकथनं। मन्त्राणां विविधसंस्कारविधिः। सर्व्वतोभद्रमण्डलादिकथनं। पञ्चाब्जमण्डलादिविधिः। मन्त्रसङ्केतकमन्त्रनिरूपणादिकं। गणेशादिपूजनविधिकथनं। तन्मन्त्रादिकथनं। एवं सौरादिमन्त्रनिरूपणं। शिवमन्त्रादिनिरूपणं। गणेशादिमन्त्रेषु प्रत्येकं पुरश्चरणविधिकथनं। वासुदेवादिमन्त्रनिरूपणं। एवं राम-

हसिंहवक्त्रादिमन्त्रनिरूपणं। हरिहरात्मकमन्त्रकथनं। हयग्रीवादिमन्त्रकथनं। महिषमर्द्दिन्यादिमन्त्रनिरूपणं। जयदुर्गादिमन्त्रकथनं। एवं नवदुर्गाकात्यायन्यादिमन्त्रकथनं। प्रत्येकं पुरश्चरणकथनञ्च। विस्तरेण कालिकामन्त्रनिरूपणतत्प्रयोगादिकीर्त्तनं। गुह्यकालीविद्यादिनिरूपणं। महाकालीमन्त्रादिकथनं। ताराविद्यादिविधिकथनं। शवसाधनादिविधिकथनं। परमयोगिनां वीरसाधनविधिकथनं। श्रीचक्रादिनाशे प्रायश्चित्तकथनं। तरिणीकात्यायन्यादिकथनञ्च।

No. 2203. **मानसोल्लासः।** Substance, paper, 11 × 4 inches. Folia, 331. Lines, 9 on a page. Extent, 5,898 ślokas. Character, Nágara. Date, ? Appearance, old. Place of deposit, Bhágalpur, Nityánanda Miśra, Paṇḍit of Zillá School. Verse. Incorrect.

Mánasollása. This is a different recension of the work noticed under No. 1215, (*cf.* 111, p. 182). It is deficient in the chapters on architecture, and conforms more closely to the main object, that of supplying a miscellaneous collection of rules and instructions regarding duties of kings, selection of officers, characteristics of different orders, classes and professions; duties, (mostly Smṛiti rules), prohibitions, food, dress, ornament, arms, grammar, games, erotics and a variety of other topics regarding which kings should have a general knowledge. By Bhúlokamalla Somes'vara, of the Chálukya dynasty. I notice it here to supply the full table of contents as given in the introduction to the work.

Beginning अभीष्टफलदं सिद्धिसिद्धमन्त्रगणेश्वरं।
कर्णतालानिलोद्धूतविघ्नतूललवभ्रमः॥
लावकस्य तित्तिरस्य महिषस्य विनोदनम्।
पारावतविनोदे च विनोदः सारमेयजः॥
श्येनमीनमृगाणाञ्च विनोदे गतिवाद्ययोः।
नृत्यस्य च कथायाश्च विनोदश्च चमत्कृतेः॥
प्रमदाया विनोदानामिति रीरिताः।
अथ सौख्यप्रदा क्रीड़ा विंशतिः कथ्यते क्रमात्॥
पर्व्वते प्रमदोद्याने प्रेषायां जलसेवने।
क्रीड़ा तु शाद्वले देशे वालुकायां शशिस्त्विषि॥
सस्यक्षेत्रेषु वा गोष्ठ्यां प्रहेलाकथनेष्वपि।

चतुरङ्गाश्वयोः क्रीड़ा वराटकफणीन्द्रयोः ॥
पंजिकायां तमिखे च क्रीड़ाचारणचत्तरे ।
प्रश्नक्रीड़ा रतिक्रीड़ा क्रीड़ानां विंशतिः पृथक् ॥
अध्यायशतकं लेवं पञ्चप्रकरणानि च ।
इति संक्षेपतः प्रोक्तं मानसोल्लासवीजकम् ॥
विस्तृतं शतशाखाभिर्वक्ष्ये कृत्स्नं द्रुमोपमम् ।
अत्रादौ कथ्यते राज्यप्राप्तिकारणविंशतिः ॥
स्थिरराज्यस्य भूभर्त्तुरुपभोगाश्च विंशतिः ।
प्रमोदजनकास्तद्वद्विनोदा अपि विंशतिः ॥
सुखोपपादिका क्रीड़ा विंशतिः परिकीर्त्यते ।
अनुक्रमणिकां तत्र वच्मि संक्षेपतः पुरः ॥
असत्यवर्ज्जनं कार्य्यं परद्रोहस्य वर्ज्जनम् ।
वर्ज्जनञ्चाप्यगम्यानामभक्ष्यस्य च वर्ज्जनम् ॥
दानं मनोहरं वाक्यं मिष्टापूर्त्तप्रवर्त्तनम् ।
अशेषदेवताभक्तिर्गोषु विप्रेषु तर्पणम् ॥
पितॄणां तर्पणं कार्य्यमतिथेश्चैव भोजनम् ।
शुश्रूषणं गुरूणाञ्च तपस्तीर्थेषु मज्जनम् ॥
दीनानाथेषु वत्सलं भृत्यानामपि पोषणम् ।
शरणागतरक्षा च राज्यलाभाय विंशतिः ॥
अथ प्राप्तस्य राज्यस्य स्थैर्य्यकारणविंशतिः ।
सप्ताङ्गानि तथा तिस्रः शक्तयः षड्गुणा अपि ॥
उपाङ्गा अपि चत्वार इति विंशतिरीरिताः ।
अथ राज्योपभोगस्य विंशतिः कथ्यते क्रमात् ॥
गृहमज्जनयस्यापि पादुकायुगलस्य च ।
ताम्बूलस्य विलेपस्य भोगं चामरमाल्ययोः ॥
भूषणासनयोर्भोगश्चामरस्थानयोरपि ।
पुत्राणामुपभोगाश्च भोजनस्य जलस्य च ॥
पादाभ्यङ्गस्य पानानां वस्त्राणां शयनस्य च ।
धूपस्य योषिताञ्चेति भोगानां विंशतिः पृथक् ॥
विंशतिः कथिता भोगा विनोदानामतोऽधुना ।
वक्ष्ये शस्त्रस्य शास्त्रस्य विनोदान् गजवाजिनोः ॥

अङ्गमल्लविनोदस्तु विनोदस्तासचूड़जः ।

End. शब्दानां लक्षणं ज्ञानं तथा स्त्रीजाति निश्चयः ।
कामधेनुरिदं शास्त्रं मानसोल्लासमंज्ञितं ॥
नास्त्यनेन समं शास्त्रं सर्व्ववस्तुप्रकाशने ।
शास्त्रमेतल्लभते ज्ञानं चत्रियोराज्यमाप्नुयात् ॥
वैश्योविभवपर्थैं शुद्रोहत्तिं प्रपूजितः ॥ २१ ॥

Colophon. इति श्रीमहाराजाधिराजसत्यश्रेय्यकुलतिलकचालुक्याभरणश्रीमद्भूलोकमल्ल-श्रीसोमेश्वरदेवविरचिते अभिलषितचिन्तामणौ मानसोल्लासे सुखोपपादकक्रीडाकथने पञ्चम-प्रकरण समाप्तम् ।

No. 2204. मनोरमा । Substance, aguru bark, 21 × 4¼ inches. Folia, 159. Lines, 11 on a page. Extent, 7,821 ślokas. Character, Bengali. Date, Sk. 1649. Place of deposit, Ulá, Post Ráṇágháṭa, Zillá Nadiyá, Bábu Annadáprasáda Mukhopádhyáya. Appearance, fresh. Prose. Corrupt.

Manoramá. A commentary on the Tantraràja, a digest of the Tántric doctrine of Kádimata, compiled by Nrisiñha, a king of the Dekkan, after instructions received by him from one Kanṭhes'a Dijavara, a Guru of the king of Kás'mír, when he was on his travels in the south. It seems from some corrupt verses in the introduction that a commentary was written on the first twenty-two chapters of the work by one Subhagánandanátha, and on the next fourteen by his pupil Prakas'á-nanda Deśíka, and a revised version of that was written by Sundaravara, who styles himself *Khsmábhrit* or king. The extent of the commentary is reckoned at 1,195 verses. The codex is obviously incomplete, though described as complete in the colophon.

Beginning. ॐ नमोगणेशाय । आद्यश्लोकेन प्रबन्धवाक्यार्थगर्भविनायकस्तुति. क्रियते । तत्र अनाद्यनन्तः कालस्याद्यन्तरहितत्वादपराधीनः । इतरप्रेरणाविधुरः । स्वाधीनभुवनत्रयः स्वा-यत्तज्ञातृज्ञानज्ञेयात्मभुवनत्रयोजयति विश्वोत्कृष्टोभवतीत्यर्थः ।—इत्यादि ।

End. श्रीमत्कादिमते तन्त्रे व्याख्यानं ग्रन्थसङ्ख्यया ।
सहस्राणां द्वादशकं न्यूनं पञ्चाशतैरितं ॥
काश्मीरराजस्य गुरुः श्रीकण्ठेशोद्विजेश्वरः ।
दक्षिणापथपुण्यौघपरिणामाद्दयोदधिः ॥

कदाचिदागतोद्रष्टुं राममेतुं खलीलया।
तेनैवानुगृहीतोऽभून्मध्येमार्गं नृसिंहराट्॥
तन्त्राण्यधीतवांस्तस्मान्नित्यानां तेषु निर्मिता।
व्याख्या मनोरमाभिख्या तेन कादिमतस्य तु॥
सुभगानन्दनाथेन द्वाविंशपटलावधि।
तदाज्ञयावशिष्टानां पटलानां विनिर्ममे॥
चतुर्दशानां तच्छिष्यः प्रकाशानन्ददेशिकः।
तां सुन्दरवरच्छायद्याख्यां प्राक्सम्प्रदायतः॥
समाप्ता चेयं तन्त्रराजव्याख्या मनोरमाख्या।

Colophon. शुभमस्तु। शकाब्दाः १६४९।

विषयः। तन्त्रराजाभिधानतन्त्रग्रन्थस्य व्याख्यानम्।

No. 2205. **वासिष्ठचन्द्रिका, वा वासिष्ठपददीपः।** Substance, country-made yellow paper, 15 × 4½ inches. Folia, 94. Lines, 12 on a page. Extent, 4,207 ślokas. Character, Bengali. Date, ? Place of deposit, U'lá, Post Ráṇágháṭa, Zillá Nadiyá, Bábu Annadáprasáda Mukhopádhyáya. Appearance, new. Prose. Incorrect.

Váśishṭha-chandriká ALIAS **Váśishṭha-padadípa.** A commentary on the philosophical portion of the Yogavás'ishṭha Rámáyaṇa. By Advayáraṇya.

Beginning. अविद्यकल्पितद्वैतं नरसिंहाभिधं महः।
वेदान्तवेद्यं वन्देहं परमानन्दविग्रहं॥
सर्व्वमुत्तमसुखप्रमादतोजीवजातम्+ति श्रुतिर्जगौ।
तस्य वेदविदितस्य वर्ण्यते किं महत्त्वमखिलात्मनोगुरोः॥
नतभवपरिपन्थिदीनदानैकलीलं
मुनिवरनिकुरम्बैः पूज्यमानाङ्घ्रियुग्मं।
विधुतसकलदोषं मद्य (?) विज्ञातमूर्त्तिं
श्रुतिशतनुतमाराद्राश्रये विश्वनाथं॥
योद्दल्लीमधिगतः शिवराजधान्यां
वाद्यान्तरैर्विरचितापचितीच्छयेव।

इत्थैव वारयति विघ्नशतानि सोऽस्मा-
दस्मान् समस्तसुरवन्दितपादपद्मः ॥

— — — — — — — — — ।

श्रीमद्गुरुगणेशान् वचःसङ्कल्पितार्थदान् ।
प्रणम्य मूर्द्धावहितः कुर्व्वे वासिष्ठचन्द्रिकां ॥
वासिष्ठाब्धिं तितीर्षामि हनूमानिव लीलया ।
रामपादाब्जभक्त्याहं यन्नमर्हन्ति सूरयः ॥

अथ सत्यज्ञानानन्दाद्वितीयः परमात्मा भगवन्नारायणः कल्पादौ चेत्राणि तपःप्रधानजीवांश्च चित्प्रधानोभगवान् ज्ञानकर्म्मानुसारेण ससर्ज्ज तथाचोक्तमाचार्य्यैः—इत्यादि ।

End. अद्वयारण्यनिर्म्माणे वासिष्ठपददीपके ।
संसारगरनिर्व्वाणं निर्व्वाणप्रक्रियाभ्यगात् ॥

— — — — — — — — — — — ।

यस्मिन बोधनिधैा निधाय भगवान् विद्याप्रचारोद्यमं
रुद्राण्या रमणः प्रियासहचरः खैरं चचारा+षु ।
दत्त्वा नाम+निर्जनोपकृतये विद्याधिकारोचितं
प्रायस्तं परमं गुरुं भुवि महादेवाश्रमं सम्भज ॥

— — — — — — — — — — ।

स जयति कवितासुधानिधानं
द्विजकभूपतिरग्रिमोऽभिनन्दः ।
अतिविपुलवा+ +समासमासं
प्रजड़जनोपकृतिर्य उद्दधार ॥
निन्दन्निदं वेदनिविष्टमिष्टं
प्रकृष्टमुल्लासपदं हि शास्त्रं ।
चित्रं पवित्रं स्वकुलप्रकाशं
गच्छन् प्रशंसन् पुमर्थभाक् स्यात् ॥
श्रीमत्त्र्यम्बकपत्तने नरहरिचैाणीश्वरेन्द्राग्रज-
श्रीमल्लक्ष्मणभाक्‌यस्य विनयाद्वासिष्ठरामायणे ।
प्रारब्धः पददीपकः खलु मया+स्मिन् स्वहस्तार्पिते
साराथः परिगृह्यते कृतिवरैः——— ॥

Colophon. इति अद्वयारण्यटीका समाप्ता ।

विषयः । योगवासिष्ठस्य उत्पत्तिप्रकरणादारभ्य निर्व्वाणप्रकरणान्तं व्याख्यानं ।

No. 2206. महिमप्रकाशिका । Substance, country-made paper, 14 × 3 inches. Folia, 26. Lines, 6 on a page. Extent, 498 s'lokas. Character, Bengali. Date, ? Place of deposit, U'lá, Post Ráṇágháṭa, Zillá Nadiyá, Bábu Annadáprasáda Mukhopádhyáya. Appearance, new. Prose. Generally correct.

Mahima-prakáśiká. A commentary on the Mahimnastotra—a hymn in praise of S'iva. By Govindaráma Siddhántavágís'a Bhaṭṭá-chárya, son of Rámadeva.

Beginning. यः कर्त्ता सचराचरस्य जगतोध्यायन्ति यं योगिनो-
येनेदं क्रियतेऽवता (?) श्रुतिगणा यस्मै न वक्तुं क्षमाः ।
यस्माद्भय उदेति सर्व्वमखिलं यस्मिन् पुनर्लीयते
यस्मान्तं न विदुर्मुनीन्द्रनिचयस्तस्मै नमः शम्भवे ॥
योजातोरामदेवाद्विबुधगणहृदा + +कारोरुकीर्त्ति-
र्विद्यादानादिजन्मामितविषदयशस्तर्कवागीशसूनोः ।
सोऽयं गोविन्दरामः समतनुत महिम्नः स्तुतेर्व्वृत्तिमेतां
विद्वत्सङ्घैरियं + + + + कृपया त्यक्तमात्सर्य्यलेशैः ।
मया कृतेयं महिमप्रकाशिका
स्तोत्रार्थसन्देहसमूहनाशिका ।
कामान्मनागबुद्धिमनोविलासिनी
भूयात्सदाभ्टद्बुधचित्तवासिनी ॥

पुरा किल काश्यां पुष्पदन्तनाम्ना गन्धर्व्वराजोरजन्यां प्रतिनियतमेव राजोद्याने पुष्पाण्यप हरति उद्यानरक्षिणस्तु प्रातःकुसुमान्यनवाप्य विस्मिताः बभूवुः । — — — — — — — — स्तोतुमारभते स्म महिम्न इत्यादि ।

End. स्तोत्रं पुष्पदन्तेन निर्म्मितमभूदेतन्महेशप्रियं
भक्त्या तत्पदपद्मवन्दनभवत् + + + मुग्धात्मना ।
पादाब्जं परिवन्द्य शङ्करविभोर्गोविन्दरामद्विजो—
टीकां तस्य विनिर्म्ममे द्विविशिखा+ +न्दुमंख्ये शके ॥
यदज्ञानात् प्रमादाद्वा बभूव स्खलितं मम ।
तत् क्षन्तव्यं क्षमासारैरवश्य दूरदर्शिभिः ॥

Colophon. इति गोविन्दरामसिद्धान्तवागीशभट्टाचार्य्यकृता महिमप्रकाशिका महिम्नः-स्तोत्रटीका समाप्ता ॥

विषयः । पुष्पदन्तकृतशिवमहिम्नः स्तोत्रस्य व्याख्यानं ।

———

No. 2207. नलचरितटीका (पूर्व्वभागः)। Substance, country-made yellow paper, 13 × 4 inches. Folia, 125. Lines, 10 on a page. Extent, 4,824 ślokas. Character, Bengali. Date, ? Place of deposit, Úlá, Post Ráṇágháṭa, Zillá Nadiyá, Bábu Annadáprasáda Mukhopádhyáya. Appearance, new. Prose. Incorrect.

Nalacharita-ṭíká. A commentary on the *Naishadha-charita.* By Bhavadatta, son of Devadatta, grandson of Sanayás'arma S'armá, of the Sáṇḍilya gotra.

Beginning. नमामि वाचामधिदेवतां तां
त्रिलोकलोकैकनिकेतनस्थां।
प्रसादमासाद्य यदीयमेव
वागीश्वरस्यापि कवित्वशक्तिः॥
अस्यैव सम्प्रति महाकविभिः प्रणीता
नानार्थबोधमधुरा विवृतिस्त्वनेका।
तेषां तदत्र तुलना न तथा ममैषा
खद्योत + + + + + दयेन्दुकान्तिः॥
वक्तुं सुधीरपि गुरुननुपास्य यस्य
शक्नोति किञ्चिदपि नैव रहस्यमस्य।
काव्येऽत्र + + विवृतौ कविपण्डितस्य
हासाय किं नु + + प्रति बालकस्य॥
तथापि बाल्यात् + + + + मुच्चै-
रेत्य प्रवृत्तोऽस्मि विधातुमेतां।
टीकावबोधाद्विधुरोऽपि काव्ये
बालस्य किं कल्पविधौ विचारः॥

निपीयेत्यादि। स नलोनाम राजा आसीत्। इत्यादि।

End. परमात्मानं लक्षीकृत्य त्यजन्ती सती तत्परिभूय तिष्ठतीत्यर्थः। यतोवाचो-निवर्त्तन्ते अप्राप्य मनसा सह—इति श्रुतेः। एकमेवाद्वितीयं ब्रह्मेत्यादिश्रुतिः। नित्यं विज्ञानं ब्रह्मेत्यादिना च। श्रीहर्षं पूर्व्वार्द्धव्याख्यातमेव। शृङ्गार एव अमृतं, तस्य शीतगुश्चन्द्रः यथा सुधा-श्रयस्तथा शृङ्गाराश्रयोऽसाविति। गोस्त्रियोरुपसर्ज्जनस्येति ह्रस्वत्वं। इह सर्गे देवतावर्णनमुद्दिश्य द्वीपान्तरमुपकीर्त्तनं "योग्य" भूमेः स्वर्गरूपत्वात्कृतं। जम्बूद्वीपे + + वर्णनं यत्कृतं तत्पुर-चतुष्टयस्य विष्णोः शिवस्य च + + + वसतिमत्त्वात् देवभूमित्वमेवेत्यदोषः॥

जातः शाण्डिल्यगोत्रे विमलतरगुणाद्दिवाद्दिकर्णा-
मिश्रोवाचस्पतिस्तत्प्रगुणतनयतां प्रापदप्राप्तदोषः ।
धर्म्मादित्यस्ततोऽभूज्जगति सुविदितोवारचैत्यस्य नाम्ना
मीमांसाबोधवेधाः सम + + + महाकुम्भकद्वारमञ्जः ॥
अजायत जगद्दरोधर + जैत्रतुल्यस्ततो—
दिवाकर इति श्रुतः प्रथितधर्म्मकर्म्मा ततः ।
अभूद्गुणमहानिधिः स नयशर्म्मशर्म्मा सुतः
श्रिया परमया युतोजयति देवदत्तस्ततः ॥
तत्सूनोर्भवदत्त इत्यभिधया ख्यातात्मनः श्रीमतः
टीकायां निषधाधिराजचरिते यस्यामिहैकादशः ।
सर्गः स्वर्गनिकेतकीर्त्तनलसन्नामाभ्यगादुज्ज्वलः
सेयं सारसरस्वती वितनुतां नित्यं प्रमोदं सतां ॥

Colophon. इति श्रीभवदत्तकृतौ नलचरितटीकायामेकादशः सर्गः ।

विषयः । श्रीहर्षकृतनैषधचरितस्य एकादशसर्गान्तं व्याख्यानम् ।

No. 2208. **नन्दिकेश्वरसंहिता, वा शिवधर्म्मोत्तरं, अथवा नन्दिकेश्वर-पुराणम् ।** Substance, foolscap paper, 12 × 3½ inches. Folia, 130. Lines, 7 on a page. Extent, 2,314 ślokas. Character, Bengali. Date, ? Place of deposit, U'lá, Post Ráṇágháṭa, Zillá Nadiyá, Bábu Annadáprasáda Mukhopádhyáya. Appearance, new. Verse. Incorrect.

Nandikeśvara-sañhitá ALIAS **Nandikeśvara-puráṇa** ALIAS **S'ívadharmottara.** The second part of a treatise on the divinity and adoration of S'iva, called S'ivadharma, a S'aiva Tantra, in which S'iva, as Nandikes'vara or the master of Nandi, expounds S'aiva doctrines for the edification of Sanatkumára and his followers.

CONTENTS: I. Praise of S'ivadharma. Virtues of S'ivá's liñgam. Liñgams of crystal and other materials appropriate for Indra and other gods. Sin of not worshipping S'iva. Merit of worshipping liñgams.

II—V. Duties of worshippers of S'iva. Merit of erecting temples for S'iva. Sweeping, cleaning, and besmearing cowdung in S'iva's temples. Bathing of liñgams. Offerings of aromatics and edibles to ditto. Appropriate flowers for ditto. Characteristics of Bel leaves. Rules for songs and music before liñgams.

VI—VIII. Hymn to S'iva (Rudragítá)—S'ánti or benedictions. Worship of S'iva on particular lunations and months. All sacred pools reside in lingams. Merit of singing and music before lingams. Praise of cows. The divinities that reside in the different parts of a cow, &c.

IX—XI. The means of obtaining S'aiva emancipation. Special worship of lingams. Vow of worshipping S'iva for twelve months together. The fast of Kailása. Rules for gifts of cows. Duties of S'aivas common to all castes and all conditions of men. Rules for putting on the person Rudráksha seeds, ashes, matted hair, &c. Praise of abstinence from slaughter. Praise of truthfulness.

XII—XIV. Faith in S'iva defined. Yoga in reference to S'iva. Rules for gifts. Knowledge defined. Gokarṇa, Bhadrakarṇa and other principal seats of S'iva, (in all eight). Eight kinds of leaves appropriate in the worship of S'iva. Eight secrets of worship. Characteristics of the religion of S'iva. Characteristics of heaven and hell. Jnána Yoga necessary for salvation. Sin defined. Uninterrupted painfulness or pessimism of the world.

XV—XVII. Particular diseases proceeding from particular sins. Description of the human body. Characteristics of ghosts. Punishments in hell. Knowledge concerning S'iva. Mantras of S'iva. Merit of teaching.

XVIII—XXI. Sacrifice by works. Do. by meditation. Do. by knowledge. Merit of gifts to devotees of S'iva. Rules of expiations for followers of S'aiva religion. Merits of Goloka and other heavens. Prevalence of air in animated beings.

Beginning. सर्व्वाकारमशेषस्य जगतः सर्व्वदा शिवं।
गोब्राह्मणनृपाणाञ्च शिवं भवतु सर्व्वदा॥
शिवमादौ शिवं मध्ये शिवमन्ते च सर्व्वदा।
सर्व्वेषां शिवभक्तानां मनुजानाञ्च तच्छिवं॥
मेरुपृष्ठे सुखासीनं शिवभक्तिपरायणाः।
नन्दिकेश्वरमागत्य दृष्ट्वा सर्व्वे समुत्थिताः॥
नत्वा स्तुत्वा महादेवं मुनिर्ब्रह्मसुतोत्तमः।
सनत्कुमारः सुतपाः पृच्छति स्म यथाविधि॥
भगवन् सर्व्वधर्म्माणां शिवधर्म्मं सनातनं॥

श्रोतुं हि ऋषयः सर्व्वे परं धर्म्मं समागताः । इत्यादि ।

End. वायुना पूरितोगच्छेन्नरस्तत्र यथेच्छति ।
यमलोकं समुद्रांश्च सप्तद्वीपां वसुन्धरां ॥
यथेष्टं भ्रमते देवि मनस्तद्वायुना सह ।
तन्मयं सर्व्वमाख्यातं किं भूयः परिपृच्छसि ॥

Colophon. इति नन्दिकेश्वरसंहितायां शिवधर्म्मोत्तरे एकविंशतितमोऽध्यायः ।

विषयः । १—२ये, अध्याये,—नन्दिकेश्वरस्य सनत्कुमारेण सह संवादेन शिवधर्म्ममाहात्म्य कीर्त्तनं । शिवलिङ्गमाहात्म्यकीर्त्तनं । इन्द्रोपेन्द्रादिदेवभेदेन स्फटिकादिलिङ्गपूजापरत्वकथनं । शिवपूजाया अकरणे प्रत्यवायनिरूपणं । चराचरभेदात् द्विविधलिङ्गकथनं । लिङ्गपूजामाहात्म्य-कथनञ्च ।

३—५मे अध्याये,—शिवभक्तानां नियमादिकथनं । शिवालयनिर्म्माणफलकथनं । शिवाल-यलेपनमाहात्म्यकथनमुखेन गोमयादिग्रहणविधिकथनं । लिङ्गस्नपनविधिकथनं । घृतेक्षुरसादि-द्रव्यैः स्नपने प्रत्येकं फलविशेषकथनं । महास्नानविधिकथनं । गन्धनैवेद्यादिनिरूपणञ्च । पुष्प-विवेचनं । विल्वपत्रलक्षणादिकथनं । सङ्गीतादिकरणविधिः ।

६—८मे अध्याये,—रुद्रगीतकथनं । शान्त्यध्यायकथनं । तिथिनक्षत्रमासविशेषे शिवपूजामा-हात्म्यकथनं । शिवलिङ्गे समस्ततीर्थावस्थानकथनं । शिवलिङ्गसमीपे नृत्यगीतादिमाहात्म्यकथनं । गोमाहात्म्यकथनं । गोरङ्गविशेषे तीर्थविशेषस्थितिकथनं । गोसावित्रीकथनं ।

९—११शे अध्याये,—शैवगतिप्राप्त्युपायकीर्त्तनं । शिवलिङ्गमहाव्रतकथनं । द्वादशमासीय-शिवव्रतकथनं । कैलासव्रतकथनं । गोप्रदानविधिकथनं । सर्व्ववर्णसर्व्वाश्रमसाधारणशैवाचारक-थनं । तत्र रुद्राक्षभस्मजटादिधारणविधिकथनं । अहिंसामाहात्म्यकीर्त्तनं । सत्यप्रशंसादिकथनं ।

१२—१४शे अध्याये,—शिवभक्तिनिरूपणं । शैवयोगमाहात्म्यकथनं । दानविधिकथनं । ज्ञाननिरूपणं । गोकर्णभद्रकर्णाद्यष्टशैवस्थाननिरूपणं । पवित्राष्टककथनं । गुह्याष्टककथनं । शिव-धर्म्मलक्षणादिकथनं । स्वर्गनरकलक्षणादिकथनं । मोक्षाय ज्ञानयोगकथनं । पापभेदनिरूपणं । संसारस्य दुःखमयत्ववर्णनं ।

१५—१७ अध्याये,—येन येन पापेन यद्यद्रूपोरोगोजायते तन्निरूपणं । (कर्म्मविपाक-कथनं ।) नरदेहनिरूपणं । प्रेत्यभावनिरूपणं । नरकयन्त्रणाकथनं । शिवज्ञानकथनं । शिवमन्त्र-कथनं । विद्यादानफलकीर्त्तनं ।

१८—२१ अध्याये,—कर्म्मयज्ञकथनं । ध्यानयज्ञकथनं । ज्ञानयज्ञकथनं । शिवभक्ताय दा-नमाहात्म्यकथनं । शैवप्रायश्चित्तविधिकथनं । गोलोकमाहात्म्यादिकथनं । त्रैधातुकदेहस्य वाय-प्राधान्यकथनञ्च ।

No. 2209. न्यायरत्नावली। Substance, aguru bark, 19 × 3 inches. Folia, 106. Lines, 8 on a page. Extent, 4,725 ślokas. Character, Bengali. Date, ? Place of deposit, Ulá, Post Ránágháṭa, Zillá Nadiyá, Bábu Annadáprasáda Mukhopádhyáya. Appearance, fresh. Prose. Correct.

Nyáyaratnávalí. A commentary on the *Siddhántavindu*, of Madhusúdana Sarasvatí, prefaced by a dissertation on the fallacies of the Chárváka, Bauddha, Jain, Sáṅkhya, Nyáya, Vais'eshika and other doctrines, observed from a Vedánta standpoint. By Brahmánanda Sarasvatí. Hall's Contributions, p. 109.

Beginning. नमोनवघनश्यामकामकामितदेहिने।
कमलाकामसौदामकण्ठकामुकगेहिने॥
अद्वैतसिद्धेष्टीकायास्तदीययोश्च संग्रहात्।
विचित्ररचना काचिद् ब्रह्मानन्देन रच्यते॥
शङ्करोक्तिमहाम्भोधेर्गुरूणामुपदेशतः।
उद्धृतां प्रकटीकुर्व्वे न्यायरत्नावलीमिह॥

तत्राद्वितीयस्वप्रकाशनिरतिशयानन्दरूपयोर्जीवब्रह्मस्वरूपयोरैक्यमुत्तानन्दरूपं तदहं ब्रह्मास्मीत्यादिवेदान्तमहावाक्यं द्वितीयविषयकप्रत्यक्षादिसर्व्वप्रमाणबाधकमतोनात्मभूतं सर्व्वं मिथ्येत्याद्यर्थविवेचनवचनरोचमानं श्रीमद्बादरायणशङ्करसुरेश्वराचार्य्यवर्य्यकृतमर्य्यादं वेदान्तदर्शन दर्शनेषु सर्व्वेषु दर्शनीयतमं दर्शनीयं—————————प्रकरणं कर्त्तव्यतया प्रतिजानीते,—श्रीशङ्करेत्यादि। श्रीशङ्करस्वामी नवावतारस्येति कर्म्मधारयः। इत्यादि।

End. लब्धतिस्तस्योरद्धःप्रापकोनिबन्धोग्रन्थः। अत्र ग्रन्थे सौष्ठवं गुणवत्त्वं बलभद्रस्य स्वसेवकब्रह्मचारिणः।

श्रीनारायणतीर्थानां गुरूणाञ्चरणाम्बुजं।
नमामि वाङ्मनःकायैरनन्यशरणैः सदा॥
भजे श्रीपरमानन्दसरस्वत्याः पदाम्बुजं।
यदेवालम्ब्य संसारसागरोगोष्पदीकृतः॥

Colophon. इति श्रीब्रह्मानन्दसरस्वतीविरचिता सिद्धान्तविन्दुटीका न्यायरत्नावली समाप्ता। शुभमस्तु।

विषयः। मधुसूदनसरस्वतीकृतसिद्धान्तविन्दुनामकवेदान्तप्रकरणस्य चार्व्वाक-बौद्ध-जैन-सांख्य-न्याय-वैशेषिकादिमतखण्डनपुरःसरं व्याख्यानं।

No. 2210 मुग्धबोधपरिशिष्टम् । Substance, country-made yellow paper, 16 × 3 inches. Folia, 22. Lines, 6 on a page. Extent, 511 ślokas. Character, Bengali. Date, ? Place of deposit, U'lá, Post Ráṇágháṭa, Zillá Nadiyá, Bábu Annadáprasáda Mukhopádhyáya. Appearance, fresh. Prose. Correct.

Mugdhabodha-pariśishṭa. An appendix to Vopadeva's Sanskrit grammar named 'Mugdhabodha.' By Nandakis ora Bhaṭṭáchárya Chakravartí.

Beginning. अथ कारकं विवृणुमः । तत्र क्रियानिमित्तं कारकमिति वत्तवः । तत्र निमित्तपदस्य कारणार्थत्वे विप्राय भूमिं ददाति इत्यत्र सम्प्रदाने अव्याप्तिः । तस्य त्यागविशेषात्मकदानक्रियायाः कारणत्वाभावात् । अनन्यथासिद्धिनियतपूर्ववर्त्तिन एव कारणपदार्थत्वात् प्रयोजकार्थकत्वे तु देवदत्तस्य तण्डुलं पचतीत्यत्र सम्बन्धिन्यतिव्याप्तिः ।

End. इमनन्तः पिमः पुंलिङ्गः स्याद्वा । प्रेमा प्रेम । स्वार्थे प्रत्ययान्तानां क्वचित् लिङ्गान्तरमभिधानात् । यथा त्रिलोकी एव त्रैलोक्यं मुक्ता एव मौक्तिकं ।

Colophon. इति नन्दकिशोरभट्टाचार्य्यचक्रवर्त्तिकृते मुग्धबोधपरिशिष्टे तद्धितप्रकरणं समाप्तं ।

विषयः । मुग्धबोधव्याकरणस्य कारकप्रकरणादारभ्य तद्धितप्रकरणपर्य्यन्तं यावत् वक्तव्यव्याकरणप्रक्रियाकथनं । कारकसमासादीनां लक्षणादिविवेचनं । शक्त्यादिनिरूपणञ्च ।

No. 2211. आर्य्यासप्तशती । Substance, country-made yellow paper, 17 × 4 inches. Folia, 45. Lines, 6 on a page. Extent, 1,012 ślokas. Character, Bengali. Date, ? Place of deposit, Ulá, Post Ráṇágháṭa, Zillá Nadiyá, Bábu Annadáprasáda Mukhopádhyáya; another copy at S'ántipura, Paṇḍit Kálidása Vidyávágís'a. Appearance, fresh. Verse. Incorrect.

A'ryá-saptaśatí. Seven hundred stanzas in the A'ryá mitre on various subjects, chiefly erotic. By Govardhana A'chárya.

Beginning. पाणिग्रहे पुलकितं पुरैशं भूतिभूषितं जयति ।
अङ्कुरित इव मनोभूर्यस्मिन् भस्मावशेषोऽपि ॥
मामव संवृणु विषमिदमिति सातङ्कं पितामहेनोक्तः ।
प्रातर्ज्जयति सलज्जः कज्जलमलिनाधरः शम्भुः ॥ इत्यादि ।

End. उदारनबलभद्राभ्यां सप्तशती शिष्यसोदराभ्यां नः ।
द्यौरिव रविचन्द्राभ्यां प्रकाशिता निर्म्मलीकृत्य ॥

विरचन् वामनशीलां वामन इव कविपदं लिप्सुः ।
अक्रतार्य्यासप्तशतीमेतां गोवर्द्धनाचार्य्यः ॥

Colophon. इति श्रीगोवर्द्धनाचार्य्यविरचितार्य्यासप्तशती समाप्ता ।

विषयः । शृङ्गाररसविषयकवर्णनं ।

No. 2212. शारीरकन्यायनिर्णयः । Substance, country-made paper, 15 × 3½, inches. Folia, 182. Lines, 18 on a page. Extent, 17.308 ślokas. Character; Bengali. Date, ? Place of deposit, S'ántipura, Paṇḍit Kálidása Vidyávágís'a. Appearance, decayed. Prose. Correct.

S'árírakanyáya-nirṇaya. A gloss on S'aṅkara's commentary on the Vedánta Sútra. By A'nandajnána, disciple of S'uddhánanda. Hall's Contributions, p. 89.

Beginning. अथस्तान्यमपूर्व्वमर्थधिषणैर्ग्राह्यं पुमर्थास्पदं
लक्ष्यं लक्षणभेदतः श्रुतिगतं निर्ड्रूतमाध्यार्थकं ।
आम्नायान्तविभातविश्वविभवं सर्व्वाविरुद्धं परं
मुक्यज्ञानमनर्थसार्थविधुरं ब्रह्म प्रपद्ये सदा ॥
योलोकं सकलं पुनाति निगमा यं प्राङ्गरेकान्ततो-
व्याप्तं येन जगज्जगन्ति सततं यस्मै नमस्कुर्व्वते ॥
यस्मादाविरभूदशेषममरा यस्य प्रसादार्थिनो-
यस्मिन् पर्य्यवसास्यति स्फुरदिदं तस्मै नमोविष्णवे ।
— — — — — — — — — — — ।
मङ्गाथाःम्बुजजातजातमधुरप्रेमेमधुप्रार्थना-
स्वार्थव्यग्रधियः समस्तमवतः सर्गेऽपि निर्व्विद्निः ।
यस्मिन् मुक्तिपथोमुमुक्षुमुनिभिः संप्रार्थितः संवभो
तस्मै भाष्यकृते नमोऽस्तु भगवत्पादाभिधां बिभ्रते ।
यत्पादाम्बुजचञ्चरीकधिषणानिर्व्वाणमार्गाधिगा
पंक्तिर्मुक्तनिसर्गदुर्गदुरिता वाचंयमानामियं ।
तस्मिन् नित्यमिदं प्रसादि समभूद्बोधाङ्कुरोमे यतः
शुद्धानन्दमुनीश्वराय गुरवे तस्मै परस्मै नमः ॥
मातर्नतोऽस्मि भवतीमथवार्थये त्वां
चेतः सरस्वति परास्यपराङ्मुखमर्थं ।

शारीरके महदनुग्रहसंप्रसन्न-
मेकाग्रमस्तु वचसा सह सम्यगर्थे ॥
श्रद्धाभक्ती पुरोधाय विद्यायागमभावनां ।
श्रीमच्छारीरके भाष्ये करिष्ये न्यायनिर्णयं ॥

नित्याध्ययनविध्युपादापितवेदान्तवचोभिरापाततः प्रतिपन्नं शास्त्रारम्भौपयिकं अनुबन्धजातं न्यायतोनिर्णेतुं भगवद्बादरायणः सूचितवान्,—अथातोब्रह्मजिज्ञासेति ।

End. सूत्राभ्यासस्य प्रयोजनमाह,—अनावृत्तिः शब्दादिति । अध्यायपरिसमाप्तिरेव परि- + + र्थः + + इष्टः प्रकृते सूत्रस्यैव अभ्यासाचतुर्लक्षणस्य वेदान्तमीमांसाशास्त्रस्य समन्वया-विरोधसाधनफलानां साकल्येन उक्तत्वाद्वक्तव्यानवशेषात् परिसमापनसूचितमिति भावः ।

व्याख्यानं व्याततर्के + + च + यत्र + + + तर्कशङ्का
+ + + + + + + प्रसृत परमतोवस्तुतत्त्वं श्रयन्ती ।
शुद्धानन्दाङ्घ्रिपद्मस्मृतिभरनिभृतप्रौढगाढोक्तिगूढा—
नन्दज्ञानप्रणीता जगति मुदमियं मद्धियां संविधत्तां ॥
सन्त्येव बहुलानीह व्याख्यानानि महाधियां ।
व्याख्या तथापि सौख्येन + + + + समाहृता ॥

Colophon. इति श्रीमत्परमहंसपरिव्राजकाचार्य्यश्रीशुद्धानन्दपूज्यपादशिष्यभगवदान-न्दज्ञानकृते श्रीमच्छारीरकभाष्यविभागे न्यायनिर्णये चतुर्थाध्यायस्य चतुर्थपादः । समाप्तोऽयं शारीरकन्यायनिर्णयः ।

विषयः । ब्रह्मसूत्रीयशाङ्करभाष्यस्य व्याख्यानम् ।

No. 2213. **योगिनीतन्त्रं, (द्वितीयभागः ।)** Substance, country-made yellow paper, 14 × 6 inches. Folia, 108. Lines, 10 on a page. Extent, 3,510 ślokas. Character, Bengali. Date, ? Place of deposit, U'lá, Post Ráṇágháṭa, Zillá Nadiyá, Bábu Annadáprasáda Mukhopádhyáya. Appearance, new. Prose. Correct.

Yoginí Tantra. An original Tantra of the S'ákta class. The codex contains only the second half of the work, and even that is obviously not complete.

Contents, I. Praise of the Tantra. Forms of Kálí. Characteristics of Gurus. Kálí identified with the Supreme Divinity. Merit of accepting her mantra.

II. Identification of Kálí, Tará, and Vidyá. Rosaries. Resolution

to adopt S'ákta Mantras. Initiation. Worship. Expiation for not worshiping S'akti at stated periods.

III—V. Amulets for curing diseases. Amulets for effecting subjugation &c. Diagrams for insuring success in worldly affairs. The six principal rituals. Bedsteads. Courtyards. A Rite with the root of a Bel tree. Shaving of the hair of the head.

VI—IX. Characteristics of Dívya and Bira conditions. Svapnávatí Vidyá, defined. Science of restoring the dead to life. Science of attracting whatever one lists. Origin of Yoginís. Story of Ghora, a demon.

Beginning. कैलास शिखरारूढं शङ्करं परमेश्वरं।
पप्रच्छ गिरिजाकान्तं गौरी तं वृषभध्वजं॥
श्रीदेव्युवाच।
भगवन् सर्व्वधर्म्मज्ञ सर्व्वज्ञानमय प्रभो।
सूचितं योगिनीतन्त्रं तन्मे वद जगद्गुरो॥
माहात्म्यं कीर्त्तितं तस्य पुरा श्रीशैलमन्दिरे। इत्यादि।

End. व्रतं परे तु कर्त्तव्यं प्रतिष्ठां पुरतश्चरेत्।
नित्यव्रते महेशानि द्वितीयव्रतमाचरेत्॥
इति जानीहि देवेशि व्रतमेतत् व्रतं परं।

Colophon. इति योगिनीतन्त्रे सर्व्वतन्त्रोत्तमोत्तमे द्वितीयभागे नवमः पटलः।

विषयः। १प्रथमे पटले,—योगिनीतन्त्रमाहात्म्यादिकथनं। कालीरूपवर्णनादिकं। गुरुमाहात्म्यतल्लक्षणादिकथनं। कालिकैव महाविद्येति निरूपणं। तन्मन्त्रग्रहणफलादिकथनं।

२ये पटले,—कालिकातारविद्ययोरभेदकथनं। मालाविधानकीर्त्तनं। संकल्पविधिः। दीक्षाविधिकथनं। पूजाजपकालादिनिरूपणं। यथाकाले सन्ध्याया अकरणे दशधागायत्रीजपरूप प्रायश्चित्तविधानञ्च।

३य—५मे, पटले,—ज्वरादिनाशनकवचादिकथनं। वशीकरणादिसाधनकवचकथनं। राज्य-सुत-धन-ज्ञानलाभसाधनादियन्त्रकथनं। षट्कर्म्मादिसाधनकथनं। अथ शय्यासाधनविधिः। चिवाटचतुर्व्वाटसाधनविधिः। विल्वमूलसाधनविधिः। मुण्डसाधनविधिकथनञ्च।

६ष्ठ—९मे पटले,—दिव्यवीरभावादिनिरूपणं। स्वप्नावतीविद्यानिरूपणं। मृतसञ्जीवनीविद्याकथनं। सर्व्वाकर्षणीविद्यादिकथनं। योगिन्युत्पत्तिविवरणकथनं। तत्र घोरनामकदैत्योपाख्यानकथनञ्च।

No. 2214 भगवतीपद्यपुष्पाञ्जलिः । Substance, country-made paper, 12 × 4 inches. Folia, 5. Lines, 8 on a page. Extent, 82 ślokas. Character, Nágara. Date, ? Place of deposit, Ulá, Post Ráṇágháṭa, Zillá Nadiyá, Bábu Annadáprasáda Mukhopádhyáya. Appearance, fresh. Verse. Incorrect.

Bhagavatí-padya-pushpáñjalí. A hymn in praise of the Deví and her attributes. By Rámakṛishṇa, son of Bhadra Suri Tripáṭhi, of Karavaiṇjunapuram.

Beginning. भगवतीभगवत्पदपङ्कजं
भ्रमरभूतसुरासुरसेवितं ।
सुजनमानसहंसपरिष्कृतं
कमलया मलया निभृतं भजे ॥
तावुभावपि वन्देहं विघ्नेशगुरुदेवते ।
नरनारायणोऽस्त्वेको नरसिंहोन मेऽपरः ॥ (?)
हरिहरगुरुपद्मे हृद्यपद्मेऽनुरागा-
दधिगतपरभागामन्निधावादरेण ।
तानुचरि करोमि प्रीतये भक्तिभाजां(?)
भगवति पदपद्मे पद्यपुष्पाञ्जलिं ते ॥ इत्यादि ।

End. रमयति किलकर्ष + व चित्तं नराणां
+ परजवर + मद्रामकृष्णः कवीनां ।
चकृत सुकृतगर्भं रम्यपद्यैकहर्म्यं
खवनभुवनहेतुः प्रीतये विश्वमातुः ॥

Colophon. इति श्रीमद्भगवतीपादारविन्दमकरन्दमान्द्यसमुद्रा + ल + + + कर-मैञ्जनपुरवासिभद्रसूरित्रिपाठितनुजरामकृष्णकविना विरचितभगवतीपद्यपुष्पाञ्जलिः सम्पूर्णः ।
विषयः । स्तोत्रव्याजेन देव्या रूपगुणमाहात्म्यादिकीर्त्तनं ।

No. 2215. नामावलिस्तोत्रम । Substance, country-made paper, 12 × 9 inches. Folia, 2. Lines, 7 on a page. Extent, 14 ślokas. Character, Nágara. Date, ? Place of deposit, Ulá, Post Ráṇágháṭa, Zillá Nadiyá, Bábu Annadáprasáda Mukhopádhyáya. Appearance, fresh. Verse. Incorrect.

Námávali-stotra. A hymn in which a great number of epithets, used as names of Siva, are strung together. By Sankara Achárya.

Beginning हे चन्द्रचूड़ मदनान्तक शूलपाणे
स्थाणो गिरीश गिरिजेश महेश शम्भो ।
भूतेश + + भयसूदन मामनाथं
संसारदुःखगहनाज्जगदीश रक्ष ॥
हे पार्व्वतीहृदयवल्लभ चन्द्रमौल
भूताधिप स्मरहर त्रिदशाधिनाथ ।
हे वामदेव भव रुद्र पिनाकपाणे
संसारदुःखगहनाज्जगदीश रक्ष ॥ इत्यादि ।

End. गौरीविलासभवनायमहेश्वराय
पञ्चाननाय शरणागतक + द्राय ।
सर्व्वाय सर्व्वजगतामधिपाय तस्मै
दारिद्र्यदुःखशमनाय नमः शिवाय ॥

Colophon इति श्रीशङ्कराचार्य्यविरचितं नामावलीस्तोत्रं समाप्तं ॥

विषयः । स्तोत्रव्याजेन शिवनामावल्लिकथनं ।

No. 2216. लघुसप्तशतीस्तोत्रम् । Substance, country-made paper, 13 × 4 inches. Folium, 1. Lines, 18. Extent, 35 ślokas. Character, Nágara. Date, Sm. 1772. Place of deposit, S'ántipura, Paṇḍit Kálidása Vidyávágís'a. Appearance, fresh. Verse. Correct.

Laghusaptaśatí-stotra. A hymn in praise of the Deví as described in the well-known Chaṇḍí section of the Márkaṇḍeya Puráṇa. By Prithvídhara A'chárya.

ॐ नमश्चण्डिकायै ।

Beginning. यत्कर्म्म धर्म्मनिलयं कलयन्ति तज्ज्ञा
यज्ञादिकं तदखिलं सफलं त्वयैव ।
त्वं चेतना यत इति प्रविचार्य्य चित्ते
नित्ये त्वदीयचरणौ शरणं प्रपद्ये ॥
पाथोधिनाथतनयापतिरेष शेष-
पर्य्यङ्कलालितवपुः पुरुषः पुराणः ।
त्वन्मोहपाशविवशोजगदम्ब सोऽपि
व्याघूर्णमाननयनः शयनं चकार ॥ इत्यादि ।

End. श्रीसिद्धापरनामधेयः
श्रीशम्भुनाथो भुवनैकनाथः ।
तस्य प्रसादात्तुलभागमश्रीः
पृथ्वीधरः स्तोत्रमिदं चकार ॥

Colophon. इति श्रीपृथ्वीधराचार्य्यविरचितं लघुनप्रशतीस्तोत्रं सम्पूर्णं । संवत् १७७२ वैशाख १४ लिखितमिदं भट्टवैजनाथसुतेन विष्णुदेवेन ॥

विषयः । स्तोत्रव्याजेन देव्यामाहात्म्यादिकीर्त्तनं ।

No. 2217. शिवपञ्चाशिका वा आत्मार्पणस्तुतिः । Substance, country-made paper, 13 × 4 inches. Folia, 6. Lines, 10 on a page. Extent, 135 ślokas. Character, Nágara. Date, ? Place of deposit, S'ántipura, Paṇḍit Kálidásá Vidyávágís'a. Appearance, fresh. Verse. Correct.

S'ivapaṇcháśiká ALIAS **A'tmárpaṇastuti.** A hymn in praise of S'iva. In course of the hymn the author dedicates himself to the divinity. By Apyayí Díkshita.

Beginning. कस्ते बोद्धुं प्रभवति परं देवदेव प्रभावं
यस्मादित्थं विविधरचना सृष्टिरेषा बभूव ।
भक्तिग्राह्यस्त्वमिति तदपि त्वामहं भक्तिभावात्
स्तोतुं वाञ्छाम्यतिमहदिदं साहसं मे सहस्व ॥
क्षित्यादीनामवयववतां निश्चितं जन्म ताव-
न्नास्त्येवं तत् क्वचन कलितं कर्त्रधिष्ठानहीनं ।
नाधिष्ठातुं प्रभवति जडो नाप्यनीशस्वभाव-
स्तस्मादाद्यस्त्वमसि जगतां नाथ जाने विधाता ॥ इत्यादि ।

End. आत्मार्पणस्तुतिरियं भगवन्निबद्धा
यद्यप्यनन्यमनसा न मया तथा ते ।
वाचापि केवलमयं शरणं वृणीते
दीनो वराक इति रक्ष कृपानिधे मां ॥

Colophon. इति श्रीशिवपञ्चाशिकाप्पयदीक्षितकृतात्मार्पणस्तुतिः समाप्ता

विषयः । स्तोत्रव्याजेन शिवमाहात्म्यादिकीर्त्तनं ।

No. 2218. स्मृतिप्रदीपः । Substance, country-made paper, 18 × 4 inches. Folia, 121. Lines, 6 on a page. Extent, 3,060 ślokas. Character Bengali. Date, ? Place of deposit, Ulá, Post Ráṇágháṭa, Zillá Nadiyá, Dínanátha Bhaṭṭácháryáya. Appearance, decayed. Prose and verse. Correct.

S'mṛitipradípa. A digest of a number of Smṛiti rules. By Chandras'ekhara Mahámahopádhyáya.

Beginning. नमामि देवमीशानं सर्व्वस्य जगतः पतिं ।
प्रभुं भूतभविष्यस्य साम्प्रतस्य च सत्पतिं ॥
गोविन्दचरणद्वन्द्वं प्रणम्य द्वन्द्वनाशनं ।
प्रदीपं स्मृतिशास्त्रेषु कुरुते चन्द्रशेखरः ॥
तत्रादौ तिथिस्वरूपमाह स्कन्दपुराणं ।
अमाषोड़शभागेन देवि प्रोक्ता महाकला ।
संस्थिता परमा माया देहिनां देहधारिणी ॥ इत्यादि ।

End गुरुशिष्ययोरन्तरागमनेऽपि प्रोक्तवचनाद्होरात्रमनध्यायः । इति ।

Colophon. इति महोपाध्यायश्रीचन्द्रशेखरशर्म्मविरचिते स्मृतिप्रदीप अनध्यायविवेचनं । समाप्तोऽयं ग्रन्थः ।

विषयः । तत्रादौ तिथिस्वरूपादिकथनं । मासादिलक्षणतद्भेदनिरूपणं । युग्मादितिथिव्यवस्थाकथनं । प्रतिपदादितिथिव्यवस्थाकथनं । तत्र तत्र विहितकृत्यनिरूपणञ्च । अम्बुवाची । नवान्नव्यवस्था । मन्वन्तरानिरूपणं । युगाद्याकथनं । एकादश्याद्युपवासविधिः । संक्रान्तिनिरूपणं । ग्रहणनिरूपणं । सहमरणविधिकथनं । अनुमरणादिविधिः । अशौचनिरूपणं । श्राद्धाधिकारिनिरूपणं । अशौचान्तदिनकृत्यनिरूपणं । वृषोत्सर्गादिविधिः । षोड़शश्राद्धनिरूपणं । पर्णनरदाहविधिकथनं । पार्व्वणश्राद्धतीर्थश्राद्धादिकालनिरूपणं । अष्टकाश्राद्धकालादिकथनं । विवाहनिरूपणं । सापिण्ड्यादिनिरूपणं । कन्यादिलक्षणकथनं । कन्यादानिरूपणं । गर्भाधानादिसंस्कारनिरूपणं । सूतिकाषष्ठीपूजाविधिकथनं । बालरक्षाविधिकथनं । विद्यारम्भादिकालनिरूपणमुखेन अनध्यायकालनिरूपणञ्च ।

No. 2219. श्रुतिकल्पद्रुमः । Substance, country-made paper, 16 × 4½ inches. Folia, 88. Lines, 6 on a page. Extent, 1,747 ślokas. Character, Bengali. Date, ? Place of deposit, Ulá, Post Ráṇágháṭa, Zillá Nadiyá, Dínanátha Bhaṭṭácháryáya. Appearance, decayed. Prose. Correct.

S'ráti-kalpadruma. Principles of the Bhakti doctrine and refutation of the adual Vedánta theory and unreality of matter. The object of Bhakti is Krishṇa, whose divinity is vindicated. By Haridása, a Vaishṇava hermit.

Beginning. वन्दे मुकुन्दस्य पदारविन्दं वृन्दारवृन्दैरपि यन्न लभ्यं ।
सद्भक्तहृत्पद्मपरागरम्यं भक्त्यैकगम्यं रमयाधिगम्यं ॥
श्रुतिकल्पद्रुमोनाम ग्रन्थोयं हरिभक्तिदः ।
भक्ताएव प्रपश्यन्तु मा पश्यन्तु वहिर्मुखाः ॥

